अलं

प्रतापरुद्रीयम्

२

विद्यानाथ

5855

1087

SAS

BHARTIYA VIDYA BHAVAN LIBRARY
Received ....
Date ....
Acc. No. 504.

5855

SRI BALAMANORAMA SERIES No. 3

PRATAPARUDRIYA

of

VIDYANATHA

with

Ratnapana

of

KUMARASWAMIN

son of

MALLINATHA

EDITED AND PUBLISHED

BY

S. CHANDRASEKHARA SASTRIGAL,

Triplicane, Madras.

SAHA
VID

PRINTED AT THE SRI BALAMANORAMA PRESS,

Triplicane, Madras.

Price Rs. 1-8-0.] **1914** [*Postage Extra.*

Bhawan's Sri Sankaracharya Sanskrit ... Bharatiya Vidya Bhavan ... Vidyalaya
605

Registered according to Act XXV of 1867.
ALL RIGHTS RESERVED BY THE PUBLISHER.

Bhawan's Sri Sankaracharya Sanskrit Mahavidyalaya
605

॥ प्रतापरुद्रीयस्य विषयानुक्रमणिका ॥

विषयः — पार्श्वम्

नायकप्रकरणे—

नायकगुणाः ... ८
नायकस्वरूपम् ... १३
उदात्तादिनायकविशेषाः ... १५
शृङ्गारनायकाः ... १८
शृङ्गारनायिकाः ... २१

काव्यप्रकरणे—

काव्यस्वरूपम् ... ३१
कैशिक्यादिवृत्तयः ... ४३
रीतयः ... ४६
शय्या द्राक्षादिपाकाश्च ... ४९
काव्यविशेषाः ... ५१
ध्वनिविशेषाः ... ५३
महाकाव्यादिप्रबन्धाः ... ६९
क्षुद्रप्रबन्धाः ... ७०

नाटकप्रकरणे—

नाट्यस्वरूपम् ... ७२
दश रूपकाणि ... ७३
रूपकसामग्री ... ७४
नाटकोदाहरणप्रारम्भः ... ९३
प्रथमोऽङ्कः ... १०५
द्वितीयोऽङ्कः ... १११
तृतीयोऽङ्कः ... १२३
चतुर्थोऽङ्कः ... १३५
पञ्चमोऽङ्कः ... १४१

रसप्रकरणे—

रसस्वरूपम् ... १५५
रत्यादिस्थायिभावाः ... १६३
सात्त्विकभावाः ... १७१
व्यभिचारिभावाः ... १७३
शृङ्गारचेष्टाः ... १८७
मन्मथावस्थाः ... १९४
रसविशेषाः ... १९९

दोषप्रकरणे—

पददोषाः ... २१३
वाक्यदोषाः ... २१७
अर्थदोषाः ... २२६

गुणप्रकरणे

गुणनिरूपणम् ... २३३

शब्दालंकारप्रकरणे

अलंकारस्वरूपनिरूपणम् ... २४४
अलंकारविभागः ... २४५
छेकानुप्रासः ... २४७
वृत्त्यनुप्रासो यमकं च ... २४८
पुनरुक्तवदाभासः ... २४९
लाटानुप्रासः ... २५०
चित्रालंकार ... २५१

अर्थालंकारप्रकरणे—

उपमा ... २५४
अनन्वयः, उपमेयोपमा च ... २६७
स्मरणं, रूपकं च ... २६८
परिणामः ... २७३
संदेहः ... २७४
भ्रान्तिमान् ... २७५
अपह्नुतिः ... २७६
उल्लेखः ... २७७

विषयः	पार्श्वम्	विषयः	पार्श्वम्
उत्प्रेक्षा	... २७८	आक्षेपः	... ३१७
अतिशयोक्तिः	... २८७	व्याजस्तुतिः, अप्रस्तुतप्रशंसा च	३१९
सहोक्तिः	... २८९	पर्यायोक्तम्	... ३२१
विनोक्तिः	... २९०	प्रतीपं, अनुमानं च	... ३२२
समासोक्तिः	... २९१	काव्यलिङ्गम्	... ३२३
वक्रोक्तिः	... २९६	अर्थान्तरन्यासः	... ३२४
स्वभावोक्तिः, व्याजोक्तिश्च	... २९७	यथासंख्यं, अर्थापत्तिश्च	... ३२५
मीलनम्	... २९८	परिसंख्या	... ३२६
सामान्यम्, तद्गुणश्च	... २९९	उत्तरम्	... ३२७
अतद्गुणः, विरोधश्च	... ३००	विकल्पः	... ३२८
विशेषः	... ३०३	समुच्चयः	... ३२९
अधिकः	... ३०४	समाधिः, भाविकं च	... ३३१
विभावना,विशेषोक्तिरसंगतिश्च	३०५	प्रत्यनकिम्	... ३३३
विचित्रम्, अन्योन्यं च	... ३०६	व्याघातः, पर्यायश्च	... ३३४
विषमम्	... ३०७	सूक्ष्मः	... ३३५
समं, तुल्ययोगिता च	... ३०८	उदात्तः	... ३३६
दीपकम्	... ३०९	परिवृत्तिः	... ३३७
प्रतिवस्तूपमा	... ३१०	कारणमाला, एकावली, माला-	
दृष्टान्तः	... ३११	दीपकं च	... ३३८
निदर्शना	... ३१२	सारः	... ३३९
व्यतिरेकः	... ३१३	**मिश्रालंकारप्रकरणे—**	
श्लेषः	... ३१४	संसृष्टिः	... ३४०
परिकरः	... ३१६	संकरः	... ३४१

ॐ

॥ श्रीः ॥

श्रीगुरुचरणारविन्दाभ्यां नमः

श्रीमद्विद्यानाथप्रणीतम्

प्रतापरुद्रीयम्।

श्रीमत्कुमारस्वामिकृतरत्नापणसहितम्।

अथ नायकप्रकरणम्।

विद्याकैरवकौमुदीं श्रुतिशिरःसीमन्तमुक्तामणिं
दारान् पद्मभुवस्त्रिलोकजननीं वन्दे गिरां देवताम्।

कल्याणानि तनोतु कश्चन पुमानर्धाङ्गदन्तावळो
गण्डाभोगविलोलुपानळिगणान् कर्णाञ्चलैश्चालयन्।
यत्पादाम्बुरुहावलम्बशरणाः पूर्वे पुमांसस्त्रय-
स्त्रैलोक्यस्थितिसर्गसंहृतिविधौ निर्विघ्नसिद्धोद्यमाः ॥ १ ॥

अस्तु कल्याणदं दिव्यं वस्तु नारीनरात्मकम्।
स्वोपज्ञं वाङ्मयं यस्य विहारगृहवेदिका ॥ २ ॥

वाणीं काणभुजीमजीगणदवासासीच्च वैयासिकी-
मन्तस्तन्त्रमरंस्त पन्नगगवीगुम्फेषु चाजागरीत्।
वाचामाचकलद्रहस्यमखिलं यश्चाक्षपादस्फुरां
लोकेऽभूद्यदुपज्ञमेव विदुषां सौजन्यजन्यं यशः ॥ ३ ॥

त्रिस्कन्धशास्त्रजलधिं चुळुकीकुरुते स्म यः।
तस्य श्रीमल्लिनाथस्य तनयोऽजनि तादृशः ॥ ४ ॥

कोलचलपेद्दयार्यः प्रमाणपदवाक्यपारदृश्वा यः।
व्याख्यातनिखिलशास्त्रः प्रबन्धकर्ता च सर्वविद्यासु ॥ ५ ॥

तस्यानुजन्मा तदनुग्रहात्त-
विद्योऽनवद्यो विनयावनम्रः।
स्वामी विपश्चिद्वितनोति टीकां
प्रतापरुद्रीयरहस्यभेत्रीम् ॥ ६ ॥

यत्पादाब्जनमस्क्रियाः सुकृतिनां सारस्वतप्राक्रिया-
बीजन्यासभुवो भवन्ति कवितानाट्यैकजीवातवः ॥१॥

पुण्यश्लोकगुणोक्तिशाणकषणादुत्तेजनां लम्भितं
संजग्राह रसादिरत्ननिचयं विद्याधिनाथः पुरा ।
सोऽहं तद्व्यवहारहेतुमधुना कंचित् करोम्यापणं
तत्रानुग्रहमूल्यतोऽभिलषितं क्रीणन्तु धन्या जनाः ॥ ७ ॥
यद्यन्निगूढमखिलं शक्त्या तत्तत् प्रकाश्यते ।
नामूलं लिख्यते किंचिन्नानपेक्षितमुच्यते ॥ ८ ॥

अथ तत्रभवान् विद्यानाथनामा महाकविरलंकारशास्त्रमारभमाणस्तस्याविघ्नपरिसमाप्तये प्रचयगमनाय च ‘मङ्गळादीनि मङ्गळमध्यानि मङ्गळान्तानि शास्त्राणि प्रथन्ते’ इत्यादि भगवद्भाष्यकारवचनम् ‘आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्’ इत्याशीराद्यन्यतमस्य प्रबन्धमुखलक्षणत्वप्रतिपादकमाचार्यदण्डिवाक्यं च प्रमाणयन् वृद्धाचारपरिप्राप्तं विशिष्टेष्टदेवतानमस्कारलक्षणं मङ्गळमन्तेवास्यनुग्रहायादौ ग्रन्थतो निबध्नाति । **विद्येति** । विद्या वेदवेदाङ्गादयः । ‘अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः । पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश ॥’ इति स्मरणात् । ता एव कैरवाणि कुमुदानि तेषां कौमुदीं चन्द्रिकां निखिलविद्योल्लासकारणभूतामित्यर्थः । श्रुतीनां शिरांसि उपनिषद एव शिरांसि मूर्धानः । तत्र सीमन्तमुक्तामणिं केशमार्गाभरणायमानां वेदान्तवेद्यामित्यर्थः। अथास्या लौकिकस्वरूपमाह । **दारानिति** । ‘दाराः पुंसि च भूम्न्येव’ इत्यभिधानाद्बहुत्वं पुंस्त्वं च । त्र्यवयवो लोकस्त्रिलोकः । शाकपार्थिवादित्वान्मध्यमपदलोपी समासः । लोकत्रयसमुदायोऽत्र त्रिलोकशब्देन विवक्षितः । तस्य जननीमिति षष्ठीसमासः । अन्यथा ‘तद्धितार्थ’ इत्यादिना समाहारसमासे अकारान्तोत्तरपदत्वेन स्त्रीत्वात् ‘द्विगोः’ इतीकारे त्रिलोकीति स्यात् । अत एव ‘द्विगोर्लुगनपत्ये’ इत्यत्र “त्र्यवयवा विद्या त्रिविद्या । तामधीते वेत्ति वा त्रैविद्यः । न तु तिस्रो विद्या अधीत इत्यण्प्रत्ययनिमित्तः ‘तद्धितार्थ’ इत्यादिना समासः । अत एवाण्प्रत्ययस्य लुगभावः” इत्याह भगवान् भाष्यकारः । इत्थं नमस्कर्तव्यदेवताया वैशिष्ट्यमुक्त्वा स्वग्रन्थारम्भोपयोगित्वेन इष्टत्वं च सूचयति। **यत्पादेति** । पादावब्जे इवेत्युपमितसमासः । न तु पादावेवाब्जे इति रूपकसमासः । तथा सत्यब्जयोः प्राधान्येन तत्र नमस्कारायोगात् । सारस्वतप्राक्रियाः काव्यनाटकादिवाङ्मयविशेषाः तासां बीजं कारणभूतः शक्तिप्रतिभाद्यपरपर्यायः संस्कारविशेषः । तदेव बीजमङ्कुरकारणं तस्य न्यासभुवः आवापभूमयः । कवितानाट्यस्यैकजीवातवो मुख्यजीवनौषधानि अविच्छेदहेतव इत्यर्थः । अत्र नमस्कारात् कविताकारणभूतः संस्कारो जायते संप्रदायाविच्छेदश्च भवतीति

पूर्वेभ्यो भामहादिभ्यः सादरं विहिताञ्जलिः ।
वक्ष्ये सम्यगलंकारशास्त्रसर्वस्वसंग्रहम् ॥ २ ॥
चिरेण चरितार्थोऽभूत् काव्यालंकारसंग्रहः ।
प्रतापरुद्रदेवस्य कीर्तिर्येन प्रकाश्यते ॥ ३ ॥
रसप्रधानाः शब्दार्थौ गुणालंकारवृत्तयः ।
रीतयश्चेयती शास्त्रप्रमेयं काव्यपद्धतिः ॥ ४ ॥
यद्यप्यसौ प्रबन्धेषु प्राचां साधु निरूपिता ।
तथाप्यस्याः समं नेतुर्नोदाहरणमादृतम् ॥ ५ ॥
पुण्यश्लोकस्य चरितमुदाहरणमर्हति ।
न कश्चित्तादृशः पूर्वैः प्रबन्धाभरणीकृतः ॥ ६ ॥
प्रबन्धानां प्रबन्धॄणामपि कीर्तिप्रतिष्ठयोः ।

भावः । नमस्क्रिया इति बहुवचनं तासां भक्तिश्रद्धातिशयपूर्वकत्वं द्योतयति । तथाविधानामेव श्रेयस्करत्वात् । तथा च श्रुतिः 'भूयिष्ठां ते नमउक्तिं विधेम' इति । अत्रोपमारूपकविशेषाणां तिलतण्डुलवत् परस्परनैरपेक्ष्यात् संसृष्टिः । तदुन्नयनप्रकारस्त्वलंकारप्रकरणे व्यक्तीभविष्यतीत्युपरम्यते । ग्रन्थादौ वायुबीजस्य वकारस्य क्षेमंकरस्य भूदेवताकस्य मगणस्य चोपादानाद्वर्णगणादिशुद्धिरस्त्येवेति सर्वमवदातम् ॥ १ ॥ अथालंकारशास्त्रप्रणेतृप्रणामपूर्वकं वक्ष्यमाणमर्थं प्रतिजानीते । **पूर्वेभ्य इति** । यद्यपि रसालंकाराद्यनेकविषयमिदं शास्त्रं तथापि छत्रिन्यायेनालंकारशास्त्रमुच्यते । तत्र सर्वस्वं रसादिप्रमेयं संगृह्यते संक्षिप्यते येनासावलंकारशास्त्रसर्वस्वसंग्रहः प्रारिप्सितो ग्रन्थस्तं सम्यग् विशदं वक्ष्य इति योजना । संक्षेपवैशद्याभ्यां रसादिसर्वप्रमेयप्रतिपादनात् सर्वोत्कृष्टः स्वग्रन्थ इति सूचितो भवति ॥ २ ॥ संप्रत्यलंकारशास्त्रस्य लोकोत्तरवर्ण्यलाभेनोत्कर्षमाह । **चिरेणेति** ॥३॥ शास्त्रसर्वस्वसंग्रहं इत्युक्तं तद्विभजते । **रसेति** । रसप्रधाना रसजीविता इत्यर्थः । यद्यपि वस्त्वलंकाररसात्मना त्रिविधस्यापि व्यङ्ग्यस्य जीवितत्वमुत्तरत्र वक्ष्यति तथापि स्वात्ममात्रविश्रान्तत्वेन प्राधान्याद्रसस्यैव मुख्यं जीवितत्वम् । वस्त्वलंकारव्यङ्ग्ययोस्तु सर्वथा रसपर्यवसानेनाप्राधान्यात् तदभावेऽपि वाच्यादुत्कृष्टत्वसाम्यात् औपचारिको जीवितत्वव्यवहार इति न कश्चिद्विरोध इति ध्वनिलोचनरहस्यम् । गुणादयो वक्ष्यमाणलक्षणाः । अनुक्तसमुच्चयार्थश्चशब्दः शय्यापाकावाकर्षति ॥ ४ ॥ काव्यस्वरूपनिरूपणे सत्यप्युदाहरणार्हनायकानिरूपणाभावात् प्राचां प्रबन्धेष्वपकर्ष इत्याह । **यद्यपीति** । असौ काव्यपद्धतिः ॥ ५ ॥ अत एव प्रबन्धॄणामप्यपकर्ष इत्याह **पुण्येति** । चरितोदाहरणे कर्तृकर्मणी ॥६॥

मूलं विषयभूतस्य नेतुर्गुणनिरूपणम् ॥ ७ ॥

यथा रामगुणवर्णनं रामायणवल्मीकजन्मनोर्महाप्रतिष्ठाकारणं तथा महापुरुषवर्णनेन हि श्रेयस्करी प्रबन्धस्थितिः । यथा वेदशास्त्रपुराणादेर्हितप्राप्तिरहितनिवृत्तिश्च तथा सदाश्रयात् काव्यादपि । इयान् विशेषः । काव्यात् कर्तव्यताधीः सरसाऽन्यत्र न तथा । तथा हि ।

यद्वेदात् प्रभुसंमितादधिगतं शब्दप्रधानाच्चिरं
यच्चार्थप्रवणात् पुराणवचनादिष्टं सुहृत्संमितात् ।
कान्तासंमितया यया सरसतामापाद्य काव्यश्रिया
कर्तव्ये कुतुकी बुधो विरचितस्तस्यै स्पृहां कुर्महे ॥ ८ ॥

तन्निरूपणे तु महानुभयेषामुत्कर्ष इत्याह । **प्रबन्धानामिति** । प्रबन्धॄणां प्रबन्धकर्तॄणाम् ॥ ७ ॥ तत्र दृष्टान्तमाह । **यथा रामेति** । उत्तमगुणवर्णनेनैव प्रबन्धनिर्माणमनेकश्रेयोहेतुरित्याह । **तथा महापुरुषेति** । अत एवोत्तमगुणवर्णनमवश्यं कर्तव्यमिति भावः । अथ स्वग्रन्थप्रतिपाद्यस्य काव्यस्य वेदादिवत् पुरुषार्थपर्यवसायितामाह । **यथावेदेति** । सन्नुत्तमनायक आश्रयो वर्ण्यत्वेन यस्य तस्मात् । अभ्युच्चयमाह । **इयानिति** । उक्तमर्थमुपपादयति **तथाहीत्यादिना** । प्रत्यक्षाद्यविषयमिष्टप्राप्त्युपायं ज्योतिष्टोमादिकमनिष्टपरिहारोपायं कलञ्जभक्षणवर्जनादिकं च येन विदन्ति स वेदः । तदुक्तम् । 'प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते । एनं विदन्ति वेदेन तस्माद्वेदस्य वेदता ॥' इति । तस्मात् प्रभुसंमिताद्राजतुल्यात् । कुतः । शब्दप्रधानात् वाङ्मात्रेण प्रभुरिव वेदोऽपि विधिनिषेधबलेन पुंसां प्रवर्तको निवर्तकश्च । प्रभुर्विपक्षे दण्डयति वेदस्तु प्रत्यवायं जनयतीति शब्दप्रधानत्वमिति भावः । प्रत्यवायजनकत्वं च वेदस्य स्वरवर्णयोरन्यथोच्चारणेऽपि दुरितश्रवणादन्यथाऽनुष्ठानेऽननुष्ठाने वा कैमुतिकन्यायासिद्धम् । अध्ययनविधेः फलवदर्थावबोधपर्यन्तत्वादिति वेदितव्यम् । चिरं मीमांसापेक्षया कृच्छ्रेणेत्यर्थः । यत् कर्तव्याकर्तव्यरूपमधिगतं प्रमितम् । अर्थप्रवणादर्थवादबहुलत्वेनार्थप्रधानात् । पुराणादिकं न वेदवदेवं कुर्यान्नैवं कुर्यादिति प्रवर्तकं निवर्तकं वा विधिनिषेधबलेन किं तु तन्न्यक्कारेण पूर्वपुरुषचरितस्तुतिनिन्दामुखेन रागद्वेषावुत्पाद्य मित्रवत् प्रवृत्तिनिवृत्तिहेतुभूतम् । अतोऽस्यार्थप्रधानत्वमित्यवगन्तव्यम् । अतः सुहृत्संमितात् पुराणवचनाच्च यदिष्टमभिरुचितं तस्मिन्नित्यध्याह्रियते । यत्तदोर्नित्यसंबन्धात् । कान्तासम्मितया यया । कवयते वर्णयतीति कविः । तस्य कर्म काव्यम् । ब्राह्मणादित्वात् ष्यञ् प्रत्ययः ।

ततः काव्यं दृष्टादृष्टफलजनकतया बहूपयुक्तम् । तच्चोक्तं काव्यप्रकाशे

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये कान्तासंमिततयोपदेशयुजे ॥ इति

प्रसिद्धं चैतन्महाप्रबन्धेषु

×*परिवड्ढइ विण्णाणं संभाविज्जइ जसो विसप्पंति गुणा ।
सुव्वइ सुपुरुसचरिअं किं तज्जेण ण हरंति कव्वाळावा ॥

× परिवर्धते विज्ञानं संभाव्यते यशो विसर्पन्ति गुणाः ।
श्रूयते सुपुरुषचरितं किं तद्येन न हरन्ति काव्यालापाः ॥

तच्च पङ्कजादिवद्रूढत्वाद्रसोल्लसितशब्दार्थसंघटनात्मकमेव न कर्ममात्रम् । तस्य श्रिया विलासेन । सरसतामापाद्य उत्कण्ठाजननेनाभिमुखीकृत्येत्यर्थः । कर्तव्ये गुर्वाज्ञाकरणादौ । बुधो विद्वान् न तु पामरः । कुतुकी रागवान् विरचितः । उभयत्राप्यकारप्रश्लेषादकर्तव्ये परदारहरणादावकुतुकी द्वेषवांश्चेति लभ्यते । यथा कामिनी कटाक्षवीक्षणादिविलासैरेव कामिनमावर्जयन्ती ममेदमभिलषितं कुरु अनभिलषितं मा कुर्वित्यनुक्त्वैव सर्वं संपादयति तथा काव्यश्रीरपि व्यञ्जनव्यापारमात्रपरत्वेनोपसर्जनीभूतशब्दार्थतया शब्दार्थप्रधानाभ्यां प्रभुसुहृत्संमिताभ्यां वेदपुराणाभ्यां विलक्षणा सती सहृदयहृदयाह्लादकारिणा व्यञ्जनाव्यापारेणैव रामादिवद्वर्तितव्यं न तु रावणादिवदिति पुंसः कर्तव्ये प्रवर्तयति निवर्तयति चाकर्तव्यादित्यस्याः कान्तासंमितत्वमवगन्तव्यम् । एतेनास्याः सरसतापादनेन प्रवर्तकत्वाद् भयानुनयपुरस्सरं प्रवर्तकाभ्यां वेदपुराणाभ्यां विशेषो विवक्षित इति बोद्धव्यम् । अतस्तल्लक्षणाय प्रयतामह इत्याह । **तस्यै स्पृहां कुर्महे इति** । 'स्पृहेरीप्सितः' इति संप्रदानत्वाच्चतुर्थी । एतेन पुरुषार्थोपदेशः काव्यस्य प्रयोजनं तद्युक्तं काव्यं विषयस्तज्ज्ञानं प्रयोजनमुभयोः साध्यसाधनभावः संबन्धो जिज्ञासुरधिकारीत्यनुबन्धचतुष्टयं सूचितम् ॥ ८ ॥ न ह्युक्तोपदेशविशेष एवात्र प्रयोजनं किन्तु कीर्त्यादिकमपि संभवतीत्याह । **तत इति** । ततः सप्रयोजनत्वात् बहुप्रयोजनसाधनत्वादुपादेयमिति भावः । अत्र वृद्धसंवादमाह । **तच्चोक्तमित्यादिना** । कृद्विद्युज्शब्दाः भावे संपदादित्वात् क्विबन्ताः। अत्र यशोऽर्थानर्थप्रतीकाराः द्वयोरपि । व्यवहारोपदेशौ तु सहृदयस्यैव । निर्वृतिकाले कविरपि सहृदय एवेति निर्वृतिर्द्वयोरपि ॥ **परिवड्ढइ इति** । न हरन्तीत्यत्र मन इति शेषः । विडप्पन्ति गुणाः । 'अर्जेर्विडप्पः' इति कर्मणि विडप्पादेश इति त्रिविक्रमभोजराजौ । किं बहुना । चतुर्वर्गव्युत्पत्तिरप्यत्रैव भवतीति भावः।

*अयं श्लोकः प्रवरसेनकृते सेतुबन्धमहाकाव्ये दृश्यते ।

यत्र पुनरुत्तमपुरुषचरितं न निबध्यते तत् काव्यं परित्याज्यमेव । तन्मूला चेयं स्मृतिः 'काव्यालापांश्च वर्जयेत्' इति । न केवलं काव्यस्यायं पन्थाः । किन्तु शास्त्रजातस्यापि सदाश्रयत्वेन महान् लोकादरः । तथा वैशेषिकादेरीश्वरप्रतिष्ठापकतया जगत्पूज्यता । तथा महाभारतादीनामपि महापुरुषवर्णनपरतयैव विश्वातिशायित्वम् । किं बहुना । वेदान्ता अपि ब्रह्मप्रतिपादकतया परमुत्कृष्यन्ते ।

'अथातो धर्मजिज्ञासा' इत्युपक्रममाणेन सूत्रकृता महर्षिणापि

तथापि परनिर्वृतिरेवेह मुख्यं फलमिति रहस्यम् । अन्यथा काव्यस्य कान्तासंमितत्वविशेषो न स्यात् । तदुक्तं लोचने । चतुर्वर्गव्युत्पत्तेरपि चानन्द एव पार्यन्तिकं मुख्यं फलमिति । ननु 'काव्यालापांश्च वर्जयेत्' इति निषेधाद्विफलोऽयं प्रयास इत्याशङ्क्य स्मृतेरन्यविषयत्वमाह । **यत्र पुनरिति** । अन्यथा रामायणादेरपि हेयत्वप्रसंगादिति भावः । काव्ये कैमुतिकन्यायेनोत्तमपुरुषगुणवर्णनस्यावश्यकत्वं प्रतिपादयितुं शास्त्रजातस्यापि तत्परत्वमाह । **न केवलमित्यादिना। ईश्वरप्रतिष्ठापकतयेति।** अङ्कुरादिकं सकर्तृकम्। कार्यत्वात्। घटवत्। इत्यादिप्रमाणैरिति भावः । अत्र 'कर्तरि च' इति निषेधात् 'याजकादिभिश्च' इति षष्ठीसमासो द्रष्टव्यः । तस्याकृतिगणत्वात् । यद्वा शेषषष्ठीसमासः । तस्यैतन्निषेधाभावात् । एवमन्यत्रापि द्रष्टव्यम् । भारतादीनामपि शासकत्वाच्छास्त्रत्वेन निर्देशः । ननु चिदेकरसतया निर्धर्मकस्य ब्रह्मणः प्रतिपादकेषु वेदान्तेषु गुणवत्पुरुषवर्णनं नास्तीति चेन्नैष दोषः । ब्रह्मण्यानन्दादीनामौपाधिकानां विद्यमानत्वात् । तदुक्तं पञ्चपादिकायाम् । 'आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति तद्धर्माः' इति । अथवा सच्चिदानन्दस्य ब्रह्मणो निर्गुणस्यापि निर्दोषत्वमेव गुणः । यथाह माघः । 'अपदोषतैव विगुणस्य गुणः' इति । तदेतदभिप्रेत्याह । **किं बहुनेति** । न चेदं माघवचनमब्रह्मपरमिति वचनीयम् । तथा हि 'अविभाव्यतारकमदृष्टहिमद्युतिबिम्बमस्तमितभानु नभः । अवसन्नतापमतमिस्रमभादपदोषतैव विगुणस्य गुणः ॥' इति । अत्र प्राकरणिकसन्ध्यानभःप्रतिपादनात् प्रतीयमानस्याप्राकरणिकस्य 'न तत्र सूर्यो भाति न चन्द्रतारकम्' 'को मोहः कः शोकः' इत्याद्युपनिषदर्थसनाथस्याकाशपर्यायनभःशब्दार्थस्य ब्रह्मणोऽर्थान्तरन्यासेन निर्गुणस्य निर्दोषत्वमेव गुण इति विवक्षितत्वात् । पदार्थविवेचनप्रपञ्चः पुनरस्मन्महोपाध्यायविरचितमाघव्याख्याने सर्वंकषाख्याने द्रष्टव्यः । निरीश्वरवादिनामपि मीमांसकानां गुणधौरेयधर्मप्रतिपादनादेव गुणवत्पुरुषवर्णनपर्यवसायित्वमित्याह । **अथात इति** । अथ

पुरुषाश्रितस्य गुणश्रेष्ठस्य धर्मस्य जिज्ञासाद्वारेण महापुरुषगुणवर्णनमेव शास्त्रस्य प्राणा इत्युररीकृतम् । तत्तन्न्यायनिरूपणपरस्यापि प्रबन्धराशेर्महापुरुषगुणवर्णनं हेम्नः परमामोदः । अतश्च

प्रतापरुद्रदेवस्य गुणानाश्रित्य निर्मितः ।
अलंकारप्रबन्धोऽयं सन्तः कर्णोत्सवोऽस्तु वः ॥ ९ ॥
काकतीयनरेन्द्रस्य यशो भूषयितुं कृता ।
विद्यानाथकृतिश्चेयं स्वयं तेन विभूष्यते ॥ १० ॥

तदुक्तं दण्डिना ।

'आदिराजयशोबिम्बमादर्शं प्राप्य वाङ्मयम् ।
तेषामसन्निधानेऽपि न स्वयं पश्य नश्यति ॥' इति

सूक्तैव प्रतिपाद्यमहिम्ना प्रबन्धमहत्ता । तदुक्तं प्राचा भामहेन ।

वेदाध्ययनानन्तरम् अतो वेदस्य विवक्षितार्थत्वाद् धर्मस्य जिज्ञासा कर्तव्येति संक्षेपतः सूत्रार्थः । महर्षिणा जैमिनिनेति शेषः । धर्मो नाम श्रेयस्साधनभूतो यागादिरेव नापूर्वमात्मनिष्ठम् । तदुक्तम् । 'श्रेयःसाधनता यत्र द्रव्यादौ विधितो भवेत् । तस्यैव धर्मता ज्ञेया धर्मस्तत्साधनं यतः ॥' इति । 'अपूर्वं च यागादेरवान्तरव्यापारः शक्तिर्वा' इति भाट्टः । तन्मताश्रयणे धर्मस्यापूर्वद्वारा पुरुषाश्रितत्वं गुणत्वं चौपचारिकम् । प्राभाकरास्तु यागादिव्यतिरिक्तं स्थिरकार्यं लिङ्गादिवाच्यमपूर्वमेव धर्म इति प्रतिपेदिरे । तन्मते पुनस्तस्यात्मनिष्ठत्वं गुणत्वं च संप्रतिपन्नमेवेति सुष्ठूक्तं **पुरुषाश्रितस्य गुणश्रेष्ठस्येति** । उररीकृतमङ्गीकृतम् । नन्वेतच्छास्त्रं न्यायनिरूपणपरं न पुरुषगुणवर्णनपरमित्याशङ्क्य तस्यापि पुरुषगुणधर्मनिरूपणार्थत्वात् तत्रैव पर्यवसानमन्यथा वैफल्यमित्याशयेनाह । **तत्तन्न्यायेति** । उक्तमर्थमुपसंहरन् स्वग्रन्थस्य विद्वत्परिग्रहमाशास्ते । **अतश्चेति**॥९॥वर्ण्यप्रबन्धयोरुभयोरुत्कृष्टत्वादन्योन्यमुपस्कार्योपस्कारकभाव इत्याह । **काकतीयेति** । काकतिर्नाम दुर्गाशक्तिरेकशिलानगरेश्वराणां कुलदेवता सा शक्तिर्भजनीयास्येति काकतीयः । 'वृद्धाच्छः' इति शैषिकश्छप्रत्ययः॥१०॥अत्र प्रबन्धमहिम्ना वर्ण्योपस्कारे वृद्धसंवादमाह । **तदुक्तं दण्डिनेति** । अत्र बिम्बशब्दः कर्तृवाची । वाङ्मयादर्शः कर्म । अत्र नलनहुषाद्यसंनिधानेऽपि तद्यशोबिम्बप्रतिष्ठाया वाङ्मयादर्शाधीनत्वोक्तेः प्रबन्धमहिम्ना प्रतिपाद्योत्कर्ष इति भावः । केषुचित् कोशेष्वेतत् पद्यं प्रतिपाद्यमहिम्ना प्रबन्धोत्कर्षपरग्रन्थमध्ये लेखकदोषाल्लिखितं । तत्र 'गौर्गौः कामदुघा सद्भिः' इत्याद्येतत्पद्यपूर्वोत्तरश्लोकपर्यालोचनयास्मदुक्तार्थावधारणादुपेक्षणीयम् । अथ वर्ण्यमहिम्ना प्रबन्धोपस्कारे भामहादिसंवादमाह । **सूक्तैवेत्यादिना** । **नायकेति** । नायको रामादिस्तरलश्च ।

'उपश्लोक्यस्य माहात्म्यादुज्ज्वलाः काव्यसंपदः ।'

इति । प्रतिपादितं चोद्भटेन ।

'गुणालंकारचारुत्वयुक्तमप्यधिकोज्ज्वलम् ।
काव्यमाश्रयसंपत्त्या मेरुणेवामरद्रुमः ॥'

इति । रुद्रभट्टेनापि कथितम् । 'उदारचरितनिबन्धना प्रबन्धप्रतिष्ठा' इति । प्रपञ्चितं च साहित्यमीमांसायाम् । 'नायकगुणग्रथिताः सूक्तिस्रजः सुकृतिनामाकल्पमाकल्पन्ति' इति ।
निरूपितं च भोजराजेन ।

'कवेरल्पाऽपि वाग्वृत्तिर्विद्वत्कर्णावतंसति ।
नायको यदि वर्ण्येत लोकोत्तरगुणोत्तरः ॥' इति ।

॥ महाकुलीनत्वादिनायकगुणाः ॥

तत्रैते नायकगुणाः ।

महाकुलीनतौज्ज्वल्यं महाभाग्यमुदारता ।
तेजस्विता विदग्धत्वं धार्मिकत्वादयो गुणाः ॥ ११ ॥
पूर्वशास्त्रानुसारेण कतिचित् कथिता इमे ।
प्रतापरुद्रदेवस्य गुणा वाचामगोचराः ॥ १२ ॥

अथैतेषां स्वरूपमुदाहरणं च । तत्र

महाकुलीनता नाम कुले महति संभवः ।

यथा

ताहक्श्लाघ्यमलोकभाग्यविभवादिन्द्रादिबृन्दारकैः
क्षोण्यां क्रीडितुमिच्छुभिश्चिरतरं संप्रार्थितः पद्मभूः ।

गुणाः शौर्यादयस्तन्तवश्च । आकल्पवदाचरन्ति आकल्पन्ति । 'सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्यः' इति क्विप् । अनेन कर्णावतंसतिर्व्याख्यातः । एवमवश्यं लोकोत्तरगुणो नायकः काव्ये वर्ण्य इत्युक्तम् । ते गुणाः क इत्याकाङ्क्षायां पूर्वशास्त्रानुसारेण कतिचन गुणान् गणयति । **तत्रेत्यादिना** । अथैतेषां यथोद्देशक्रमं लक्षणोदाहरणे प्रदर्शयति । **महाकुलीनतेत्यादिना** । 'महाकुलादञ्खञौ' इत्यत्रान्यतरस्यांग्रहणानुवृत्त्या खञ्प्रत्ययः ॥ ११ ॥ १२ ॥ उदाहरति । **ताहगिति** । अत्र भूलोकस्य स्वर्गातिशायि वैभवं काकतीयनरेन्द्राणामिन्द्रादिसादृश्यं

अत्यर्केन्दुकुलप्रशस्तिमसृजद्यं काकतीयान्वयं
तस्मिन् संप्रति वीररुद्रवपुषा जागर्ति लक्ष्मीपतिः॥ १३॥

अथौज्ज्वल्यम् ।

रूपसंपन्नदेहत्वमौज्ज्वल्यं परिकीर्त्यते ।

यथा

मुरारेर्यः पूर्वं जलनिधिसुतायामुदभव-
न्महादेवाज्जातः स पुनरवनीभृद्दुहितरि ।
वपुष्मान् कामोऽयं जयति जगतीभाग्यविभवैः
प्रतापश्रीरुद्रः स्वयमिति मनीषा मृगदृशाम् ॥ १४ ॥

अथ महाभाग्यम् ।

विश्वंभराधिपत्यं यत्तन्महाभाग्यमुच्यते ॥

यथा

सेवानम्रनरेन्द्रमौळिविलसद्रत्नांशुनीराजितं
राज्यश्रीप्रथमावतारपदवीमारुह्य सिंहासनम् ।
क्षोणीं रक्षति विक्रमैरनुपमैः प्रत्यर्थिपृथ्वीपति-
श्लाघालङ्घनजाङ्घिकैर्गुणनिधिः श्रीवीररुद्रो नृपः॥ १५॥

अथौदार्यम् ।

यद्विश्राणनताच्छील्यमौदार्यं तन्निगद्यते ।

यथा

च व्यज्यते ॥ १३ ॥ औज्ज्वल्यमाह । **रूपेति** । कुण्डलमुक्ताहारनूपुराङ्गदादि-चतुर्विधभूषणाभावेऽपि भूषितवदवभासमान आकारविशेषो रूपम् । तदुक्तं भावप्रकाशे । 'आवेध्यारोप्यविक्षेप्यबन्धनीयैरभूषितम् । यद् भूषितमिवाभाति तद्रूपमिति कथ्यते ॥' इति । उदाहरति । **मुरारेरिति** । महादेवान्महादेवनामका-न्महाराजात् । अवनीभृद्दुहितरि राजपुत्र्याम् । ईश्वरात् पार्वत्यामिति च ध्वन्यते। अत्र मदनत्वोत्प्रेक्षया रूपसंपत्तिरुक्ता ॥ १४ ॥ महाभाग्यमाह । **विश्वंभरेति** विश्वं बिभर्तीति विश्वंभरा । 'संज्ञायां भृतॄवृजि' इत्यादिना खश्प्रत्यये मुमा-गमः । तस्या आधिपत्यं सार्वभौमत्वमित्यर्थः । उदाहरति । **सेवेति** । प्रथमो-ऽवतारोऽवतरणम् । 'अवे तॄस्त्रोर्घञ्' इत्यत्र प्रायेणग्रहणानुवृत्तेरसंज्ञायामपि घञ्प्रत्ययः । तस्य पदवीं सिंहासनस्य राज्यलक्ष्मीप्रथमचिह्नत्वादिति भावः । प्रत्यर्थिपृथ्वीपतीनां श्लाघाया उत्कर्षस्य लङ्घने जङ्घया चरन्तीति जाङ्घिकाः शी-घ्रगामिनः । 'चरति' इति ठक् । दुष्टनिग्रहशिष्टपरिपालनाभ्यामखिलक्षोणीसंरक्ष-

वदान्यो नान्योऽस्ति त्रिजगति समो रुद्रनृपते-
र्गुणश्रेणीश्लाघापिहितहरिदीशानयशसः ।
समन्तादुद्भूतैर्द्विरदमदगन्धैः सुरभयः
क्रियन्ते यद्विद्वज्जनमणिगृहप्राङ्गणभुवः ॥ १६ ॥

अथ तेजस्विता ।

जगत्प्रकाशकत्वं यत्तेजस्वित्वं तदुच्यते ।

यथा

सदा तेजोभानौ स्फुरति जयिनः काकतिविभो-
ररिक्ष्माभृत्कान्ताचिकुरतिमिराहंकृतिमुषि ।
प्रकाशव्युत्पत्तिर्भवति जरदुद्दामतमसा
मसूर्यपश्यानामवधिगिरिपाश्चात्यदृषदाम् ॥ १७ ॥

णादस्य महाभाग्यम् ॥१५॥ औदार्यमाह। **यदिति**। तच्छीलस्य भावस्ताच्छील्यम्। विश्राणने ताच्छील्यमिति शिवभागवतवत् समासः । उदाहरति। **वदान्य इति** त्रयाणां जगतां समाहारस्त्रिजगदिति 'तद्धितार्थ ' इत्यादिना द्विगुः । गुणश्रेणीश्लाघया गुणगणोत्कर्षेण पिहितं तिरस्कृतं हरिदीशानानां दिक्पतीनां यशो येन तस्य । अत्र समृद्धवस्तुवर्णनादुदात्तालंकारः ॥ १६ ॥ तेजस्वित्वमाह । **जगदिति** । उदाहरति । **सदेति** । जयिनो जयशीलस्य । काकतिदेवतोपासको विभुः काकतिविभुः । मध्यमपदलोपी समासः । अरिक्ष्माभृत्कान्ताचिकुराः शत्रुराजस्त्रीकुन्तला एव तिमिरं तस्याहंकृतिमुषि गर्वनिर्वापके । प्रियवियोजनेन तन्निवर्तकत्वादिति भावः । तेजोभानौ सदा न दिवैव स्फुरति सतीति भावलक्षणा सप्तमी । जरन्ति जीर्णानि सर्वदा प्रकाशविरहात् घनीभूतानीत्यर्थः । 'जीर्यतेरतृन्' इति भूते अतृन्प्रत्ययः । तान्युद्दामानि बहुलानि तमांसि यासां तासां तथोक्तानाम् । न सूर्यं पश्यन्तीत्यसूर्यपश्याः । 'असूर्यललाटयोर्दृशितपोः' इति खश्प्रत्ययः । 'अरुर्द्विषत्' इत्यादिना मुमागमः । 'उपपदमतिङ्' इति समासः । अत्र नञः सूर्यकर्मिकया दृशिक्रियया संबन्धो न तु सूर्यस्थया सत्तया । अतोऽसूर्यमित्यसमर्थसमासः । तथापि साधुरेव । यदाह भगवान् भाष्यकारः । 'अवश्यं कस्यचिन्नञ्समासस्यासमर्थस्य गमकस्य साधुत्वं वक्तव्यमसूर्यंपश्यानि मुखानीति' । तासामवधिगिरेः लोकालोकपर्वतस्य पाश्चात्यदृषदामप्रकाशप्रदेशवर्त्युपलानां प्रकाशव्युत्पत्तिः प्रकाशज्ञानम् । यद्वा । अयं प्रकाशशब्दवाच्य इति शक्तिग्राहिकया संग्रहः । अत्र सूर्यप्रकाशरहितयोरपि देशकालयोरतिवेलप्रकाशजननाल्लोकोत्तरमस्य तेजस्वित्वमिति भावः ॥ १७ ॥ वैदग्ध्य-

अथ वैदग्ध्यम् ।

कृत्यवस्तुषु चातुर्यं वैदग्ध्यं परिकीर्त्यते ।

यथा

चातुर्यं किमु वर्ण्यते गुणनिधेः श्रीवीररुद्रप्रभो-
र्यत्रान्योन्यविरुद्धयोरपि महद्वाणीश्रियोरार्जवम् ।
किं चाभ्यां सदृशोपचारललितां तत्तादृशैरुत्सवै-
र्निःसापत्न्यामिमां भुवं स नृपतिर्धत्ते दिशां जित्वरः ॥

अथ धार्मिकत्वम् ।

धर्मैकायत्तचित्तत्वं धार्मिकत्वमुदीर्यते ।

यथा

माह । **कृत्येति** । कृत्यवस्तुषु कर्तव्यार्थेषु चातुर्यं प्रयोगकौशलम् । उदाहरति । **चातुर्यमिति** । 'यत्र विद्या न तत्र श्रीर्यत्र श्रीर्न सरस्वती' इति न्यायेनान्योन्यविरुद्धयोरपि वाणीश्रियोर्यत्र वीररुद्रे महदार्जवं सौहार्दमेकत्रावस्थानमिति यावत् । अस्तीति गम्यते । अस्तिर्भवतिपरोऽप्रयुज्यमानोऽप्यस्तीति महाभाष्यकारवचनात् । उक्तन्यायस्तु वीररुद्रव्यतिरिक्तनिर्गुणभूपालविषय इत्यर्थः । आभ्यां श्रीवाणीभ्याम् । सहेति शेषः । अत्र सहादिशब्दाप्रयोगेऽपि तदर्थगम्यतायां 'वृद्धो यूना' इति ज्ञापनात् तृतीया । सदृशैः स्वस्वशीलोचितैरुपचारैः प्रियाचरितसत्कारविशेषैर्ललितां हृष्टामित्यर्थः । तदुक्तं भावप्रकाशे । 'उपचारो यथासत्त्वं स्त्रीणामल्पोऽपि हर्षदः । महानप्यन्यथायुक्तो नैव तुष्टिकरो भवेत् ॥' इति । उपचारलक्षणमपि तत्रैव । 'वासोऽङ्गरागाभरणमाल्यशय्यासनादिषु । यत्र यत्र स्पृहा तत्तद्देशकालानुकूल्यतः ॥ अत्यादरेण सत्कार उपचार इतीरितः॥' इति । आभ्यामित्यत्राप्रधाने तृतीयाविधानेऽपि श्रीवाण्योः शाब्द एवोपसर्जनभावो न त्वार्थः । सह शाखया प्रस्तरं प्रहरतीत्यत्र प्रहरणे शाखाप्रस्तरयोरिव तयोर्भुवश्च समप्रधानभावोपपत्तेः । अन्यथानौचित्यादिति रहस्यम् । अतस्तिस्रोपि सदृशोपचारसंतुष्टा इति भावः । तां भुवम् । स नृपतिः । तत्तादृशशब्दयोः स्वरूपप्रकारस्मारकयोः खञ्जकुब्जादिवद्विशेषणसमासः । वक्तुमशक्यैरित्यर्थः । उत्सवैः हर्षोत्पादकव्यापारैः । 'उत्सूते हर्षमित्येष उत्सवः परिकीर्त्यते, इति तत्रैवोक्तेः । मिथो विरुद्धानामेतासामन्योन्यानुरागजननेन वशीकरणाद्वैदग्ध्यमुक्तम् । वितरणविद्वद्गोष्ठीप्रजारञ्जनादिभिः श्रीवाणीधरणीर्निर्विरोधं पोषयतीति भावः ॥ १८ ॥ धार्मिकत्वमाह । **धर्मेति** । धर्मं चरत्यासेवत इति धार्मिकः । 'सकृत्कृतधर्मो न धार्मिकः' इति वृत्तिकारः । तस्य भावस्तत्त्वम् । उदाहरति ।

परिहासेऽप्यनौचित्यं स्वप्नेऽप्यन्यवधूकथाम् ।
शत्रावप्यगुणारोपं काकतीन्द्रो न मृष्यति ॥ १९ ॥

आदिग्रहणान्महामहिमत्वपाण्डित्यप्रभृतयः ।

तन्महामहिमत्वं स्याद्या पुनर्देवतात्मता ।

यथा ।

कौसल्याऽऽसीत् प्रथमजननी देवकी च द्वितीया
विष्णोर्माता तदनु महिता मुम्मडाम्बा तृतीया ।
यस्त्रेतायां रघुपतिरभूद् द्वापरे शौरिरासीत्
त्रातुं क्षोणीं स जयति कलौ वीररुद्रावतारः ॥ २० ॥

अत्र गरुडध्वजात्मकतया महामहिमतोक्ता ।

अथ पाण्डित्यम् ।

सर्वविद्याधिकत्वं यत् पाण्डित्यं तदुदाहृतम् ।

यथा

गोष्ठीभिः परितोषयन् बुधगणान् षड्दर्शनीसीमभिः
सत्सारस्वतमार्गदर्शनचणैः सूक्तैः कवीन् प्रीणयन् ।
संगीतोपनिषद्रहस्यपिशुनैरातोद्ययोग्यक्रमै-
र्धिन्वन् संसदि वैणिकान् विहरते श्रीकाकतीन्द्रो नृपः ॥

परिहास इति । अनौचित्यमन्यद्रव्याभिलाषानृतभाषणादिहेतुकमित्यर्थः ; परिहासादावप्यनौचित्यादिकमसहमानस्य धार्मिकत्वं किमु वक्तव्यमिति भावः ॥ १९ ॥ आदिग्रहणसंगृहीतेषु महामहिमत्वमाह । **तदिति** । उदाहरति । **कौसल्येति** । कोसलस्यापत्यं स्त्री कौसल्या । 'वृद्धेत्कोसलाजादाञ्ञ्यङ्' इति ञ्यङ्प्रत्यये टाप् । तद्देवकीत्वमनु पश्चाद् देवकीत्वानन्तरमित्यर्थः । 'अनुर्लक्षणे' इति कर्मप्रवचनीयत्वात् तद्योगे द्वितीया । महिता पूज्यमाना । 'मतिबुद्धि' इत्यादिना वर्तमाने क्तः । अत्र विष्ण्वतारत्वेन देवतात्मकत्वान्महामहिमत्वम् ॥ २० ॥ पाण्डित्यमाह । **सर्वेति** । उदाहरति । **गोष्ठीभिरिति** । षण्णां दर्शनानां पाणिन्यादिप्रस्थानानां समाहारः षड्दर्शनी । 'पाणिनेर्जैमिनेश्चैव व्यासस्य कपिलस्य च । कणादस्याक्षपादस्य दर्शनानि षडेव हि ॥' इत्याहुः । द्विगुत्वाद् ङीप् । सा सीमा गोचरो यासां ताभिस्तथोक्ताभिर्गोष्ठीभिः शास्त्रप्रसङ्गैः । सत्सारस्वतमार्गस्य सत्कवितामार्गस्य दर्शनं प्रकाशनम् । दृशेर्ण्यन्ताल्ल्युट् । तेन वित्तैस्तच्चणैः । 'तेन वित्तश्चञ्चुप्चणपौ' इति चणप्प्रत्ययः । संगीतोपनिषद्रहस्यपिशु-

अथ नायकगुणनिरूपणानन्तरं नायकस्वरूपं निरूप्यते।

यशःप्रतापसुभगो धर्मकामार्थतत्परः।
धुरंधरो गुणाढ्यश्च नायकः परिकीर्तितः॥ २२॥

यशःप्रतापाभ्यां सुभगत्वं यथा।

धर्मालम्बसमुच्छ्रितां त्रिभुवनस्यैकातपत्रश्रियं
धत्ते काकतिवीररुद्रनृपतेः स्फारं यशोमण्डलम्।
छायेवास्य नभस्थली कुवलयश्यामेयमालोक्यते
तन्मन्ये नियतं प्रतापतपनस्तस्योपरि द्योतते॥ २३॥

धर्मकामार्थतत्परत्वं यथा।

नैर्नाट्यवेदमर्मोद्घाटकैः। आतोद्ययोग्यक्रमैस्तततादिचतुर्विधवाद्योचितपरिपाटीभिः। वीणा शिल्पमेषां वैणिकाः। तान् धिन्वन् प्रीणयन्। अत्र विभोः सर्वविद्याविशारदत्वादखण्डं पाण्डित्यमिति भावः। प्रभृतिग्रहणाद्विनीतत्वादयो ये दशरूपकोक्तास्ते तत्रैव द्रष्टव्याः। यथासंभवमेते स्त्रीपुंससाधारणा गुणाः पुरुषमात्रनियतास्त्वन्येऽपि शोभादयः। तदुक्तम्। 'शोभा विलासो माधुर्यं गाम्भीर्यं स्थैर्यतेजसी। ललितौदार्यमित्यष्टौ सात्त्विकाः पौरुषा गुणाः।' इति॥ २१॥ तेऽपि तत्रैव द्रष्टव्या इत्युपेक्ष्य नायकलक्षणं प्रतिजानीते। **अथेति**। लक्षयति। **यश इति**। गुणैः पूर्वोक्तैः साधारणैर्महाकुलीनतादिभिरसाधारणैः शोभादिभिश्चाढ्य इत्येतावदेव सामान्यलक्षणम्। नयति प्राप्नोति वृत्तं फलं चेति नायक इति व्युत्पत्त्या प्रबन्धव्यापी फलवानित्यपि विशेषो द्रष्टव्यः। चशब्दोऽनुक्तसमुच्चयार्थस्सन्नुत्तममध्यमाधमभेदेन त्रिविधो नायक इतीमं विभागमाकर्षति। तेनोक्तसकलगुणसंपन्नः प्रबन्धव्यापिफलशिरस्कव्यापार उत्तमः। कतिपयगुणहीनो मध्यमः। बहुगुणहीनोऽधम इति विवेकः। अत्र धार्मिकत्वादय इत्यादिग्रहणसंगृहीतानां यशःप्रतापादीनां गुणाढ्यपदेनैवोपात्तानामपि पुनरुपादानमेतेषां सर्वेष्वपि नायकेष्वावश्यकत्वमभिव्यञ्जायितुमिति रहस्यम्। सत्समाख्या यशः। कोशदण्डजं तेजः प्रतापः। धर्मादयः प्रसिद्धाः। धूरेव धुरा। 'टावन्तत्वं हलन्तानाम्' इति वचनाट्टाप्। तां धारयतीति धुरन्धरः। 'संज्ञायां भृतृवृजि' इत्यादिना खच्प्रत्ययः। 'खित्यनव्ययस्य' इति ह्रस्वः। 'अरुर्द्विषद्' इत्यादिना मुमागमः॥२२॥तत्र यथायोगमुदाहरति। **धर्मेति**। धर्म एवालम्बो दण्डस्तस्मिन् समुच्छ्रितां विस्तारितां। त्रिभुवनस्येति समाहारद्विगुः। पात्रादित्वान्न स्त्रीत्वम्। स्फारं प्रभूतम्। अत्र त्रिभुवनोल्लङ्घिनः कीर्तिमण्डलातपत्रस्योपरि प्रतापतपनः प्रकाशत इत्युत्प्रेक्षणादर्वाचीनसूर्यादिमहसां छत्राधःखचितमणिगणवदवभासमा-

धर्मोऽर्थ इव पूर्णश्रीरर्थो धर्म इव स्थितः ।
कामस्ताविव तौ काम इव रुद्रनरेश्वरे ॥ २४ ॥

धुरीणता यथा ।

गायन्तीरनुमोदते निजवधूः शेषः शिरःकम्पनै-
र्लक्ष्मीं प्रीणयतेऽद्य कच्छपपतिर्वक्षस्थलीदर्शनात् ।
दिङ्नागाश्च करेणुकाशुचमपाकुर्वन्त्यनुव्रज्यया
दोष्णा काकतिवीररुद्रनृपतौ विश्वंभरां बिभ्रति ॥ २५ ॥

गुणाढ्यत्वं यथा ।

मुखैः सहस्रेण फणी वदेच्चेत्
करैः सहस्रेण लिखेद्विवस्वान् ।
नेत्रैः सहस्रेण हरिश्च पश्येत्
स्थाने गुणान् काकतिवीरभर्तुः ॥ २६ ॥

नत्वं कीर्तिप्रतापयोश्चन्द्रसूर्याधिकत्वं च व्यज्यते ॥ २३ ॥ **धर्म इति** । अत्र धर्मार्थयोः पर्यायेणोपमानोपमेयभावादुपमेयोपमालंकार इति वक्ष्यति । एतेनानयोरन्योन्यमेव सादृश्यं न त्वेतत्सदृशोऽन्यः कोऽपीति व्यज्यते । एवमुत्तरार्धेऽपि योज्यम् ॥ २४ ॥ **धुरीणतेति** । 'खः सर्वधुरात्' इत्यत्र 'खः' इति योगविभागात् खप्रत्ययः । **गायन्तीरिति** । स्वभर्तृभारावतरणसन्तोषभराद्वीररुद्रकीर्तिमेवेति भावः । कच्छपपतिरादिकूर्मावतारो हरिरपोढभारत्वादालिङ्गनार्थं वक्षस्स्थलीदर्शनात् । दृशेर्ण्यन्ताल्ल्युट् । लक्ष्मीं प्रीणयते । प्रीञ् तर्पणे इत्यस्माद्धातोश्चौरादिकाण्णिचि 'धूञ्प्रीञोर्नुग्वक्तव्यः' इति नुक् । अनुव्रज्यया रन्तुमनुधावनेन । 'व्रजयजोर्भावे क्यप्' इति क्यप् । करेणुकाशुचं विप्रलम्भजनिताम् । अद्येति सर्वत्र सम्बध्यते । शेषादयो भुवं बिभ्रति शेषादींस्तु कूर्मराज इत्यागमः । शेषादिभरणीयां विश्वंभरां वीररुद्रो भुजेनैकेन बिभर्तीति विश्वातिशायि धुरन्धरत्वमस्योक्तम् ॥ २५ ॥ **मुखैरिति** । करैरित्यत्रांशुहस्तयोरभेदाध्यवसायाल्लेखनसाधनत्वं विज्ञेयम् । वदेदित्यादौ 'अर्हे कृत्यतृचश्च' इत्यर्हार्थे लिङ्प्रत्ययः । शेषादय एवास्य गुणानामभिवदनादीन्यर्हन्ति । तथा चेद्युक्तमिति वाक्यार्थः । असंख्येया गुणा इति भावः । सहस्रेणेत्यत्र संख्येयबाहुल्येऽपि 'विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोः' इत्यमरवचनादेकत्वमवगन्तव्यम् ॥ २६ ॥ अथ धीरोदात्तादयश्चत्वारो नायकाः सर्वरससाधारणास्तेषामेव शृङ्गाराश्रयतयानुकूलादिभेदेन प्रत्येकं चतुर्विधानामुत्तममध्यमाधमभेदेन पुनः प्रत्येकं त्रैविध्ये अष्टाचत्वारिंशद्भेदाः । धीरोदात्तादिशब्दाश्च महावीरचरितादिमहाप्रबन्धेष्वेकस्यानेक

अथ नायकविशेषा निरूप्यन्ते ।

उदात्त उद्धतश्चैव ललितः शान्त इत्यपि ।
धीरपूर्वा इमे पूर्वैश्चत्वारो नायकाः स्मृताः ॥ २७ ॥

तत्र सर्वरससाधारणाश्चत्वारो नायकाः धीरोदात्तधीरोद्धतधीरललितधीरशान्ताः । एतेषां स्वरूपमुदाहरणं च ।

महासत्वोऽतिगम्भीरः कृपावानविकत्थनः ।
प्रतापरुद्रवद्धीरो धीरोदात्तः स संमतः ॥ २८ ॥

रूपाभिधानेन वत्सवृषभमहोक्षादिशब्दवदवस्थावाचिनो न जातिवाचिन इति प्रतिपादितं *दशरूपके । तत्र कतिचिल्लक्षणोदाहरणाभ्यां प्रदर्श्यन्ते । **अथेत्यादिना** । **उदात्त इति** । धीरपूर्वा उदात्तादय इत्युक्तेर्धीरशब्दपूर्वा उदात्तादिशब्दा इत्युक्तं स्यात् । अतोऽत्र शब्दपरेणार्थलक्षणा कथंचित् कल्प्या ॥ २७ ॥ अत्र धीरोदात्तादीनां सर्वरससाधारण्येऽपि यथाक्रमं वीररौद्रश्टङ्गारशान्तप्रधानत्वं वक्ष्यमाणविशेषलक्षणपर्यालोचनया विज्ञेयमिति †रहस्यम् । तत्र धीरोदात्तमाह । **महासत्व इति** । क्रोधाद्यनभिभूतान्तःकरणो महासत्त्वः । अयमेव धीर इत्याहुः । अत्रत्यधीरशब्देन तु उद्योगादेरचलितत्वलक्षणः स्थिरः शास्त्रचक्षुर्वाभिधीयते इति न पौनरुक्त्यम् । सत्यपि विकारे सावहित्थो गम्भीरः । परदुःखापहरणेच्छुः कृपावान् । आत्मश्लाघाविहीनोऽविकत्थनः । ‘अनुदात्तेतश्च हलादेः’

---

*धीरललितादिशब्दाश्च यथोक्तगुणसमारोपितावस्थाभिधायिनो वत्सवृषभमहोक्षादिवन्न जात्या कश्चिदवस्थितरूपो ललितादिरस्ति । तदा हि महाकविप्रबन्धेषु विरुद्धानेकरूपाभिधानमसंगतमेव स्यात्, जातेरनपायित्वात् । तथा च भवभूतिनैक एव जामदग्न्यः ‘ब्राह्मणातिक्रमत्यागो भवतामेव भूतये । जामदग्न्यश्च वो मित्रमन्यथा दुर्मनायते ॥’ इत्यादिना रावणं प्रति धीरोदात्तत्वेन ‘कैलासोद्धारसार’ इत्यादिभिश्च रामादीन्प्रति प्रथमं धीरोद्धतत्वेन पुनः ‘पुण्या ब्राह्मणजातिः’ इत्यादिभिश्च धीरशान्तत्वेनोपवर्णितः । न चावस्थान्तराभिधानमनुचितमङ्गभूतनायकानां नायकान्तरापेक्षया महासत्त्वादेरव्यवस्थितत्वादङ्गिनस्तु रामादेरेकप्रबन्धोपात्तान्प्रत्येकरूपत्वादारम्भोपात्तावस्थातोऽवस्थान्तरोपादानमन्याय्यम् । यथोदात्तत्वाभिमतस्य रामस्य छद्मना वालिवधादमहासत्त्वतया स्वावस्थापरित्याग इति । वक्ष्यमाणानां च दक्षिणाद्यवस्थानां पूर्वां प्रत्यन्यया हृत इति नित्यसापेक्षत्वेनाविर्भावादुपात्तावस्थातोऽवस्थान्तराभिधानमङ्गाङ्गिनोरप्यविरुद्धम् ।

†एतद्रहस्यविज्ञानार्थं नायकप्रकरणस्य अन्ते विद्यमानाः ७१, ७२, ७३, श्लोकाः द्रष्टव्याः ।

यथा

संदिग्धे कृपया मृदुः क्षणमरीन् हन्तुं धृतासिः पुरः
शौर्यश्रीप्रणयप्रशंसिषु नमद्भूर्लज्जते वन्दिषु ।
आकारान्सुखरोषहर्षपिशुनान् वक्त्रे न धत्ते मनाक्
त्रैलोक्यातिशयालुकीर्तिसुभगः श्रीवीररुद्रो नृपः ॥ २९ ॥

दर्पमात्सर्यभूयिष्ठश्चण्डवृत्तिर्विकत्थनः ।
मायावी सुलभक्रोधः स धीरोद्धत उच्यते ॥ ३० ॥

यथा

रेरे घूर्जर जर्झरोऽसि समरे लम्पाक किं कम्पसे
वङ्ग त्वङ्गसि किं मुधा बलरजःकाणोऽसि किं कोङ्कण ।
हूण प्राणपरायणो भव महाराष्ट्रापराष्ट्रोऽस्यमी
योद्धारो वयमित्यरीनभिभवन्त्यन्ध्रक्षमाभृद्भटाः ॥ ३१ ॥

इति युच् । एवंगुणको यः प्रतापरुद्रवद्वर्तते स धीरोदात्त इति योजना । एवं च सर्वोत्कर्षेण वृत्तिरौदात्त्यमिति फलितम् । अत्र स्थैर्यादिसामान्यगुणानां विशेषलक्षणेषूपादानं तत्रावश्यकत्वसूचनार्थम् । उदाहरति । **संदिग्ध इति** । कृपया मृदुर्न तु कातर्येणेत्यनेन महासत्त्वतोच्यते । क्षणमल्पकालमेव । पश्चात्तु हन्त्येवेति स्थैर्यम् । पुरः स्थितानरीन् न तु पलायितानिति धार्मिकत्वम् । **शौर्येति** । वन्दिविहितप्रशंसाकर्णनेनैव लज्जमानस्यात्मश्लाघा तु दूरत एवेत्यविकत्थनत्वम् । नमद्भ्रूत्वं लज्जानुभावः । इष्टानुभवजन्य आनन्दः सुखम् । सापराधविषयोऽमर्षो रोषः । इष्टलाभजन्यो मनःप्रसादो हर्षः । तेषां पिशुनान् सूचकानाकारानक्षिनिमीलनभ्रुकुटिमुखरागादीन् वक्त्रे मनागीषदपि न धत्त इत्यवहित्थया गाम्भीर्यम् । त्रयो लोकास्त्रैलोक्यं तदतिशयालुरिति मधुपिपासुप्रभृतित्वात् द्वितीयासमासो द्रष्टव्यः । शीङो वक्तव्यादालुच्प्रत्ययः । अत्र स्थैर्यधार्मिकत्वकीर्तयः साधारणा गुणाः कृपादयस्तु विशेषा इति विवेकः ॥ २८ ॥ २९ ॥ धीरोद्धतमाह । **दर्पेति** । दर्पः शौर्यादिमदः । मात्सर्यमसहनमसूयेति यावत् । ताभ्यां भूयिष्ठश्चण्डवृत्तिः रौद्रः । विकत्थन आत्मश्लाघापरः । मन्त्रादिबलेनाविद्यमानवस्तुप्रकाशकः केवलवञ्चको वा मायावी । उदाहरति । **रेरे इति** । 'हीनसंबोधने तु रे' इत्यमरः । तस्य प्रतिवाक्यमावर्त्यमानस्य 'वाक्यादेरामन्त्रितस्यासूयासम्मतिकोपकुत्सनभर्त्सनेषु' इति यथायोगमसूयाद्यर्थेषु द्विर्भावः । अत्र 'स्वरितमाम्रेडिते' इत्यादिना प्राप्तस्य प्लुतस्य सर्वप्लुतः साहसमनिच्छता विभाषा वक्तव्येति पाक्षिकः प्रतिषेधः । शास्त्रत्यागः साहसमिति हरदत्तः । अत्र घूर्जरादिवाक्येषु यथायोग-

अत्र भटानां धीरोद्धतत्वम् ।

निश्चिन्तो धीरललितः कलासक्तः सुखी *मृदुः ।

यथा

शौर्योष्मा निरवग्रहः प्रतिनृपाः सर्वेऽपि नम्रीकृताः
पातिव्रत्यमुपैति भूरियमयं नाथः स्वयंभूः शिवः ।
धीरोऽयं युवराज एव वहति श्रीवीररुद्रो धुरं
सर्वामित्यनुमोदते प्रतिकलं श्रीकाकतीन्द्रो नृपः ॥३२॥

धीरः शान्तः प्रसन्नात्मा धीरशान्तो द्विजादिकः ।

यथा

वीरं रुद्रनृपालरत्नमभितः प्राप्तोदयं मोदते
संख्यावद्गण एष पूषणमिव प्रत्यग्रमब्जाकरः ।
उन्मीलत्कमलाविहारवसतिर्भूत्वा विकासैर्निजै-
र्विश्वामोदमुदञ्चयन्नविरतं दोषावसानोत्सुकः॥ ३३ ॥

मुद्धावितैर्दर्पमात्सर्यादिभिर्योद्धारो वयमित्यात्मश्लाघया चान्ध्रक्षमाभृद्भटानां धीरोद्धतत्वम् ॥ ३० ॥ ३१ ॥ धीरललितमाह । **निश्चिन्त इति** । सुतसचिवादिविनिहितयोगक्षेमतया चिन्ताविरहितो निश्चिन्तः । अत एव कलासु गीतादिष्वासक्तः । सुखी भोगप्रवणः । शृङ्गारप्रधानत्वात् सुकुमाराकारो मृदुः । उदाहरति । **शौर्येति** । अत्रानर्गळशौर्यादिभिर्दैवानुकूल्येन युवराजधुरन्धरत्वेन च निश्चिन्तः सकलकलासुखमनुभवतीति वीररुद्रकुलज्येष्ठस्य धीरललितत्वम् ॥ ३२ ॥ धीरशान्तमाह । **धीर इति** । विवेचकः क्लेशसहिष्णुर्वा धीरः । शमप्रधानः शान्तः । हृष्टान्तःकरणः प्रसन्नात्मा । द्विजादिक इत्यादिग्रहणाद्वणिक्सचिवौ विवक्षितौ । 'सामान्यगुणयुक्तस्तु धीरशान्तो द्विजादिकः' इति †केचित् । उदाहरति । **वीरमिति** । संख्या ज्ञानं तद्वतां विदुषां गणः संख्यावद्गणः । प्राप्त उदयोऽभिवृद्धिरन्यत्रोदयाचलो येन तं तथोक्तम् । प्रत्यग्रमुभयत्राभिनवम् । उन्मीलन्त्या उल्लसन्त्याः कमलायाः संपत्तेरन्यत्र लक्ष्म्या विहारवसतिः । विकासैरुत्सवादिभिरन्यत्र दळविश्लेषैः । विश्वस्यामोदं हर्षमन्यत्र गन्धविशेषमुदञ्चयन् उद्बोधयन् । दोषावसानं पापोपशमः । अन्यत्र दोषाया रात्रेरवसानं प्रभातम् । 'दोषा रात्रिमुखे रात्रावत्रानव्ययमप्यसौ' इति विश्वः । **तत्रोत्सुक इति** । अत्र

---

*सुखैकभूः इति पाठान्तरम् ।

†केचिच्छब्देन दशरूपकसाहित्यदर्पणकारादयः विवक्षिताः ।

अत्र विप्राणां धीरशान्तत्वम् ।

॥ शृंगारनायका निरूप्यन्ते ॥

अथ शृङ्गारविषयाश्चत्वारो नायका इमे ।
अनुकूलो दक्षिणश्च धृष्टः शठ इति स्मृताः ॥ ३४ ॥

एषां स्वरूपमुदाहरणं च ।

एकायत्तोऽनुकूलः स्यात्

एकस्यां नायिकायां विशेषानुरक्तोऽनुकूलो नायकः ।

यथा

किं नामाचरितं तपः सखि भुवा यस्याः पतिर्गीयते
वीरो रुद्रनृपः क तत् सुचरितं तस्य प्रिया स्यां यतः।
जाने मानिनि मा विषीद पुरतः प्रख्याप्य नाम स्थिरां
त्वां रत्नाकरमेखलां त्वयि सदा सक्तं विधास्ये नृपम्।

अत्र प्रतापरुद्रस्य क्षोण्यां विशेषानुरागो व्यज्यते येन वध्वा स्थिरा रत्नाकरमेखलेति तन्नामग्रहणेन स्नेहप्रख्यापनं क्रियते ।

तुल्योऽनेकत्र दक्षिणः ।

अनेकासु नायिकासु अवैषम्येण स्नेहानुवर्ती दक्षिणो नायकः।

यथा

दोषावसानेत्यादौ धैर्यशान्त्योर्विश्वामोदमित्यादौ प्रसादादेश्च प्रतिपादनात् विप्राणां धीरशान्तत्वम् ॥ ३३ ॥ अथ शृङ्गारनायकानां यथाक्रमसुद्देशलक्षणोदाहरणानि दर्शयति । **अथेत्यादिना** ॥ ३४ ॥ तत्रानुकूलमाह । **एकेति** । सत्स्वपि नायिकान्तरेष्विति शेषः । तदेवाह । **एकस्यामिति** । एकजानिरेवानुकूलो यथा रामादिरित्यन्ये* । उदाहरति । **किमिति** । नायिकावाक्यमेतत् । भुवा कयाचिन्नायिकया । नामेति संभावनायाम् । यतः सुचरितात् । अथ सखी नायिकामाह । **जान इति** । नायकघटनोपायमिति शेषः । 'अनुपसर्गात् ज्ञः' इत्यात्मनेपदम् । नामेति कुत्सायाम् । अनुरागोत्पादनार्थं सपत्नीनामसाम्येन नायिकाप्रकाशनस्य कुत्सितत्वात् 'नाम प्रकाश्यसंभाव्यकुत्साभ्युपगमेषु च' इति विश्वः। अत्र राज्ञो भूमौ विशेषानुरागोऽन्यत्र न तथेत्यानुकूल्यम् ॥ ३५ ॥ दक्षिणमाह । **तुल्य**

---

*अन्ये दशरूपकसाहित्यदर्पणकारादयः इत्यवगन्तव्यम् ।

गूढविप्रियकृच्छठः ॥

नायिकामात्रविदितविप्रियकारी शठः ।

यथा

दृष्ट्या पश्यसि केवलं न मनसा वाचा प्रियं भाषसे
नो भावेन भुजान्तरं प्रकटयस्यग्रे न चाभ्यन्तरम् ।
ज्ञातं काकतिनाथ भूस्तव परं प्राणेश्वरी ध्यायतो
मादृक्षेषु विडम्बनैव तदलं व्यर्थैर्बहिस्संभ्रमैः॥ ३९ ॥

अत्र तत्तन्नायकविषयतया काकतीश्वराणामुदाहरणेन वीररुद्रस्यैव वर्णनम् ।

एषां नायिकानुकूलने पीठमर्दविटचेटविदूषकनामानः सहायाः । तेषां स्वरूपं निरूप्यते ।

किंचिदूनः पीठमर्द एकविद्यो विटः स्मृतः ।
संधानकुशलश्चेटो हास्यप्रायो विदूषकः ॥ ४० ॥

स्पष्टमेषामुदाहरणम् ।

नाचापराधाभिव्यक्तिर्निर्भीकत्वं चेत्यस्य धृष्टत्वम् । अन्यासंभोगचिह्नैः कुपितत्वादियं खण्डिता । 'अधीरा परुषैर्वाक्यैः खेदयेद्वल्लभं रुषा' इति लक्षणादधीरा च ॥ ३८ ॥ शठमाह । **गूढेति** । उदाहरति । **दृष्ट्येति** । अत्र दर्शनप्रियभाषणयोश्चक्षुर्वागिन्द्रियकरणत्वाव्यभिचारादेव सिद्धेर्दृष्ट्या वाचेति च पुनरुपादानस्य तात्पर्यानिषेधार्थकत्वान्न पौनरुक्त्यम् । भूः परं भूरेव । ध्यायतश्चिन्तयतोऽन्यासक्तस्येत्यर्थः । मादृक्षेषु जनेष्विति शेषः । दृशेः क्सप्रत्ययो वक्तव्यः । अत्र नायिकामात्रविदितभावशून्यदर्शनादिविधानादस्य शठत्वम् । नायिका त्वधीरमध्या ॥ ३९ ॥ वीररुद्रगुणवर्णनप्रतिज्ञाभङ्गं परिहरति । **अत्रेति** ॥ अथ शृङ्गारनायकस्य नायिकासंबन्धनियमात् तदनुकूलने सहायानाह । **एषामिति**। क्रमेणैषां लक्षणमाह । **किंचिदित्यादि** । प्रधानेतिवृत्तनायकादीषन्न्यूनगुणः प्रासङ्गिकेतिवृत्तनायकः किंचिदूनशब्देन विवक्षितः । तदुक्तम् । 'पताकानायकस्त्वन्यः पीठमर्दो विचक्षणः । तस्यैवानुचरो भक्तः किंचिदूनस्तु तद्गुणैः॥' (द० रू० प्र. २ श्लो. ८) इति । स च सुग्रीवमकरन्दादिः । नायकोपयोगिगीतादिविद्यानामेकविद्याभिज्ञो विटः कलहंसादिः । वाक्याङ्गवेषविकारादिना हास्यकारी विदूषकः ॥ ४० ॥ अथ संभावितनायकसामान्यगुणयोगिनी नायिकेति सामान्यलक्षणं सिद्धवत्कृत्य तद्विशेषाः कति-

अथाष्टविधाः शृङ्गारनायिकाः ।

स्वाधीनपतिका चैव तथा वासकसज्जिका ।
विरहोत्कण्ठिता चैव विप्रलब्धा च खण्डिता ॥ ४१ ॥

कलहान्तरिता चैव तथा प्रोषितभर्तृका ।
तथाभिसारिका चेति क्रमाल्लक्षणमुच्यते ॥ ४२ ॥

प्रियोपलालिता नित्यं स्वाधीनपतिका मता ।

यथा

प्रियां सर्वसहां तैस्तैर्विशेषैरुपलालयन् ।
प्रतापरुद्रनृपतिः प्रतिक्षणमवेक्षते ॥ ४३ ॥

प्रियागमनवेलायां मण्डयन्ती मुहुर्मुहुः ।
केलीगृहं तथात्मानं सा स्याद्वासकसज्जिका ॥ ४४ ॥

यथा

स्वतेजसा परिष्कृत्य प्रधानागारमुत्कया ।
श्रियाभिषेकवेलायां वीररुद्रः प्रतीक्षितः ॥ ४५ ॥

चिल्लक्षणोदाहरणाभ्यां निरूप्यन्ते । **अथेत्यादिना** ॥ ४१ ॥ ४२ ॥ तत्र स्वाधीनपतिकामाह । **प्रियेति** । अध्युपरि इनः स्वामी यस्यासावधीनः आयत्तः । 'अधीनो निघ्न आयत्तः' इत्यमरः । स्वस्मिन्नधीनः स्वाधीनः । यद्वा स्वस्मिन्नधिकृतमधीति वा विगृह्य 'सप्तमी शौण्डैः' इति समासः । 'अषडक्ष' इत्यादिना अध्युत्तरपदान्नित्यः खप्रत्ययः । सुरतसुखास्वादलोभेनासन्नत्वात् स्वाधीन आयत्तः पतिर्यस्याः सा तथोक्ता । उदाहरति । **प्रियामिति** । सर्वं सहत इति सर्वसहा नाम काचिन्नायिका । 'संज्ञायाम्' इत्यादिना खश्प्रत्यये मुमागमः । विशेषैर्वासोऽङ्गरागादिभिरुपलालयन्नवेक्षत इत्यनेनासन्नयत्तरमणत्वप्रतीतेरियं स्वाधीनपतिका । नायकस्त्वनुकूलः । भूपरिपालने नित्यजागरूकोऽयमित्यपि गम्यते ॥ ४३ ॥ वासकसज्जिकामाह । **प्रियेति** । वासके वासवेश्मनि भोगोपकरणैः सज्जा सन्नद्धा सैव वासकसज्जिका । 'स्त्रीणां वारस्तु वासकः' इति पक्षे वासके वारदिवसे सज्जयति सज्जीकरोति हर्षेण केलीगृहादिकमिति वासकसज्जिका । अयमेव पक्षो विद्यानाथस्य विवक्षितः । उदाहरति । **स्वेति** । परिष्कृत्यालंकृत्य उत्कयोन्मनसा उत्कण्ठितयेत्यर्थः । 'उत्क उन्मनाः' इति निपातनात् साधुः । अत्र क्रीडागारपरिष्कारादिभिरियं वासकसज्जिका । अत एवोदात्तापि । तदुक्तम् । 'उदात्ता केशवासोऽङ्गमाल्यभूषासु सादरा । शय्या-

नर्मोक्त्यैव निमन्त्रिता स्मरकलाकेळीषु काचिन्मया
साकूतेन विलोकनेन हृदयं कस्यैचिदाविष्कृतम् ।
कस्याश्चित् प्रहितः प्रसाधनविधिर्दूतीकरेण क्व वा
गन्तास्मीत्यनुचिन्तयैव नृपतेरासीत् प्रभाता निशा ॥

तथा च

वाणीं मुखेन नेत्राभ्यां श्रियं दोष्णा च मेदिनीम् ।
मानयंस्तुल्यतां धत्ते तासु रुद्रनरेश्वरः ॥ ३७ ॥

व्यक्तागाः गतभीः धृष्टः ।

स्पष्टं यथा

राज्यश्रीपरिभोगशंसि भवतः सर्वांगमालोक्यते
कस्तत्राविनयोऽस्ति साहसमिदं तन्नाम मय्यर्पितम् ।
जाने त्वां बहुवल्लभं किमपरं वक्तव्यमल्पा वयं
तस्यां प्रेम तवाधिकं वसुमती या नाम किं जल्पितैः ॥

इति । स्नेहेनानुवर्तते ताच्छील्येन स्नेहानुवर्ती । उदाहरति । **नर्मेति** । अग्राम्य इष्टजनावर्जनरूपः परिहासो नर्म । केळीष्विति विषयसप्तमी । स्वाभिमतभावप्रकाशको दृग्विकार आकूतम् । तदुक्तम् । 'आकूतं तद्यत्र भावः सोऽप्यभीष्टो विभाव्यते' इति । प्रसाधनविधिः स्रक्चन्दनाभरणादिः । **प्रभातेति** । प्रभातप्रायेत्यर्थः । अत्र वाक्यत्रये यथाक्रमसुक्तिविशेषेण कलाविनोदस्य विलोकनविशेषेण वक्षस्स्थलाविष्करणस्य करेण वशीकरणस्य च सूचनाद्वाणीलक्ष्मीवसुन्धराः प्रतीयन्ते । अत्र आप्रभातमनिश्चितगन्तव्यतया चिन्ताकुलत्वेनास्य समानुरागत्वप्रतीतेर्दक्षिणोऽयं नायकः ॥ ३६ ॥ उदाहरणान्तरमाह । **वाणीमिति** । अत्र वाण्यादीनां वाच्यत्वान्मुखादिशब्दैर्नर्मोक्त्यादीनां प्रतीयमानत्वाच्च पूर्वोदाहरणात् भेदः । स्त्रीलिङ्गमहिम्ना प्रतीयमानलौकिकनायिकाभेदाध्यवसायेन वाण्याद्यनुरागेपि न शृङ्गारनायकत्वभङ्गप्रसङ्गः ॥ ३७ ॥ धृष्टमाह । **व्यक्तेति** । उदाहरति । **राज्येति** । राज्यश्रीस्तन्नाम्नी काचिन्नायिका राज्यलक्ष्मीश्च । तत्पक्षे सर्वाङ्गं सप्ताङ्गानि । अल्पा दरिद्राः । नामेति प्रसिद्धौ । जल्पितैः किं जल्पितसाध्यं नास्तीत्यर्थः । गम्यमानसाधनक्रियापेक्षया करणत्वात् तृतीया । 'न केवलं श्रूयमाणैव क्रिया निमित्तं कारकभावस्य अपि तु गम्यमानापि' इति न्यासोद्योतवचनात् । बहुशश्चैतदुक्तं तातपादैः संजीविन्यादौ । धनपरा राजानो न वाल्लभ्यपरा इति नायिकाभिप्रायः । अतः स्त्र्यन्तरसंभोगप्रकाशनात् गोत्रस्खल-

नीत्वाऽन्यत्र निशां प्रातरागते प्राणवल्लभे ।
अन्यासंभोगचिह्नैस्तु कुपिता खण्डिता मता ॥ ४९ ॥

यथा

रात्रिर्यामत्रयपरिमिता वल्लभास्ते सहस्रं
मार्गासक्त्या मम गृहमपि प्रातरेवागतोऽसि ।
किं कर्तव्यं वद नृपतिभिर्वीक्षणीया हि सर्वाः
को वा दोषस्तव पुनरहं काममायासयित्री ॥ ५० ॥

कोपात् प्रियं पराणुद्य पश्चात्तापसमन्विता ।
कलहान्तरिता नाम सूरिभिः परिकीर्तिता ॥ ५१ ॥

यथा

*तह तह अणुणअन्तो पिओ तुए हिअअरोसकलुसेण ।
अवहीरिदो ण मुणिअं राएत्ति विओअवेअणं सहस्स॥ ५२ ॥

---

*'तथा तथा अनुनयन् प्रियस्त्वया हृदयरोषकलुषेण ।
अवधीरितो न ज्ञातो राजेति वियोगवेदनां सहस्व ॥'

सख्यादयः सर्वेऽपि मदीया इत्याह । **वयमिति** । अत एव न ममेत्येकवचनप्रक्रमभङ्गः । अत्र भारत्या दयिते भुव इति पाठः साधीयान् क्षितिनायक इति समासपाठे व्यासप्रक्रमभङ्गप्रसङ्गात् । अत्र संकेतमावेद्य दयितेन वञ्चिता सती कामातुरेयं विप्रलब्धा ॥ ४७ ॥ ४८ ॥ खण्डितामाह । **नीत्वेति** । उदाहरति । **रात्रिरिति** । आद्यन्तयामार्धयोरकुण्ठितसंचारत्वेनारात्रित्वाभिमानात् त्रियामेति व्यवहारः । **सहस्रमिति** । 'विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोः ।' इत्येकत्वम् । तथापि मार्गासक्त्या न तु मदुद्देशेन । प्रातरेव विहारानर्हसमय एवेति भावः । अत एवागमनप्रयोजनं पृच्छति । **किमिति** । यद्वा नैवान्यत् प्रयोजनं प्रजापालनपराणां नृपाणामित्याह । **नृपतिभिरिति** । किं तु तवैवं प्रयासजननात् कियद्वा पापं ममैवं जीवन्त्या इति चिन्तयामीत्याह । **को वेति** । अत्र प्रातरागतस्य प्रेयसोऽन्यासङ्गविकारदर्शनात् कुपितेयं खण्डिता । 'वक्ति सोत्प्रासवक्रोक्त्या धीरमध्या कृतागसम्' इति लक्षणात् धीरमध्या च । नायकस्तु धृष्टः ॥ ४९ ॥ ५० ॥ कलहान्तरितामाह । **कोपादिति** । प्रियं प्रणामादिना प्रसादनपरमित्यर्थः । तदुक्तम् 'सत्यवागार्जवरतिरुपकुर्वन् प्रियं वदन् । भजते यः स्वयं प्रीतः प्रियः स भवति स्त्रियाः ॥' इति । कलहे सति सुखेनान्तरिता कलहान्तरिता । उदाहरति । **तहेति** । **मुणिअमिति** । 'जाणमुणौ ज्ञः' इति जानातेर्मुणादेशः विसूरणमिति

देशान्तरगते कान्ते खिन्ना प्रोषितभर्तृका ॥

यथा

त्रैलोक्यप्रथमानकीर्तिमहसः श्रीवीररुद्रप्रभोः
सेवार्थं चिरयत्सु काकतिपुरे भूपेषु यद्योषितः ।
द्वारासक्तदृशो नयन्ति दिवसान् व्युष्टाशया च क्षपा-
स्तद्ध्यानप्रतिबद्धसान्द्रपुलकव्याकीर्णकामेषवः ॥ ५३ ॥

कान्ताभिसरणोद्युक्ता स्मरार्ता साऽभिसारिका ॥

यथा

संभ्रमैरलमल्पज्ञे प्रेयानस्तु महीपीतः ।
करेणुस्थां न पश्यामि न शृणोम्यभिसारिकाम् ॥ ५४ ॥

खिदेर्विसूर इति विसूरादेश इति कोशान्तरे । तथा तथेत्यनेन पुनः पुनः प्रणामादिर्द्योत्यते । अत्र तादृशं राजानं प्रियमनादृत्य किमर्थमधुना दूयस इति हृदयोपालम्भादियं कलहान्तरिता । नायकस्तूत्तमः । 'कामतन्त्रेषु निपुणः क्रुद्धानुनयकोविदः' इत्यादिलक्षणात् ॥५१॥५२॥ प्रोषितभर्तृकामाह । **देशेति** । **कान्त इति** । 'कथाभिः कसनीयाभिः काम्यैर्भोगैश्च सर्वदा । उपचारैश्च रमयेद्यः स कान्त इतीरितः ॥' इत्युक्तलक्षण इत्यर्थः । उदाहरति । **त्रैलोक्येति** । व्युष्टं प्रभातम् । तद्ध्यानप्रतिबद्धाः प्रियचिन्ताप्ररूढाः सान्द्रपुलका एव व्याकीर्ण-कामेषवः कीलितकामबाणा यासां तास्तथोक्ताः । अत्र चिन्ताजागरादिप्रतिपाद-नात् खिन्नत्वेनेयं प्रोषितभर्तृका ॥ ५३ ॥ अभिसारिकामाह । **कान्तेति** । कान्तस्य कर्मणः कर्तुर्वाभिसरणे उद्युक्ता अत एवोक्तम् 'स्मरार्ताभिसरेत् कान्तं सारयेद्वाभिसारिका ।' (द० रू० प्र. २ श्लो. २७) इति । सारयेदिति दूत्यादिमुखेनेति शेषः । उदाहरति । **संभ्रमैरिति** । कान्ताभिसरणाय करेणु-मानयेति कयाचिदुक्ते सख्या वचनमेतत् । अथवा नैव करेणुस्थाभिसरणं दृष्टचरं श्रुतचरं वेत्याभाणकमुखेन सखी नायिकायाः प्रकटाभिसरणं वारयति । अल्पं जानातीत्यल्पज्ञे मुग्धे । अत्र 'आतोऽनुपसर्गे कः' इति कप्रत्ययो न तु 'इगुपधज्ञाप्रीकिरः कः' इत्यादिना । अत एवाह भगवान् कात्या-यनः । 'आकारादनुपपदात् कर्मोपपदो विप्रतिषेधेन' इति । एतच्च संजीविनीसर्वङ्कषादावसकृदुक्तं तातपादैः । अत्र कान्तकर्मकाभिसरणमुक्तम् । एवं कान्तकर्तृकाभिसरणेऽप्युदाहार्यम् । एतासां च 'चिन्तानिश्वासखे-दाश्रुवैवर्ण्यग्लान्यभूषणैः । युक्ताः षडन्त्या द्वे चाद्ये क्रीडौज्ज्वल्यप्रहर्षितैः ॥' (द० रू० प्र. २ श्लो. २८) इत्युक्तदशविकारा द्रष्टव्याः ॥ ५४ ॥

॥ आसां नायकानुकूलने सहायाः ॥

दूत्यो दासी सखी कारूर्धात्रेयी प्रातिवेशिनी ।
लिङ्गिनी शिल्पिनी स्वा च सहायाः परिकीर्तिताः॥५५॥

एतासां स्वरूपमुदाहरणं च स्पष्टम् । कामशास्त्रप्रसिद्धाः पद्मिनीचित्रिणीप्रभृतयो जातिविशेषा ज्ञातव्याः ।

संक्षेपेण नायिका त्रिविधा । मुग्धा मध्या प्रौढा चेति ।

उदयद्यौवना मुग्धा लज्जाविजितमन्मथा ।
लज्जामन्मथमध्यस्था मध्यमोदितयौवना ॥
स्मरमन्दीकृतव्रीडा प्रौढा संपूर्णयौवना ॥ ५६ ॥

यथाक्रममुदाहरणानि । मुग्धा यथा

मुग्धे यन्मनसोऽपि गोप्यमखिलं तन्मह्यमावेद्यते
किं या काचिदहं तव प्रियसखी प्रच्छाद्य किं ताम्यसि ।
आसक्तिस्तव रुद्रदेवनृपतावाशास्यते किं भवे-
दित्याळ्यां प्रणयैकवाचि सुतनुर्दत्तोत्तरा व्रीडया ॥ ५७ ॥

अथासां दूतीराह । **दूत्य इति** । दासी कर्मकरी । सखी स्नेहनिबन्धना । कारू रजक्यादिः । धात्रेयी उपमातृसुता । प्रातिवेशिनी समीपगृहवर्तिनी । लिङ्गिनी परिव्राजिका । शिल्पिनी चित्रकारादिस्त्री । स्वा स्वयं चेति दूत्यः सहाया नायकानुकूलने इति शेषः । स्वा चेति स्त्रीलिङ्गे मूलं मृग्यम् । 'स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने' इति नपुंसकत्वेनाभिधानात् । अथवा स्वा स्वकीया वान्धवस्त्रीति यावत् । तदुक्तं सर्वज्ञसोमेश्वरेण । 'भगिनी स्यालिका वापि मातुलस्याथवा सुता । एता भवन्ति दूत्यस्तु वान्धवस्त्रीति संज्ञिताः ॥' इति॥५५॥ पद्मिन्यादीनां जातिवाचित्वं न मुग्धादिवदवस्थावाचित्वमित्याह । **पद्मिनीति** । प्रभृतिग्रहणाच्छङ्खिनीहस्तिन्यौ गृह्येते । लक्षणादिकमेतासां कामशास्त्र एव द्रष्टव्यम् । इत्थं स्वाधीनपतिकाद्यवस्थाष्टकमुक्त्वा तदाश्रयभूतानेकनायिकामध्ये मुग्धादित्रयं लक्षणोदाहरणाभ्यां प्रदर्शयति । **संक्षेपेणेत्यादिना** । तत्र मुग्धामुदाहरति । **मुग्ध इति** । याकाचिदनाप्ता किम् । नेत्यर्थः अनुक्तेऽपि तव मनोरथं जानामीत्याह । **आसक्तिरिति** । अस्तीति शेषः । आशास्यत इत्येकं वाक्यम् । यः सर्वाभिरभिलष्यत इत्यर्थः । यद्वा रुद्रनृपतौ तवासक्तिराशास्यते अस्माभिरपेक्ष्यत इत्यर्थः । 'आङः शासु इच्छायाम्' इत्यस्माद्धातोः कर्मणि यक् । किं भवेदिति संप्रश्ने लिङ् । अत्राऽभिरूप्यादिगुणयोगसूचकेन

मध्या यथा

लीलाविभ्रमपूर्वरङ्गमुदितं तारुण्यमेत्य त्रपा-
नेपथ्यान्तरविम्बितस्मरकळालास्यप्रपञ्चश्रियः ।
सख्यः पश्यत काकतीयनृपतौ भावानुबन्धोज्ज्वलः
कोऽप्यस्यास्तरलभ्रुवो विजयते शृङ्गारनाट्यक्रमः॥ ५८॥

प्रौढा यथा

सहेलं पश्यन्त्याः प्रकृतिसुभगं रुद्रनृपतिं
तदात्वप्रत्युद्यद्विविधललिताटोपमधुरम् ।

सुतनुशब्देन प्रथमयौवनस्य दत्तोत्तरा व्रीडया इत्यनेन लज्जाविजितमन्मथत्वस्य च प्रतीतेरियं मुग्धा । 'आभिरूप्यमकाठिन्यमङ्गानां चातिमार्दवम् । एवमादिगुणावस्था प्रथमे यौवने भवेत् ॥' इत्युक्त्वा 'कृताधराङ्गसंस्कारा सखीकेळीषु लालसा' इत्यादिना तच्चेष्टाश्चोक्ताः । तच्चाळ्यां प्रणयैकवाचीत्यनेन सूच्यते ॥ ५६ ॥ ५७ ॥ मध्यामुदाहरति । **लीलेति** । पूर्वरङ्गो नाम नाट्यादौ कर्तव्यो रङ्गप्रसाधनाख्यः कर्मविशेषः । तदुक्तम् 'यन्नाट्यवस्तुनः पूर्वं रङ्गविघ्नोपशान्तये । कुशीलवाः प्रकुर्वन्ति पूर्वरङ्गः स कीर्तितः ॥' इति । लीलाविभ्रमाणामयत्नलब्धविलासानां पूर्वरङ्गं तारुण्यस्य विलासहेतुत्वेन तत्पूर्वभावित्वात् पूर्वरङ्गत्वेन रूपणम् । यद्वा लीलाविभ्रमा एव पूर्वरङ्गो यस्य तत् तारुण्यमेव रङ्गस्थलमिति गम्यते । त्रपैव नेपथ्यं नीहारावरणसदृशी यवनिका । अत एव तस्यान्तरे विम्बिता स्मरकला कामोद्दीपनं सैव लास्यप्रपञ्चश्रीर्यस्यास्तथोक्ताया लज्जामन्मथमध्यस्थाया इत्यर्थः । लास्यलक्षणं तु संगीतचूडामणौ । 'शृङ्गाररसभूयिष्ठैर्भूरिभावतरङ्गितैः । अङ्गैरनङ्गसर्वस्वैः शोभातिशयशालिभिः ॥ अन्वितो नृत्तभेदो यस्तल्लास्यमिति कथ्यते ॥' इति । विम्बग्रहणोचितनेपथ्यं तदन्तरे नर्तनं च तत्रैवोक्तं कुण्डलिनृत्तप्रस्तावे 'नीरन्ध्रा तत्र कर्तव्या स्निग्धा यवनिकादिमा । अपरे द्वे यवनिके नीहारावरणोपमे ॥ प्रेक्षकाणां वितन्वाना नयनानन्दकन्दलम् । नेपथ्यान्तरिता भूत्वा नर्तकी नृत्तमाचरेत् ॥' इति । भावस्य रत्याख्यस्थायिभावस्यानुबन्धो विच्छेदाभावः । सजातीयविजातीयैरतिरस्कार इत्यर्थः । अथवा भावानां सात्विकसंचारिणामनुबन्धः कल्लोलवदसकृदनुवर्तनं तेनोज्ज्वलो मनोहरः नाट्यपक्षे भावो नाम व्यापारविशेषः । तदुक्तम् । 'वागङ्गसत्वाभिनयैर्मुखरागोपशोभितैः । भावयन्नान्तरं भावं व्यापारो भाव इष्यते ॥' इति । कोऽप्यनिर्वचनीयः शृङ्गार एव नाट्यं नर्तनं तस्य क्रमः । पश्यतेत्यस्य वाक्यार्थः कर्म ॥ ५८ ॥ प्रौढामुदाहरति । **सहेलमिति** । प्रकृत्या मधुरं प्रियदर्शनम् । व्यक्तशृङ्गारसूचकोऽन्तःकरणविकारो हेला । तत्सहितं यथा भवति तथा पश्य-

रसप्रादुर्भावाद्युगपदुदयत्सात्विकमहो
मृगाक्ष्यास्तारुण्ये कुसुमशरशिल्पं विजयते ॥ ५९ ॥

भेदान्तरं यथासंभवमुदाहार्यम् ।

गुणालंकाराणां रसमहति काव्ये विलसितं
स्फुरच्छब्दार्थाभ्यां तदपि हृदयानन्दि भवति ।
तयोरप्युन्मेषस्स्रवदमृतमाधुर्यसुभगः
परं पुण्यश्लोकं चरितमनुबध्नन् विजयते ॥ ६० ॥

एष संग्रहश्लोकः ।

न्त्याः अत एव तदात्वे तत्काले प्रियदर्शनसमय इत्यर्थः । प्रत्युद्यन्ति उत्पद्यमानानि विविधानि च ललितानि कर्णकण्डूयनकुचविमर्दनादिकोमलाङ्गविन्यासाः । 'सुकुमाराङ्गविन्यासो ललितं परिकीर्त्यते' इति लक्षणात् । तेषामाटोपेन मधुरमिति स्मरमन्दीकृतव्रीडत्वमुच्यते । रसस्य शृङ्गारस्य प्रादुर्भावादुदयादनुभावादित्यर्थः । 'उत्पन्ना रतिरेकत्र प्रथमं दर्शनादिभिः । हृदारम्भानुभावेन शृङ्गारं विशिनष्टि सा ॥' इति वचनात् । कुसुमशरशिल्पं कामकलाकौशलम् । अत्र दयितावलोकनकाले अङ्गादौ सातिशयविशेषकथनाद्विलासः । 'तत्कालीनो विशेषस्तु विलासोऽङ्गक्रियादिषु ।' इति लक्षणात् ॥ ५९ ॥ विस्तरभयादस्माभिरुपेक्षितानां धीराद्यवस्थानामुदाहरणानि स्वयमेव द्रष्टव्यानीत्याह । **भेदान्तरमिति** । अत्रायं नायिकासंग्रहः । 'स्वान्या साधारणा च स्वा मुग्धा मध्या प्रगल्भिका । आद्यैकधा त्रिधान्ये द्वे धीराधीरोभयात्मना ॥ ज्येष्ठाकनिष्ठाभेदेन ते एव द्विविधे पुनः ॥ अन्या कन्या परोढा च वेश्या त्वेकेति षोडश ॥ स्वाधीनपतिकाद्यष्टावस्थाभिस्ताः समन्विताः ॥ प्रत्येकमष्टधा मुख्या मध्या हीनेति तास्त्रिधा । इत्येवं नायिकावस्थाः समुद्राष्टाग्नि (३८४) सम्मिताः ॥ विरहोत्कण्ठिता चैव विप्रलब्धाभिसारिका । इत्यवस्थात्रयं प्राहुः केचित् कन्यापरोढयोः ॥ चतुःपञ्चाशदधिकत्रिशत्यासां तदा भवेत् ॥' इत्थं प्रसक्तमनुप्रसक्तं च परिसमाप्य परमप्रकृतं पुण्यश्लोकगुणवर्णनमुपस्कुर्वन्नुपसंहरति । **गुणेति** । पुण्यः श्लोको यस्मिंस्तत् पुण्यश्लोकम् । 'पद्ये यशसि च श्लोक' इत्यमरः ॥ ६० ॥

इति पदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलचलमल्लिनाथसूरिसूनुना विश्वजनीनविद्यस्य विद्वन्मणेः पेद्दयार्यस्यानुजेन कुमारस्वामिसोमपीथिना विरचिते प्रतापरुद्रीयव्याख्याने रत्नापणाख्याने नायकनिरूपणं नाम प्रथमं प्रकरणम् ।

*उपस्कारहेतूनां गुणालंकाराणां सदृशेऽलंकार्ये सति चरितार्थत्वम् । यस्यालंकाराश्रयत्वं तदेव लोकन्यायेनालंकार्यम् । तेन गुणालंकाराणां काव्यमेवाश्रयभूतमिति तदेवालंकार्यम् । रसादेरलंकार्यत्वोक्तिः प्राधान्येनात्मन इव हारनूपुराद्यलंकार्यत्वम् । जीवितभूतत्वाद्रसादेः काव्यात्मता । क्वचिद्रसस्य प्राधान्यम् । क्वचिदलंकारस्य प्राधान्यम् । क्वचिद्वस्तुनः प्राधान्यं च ।

रसप्राधान्यं यथा

> ईषदङ्कुरितविभ्रमचारौ देहपल्लवितकान्तिनि तन्व्याः ।
> यौवने मुकुलितस्तनमात्रे पुष्पितश्च फलितश्च मनोभूः ॥६१॥

एतत् कांचिद्बालामालोक्य सस्पृहस्य प्रतापरुद्रस्य वचनम् । अत्र शृङ्गाररसो व्यज्यते ॥

अलंकारप्राधान्यं यथा

> कीर्तौ प्रतापरुद्रस्य विहरन्त्यां दिगन्तरे ।
> लोकालोकतटाः शश्वद्द्रवच्चन्द्रोपलाङ्किताः ॥ ६२ ॥

अत्र चन्द्रकान्तकुट्टिमानां लोकालोकाचलतटानां रुद्रदेवकीर्तौ चन्द्रिकाबुद्ध्या शश्वत् द्रवोऽभूदिति भ्रान्तिमदलंकारो व्यज्यते । व्यङ्ग्यावस्थायामलंकारस्यापि प्राधान्यमस्त्येव ॥

वस्तुप्राधान्यं यथा

> अवतरति वीररुद्रे काकतिवंशे त्रिलोकमहनीये ।
> त्यक्त्वा दुग्धपयोधिं तल्पफणीशः स्वमन्दिरं प्राप्तः ॥ ६३ ॥

अत्र तल्पफणीशः दुग्धाब्धिं विहाय स्वगृहं प्राप्त इत्यनेन क्षीरसमुद्रे हरिर्नास्तीति व्यज्यते । अनेन पुरुषोत्तमः प्रतापरुद्ररूपेण काकतीयकुलेऽवततारेति वस्तु व्यज्यते । इति त्रिविधं व्यङ्ग्यप्राधान्यम् ॥

---

*उपस्कारहेतूनामित्याद्यतिश्लाघाकारणमित्यन्तो ग्रन्थो बहुषु कोशेषु न दृश्यते नापि व्याख्यातः कुमारस्वामिसोमपीथिना ।

काव्यमाश्रित्य गुणालंकाराणां विलासः । तच्च काव्यं शब्दस्फुरणेनार्थस्फुरणेन तदुभयस्फुरणेन च सहृदयहृदयानन्दि भवति ॥

शब्दस्य स्फुरणं नाम प्रौढबन्धस्य डम्बरः ।

यो बन्धाडम्बर आरभट्यां प्रतिपादयिष्यते तच्छब्दस्फुरणम् ।

यथा

क्षोणीरक्षणदक्षिणाः क्षतजगत्क्षोभाद्दुरीक्ष्यक्रमाः
क्षुद्रक्षत्रियपक्षशिक्षणविधौ प्रोत्क्षिप्तकौक्षेयकाः ।
उद्दामोद्यमनस्य रुद्रनृपतेर्दोर्दण्डयोश्चण्डयो-
र्गर्जद्दुर्जनगर्वपर्वतभिदादम्भोळयः केळयः ॥ ६४ ॥

अचुम्बितार्थसंपत्तिरर्थस्फुरणमिष्यते ॥

यथा

*खग्गे जुज्झविजिम्भिए रिवुमहीणाहांजलिं विंविअं
पेक्खंतो जअलच्छिवासकमलं मण्णंति विण्णाणिणो ।
मण्णे वीरपआवरुद्दविहुणो जण्णेसु घेत्तुं उणो
सिट्ठीए रिपुजीविआइ विहिणो पत्तस्य पीढंबुअम् ॥६५॥

उभयस्फुरणं यथा

उद्यद्बृंहितगर्जितैः करिघटाकादम्बिनीडम्बरैः
क्षोणीभृत्कटकोपरोधपटुभिः सद्यः स्फुरद्दिक्तटैः ।
प्रावृट्संभ्रमशंसिनो रिपुवधूबाष्पोद्भवं दुर्दिनं
कुर्वन्तश्चलमर्तिगण्डनृपतेर्जैत्रप्रयाणोद्यमाः ॥ ६६ ॥

एवंविधशब्दार्थस्फुरणाभ्यां काव्यस्य चारुत्वम् । शब्दार्थयोरपि पुण्यश्लोकचरितवर्णनेन सहृदयहृदयानन्दित्वम् । अतो नायकस्यैव काव्ये प्राधान्यम् ।

---

*खड्गे युद्धविजृम्भिते रिपुमहीनाथाञ्जलिं विम्बितं
प्रेक्षमाणाः जयलक्ष्मिवासकमलं मन्यन्ते विज्ञानिनः ।
मन्ये वीरप्रतापरुद्रविभोर्जन्येषु ग्रहीतुं पुनः
सृष्ट्यै रिपुजीवितानि विधेः प्राप्तस्य पीठाम्बुजम् ॥

कुलाचारयशःशौर्यश्रुतशीलादिवर्णनम् ।
क्रियते नेतुरेवं यत्तदेव बहुसंमतम् ॥ ६७ ॥
अथवा प्रतिपक्षस्य वर्णयित्वा गुणान् बहून् ।
तज्जयान्नायकोत्कर्षवर्णनं च मतम् क्वचित् ॥ ६८ ॥

यथाक्रममुदाहरणम् ।

तत्वं यस्स परः पुमानवतरो यस्यान्वये काकति-
क्ष्मापानां चरितं च यस्य भुवनक्षेमंकरप्रक्रमम् ।
श्लाघा यस्य लघूकृतामरतरुस्वर्धेनुचिन्तामणिः
सोऽयं विश्वधुरंधरो विजयते श्रीवीररुद्रो नृपः ॥

यत्तेजः प्रतिपक्षभूपविहरद्गर्वान्धकारातपो
यद्दोरर्गलविक्रमास्त्रिजगतीशुद्धान्तदौवारिकः ।
सोऽप्यासाद्युधि सेवणक्षितिपतिः सन्नाहभेरीध्वनिं
श्रुत्वा रुद्रनरेश्वरस्य महतो भीतः पलाय्याकुलः॥ ७० ॥

एवंविधवर्णनमुत्पाद्ये नायके न घटते । तस्य लोकप्रसिद्ध्यर्थं कुलव्यपदेशादयो बहुधा वर्णयितुमेवोचिताः । स्वतःसिद्धे तु नायके द्वैविध्यमपि संभवति । तस्य कुलव्यपदेशादीनां लोकप्रसिद्धत्वात् कविभिर्बलवत्प्रतिपक्षविजयवर्णनं युक्तम् । एवं स्वतःसिद्धोत्पाद्यत्वभेदेन नायकस्य द्वैविध्यम् । तत्र च

धीरोद्धते यथा रौद्रो वर्ण्यते बाह्यसंभ्रमः ।
यथा च धीरललिते शृङ्गारो बहुभावकृत् ॥ ७१ ॥
न धीरोदात्तविषये तथा वर्णनमिष्यते ।
कार्यतो रससंपूर्तिस्तस्मिन्नप्युचितक्रमा ॥ ७२ ॥
हास्यादीनां तथान्येषां रसानामपि कीर्तनम् ।
मन्दोद्यमानुभावं स्याद्धीरोदात्ते तु नेतरि ॥ ७३ ॥

सर्वनायकातिशयत्वाद्धीरोदात्तस्य तद्विषयत्वं प्रबन्धानामतिश्लाघाकारणम् ॥

इति श्रीविद्यानाथकृतौ प्रतापरुद्रयशोभूषणालङ्कारशास्त्रे नायकप्रकरणम् समाप्तम् ॥

*उपस्कारहेतूनां गुणालंकाराणां सद्दशेऽलंकार्ये सति चरितार्थत्वम् । यस्यालंकाराश्रयत्वं तदेव लोकन्यायेनालंकार्यम् । तेन गुणालंकाराणां काव्यमेवाश्रयभूतमिति तदेवालंकार्यम् । रसादेरलंकार्यत्वोक्तिः प्राधान्येनात्मन इव हारनूपुराद्यलंकार्यत्वम् । जीवितभूतत्वाद्रसादेः काव्यात्मता । क्वचिद्रसस्य प्राधान्यम् । क्वचिदलंकारस्य प्राधान्यम् । क्वचिद्वस्तुनः प्राधान्यं च ।

रसप्राधान्यं यथा

ईषदङ्कुरितविभ्रमचारौ देहपल्लवितकान्तिनि तन्व्याः ।
यौवने मुकुलितस्तनमात्रे पुष्पितश्च फलितश्च मनोभूः ॥६१॥

एतत् कांचिद्बालामालोक्य सस्पृहस्य प्रतापरुद्रस्य वचनम् । अत्र शृङ्गाररसो व्यज्यते ॥

अलंकारप्राधान्यं यथा

कीर्तौ प्रतापरुद्रस्य विहरन्त्यां दिगन्तरे ।
लोकालोकतटाः शश्वद्द्रवच्चन्द्रोपलाङ्किताः ॥ ६२ ॥

अत्र चन्द्रकान्तकुट्टिमानां लोकालोकाचलतटानां रुद्रदेवकीर्तौ चन्द्रिकाबुद्ध्या शश्वत् द्रवोऽभूदिति भ्रान्तिमदलंकारो व्यज्यते । व्यङ्ग्यावस्थायामलंकारस्यापि प्राधान्यमस्त्येव ॥

वस्तुप्राधान्यं यथा

अवतरति वीररुद्रे काकतिवंशे त्रिलोकमहनीये ।
त्यक्त्वा दुग्धपयोधिं तल्पफणीशः स्वमन्दिरं प्राप्तः ॥ ६३ ॥

अत्र तल्पफणीशः दुग्धाब्धिं विहाय स्वगृहं प्राप्त इत्यनेन क्षीरसमुद्रे हरिर्नास्तीति व्यज्यते । अनेन पुरुषोत्तमः प्रतापरुद्ररूपेण काकतीयकुलेऽवततारेति वस्तु व्यज्यते । इति त्रिविधं व्यङ्ग्यप्राधान्यम् ॥

---

*उपस्कारहेतूनामित्याद्यतिश्लाघाकारणमित्यन्तो ग्रन्थो बहुषु कोशेषु न दृश्यते नापि व्याख्यातः कुमारस्वामिसोमपीथिना ।

काव्यमाश्रित्य गुणालंकाराणां विलासः । तच्च काव्यं शब्दस्फुरणेनार्थस्फुरणेन तदुभयस्फुरणेन च सहृदयहृदयानन्दि भवति ॥

शब्दस्य स्फुरणं नाम प्रौढबन्धस्य डम्बरः ।

यो बन्धाडम्बर आरभट्यां प्रतिपादयिष्यते तच्छब्दस्फुरणम् ।

यथा

क्षोणीरक्षणदक्षिणाः क्षतजगत्क्षोभाद्दुरीक्ष्यक्रमाः
क्षुद्रक्षत्रियपक्षशिक्षणविधौ प्रोत्क्षिप्तकौक्षेयकाः ।
उद्दामोद्यमनस्य रुद्रनृपतेर्दोर्दण्डयोश्चण्डयो-
र्गर्जद्दुर्जनगर्वपर्वतभिदादम्भोळयः केळयः ॥ ६४ ॥

अचुम्बितार्थसंपत्तिरर्थस्फुरणमिष्यते ॥

यथा

*खग्गे जुज्झविजिम्भिए रिवुमहीणाहांजलिं विंविअं
पेक्खंतो जअलच्छिवासकमलं मण्णंति विण्णाणिणो ।
मण्णे वीरपआवरुद्दविहुणो जण्णेसु घेत्तुं उणो
सिट्ठीए रिपुजीविआइ विहिणो पत्तस्य पीढंवुअम् ॥ ६५ ॥

उभयस्फुरणं यथा

उद्यद्बृंहितगार्जितैः करिघटाकादम्बिनीडम्बरैः
क्षोणीभृत्कटकोपरोधपटुभिः सद्यः स्फुरद्दिक्तटैः ।
प्रावृट्संभ्रमशंसिनो रिपुवधूबाष्पोद्भवं दुर्दिनं
कुर्वन्तश्चलमर्तिगण्डनृपतेर्जैत्रप्रयाणोद्यमाः ॥ ६६ ॥

एवंविधशब्दार्थस्फुरणाभ्यां काव्यस्य चारुत्वम् । शब्दार्थयोरपि पुण्यश्लोकचरितवर्णनेन सहृदयहृदयानन्दित्वम् । अतो नायकस्यैव काव्ये प्राधान्यम् ।

---

*खड्गे युद्धविजृम्भिते रिपुमहीनाथाञ्जलिं विम्बितं
प्रेक्षमाणाः जयलक्ष्मिवासकमलं मन्यन्ते विज्ञानिनः ।
मन्ये वीरप्रतापरुद्रविभोर्जन्येषु ग्रहीतुं पुनः
सृष्टयै रिपुजीवितानि विधेः प्राप्तस्य पीठाम्बुजम् ॥

कुलाचारयशःशौर्यश्रुतशीलादिवर्णनम् ।
क्रियते नेतुरेवं यत्तदेव बहुसंमतम् ॥ ६७ ॥
अथवा प्रतिपक्षस्य वर्णयित्वा गुणान् बहून् ।
तज्जयान्नायकोत्कर्षवर्णनं च मतम् क्वचित् ॥ ६८ ॥

यथाक्रममुदाहरणम् ।

तत्वं यस्स परः पुमानवतरो यस्यान्वये काकति-
क्ष्मापानां चरितं च यस्य भुवनक्षेमंकरप्रक्रमम् ।
श्लाघा यस्य लघूकृतामरतरुस्वर्धेनुचिन्तामणिः
सोऽयं विश्वधुरंधरो विजयते श्रीवीररुद्रो नृपः ॥
यत्तेजः प्रतिपक्षभूपविहरद्गर्वान्धकारातपो
यद्दोरर्गलविक्रमस्त्रिजगतीशुद्धान्तदौवारिकः ।
सोऽप्यासाद्युधि सेवणक्षितिपतिः सन्नाहभेरीध्वनिं
श्रुत्वा रुद्रनरेश्वरस्य महतो भीतः पलाय्याकुलः॥ ७० ॥

एवंविधवर्णनमुत्पाद्ये नायके न घटते । तस्य लोकप्रसिद्ध्यर्थं कुलव्यपदेशादयो बहुधा वर्णयितुमेवोचिताः । स्वतःसिद्धे तु नायके द्वैविध्यमपि संभवति । तस्य कुलव्यपदेशादीनां लोकप्रसिद्धत्वात् कविभिर्बलवत्प्रतिपक्षविजयवर्णनं युक्तम् । एवं स्वतःसिद्धोत्पाद्यत्वभेदेन नायकस्य द्वैविध्यम् । तत्र च

धीरोद्धते यथा रौद्रो वर्ण्यते बाह्यसंभ्रमः ।
यथा च धीरललिते शृङ्गारो बहुभावकृत् ॥ ७१ ॥
न धीरोदात्तविषये तथा वर्णनमिष्यते ।
कार्यतो रससंपूर्तिस्तस्मिन्नप्युचितक्रमा ॥ ७२ ॥
हास्यादीनां तथान्येषां रसानामपि कीर्तनम् ।
मन्दोद्यमानुभावं स्याद्धीरोदात्ते तु नेतरि ॥ ७३ ॥

सर्वनायकातिशयत्वाद्धीरोदात्तस्य तद्विषयत्वं प्रबन्धानामतिश्लाघाकारणम् ॥

इति श्रीविद्यानाथकृतौ प्रतापरुद्रयशोभूषणालङ्कारशास्त्रे नायकप्रकरणम् समाप्तम् ॥

SSMV

॥ अथ काव्यप्रकरणम् ॥

॥ अथ काव्यस्वरूपनिरूपणम् ॥

गुणालंकारसहितौ शब्दार्थौ दोषवर्जितौ ।
गद्यपद्योभयमयं काव्यं काव्यविदो विदुः ॥ १ ॥

*अदोषौ सगुणौ सालंकारौ शब्दार्थौ काव्यमिति काव्यसामान्यलक्षणम् ।

अथ प्रासङ्गिकं नायकस्वरूपं निरूप्य प्रकृतं काव्यस्वरूपनिरूपणं प्रतिजानीते । **अथेति** । काव्यसामान्यलक्षणमाह । **गुणेति** । अत्र गद्यपद्येत्यादिना काव्यस्य त्रेधा विभागो दर्शितः । शेषं लक्षणम् । अतस्तदेव निष्कृष्याह । **अदोषाविति** । अत्र सूत्रे प्रथममनुपात्तस्यापि दोषवर्जनस्यादौ व्याख्यानमल्पोऽपि दोषः प्रमादादिनाप्यनुपेक्ष्य इति द्योतयितुम् । तदुक्तं दण्डिना 'तदल्पमपि नोपेक्ष्यं काव्ये दुष्टं कथंचन । स्याद्वपुस्सुन्दरमपि श्वित्रेणैकेन दुर्भगम् ॥' इति । 'एको हि दोषो गुणसंनिपाते निमज्जतीन्दोः किरणेष्विवाङ्कः' ॥ इति तु काव्यव्यतिरिक्तविषयमिति द्रष्टव्यम् ॥ १ ॥ अथ वक्ष्यमाणलक्षणशब्दार्थादि-

---

*इदं च काव्यलक्षणं मम्मटाचार्यैरङ्गीकृतं, साहित्यदर्पणे रसगंगाधरे च बहुधा खण्डितम् । न्यक्कारोह्ययमेवेति पद्ये विधेयाविमर्शदोषस्य सत्वेऽपि ध्वनित्वेनोत्तमकाव्यत्वाङ्गीकरणात् अदोषत्वपदस्य काव्यलक्षणकोटौ प्रवेशानौचित्यं, रसधर्मस्य गुणस्य शब्दार्थधर्मत्वासम्भवात् औपचारिकशब्दार्थधर्मत्वकल्पनाया अपि लोकविरुद्धत्वात् सगुणत्वविशेषणस्यापि लक्षणतानवच्छेदकत्वम्, कटककुण्डलादिसंमितस्यालंकारस्य काव्यत्वव्यापकतानियमे मानाभावात् सालंकारत्वरूपलक्षणस्य लक्ष्यतावच्छेदकाव्यापकत्वं च सर्वमपि सूपपादितं साहित्यदर्पणे । रसगंगाधरस्तु शब्दार्थयुगळघटितार्थपदप्रयोगमपि नानुमनुते । अर्थरूपेऽभिधेये काव्यशब्दस्य शक्तेः निघण्टुषु अप्रसिद्धत्वात्, काव्यं पठितं काव्यं श्रुतं अर्थस्तु न ज्ञातः इत्यादिसर्वजनीनप्रयोगान्यथानुपपत्त्या च काव्यस्य अर्थात्पार्थक्यमङ्गीकरणीयमेवेति अर्थपदस्यापि लक्षणे प्रवेशोऽनुपपन्न इत्यतः, अलंकाराणामसत्वेऽपि काव्यत्वमव्याहतमित्यतः, रसधर्माणां गुणालंकारदोषाणां शब्दार्थधर्मत्वकल्पनमसंगतामित्यतश्च लक्षणमेतत्सर्वथोपेक्षणीयमित्यभिप्रैति । वाक्यं रसात्मकं काव्यम् इति काव्यसामान्यलक्षणं साहित्यदर्पणे । चमत्कारजनकभावनाविषयार्थप्रीतिपादकशब्दः काव्यमिति रसगंगाधरे ॥

शब्दार्थौ मूर्तिराख्यातौ जीवितं व्यङ्ग्यवैभवम् ।
हारादिवदलंकारास्तत्र स्युरुपमादयः ॥ २ ॥
श्लेषादयो गुणास्तत्र शौर्यादय इव स्थिताः ।
आत्मोत्कर्षावहास्तत्र स्वभावा इव रीतयः ॥ ३ ॥
शोभामाहार्यिकीं प्राप्ता वृत्तयो वृत्तयो यथा ।
पदानुगुण्यविश्रान्तिः शय्या शय्येव संमता ॥ ४ ॥
रसास्वादप्रभेदाः स्युः पाकाः पाका इव स्थिताः ।
प्रख्याता लोकवदियं सामग्री काव्यसंपदः ॥ ५ ॥

वाचकलक्षकव्यञ्जकत्वेन त्रिविधं शब्दजातम् । वाच्यलक्ष्यव्यङ्ग्यत्वेनार्थजातमपि त्रिविधम् । तात्पर्यार्थोऽपि व्यङ्ग्यार्थ एव न पुनः

काव्यसामग्र्यां शरीरादिलोकसामग्रीमारोपयति । **शब्दार्थावित्यादि** । स्वभावा जातिप्रयुक्तधर्माश्चेष्टादयः । आहार्यिकीं कृत्रिमाम् । वृत्तयो वर्तनानि । पदानामानुगुण्यं पदविनिमयासहिष्णुत्वम् । रसः शृङ्गारादिरास्वाद्यते येन गाम्भीर्येण तस्य विशेषाः रसास्वादप्रभेदाः ॥ २—५ ॥ अथ यथायोगं विवेचयन् आदौ तावच्छब्दार्थौ विभजते । **वाचकेत्यादिना** । क्रमेणाभिधालक्षणाव्यञ्जनाव्यापारैरर्थावबोधकाः शब्दा वाचकलाक्षणिकव्यञ्जकाः । तैरेव बोध्या अर्था वाच्यलक्ष्यव्यङ्ग्या इति विवेकः । ननु चतुर्थे तात्पर्यार्थे जाग्रति कथमर्थत्रैविध्योक्तिरित्याशङ्क्य तस्य तृतीयेऽन्तर्भाव इत्याह । **तात्पर्यार्थ इति** । अत्र वक्तृबुद्धिसंनिधापितो वाक्यावगम्यो वाक्यार्थो रसादिरूपस्तच्छब्देनोच्यते । तस्मिन् परास्तत्परास्तदासक्तास्तद्विषया इत्यर्थः । तेषां भावस्तात्पर्यम् । नन्वभिहितानां पदार्थानामर्थाभिधायिनां वा पदानां विशिष्टार्थप्रत्यायनशक्तिस्तात्पर्यमिति मतभेदेन मीमांसका वर्णयन्ति । अतस्तन्मते देवदत्त गामानयेत्यादौ देवदत्तकर्तृकदण्डकरणकगोकर्मकानयनरूपो विशिष्टार्थ एव व्यङ्ग्यत्वविधुरस्तात्पर्यादवगतत्वात् तात्पर्यार्थ इत्युच्यते कथमस्य व्यङ्ग्येऽन्तर्भाव इति चेत् सत्यम् । न हि तावन्मात्रे कविसंरम्भविश्रान्तिः । काव्यशब्दानामन्वयव्यतिरेकाभ्यां प्रवृत्तिनिवृत्तिविषयभूतस्य प्रधानस्य प्रयोजनान्तरस्यासम्भवात् । किं तु तदर्थन्यक्कारेण प्रतीयमाने सामाजिकानन्दास्वादफले रसादावर्थान्तरे । अतः स एव तात्पर्यार्थः । तत्प्रत्यायकपदार्थशक्तिरेव तात्पर्यम् कविसमये । तच्च नाभिधा । स्वार्थे संकेताभावात् । नापि लक्षणा । मुख्यार्थबाधाद्यभावात् । अतो वक्ष्यमाणलक्षणस्य व्यञ्जनस्यैवेदं नामान्तरकरणमिति तदर्थस्य व्यङ्ग्यार्थत्वमेवेति भावः । तर्ह्यत्र संसर्गरूपो वाक्यार्थः कथं प्रतीयत इति चेत् तार्किकाणामिव वाक्यमहिम्ना न पुनस्तात्पर्येण मीमांसकानामिवेति ब्रूमः । अत एव ते

पृथग्भूतः । अभिधालक्षणाव्यञ्जनाख्यास्तिस्रः शब्दवृत्तयः । गौणवृत्तिरपि लक्षणाप्रभेद एव । संबन्धानुपपत्तिमूलकत्वात् । यथाग्निर्मा-

---

वर्णयन्ति । आकाङ्क्षादिमत्वे सति पदानां पदार्थानां वा समन्वयशक्तिर्वाक्यं तद्बलायातो वाक्यार्थः । तात्पर्यार्थस्तु परिणातिविरसं पनसफलं परिणातिसरसमाम्रफलमित्यादिनिन्दाप्रशंसादिवाक्येषु हानोपादानादिरूप एव नान्यः तात्पर्यमपि भावाभिप्रायाद्यपरपर्यायम् । उद्देशो नाम वक्तृधर्मो न मीमांसकानामिव वाक्यधर्म इति । तदेतदुदयनाचार्यैः कुसुमाञ्जलौ 'उद्देश एव तात्पर्यम्' इत्येतच्छ्लोकव्याख्यानावसरे प्रतिपादितम् । यद्वा वैयासिकदेवताधिकरणे अर्थान्तराभावे संसर्ग एव तात्पर्यार्थः तत्सद्भावे तत्रैव प्रतीतिविश्रान्तेः स एव तात्पर्यार्थो न संसर्ग इति प्रतिपादितं । तद्वदत्रापि द्रष्टव्यम् । काव्ये संसर्गमात्रविश्रान्तिर्न संभवतीत्युक्तम् । तर्हि 'अव्यङ्ग्यमपरं स्मृतम्' इति काव्यप्रकाशवचनस्य का गतिरिति चेन्नैष दोषः अव्यङ्ग्यमित्यत्रानुदरा कन्येतिवन्नञः ईषदर्थत्वेनास्फुटव्यङ्ग्यत्वस्य विवक्षितत्वात् । तदुक्तमलंकारसुधानिधौ 'अनुल्वणत्वाद्व्यङ्ग्यानामव्यङ्ग्यं चित्रमीरितम् । व्यङ्ग्यस्यात्यन्तविच्छेदः काव्ये कुत्रापि नेष्यते ॥' इति । एवं च सति प्राचीनालंकारशास्त्रकाराणां संसर्गरूपवाक्यार्थस्य तात्पर्यार्थत्वेन प्रतिपादनं मतान्तराभिप्रायेणेति द्रष्टव्यम् । अत एवोक्तं काव्यप्रकाशे 'तात्पर्यार्थोऽपि केषुचित्' इति । उक्तं च सुधानिधौ । 'अस्मन्मतं तात्पर्यव्यापारापेक्षं न भवति' इति । विद्याधरेणाप्युक्तम् । 'तात्पर्यं नाम व्यापारान्तरं परैरभ्युपगतम्' इति । तस्माद्व्यञ्जनापरपर्यायमेव तात्पर्यं कविभिरङ्गीकृतं नान्यदिति सिद्धम् । अत एवोक्तं भावप्रकाशे 'अतो ध्वन्याख्यतात्पर्यगम्यमानत्वतः स्वतः । काव्ये रसालंक्रियादिर्वाक्यार्थो भवति स्फुटम् ॥' इति । उक्तं च ध्वन्याचार्यैः । 'यत्त्वभिप्रायविशेषरूपं व्यङ्ग्यं शब्दार्थाभ्यां प्रकाश्यते तद्भवति विवक्षितं तात्पर्येण प्रकाश्यमानम्' इति । वृत्तयोऽपि त्रिविधा इत्याह । **अभिधेति** । गौणवृत्तिर्लक्षणातो भिन्नेति प्राभाकराः । तदयुक्तम् । तस्या लक्षणायामन्तर्भावादित्याह । **गौणवृत्तिरिति** । गुणनिमित्ता वृत्तिर्गौणवृत्तिरित्यर्थः । अत्र हेतुमाह । **संबन्धेति** । लक्षणाया अपि तथात्वादिति भावः । मुख्यार्थयोगः संबन्धः । तद्बाधोऽनुपपत्तिः । अग्निर्माणवक इत्यत्राग्निलक्षितपैङ्गल्यादिगुणसामान्ययोगः संबन्धः । अनग्नावग्निशब्दप्रयोगोऽनुपपत्तिः । अत्रोभयनिष्ठस्य गुणसामान्यरूपस्य गुणविशेषरूपस्य वा सादृश्यस्य संबन्धरूपत्वम् तस्य चोभयनिरूपणीयत्वसाधर्म्येणोपचारात् । तदुक्तं वाक्यपदीये 'सादृश्यमात्रं सामान्यं द्विष्ठं कैश्चित् प्रतीयते । गुणभेदोऽप्यभेदेन द्विवृत्तिर्वा विवक्षितः ॥' इति । ननु गौण्यां यथा संबन्धस्य लक्ष्यविशेषणत्वेनान्वयो न तथा लक्षणायाम् । अतः कथमनयोः संबन्धमूलकत्वसाम्यमित्याशङ्क्य लक्षणायामपि संबन्धस्य विशेषणत्वं सदृष्टान्तमाह । **यथाग्निरिति** । अत्र सादृश्यस्य माणवकनिष्ठत्वात्

णवक इत्यत्राग्निसादृश्यविशिष्टमाणवकप्रतिपत्तिर्विवक्षिता । तथैव गङ्गायां घोष इत्यत्र गंगासंबन्धविशिष्टतीरप्रतिपत्तिर्विवक्षिता । गंगासंबन्धस्योपलक्षणत्वे घोषगतपवित्रत्वाद्यसिद्धेः । अत एव सादृश्यनिबन्धना संबन्धनिबन्धना चेति द्विविधा लक्षणा । संबन्धनिबन्धना जहद्वाच्या अजहद्वाच्या चेति द्विविधा । सादृश्यनिबन्धना सारोपा साध्यवसाया चेति द्विविधा । एवं लक्षणा चतुर्विधा । कैशिक्यारभटी

तस्य तद्विशिष्टत्वम् । अन्यत्र गङ्गाशब्दबोध्यत्वहेतुकप्रवाहात्मकप्रतीतिविषयत्वमेव तीरस्यापि गङ्गासंबन्धविशिष्टत्वम् । एवं च स्रोतस्तीरयोरेकशब्दबोध्यत्वेन तादात्म्यप्रतीतेः स्रोतोधर्मा अत्यन्तपावनत्वादयस्तीरे प्रतीयन्त इति प्रयोजनसिद्धिः । एवमनङ्गीकारे तदसिद्धिरेव बाधिकेत्याह । **गङ्गासंबन्धस्येति** । उपलक्षणत्व इति नेदं समुद्रादितीरं किं तु गङ्गातीरमिति गङ्गासंबन्धमात्रप्रतीतावित्यर्थः । **घोषगतेति** । तीरद्वारेति भावः । तथा सति गङ्गातीरे घोष इति मुख्यशब्दाभिधानाल्लक्षणाया भेदो न स्यादिति हृदयम् । न च मा भूद्भेद इति वक्तुं युक्तम् । तथा सति मुख्ये संभवति गौणस्यान्याय्यत्वात् सर्वसंप्रतिपन्ना लक्षणैवोत्सीदेदिति । अनेन संबन्धानुपपत्तिप्रयोजनानां त्रयाणामपि लक्षणाबीजत्वमुक्तम् । तस्या विभागमाह । **अत एवेति** । निमित्तभेदादित्यर्थः । अत्र सादृश्यशब्देनारोपाध्यवसायहेतवोऽन्येऽपि कार्यकारणभावादयः संबन्धा उपलक्ष्यन्ते । संबन्धशब्देन तद्व्यतिरिक्ता गोबलीवर्दन्यायेनोच्यन्ते । द्वयोरपि प्रत्येकं द्वैविध्यमाह । **संबन्धेत्यादि** । अत्र यद्यपि सारोपसाध्यवसाययोः सादृश्यनिमित्तत्वे गौणत्वं गौर्वाहीको गौरयमित्यादौ कार्यकारणभावादिसंबन्धान्तरनिमित्तत्वे तु शुद्धत्वमायुर्घृतमायुरेवेदमित्यादौ एवं चातुर्विध्ये जहदजहल्लक्षणाभ्यां सह षोढा लक्षणेति काव्यप्रकाशकारस्तथापि मुख्यार्थस्य हानोपादानारोपाध्यवसायलक्षणोपाधिवशाच्चातुर्विध्यमेव लक्षणायाः । आयुर्घृतमायुरेवेदमित्यादावपि गौणत्वस्यैव सुकल्पत्वाच्च । तदुक्तमलंकारचूडामणौ । 'यत्र वस्त्वन्तरे वस्त्वन्तरमुपचर्यते स गौणोऽर्थः । यत्र न तथा स लक्ष्य इति विवेकः' इति । कुशलप्रवीणादिशब्दानां तु साक्षात् संकेतविषयत्वेन मुख्यत्वान्न रूढिहेतुकत्वं लक्षणाया इत्याचार्यहेमचन्द्रः । रूढिपक्षाश्रयणे तु प्रयोजनलक्षणापेक्षं चातुर्विध्यमिति विज्ञेयम् । ननु कैशिक्यादिवृत्तीनां विद्यमानत्वात् कथं तिस्रः शब्दवृत्तय इत्याशङ्क्य शब्दसंदर्भाश्रितत्वात्तासामशब्दवृत्तित्वमित्यभिप्रायेणाह । **कैशिकीति** । रसाद्यनुगुणत्वेनौचित्यवानर्थव्यापारः कैशिक्यादिः । तादृश एव शब्दव्यापारो वैदर्भ्यादिः । तदुक्तं ध्वन्याचार्यैः । 'रसाद्यनुगुणत्वेन व्यवहारोऽर्थशब्दयोः । औचित्यवान् यस्ता एव वृत्तयो द्विविधाः स्थिताः ॥'

सात्वती भारती चेति रचनाश्रितत्वेन रसावस्थानसूचकाश्चतस्रो वृत्तयः । तथाचोक्तं दशरूपके

कैशिक्यारभटी चैव सात्वती भारती तथा ।
चतस्रो वृत्तयो ज्ञेया रसावस्थानसूचकाः ॥

इति । रचनाया अपि रसव्यञ्जकत्वं प्रसिद्धम् । रसाननुगुणवर्णरचनाया दोषत्वमुक्तम् । वैदर्भीप्रभृतयो रीतिविशेषा न वृत्तिष्वन्तर्भूताः । **तत्र संकेतितार्थगोचरः शब्दव्यापारोऽभिधा** । सा द्विविधा रूढिपूर्विका योगपूर्विका चेति । रूढिपूर्विका यथा ।

तपोविशेषैः प्रथितैः प्रजानां शुभैश्चरित्रैर्जगतीमहिष्याः ।

इति । एवं कैशिक्यादीनामर्थप्राधान्येऽपि नान्तरीयकाणां शब्दानां यथायोगं वैदर्भ्यादिसापेक्षत्वस्य धनिकादिभिः प्रतिपादनाद्रचनाश्रितत्वमित्यनुसंधेयम् । कैशिक्यादीनां रसव्यञ्जकत्वस्य रचनाधीनत्वात् तस्यास्तथात्वमन्वयव्यतिरेकाभ्यां दर्शयति । **रचनाया अपीति । प्रसिद्धमिति** । काव्यालोकादाविति शेषः । तदुक्तम् । 'यस्य लक्ष्यक्रमव्यङ्ग्यो ध्वनिर्वर्णपदादिषु । वाक्ये संघटनायां च स प्रबन्धेऽपि दीप्यते ॥' इति । यद्यपि विभावादीनामेव रसव्यञ्जकत्वं रचनादीनान्तु विभावादिसहकारित्वमेव अत एवोक्तं लोचने । 'सहकारित्वमेवाभिधातुं संघटनायामित्यादौ सप्तमीनिर्देशः' इति तथाप्यौपचारिकं रसव्यञ्जकत्वामिति बोद्धव्यम् । **दोषत्वमिति** 'रसस्य स्याद्विरोधाय वृत्त्यनौचित्यमेव च' इति वचनाद्रसभङ्गहेतुत्वादिति भावः । अथ प्रसंगाद्वैदर्भ्यादीनां वक्ष्यमाणं कैशिक्याद्यनन्तर्भावमधुना प्रतिजानीते । **वैदर्भीप्रभृतय इति** । अथोद्देशक्रमानुसारेणाभिधालक्षणमाह । **तत्रेति** । संकेतः शब्दार्थयोः संबन्धावधारणं स कृतो यस्य स संकेतितोऽर्थोऽत्र जातिगुणक्रियाद्रव्यात्मकः केवलजातिर्जात्यालक्षितव्यक्तिरन्यापोहो वा मतभेदात् । सार्वपथीनाः खलु कवयो भवन्ति । विशेषणद्वयेन व्यञ्जनचेष्टयोः क्रमेण व्युदासः । लक्षणायास्तु द्वयोरन्यतरेणेति विवेकः । लक्ष्येऽपि संकेतोऽस्तीत्यन्विताभिधानवादिनः । तन्मते शब्दव्यापारपदेनैवेति विशेषः । अशब्दव्यापारो लक्षणेति वक्ष्यते । अभिधां विभजते । **सेति** । रूढिरश्वकर्णादिवदवयवार्थाभावेन समुदायप्रसिद्धिः । तदुक्तमाचार्यैः । 'असत्स्ववयवार्थेषु योऽन्यत्रार्थे प्रयुज्यते । तत्रानन्यगतित्वेन समुदायः प्रसिध्यति ॥' इति । योगः प्रोक्षण्यादौ प्रकृष्टोक्षणकरणत्वादिवदवयवप्रसिद्धिः । आद्यामुदाहरति । **तप इति** । तपोविशेषैः कृच्छ्रचान्द्रायणादिभिः । जगतीमहिष्या भूकान्तायाः शुभैश्चरित्रैः पुरन्ध्रीसाध्यैर्गौरीव्रतादिभिरस्य भुवनस्य मध्यमलोकस्य

भाग्यैः प्रभूतैर्भुवनस्य चास्य विभर्ति राज्यं वरवीररुद्रः॥६॥

अत्र सर्वे शब्दा रूढाः। योगपूर्विका यथा।

राज्ञि रुद्रनराधीशे रञ्जयत्यखिलाः प्रजाः।
भूरन्वर्था वसुमती रत्नगर्भा स्थिरेति च ॥ ७ ॥

अत्र वसुमतीरत्नगर्भेत्येवमादयो यौगिकाः।

वाच्यार्थानुपपत्त्या तत्संबन्धिन्यारोपितः शब्दव्यापारो लक्षणा।

तत्र जहल्लक्षणा यथा।

जेतुः काकतिभूभर्तुराकर्ण्य पटहध्वानिम्।
सासन्तनगराण्युच्चैराक्रोशन्ति समन्ततः ॥ ८ ॥

अत्र नगराण्युच्चैराक्रोशन्तीति वाच्यस्यानन्वयः। अचेतनानामाक्रोशस्यासंभवात्।

अजहल्लक्षणा यथा।

पत्युः काकतिनाथस्य पादपीठीमनारतम्।
स्फुरद्रत्नप्रभाजालैरलंकुर्वन्ति मौलयः ॥ ९ ॥

भाग्यैरदृष्टपरिपाकैः। अत्र तपःप्रभृतिनिमित्तभेदाद्विच्छित्तिविशेषं वक्तुं मध्यमलोक एव समष्टिव्यष्टिभ्यामाश्रितः प्रजापृथिवीव्यतिरिक्तमध्यमलोकासंभवादिति द्रष्टव्यम्। अत्र तपःप्रभृतीनामवयवार्थाभावाद्रूढत्वे न कोऽपि विवादः। प्रजादिशब्दानामवयवार्थसद्भावेन यौगिकत्वेऽपि रूढिर्योगमपहरतीति शब्दशक्तिस्वाभाव्यादर्थान्तरे प्रयोगनिवारणान्निर्मन्थ्यपङ्कजादिवद्रूढत्वमभिमतमेवेत्याशयेनाह। **अत्र सर्व इति** ॥ ६ ॥ द्वितीयामुदाहरति। **राज्ञीति**। अत्र वसुमत्यादिशब्दानां धनवत्ताद्यवयवार्थसद्भावाद्यौगिकत्वमित्याह। **अत्रेति** ॥ ७ ॥ लक्षणां लक्षयति। **वाच्येति**। वाच्यार्थानुपपत्त्या मुख्यार्थबाधेन हेतुना तत्संबन्धिनि मुख्यार्थसंबन्धे विषये आरोपितः शब्दव्यापारो लक्षणेत्यर्थः। अत्र यद्यपि स्वार्थं प्रत्याय्योपरतव्यापारस्य शब्दस्य पुनर्व्यापारान्तरायोगादर्थ एव लक्षक इत्यर्थव्यापारो लक्षणा तथापि वाच्यधर्मो वाचक उपचर्यत इति लक्षणायाः शब्दवृत्तित्वव्यवहार इति विज्ञेयम्। अत्र तावत् पूर्वोक्तविभागक्रमेण जहल्लक्षणामुदाहरति **जेतुरिति**। अत्राक्रोशासिद्ध्यर्थं नगरशब्दः स्वार्थं हित्वा तद्वासिनः प्राणिनो लक्षयतीत्येषा जहल्लक्षणा। तत्रत्यप्राणिमात्रभयप्रतीतिः प्रयोजनम्। मुख्यार्थबाधं व्यनक्ति। **अत्रेति** ॥ ८ ॥ अजहल्लक्षणामुदाहरति। **पत्युरिति**। **पादपीठीमिति**। अल्पं पीठं पीठी। गौरादित्वात् ङीष्। अत्र

अत्रालंकारसिद्ध्यर्थं मौलिभिस्तदाश्रयभूता नृपतयो लक्ष्यन्ते ।

सारोपलक्षणा यथा

मन्थानाचलमूलमेचकशिलासंघट्टनश्यामिका-
कारं यत्तुहिनद्युतौ स्फुरति तत् सारङ्गमाचक्षते ।
मन्ये नन्विह वीररुद्रनृपतेः कीर्तिश्रिया निर्जित-
स्तन्मुद्राङ्कवराहमिन्दुरुरसा बिभ्रत् समुज्जृम्भते ॥ १० ॥

अत्र चन्द्रकलङ्करूपे कुरङ्गे वराहत्वमारोप्यते ।

विषयविषयिणोरभिहितयोरभेदप्रतिपत्तिरारोपः ।
विषयनिगरणेनाभेदप्रतिपत्तिरध्यवसायः ।

एवोक्तममरकोशे । 'स्त्री स्यात् काचिन्मृणाल्यादिर्विवक्षापचये यदि ।' इति । बाहुल्यप्रतीतिः प्रयोजनम् । लक्ष्ये लक्षणं योजयति ॥९॥ **अत्रेति । नृपतय इति ।** मौलिसहिता एवेत्यर्थः । एवं चात्रापि स्वार्थं हित्वैव तद्विशिष्टार्थान्तरलक्षणेति सिद्धम् । स्वार्थापरित्यागे तु स्वार्थांशेऽभिधा अंशान्तरे तु लक्षणा चेत्येकस्य शब्दस्यैकदा वृत्तिद्वयापत्तेः । तर्हि जहदजहल्लक्षणयोरभेद इति चेत् सत्यम् । किं त्वत्राभिधातः प्रच्याव्य स्वार्थस्यापि लक्ष्यत्वेन स्वीकारादजहत्स्वार्थेति व्यपदेशः । अन्यत्र तु तदपि नास्तीति जहत्स्वार्थेति । तदुक्तं तातपादैरेकावलीतरले तन्त्रवार्तिकव्याख्याने सिद्धाञ्जने च 'स्वार्थत्यागे समानेऽपि सह तेनान्यलक्षणा। यत्रेयमजहत्स्वार्था जहत्स्वार्था तु तं विना ॥' इति । नन्वर्थ एव लक्षक इत्युक्तं तथा सत्यजहत्स्वार्थायाः स्वार्थांशे वृत्तिविरोध इति चेन्नैष दोषः । केवलस्वार्थस्य लक्षकत्वं तत्सहितस्यान्यस्य लक्ष्यत्वमिति भेदसद्भावादित्येतदपि तत्रैवोक्तमित्यलमबालसुलभैः प्रसङ्गैः ॥ सारोपलक्षणामुदाहरति । **मन्थानेति** । मन्थानो मन्थदण्डस्तदचलो मन्थानाचलो मन्दराद्रिरित्यर्थः । 'मन्थानं मन्दरं कृत्वा योक्त्रं कृत्वा च वासुकिम् ।' इति विष्णुपुराणात् । तस्य मूलोपलेषु संघट्टनेन वासुकिसंघर्षणेन या श्यामिका कालिमा तदाकारमतिनीलमित्यर्थः । **तन्मुद्रेति।** वराहध्वजत्वात् काकतीश्वरस्येति भावः । लोके केनचिज्जितस्तन्मुद्रामुरसा बिभर्तीति प्रसिद्धिः । अत्र कुरङ्गस्य वराहात्मकत्वं प्रतीयते । अत्र विषयविषयिणौ विविच्यन्नारोपं दर्शयति । **अत्रेति** ॥ १० ॥ भेदान्तरसांकर्यशङ्कानिरासार्थमारोपलक्षणमाह । **विषयेति** । विषयः प्रकृतो माणवकादिः । विषयी अप्रकृतो वह्न्यादिः तयोरभिहितयोरपह्नुतभेदतया सामानाधिकरण्येनोक्तयोरित्यर्थः । एतेनाध्यवसायाद्भेद उक्तः । प्रसङ्गात् तस्यापि लक्षणमाह । **विषयेति** । विषयस्य निगरणमत्यन्तापलापस्तेनाभेदप्रतिपत्तिर्विषयिण इति साम-

साध्यवसायलक्षणा यथा

काकतीयकुलाम्भोधेः प्रभवत्येष चन्द्रमाः ।
कृतः कुवलयोल्लासो येनोदयमुपेयुषा ॥ ११ ॥

अत्र प्रतापरुद्रश्चन्द्रतयाध्यवसीयते । काकतीयकुलाम्भोधेरित्यारोपः॥

अथ व्यञ्जनावृत्तिः ॥

अन्वितेषु पदार्थेषु वाक्यार्थोपस्कारार्थमर्थान्तरविषयः शब्दव्यापारो व्यञ्जनावृत्तिः ।

सा त्रिविधा । शब्दार्थोभयशक्तिमूलत्वेन ।

तत्र शब्दशक्तिमूला यथा

थ्योल्लक्ष्यते । न चायं जहल्लक्षणाभेदः । अत्र सादृश्यादिनिबन्धनस्य वस्त्वन्तरे वस्त्वन्तरोपचारस्य विद्यमानत्वात् । साध्यवसायलक्षणामुदाहरति । **काकतीयेति** । उदयमभ्युदयं पूर्वपर्वतं चोपेयुषा प्राप्तवता । कुवलयोल्लासो भूमण्डलाह्लादः कैरवविकासश्च । अत्रैष चन्द्रमा इत्येतच्छब्देन चन्द्र एव पुरोवर्त्यभेदाध्यवसायेनेदन्तया विशिष्यते । न तु राजा विवक्ष्यते । अन्यथा सारोपत्वप्रसङ्गात् । अतस्तादृशचन्द्र एव निगीर्णविषयतया ऐकरस्येन प्रतीयते । सर्वमेतन्मनसि निधायाह । **अत्रेति** । लक्षणान्तरयोगे विच्छित्तिविशेषोऽस्तीत्यभिप्रायेणाह । **काकतीयेति**॥११॥व्यञ्जनावृत्तेर्लक्षणमाह। **अन्वितेष्विति**। पदार्थेषु पदैराभिहितेषु । अन्वितेष्वाकाङ्क्षादिवशान्मिथः संबद्धेषु सत्सु । समन्वयशक्त्या वाक्यार्थे प्रतीत इत्यर्थः । यद्वा अर्थप्रकरणादिना प्राकरणिकार्थपर्यवसितेष्वित्यर्थः । एते[..]भिधान्वयशक्त्योः सति संभवे लक्षणायाश्चानन्तरभावी व्यञ्जनाव्यापार इति सूचितम् । लक्षणा तु समन्वयशक्तिसमर्पितान्वयविधुरीकरणधुरीणत्वादन्वयशक्त्यनन्तरभाविन्येवेत्यवोचन्नभिनवगुप्ताचार्यपादाः । वाक्यार्थस्य काव्यशरीरभूतस्योपस्कारार्थं शोभार्थं व्यङ्ग्यरहितस्य काव्यस्यानात्मकशरीरवदचारुत्वादिति भावः । वाच्यलक्ष्याभ्यामन्योऽर्थान्तरं व्यङ्ग्यं तद्विषयः शब्दव्यापारः । अत्र शब्दग्रहणमर्थस्याप्युपलक्षणार्थम् । अज्ञातार्थस्य शब्दस्य विशिष्टस्य शब्दानभिधेयस्य चार्थस्य व्यञ्जकत्वायोगादुभयव्यापारत्वाभ्युपगमात् । किंतु शब्दार्थशक्तिमूलयोर्यथायोगमेकस्य प्राधान्यमितरस्य सहकारित्वमुभयशक्तिमूलेऽपि तत्तदंशयोरेवमेव विभागो द्रष्टव्यः । व्यञ्जनावृत्तिं विभजते । **सा त्रिविधेति** । अत्रानेकार्थस्य शब्दस्यार्थप्रकरणादिभिरप्रकृतार्थवाचकत्वे निवारितेऽपि तत्प्रतीतिर्यत्प्रसादलब्धा सा शब्दशक्तिमूला । वक्तृबोद्धव्यादिवशात् सहृदयानामर्थान्तरप्रतीतिहेतुर्वाच्याद्यर्थव्यापारोऽर्थशक्तिमूला । उभयसंबन्धे तूभय-

अथ काव्यविशेषाः ।

व्यङ्ग्यस्य प्राधान्याप्राधान्याभ्यामस्फुटत्वेन च त्रिविधं काव्यम्। व्यङ्ग्यस्य प्राधान्ये उत्तमं काव्यं ध्वनिरिति व्यपदिश्यते । अप्राधान्ये मध्यमं गुणीभूतव्यङ्ग्यमिति गीयते। व्यङ्ग्यस्यास्फुटत्वेऽधमं काव्यं चित्रमिति गीयते । ध्वनिर्यथा---

स्वामिन् गोत्रमहीधरान् किमधुना नीचैर्विधत्से कुतो
गाधानम्बुनिधीन् करोषि कुरुषे किं दिक्पतीनल्पकान् ।
इत्थं पार्श्वचरानुलापमखिलं न्यक्कृत्य धर्मैषिणा
सृष्टः पद्मभुवा गुणैकवसतिः श्रीवीररुद्रो नृपः॥ ३८ ॥

अत्र प्रतापरुद्रस्य कुलशैलातिशायिसमुन्नतत्वमतिसमुद्रगाम्भीर्यं लोकपालाधिकमैश्वर्यं च ध्वन्यते । तथा कुलशैलपयोनिधिलोकपालनिर्माणसंरम्भातिशायि सर्वविलक्षणं काकतीयनिर्माणवैभवम् इति च व्यज्यते ॥

द्राक्षापाकनारिकेळपाकावर्थस्य द्रुतविलम्बितप्रतीत्योः परां कोटिमारूढौ । अतस्तदन्तराळवर्तिन्या मध्यमप्रतीतेरनेकविधत्वात् तदनुसारेण कदळीरसालादिपाकाः स्वयमूह्या इत्याह । **एवमिति** ॥ इत्थं काव्यसामग्रीं निरूप्य तद्भेदा निरूप्यन्ते । **अथेत्यादिना** । तेषां सामान्यतः स्वरूपनिरूपणपूर्वकं विभागमाह । **व्यङ्ग्यस्येति** । प्राधान्यादिनिमित्तवशादुत्तमादिकाव्यानां ध्वन्यादिसंज्ञाप्रवृत्तिरित्याह । **व्यङ्ग्यस्य प्राधान्य इत्यादिना** । यथा लोके कस्यचिद् वस्तुनः संज्ञानार्थं प्रदीपादाविव व्यङ्ग्यार्थमेव वाच्यवाचकवैचित्र्यादौ महाकविप्रवृत्तेर्व्यङ्ग्यस्य मध्ये विश्रान्तिविरहेण स्वपर्यन्तं सहृदयहृदयाकर्षणाच्च तस्य प्राधान्यमित्यनुसन्धेयम् । तद्विरुद्धमप्राधान्यम् । तच्च व्यङ्ग्यस्य चारुत्वापकर्षोपाधिकृतं न स्वाभाविकमिति गुणीभूतव्यङ्ग्यमित्यत्र च्विप्रत्ययेन सूच्यते । अधमकाव्यस्यास्फुटव्यङ्ग्यत्वेन नीरसत्वात् केवलवाच्यवाचकवैचित्र्याश्रयत्वेनालेख्यप्रख्यत्वाच्चित्रशब्दवाच्यत्वम् । तच्च शब्दार्थालंकारयोर्व्याससमासाभ्यां निबन्धने शब्दचित्रमर्थचित्रमुभयचित्रं चेति त्रेधा विभिद्यते ॥ तत्र ध्वनिमुदाहरति । **स्वामिन्निति** । अल्पकानत्यल्पान् । अनुलापं मुहुर्भाषासकृत्कथनमिति यावत् । धर्मैषिणा न तु कुलाचलाद्युपमैषिणा । गुणैकवसतिर्न पुनरचलादिवदेकैकगुणाधारः । अत्रौन्नत्यादिव्यङ्ग्यस्यागूढत्वाद्यपकर्षनिमित्ताभावात् प्राधान्येनोत्तमकाव्यत्वमेवेत्यभिप्रायेणाह । **अत्रेति** ॥ ३८ ॥ गुणीभूतव्यङ्ग्यमुदाहरति ।

गुणीभूतव्यङ्ग्यं यथा

प्रत्यग्रप्रसरत्प्रतापविभवव्याप्ताखिलाशान्तरे
विश्वत्रातरि वीररुद्रनृपतौ सिंहासनाध्यासिनि ।
आस्थानीं समुपागतैर्नृपवरैस्तास्तास्तथा दर्शिता-
श्चेष्टा याभिरमुष्य काकतिविभोर्दृष्टिः कृपार्द्रीकृता ॥३९॥

अत्र प्राप्ताभिषेकमहोत्सवस्य प्रतापरुद्रदेवमहाराजस्याग्रे शरणार्थिनां पार्थिवानां तथाविधकार्पण्योक्तिपुनःपुनःप्रणामादिकव्यङ्ग्यं तास्ताश्चेष्टा दर्शिता इति वाच्यादनतिशायि इति गुणीभूतव्यङ्ग्यता ।

चित्रं त्रिविधम् । शब्दचित्रमर्थचित्रमुभयचित्रं चेति ।

तत्र शब्दचित्रं यथा

क्षोणीरक्षणदक्षिणाः क्षतजगत्क्षोभा दुरीक्ष्यक्रमाः
क्षुद्रक्षत्रियपक्षशिक्षणविधौ प्रोत्क्षिप्तकौक्षेयकाः ।
उद्दामोद्यमनस्य रुद्रनृपतेर्दोर्दण्डयोश्चण्डयो-
र्गर्जद्दुर्जनगर्वपर्वतभिदा दम्भोळयः केळयः ॥ ४० ॥

अर्थचित्रं यथा

*खग्गे जुज्झविजिम्भिए रिवुमहीणाहांजलिं बिंबिअं
पेक्खन्तो जअळच्छिवासकमलं मण्णंति विण्णाणिणो ।

---

*खड्गे युद्धविजृम्भिते रिपुमहीनाथाञ्जलिं बिम्बितं
पश्यन्तो जयलक्ष्मीवासकमलं मन्यन्ते विज्ञानिनः ।
मन्ये वीरप्रतापरुद्रविभोर्जन्येषु गृहीतुं पुनः
स्रष्टुं रिपुजीवितानि विधेर्यातस्य पीठांबुजम् ॥

प्रत्यग्रेति । अत्र कार्पण्यवचनादिचेष्टाविशेषरूपव्यङ्ग्यस्य याभिरमुष्येत्यादिवाक्येनोक्तप्रायत्वादगूढत्वेन न चारुत्वातिशय इत्याह । **वाच्यादनतिशायीति** ॥ ३९ ॥ शब्दचित्रमुदाहरति । **क्षोणीति** । दुरीक्ष्यक्रमाः अभ्यासजनितलाघवातिशयेन दुरवबोधायुधप्रयोगपरिपाटीकाः । क्षुद्रक्षत्रियपक्षो राजपार्श्वबलम् कौक्षेयकः खड्गः । "कुलकुक्षि—" इत्यादिना शैषिको ढकञ्प्रत्ययः। यदैतत्सूत्रं भाष्यकारो न ममृषे तदा "दृतिकुक्षि—" इत्यादिना ढञ् । स्वार्थिकः कप्रत्ययः । अत्र दोर्दण्डक्रीडानामशनित्वरूपणं गर्वाणां पर्वतत्वरूपणे हेतुः । अतः परम्परितं रूपकम् । तस्मिन् सत्यपि कवेर्वृत्त्यनुप्रास एवाभिनिवेशाच्छब्दचित्रस्यैव प्राधान्यमर्थचित्रस्य तु गुणभाव एवेति नोभयचित्रत्वमस्येति भावः ॥४०॥ अर्थचित्रमुदाहरति। **खग्ग इति**। जन्येषु युद्धेषु यातस्य गच्छतः। पत्तस्येति पाठे

मण्णे वीरपआवरुद्दविहुणो जण्णेसु घेत्तुं उणो
सिट्ठीए रिवुजीविआइ विहिणो जत्तस्स पीठंवुअं ॥४१॥

उभयचित्रं यथा

विद्यासमुद्रे भुवनैकभद्रे प्रतापरुद्रे जितवैरिभद्रे।
रक्षाविनिद्रे धृतशौर्यमुद्रे कान्तेव पृथ्वी रमते गुणार्द्रे॥ ४२॥

अत्रानुप्रासोपमाभ्यां चित्रता॥

॥ अथ ध्वनिविशेषाः॥

अथ ध्वनिविशेषा निरूप्यन्ते। अत्र ध्वनेर्लक्षणाभिधामूलत्वेनाविवक्षितवाच्यविवक्षितान्यपरवाच्याख्यौ प्रथमं द्वौ भेदौ। अविव-

---

प्राप्तस्येति छाया। लच्छिवासेत्यत्र लक्ष्मीशब्दस्य 'दिहौ मिथः सः' इति पाक्षिको ह्रस्वः। घेत्तुं उणो इत्यत्र 'तुमुन्तव्यक्त्वासु ग्रहेः' इति तुमुन्प्रत्यये ग्रहेर्घेरित्यादेशे घेत्तुमिति सिद्धम्। तस्योत्तरपदेन सन्ध्यभावः। 'पदयोः सन्धिर्वा' इति विकल्पितत्वात्। वीरपआवेत्यत्र 'वा समासे' इति समासे विकल्पाद द्वित्वाभावः। जत्तस्सेति वर्तमानापदेशेन परासुवैरिप्राणसंग्रहणलम्पटस्य कमलभुवः कमलोपवेशनावकाशाभावः प्रतीयते। अत्र प्रतापरुद्रखङ्गप्रतिबिम्बिते रिपुनृपाञ्जलौ जयलक्ष्मीवासकमलत्वमारोप्य तदपह्नवेनार्थसिद्धेन ब्रह्मासनकमलत्वप्रतिपादनादपह्नवालङ्कारः। अत्रैव कवेरभिनिवेशादस्यार्थचित्रत्वम्। वृत्त्यनुप्रासे तु गुणभाव एवेति नात्राप्युभयचित्रत्वमिति भावः॥ ४१॥ उभयचित्रमुदाहरति। **विद्येति**। अत्रोभयत्र कवेरभिनिवेशादुभयचित्रत्वमित्यभिप्रायेणाह। **अत्रेति**। यद्यप्येतत् प्राचीनालंकारकारैर्नोदाहृतं तथाप्यन्यतरप्राधान्येनेतरभेदद्वयवदुभयप्राधान्येनास्यापि सुवचत्वादविरोधः। किं च 'पादाम्बुजं भवतु वो विजयाय मञ्जुमञ्जीरशिञ्जितमनोहरमम्बिकायाः॥' इत्यत्रोपमानुप्रासयोरन्योन्यनिरपेक्षत्वेन समप्रधानभावयोः संसृष्टिमङ्गीकुर्वाणैः पूर्वैरेवोभयचित्रमप्यङ्गीकृतमिति विज्ञेयम्। नन्वेषूदाहरणेषु यथायोगं विभावानुभावविशेषकथनेन वीरशृङ्गारयोः पर्यवसानात् कथमधमत्वम्। सत्यम्। शब्दार्थालंकारयोरेव कविविवक्षाविषयत्वाद् विद्यमानोऽपि रसो दिवा चन्द्रप्रकाशवन्न प्रतीयते। तदुक्तं काव्यालोके 'रसभावादिविषयविवक्षाविरहे सति। अलंकारनिबन्धो यः स चित्रविषयो मतः॥' इति॥ ४२॥ एवं त्रिविधमपि काव्यं सामान्यतो निरूप्य तत्रोत्तमकाव्यं प्रपञ्चयितुं प्रतिजानीते। **अथेति**। विभजते। **अत्रेति**। अविवक्षितं व्यङ्ग्येन न्यग्भावितं वाच्यं यत्र सोऽविवक्षितवाच्यः। अन्यपरं व्यङ्ग्यपरं राजतात्पर्येण राजपुरुषसेवनवद् व्यङ्ग्यपरत्वेनैव विवक्षितं विवक्षितान्यपरं तथाभूतं वाच्यं यत्र स विवक्षितान्यपरवाच्यः। तत्र लक्षणामूलं चतुर्धा विभजते। **अविवक्षितेति**।

क्षितवाच्यस्यार्थान्तरसंक्रमितात्यन्ततिरस्कृतवाच्यतया द्विविधस्य वाक्यपदगतत्वेन द्वैविध्ये चातुर्विध्यम्। विवक्षितान्यपरवाच्यस्य संलक्ष्यक्रमव्यङ्ग्यासंलक्ष्यक्रमव्यङ्ग्यतया द्वौ भेदौ। संलक्ष्यक्रमव्यङ्ग्ये शब्दशक्तिमूले वस्त्वलंकाररूपतया द्वैविध्ये वाक्यपदगतत्वेन चातुर्विध्यम्। अर्थशक्तिमूले संलक्ष्यक्रमव्यङ्ग्येऽर्थस्य स्वतःसंभवित्वेन कविप्रौढोक्तिसिद्धत्वेन कविनिबद्धोक्तिसिद्धत्वेन च त्रैविध्यम्। त्रिविधस्य वस्त्वलंकाररूपतया द्वैविध्ये षड्विधत्वम्। षड्विधस्यापि व्यङ्ग्यव्यञ्जकतया द्वैविध्ये द्वादशविधत्वम्। द्वादशविधस्यापि प्रबन्धगतत्वेन वाक्यगतत्वेन पदगतत्वेन च त्रैविध्ये षट्त्रिंशत्प्रकारोऽर्थशक्तिमूलोऽनुर-

---

तत्रार्थान्तरसंक्रमितवाच्ये वाच्यस्योपपद्यमानत्वेऽपि तावतानुपयोगादजहल्लक्षणामूलत्वम्। अत्यन्ततिरस्कृतवाच्ये वाच्यस्यानुपपन्नत्वात् जहल्लक्षणामूलत्वमिति विवेकः। संक्रमितेति णिचा व्यञ्जनसहकारिवर्गस्यायं प्रभाव इति सूचयते। अभिधामूलं विभजते। **विवक्षितेति**। संलक्ष्यः स्फुटसंवेद्यः क्रमो व्यङ्ग्यव्यञ्जकयोर्यत्र स संलक्ष्यक्रमव्यङ्ग्यः। यत्र व्यञ्जकस्य विभावादेर्व्यङ्ग्यस्य च रसादेः सन्नपि क्रमो निशितसूच्या शतपत्रपत्रशतवेधवदाशुभावित्वान्न लक्ष्यते सोऽसंलक्ष्यक्रमव्यङ्ग्यः। तत्राद्यस्य शब्दार्थोभयशक्तिमूलत्वेन त्रैविध्यं सिद्धवत्कृत्याद्यं चतुर्धा विभजते। **संलक्ष्येति**। जातिगुणादिरूपोऽर्थो वस्तु। तदेव विच्छित्तिविशेषयुक्तमलंकारः। द्वितीयः षट्त्रिंशत्प्रकार इत्याह। **अर्थशक्तिमूल इत्यादिना**। अर्थस्य मूलभूतस्य व्यञ्जकस्येत्यर्थः। यो न केवलं साहित्यमात्रसिद्धः किं तु लोकेऽप्यौचित्येन संभाव्यते स स्वतःसंभवी। यः पुनरसन्नपि लोके कविना प्रतिभामात्रेण संभाव्य संपाद्यते स कविप्रौढोक्तिसिद्धः। कविनिबद्धवक्तृप्रौढोक्तिसिद्धस्तु कविनिबद्धोक्तिसिद्ध इति त्रयाणां विवेकः। **षड्विधस्येति**। व्यञ्जकस्येति भावः। **व्यङ्ग्यव्यञ्जकतयेति**। व्यङ्ग्ययोर्वस्त्वलंकाररूपयोर्व्यञ्जकतयेत्यर्थः। तथा चोक्तं काव्यप्रकाशे 'अर्थशक्त्युद्भवोऽप्यर्थो व्यञ्जकः संभवी स्वतः। प्रौढोक्तिमात्रात् सिद्धो वा कवेस्तेनोदितस्य वा॥ वस्तु वालंकृतिर्वेति षड्भेदोऽसौ व्यनक्ति यत्। वस्त्वलंकारमथवा तेनायं द्वादशात्मकः॥' इति। हेमचन्द्रस्तु प्रौढोक्तिमन्तरेण स्वतःसिद्धस्याप्यकिंचित्करत्वात् तत्सिद्धत्वमेव सर्वत्रेति स्वतःसंभवित्वादिभेदत्रयं नाङ्गीचकार। **अनुरणनेति**। घण्टादेः प्रथमस्वनानन्तरभावी स्निग्धः स्वनोऽनुरणनम्। तत्सादृश्यात् संलक्ष्यक्रमव्यङ्ग्यस्त्रिविधोऽप्यनुरणनध्वनिरुच्यते। तत्र 'विच्छित्तिशोभिनैकेन भूषणेनेव भामिनी। पदद्योत्येन सुकवेर्ध्वनिना भाति भारती॥' इति ध्वन्याचार्यवचनात्

णनध्वनिः । उभयशक्तिमूलो वाक्यगतत्वेनैकविध एव । एवं संलक्ष्यक्रमव्यङ्ग्यध्वनेरेकचत्वारिंशद्भेदाः । असंलक्ष्यक्रमव्यङ्ग्यो रसादिध्वनिः प्रबन्धवाक्यपदपदैकदेशरचनावर्णगतत्वेन षड्विधः । एवं विवक्षितान्यपरवाच्यध्वनेः सप्तचत्वारिंशद्भेदाः । अविवक्षितवाच्यभेदैश्चतुर्भिः सह ध्वनेः प्रथमं शुद्धा एकपञ्चाशद् भेदाः । तेषां प्रत्येकमेकैकस्यैकैकेन संबन्धे प्रथमभेदस्यैकपञ्चाशद् भेदाः । द्वितीयस्य पञ्चाशद् भेदाः । तृतीयस्यैकोनपञ्चाशद् भेदाः । अनेन क्रमेणोत्तरोत्तरस्यैकैकभेदपरित्यागे षड्विंशत्युत्तरशतत्रयाधिकसहस्रसंख्याका (१३२६) मिश्रभेदाः । अविवक्षितवाच्यस्य विवक्षितान्यपरवाच्यसंबन्धे यो भेदस्तस्मिन्नेवान्तर्भूतो विवक्षितान्यपरवाच्यस्याविवक्षितवाच्यसंबन्धे भेदो न पृथग्भूतः । अनेनैव क्रमेण वस्तु-

---

पदगतेष्वपि रम्यत्वमस्तीति वेदितव्यम् । तृतीयमाह । **उभयशक्तीति** । **एकविध एवेति** । प्रकारवैचित्र्यकल्पनस्य दुःशकत्वादिति भावः । अनुरणनध्वनिभेदान् क्रोडीकृत्याह । **एवमिति** । एकश्च चत्वारिंशच्च एकचत्वारिंशदिति द्वन्द्वः । 'सर्वो द्वन्द्वो विभाषयैकवद्भवति' इत्येकवद्भावः । 'लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य' इति भाष्यकारवचनाज्जनपदादिशब्दवन्नपुंसकत्वाभावः । नापि भेद्यलिङ्गत्वम् । विंशत्यादीनां नवत्यन्तानाममरकोशे 'तासु चानवतेः स्त्रियः' इति नियमेन स्त्रीलिङ्गताभिधानात् । यद्वा एकोत्तरा चत्वारिंशदिति मध्यमपदलोपी समासः । एवमन्यत्रापि द्रष्टव्यम् । द्वितीयमभिधामूलध्वनिं विभजते । **असंलक्ष्येति** । रसादीनामानन्त्येन तद्भेदकल्पनस्याशक्यत्वात् तद्द्योतकप्रबन्धादिकृतो रसादेः षोढा विभाग इत्याह । **प्रबन्धेति** । सर्वानपि ध्वनिभेदान् संकलय्याह । **एवमिति** । शुद्धा ध्वन्यन्तरासंबद्धा इत्यर्थः । मिश्रभेदानाह । **तेषामिति** । तेषां शुद्धानामित्यर्थः । ननु लक्षणामूलध्वनेरभिधामूलध्वनिसंबन्धे यथैको मिश्रभेदस्तथैवाभिधामूलध्वनेर्लक्षणामूलध्वनिसंबन्धे भेदान्तरं भविष्यति । एवमेकपञ्चाशतोऽपि भेदानां विचार्यमाणे एकोत्तरशतषट्काधिकसहस्रद्वयसंख्याक (२६०१) मिश्रभेदसंभवादेकैकन्यूनताश्रयणेन षड्विंशत्युत्तरशतत्रयाधिकसहस्र (१३२६) संख्यावलम्बनमयुक्तमिति चेत् सत्यम् । भेदद्वयेऽपि तस्यामुना संबन्धोऽमुष्य वा तेनेति संबन्धिप्रतिसंबन्धिनोरुच्चारणव्यत्यासमात्रं न पुनश्चमत्कारविशेषः । अतस्तेषां यथायोगं मिथोऽन्तर्भाव एवेति युक्तमेवोक्तम् । तदेतदाह । **अविवक्षितवाच्यस्येति** । विषयव्याप्त्यर्थं ध्वन्यन्तरेऽप्यन्तर्भावं दर्शयति । **अनेनैवेति** । भूयो विभागमाह । **तस्या-**

ध्वनेरलंकारध्वनिसंबन्धभेदोऽप्यलंकारध्वनेर्वस्तुध्वनिसंबन्धान्न पृथग्भूत इति पूर्वपूर्वस्योत्तरोत्तरसंबन्धे एकैकभेदन्यूनता ज्ञेया। तस्यापि मिश्रणस्य त्रिरूपेण संकरेणैकरूपया संसृष्ट्या च पुनश्चतुर्धायोजने चतुरुत्तरशतत्रयाधिकपञ्चसहस्राणि (५३०४) भेदाः।

शुद्धाश्चन्द्रशरा मिश्रा ऋतुनेत्रानलेन्दवः।
संसृष्टिसंकरायातास्त्वब्धिखाग्निशराभिधाः॥

तत्र शुद्धानामेकपञ्चाशद्भेदानां नामधेयानि कथ्यन्ते। पदगतार्थान्तरसंक्रमिताविवक्षितवाच्यध्वनिः॥ १॥ वाक्यगतार्थान्तरसंक्रमिताविवक्षितवाच्यध्वनिः॥ २॥ पदगतात्यन्ततिरस्कृताविवक्षितवाच्यध्वनिः॥३॥ वाक्यगतात्यन्ततिरस्कृताविवक्षितवाच्यध्वनिः॥ ४॥ पदगतशब्दशक्तिमूलसंलक्ष्यक्रमवस्तुध्वनिः॥ ५॥ पदगतशब्दशक्तिमूलसंलक्ष्यक्रमालंकारध्वनिः॥ ६॥ वाक्यगतशब्दशक्तिमूलसंलक्ष्यक्रमवस्तुध्वनिः॥ ७॥ वाक्यगतशब्दशक्तिमूलसंलक्ष्यक्रमालंकारध्वनिः॥ ८॥ पदगतस्वतःसिद्धार्थशक्तिमूलो वस्तुना वस्तुध्वनिः॥९॥ पदगतस्वतःसिद्धार्थशक्तिमूलो वस्तुनालंकारध्वनिः॥१०॥ पदगतस्वतःसिद्धार्थशक्तिमूलोऽलंकारेणालंकारध्वनिः॥ ११॥ पदगतस्वतःसिद्धार्थशक्तिमूलोऽलंकारेण वस्तुध्वनिः॥ १२॥ वाक्यगतस्वतःसिद्धार्थशक्तिमूलो वस्तुना वस्तुध्वनिः॥ १३॥ वाक्यग-

---

पीति। ध्वन्योः संदेहास्पदत्वेनानुग्राह्यानुग्राहकभावेनैकव्यञ्जकानुप्रवेशेन च त्रिरूपेणेत्यर्थः। संकरवत् सापेक्षत्वाभावात् संसृष्टेरेकरूपत्वं द्रष्टव्यम्। फलितां संख्यामाह। **चतुरुत्तरेति**। न्यूनाधिकसंख्याव्यवच्छेदार्थमुक्तामेव संख्यां संकेतभाषया क्रोडीकृत्याह। **शुद्धा इति**। अत्राङ्कप्रस्तारो व्युत्क्रमेण द्रष्टव्यः। चन्द्र एकः। शराः पञ्च (५१)। ऋतवः षट्। नेत्रे द्वे। अनलास्त्रयः। इन्दुरेकः (१३२६)। अब्धयश्चत्वारः। खं शून्यं बिन्दुरित्यर्थः। अग्नयस्त्रयः। शराः पञ्च (५३०४)। तर्हि किंनिमित्तं काव्यप्रकाशकारोऽन्तर्भावयातयामानपि कतिचन भेदान् संगृह्य चतुरुत्तरचतुःशतीयुतायुत (१०४०४) संख्याकान् संसृष्टिसंकरायत्तभेदानजीगणत्। को वेद किं वा तत्र निमित्तं तत् पुनस्त एव तत्रभवन्तो विदांकुर्वन्तु। अस्माभिस्तु 'युक्तियुक्तं वचो ग्राह्यं न तु पूरुषगौरवात्' इति न्यायसरणिरनुसरणीयेति विद्यानाथहृदयम्॥ अथ प्रतिपत्तिसौकर्यार्थं शुद्धभेदानां प्रतिज्ञापूर्वकं नामानि कथयति। **तत्रेति**। गतार्थमेतत्। अत्र कतिपयो-

तस्वतःसिद्धार्थशक्तिमूलो वस्तुनालंकारध्वनिः ॥ १४ ॥ वाक्यगत-स्वतःसिद्धार्थशक्तिमूलोऽलंकारेणालंकारध्वनिः ॥ १५ ॥ वाक्यगत-स्वतःसिद्धार्थशक्तिमूलोऽलंकारेण वस्तुध्वनिः ॥ १६ ॥ प्रबन्धगतस्व-तःसिद्धार्थशक्तिमूलो वस्तुना वस्तुध्वनिः ॥ १७ ॥ प्रबन्धगतस्वतः-सिद्धार्थशक्तिमूलो वस्तुनालंकारध्वनिः ॥ १८ ॥ प्रबन्धगतस्वतः सिद्धार्थशक्तिमूलोऽलंकारेणालंकारध्वनिः ॥ १९ ॥ प्रबन्धगतस्वतः-सिद्धार्थशक्तिमूलोऽलंकारेण वस्तुध्वनिः ॥ २० ॥ पदगतकविप्रौ-ढोक्तिसिद्धार्थशक्तिमूलो वस्तुना वस्तुध्वनिः ॥ २१ ॥ पदगतक-विप्रौढोक्तिसिद्धार्थशक्तिमूलो वस्तुनालंकारध्वनिः ॥ २२ ॥ पदगत-कविप्रौढोक्तिसिद्धार्थशक्तिमूलोऽलंकारेणालंकारध्वनिः ॥ २३ ॥ पद-गतकविप्रौढोक्तिसिद्धार्थशक्तिमूलोऽलंकारेण वस्तुध्वनिः ॥ २४ ॥ वाक्यगतकविप्रौढोक्तिसिद्धार्थशक्तिमूलो वस्तुना वस्तुध्वनिः ॥ २५ ॥ वाक्यगतकविप्रौढोक्तिसिद्धार्थशक्तिमूलो वस्तुनालंकारध्वनिः ॥ २६ ॥ वाक्यगतकविप्रौढोक्तिसिद्धार्थशक्तिमूलोऽलंकारेण वस्तुध्वनिः ॥ २७ ॥ वाक्यगतकविप्रौढोक्तिसिद्धार्थशक्तिमूलोऽलंकारेणालंकारध्वनिः ॥ २८ ॥ प्रबन्धगतकविप्रौढोक्तिसिद्धार्थशक्तिमूलो वस्तुना वस्तुध्वनिः ॥ २९ ॥ प्रबन्धगतकविप्रौढोक्तिसिद्धार्थशक्तिमूलो वस्तुनालंकारध्वनिः ॥ ३० ॥ प्रबन्धगतकविप्रौढोक्तिसिद्धार्थशक्तिमूलोऽलंकारेणालंकारध्वनिः ॥ ३१ ॥ प्रबन्धगतकविप्रौढोक्तिसिद्धार्थशक्तिमूलोऽलंकारेण वस्तुध्वनिः ॥ ३२ ॥ पदगतकविनिबद्धोक्तिसिद्धार्थशक्तिमूलो वस्तुना वस्तुध्वनिः ॥ ३३ ॥ पदगतकविनिबद्धोक्तिसिद्धार्थशक्तिमूलो वस्तुनालंकारध्वनिः ॥ ३४ ॥ पदगतकविनिबद्धोक्तिसिद्धार्थशक्तिमूलोऽलंकारेणालंकारध्वनिः ॥ ३५ ॥ पदगतकविनिवद्धोक्तिसिद्धार्थशक्तिमूलोऽलंकारेण वस्तुध्वनिः ॥ ३६ ॥ वाक्यगतकविनिबद्धोक्तिसिद्धार्थशक्तिमूलो वस्तुना वस्तुध्वनिः ॥ ३७ ॥ वाक्यगतकविनिबद्धोक्तिसिद्धार्थशक्तिमूलो वस्तुनालंकारध्वनिः ॥ ३८ ॥ वाक्यगतकविनिबद्धोक्तिसिद्धार्थशक्तिमूलोऽलंकारेणालंकारध्वनिः ३९ वाक्यगतकविनिबद्धोक्तिसिद्धार्थशक्तिमूलोऽलंकारेण वस्तुध्वनिः ॥ ४० ॥

प्रबन्धगतकविनिबद्धोक्तिसिद्धार्थशक्तिमूलो वस्तुना वस्तुध्वनिः॥४१॥ प्रबन्धगतकविनिबद्धोक्तिसिद्धार्थशक्तिमूलो वस्तुनालंकारध्वनिः॥४२॥ प्रबन्धगतकविनिबद्धोक्तिसिद्धार्थशक्तिमूलोऽलंकारेणालंकारध्वनिः ४३ प्रबन्धगतकविनिबद्धोक्तिसिद्धार्थशक्तिमूलोऽलंकारेण वस्तुध्वनिः ४४ प्रबन्धगतासंलक्ष्यक्रमव्यङ्ग्यो रसादिध्वनिः ॥ ४५ ॥ वाक्यगतासंलक्ष्यक्रमव्यङ्ग्यो रसादिध्वनिः ॥ ४६ ॥ पदगतासंलक्ष्यक्रमव्यङ्ग्यो रसादिध्वनिः ॥ ४७ ॥ पदैकदेशगतासंलक्ष्यक्रमव्यङ्ग्यो रसादिध्वनिः ॥ ४८ ॥ रचनागतासंलक्ष्यक्रमव्यङ्ग्यो रसादिध्वनिः ॥ ४९ ॥ वर्णगतासंलक्ष्यक्रमव्यङ्ग्यो रसादिध्वनिः ॥ ५० ॥ वाक्यगतोभयशक्तिमूलो रसादिध्वनिः ॥ ५१ ॥

तत्र दिङ्मात्रमुदाह्रियते ।

अर्थान्तरसंक्रमिताविवाक्षितवाच्यध्वनिर्यथा—

मूर्धानो यूयमास्माकाः किमित्यौन्नत्यमिच्छथ ।
इति प्रतापरुद्रस्य प्रणताः प्रतिपार्थिवाः ॥ ४३ ॥

अत्र आस्माका इति सर्वदैन्यभूमयो वयमीदृशानामस्माकं संबन्धिनो यूयमित्यर्थान्तरसंक्रमिताविवक्षितवाच्यता ।

अत्यन्ततिरस्कृतवाच्यो ध्वनिर्यथा

विशदिमविलिप्तवियतो धवलिमपरिपूरिताखिलाशान्ताः ।
विहरन्ति यशःपूरा गौराः श्रीकाकतीन्द्रस्य ॥ ४४ ॥

दाहरणप्रदर्शनेनोहकुशलानां भेदान्तराणि सुबोधानीत्यभिप्रायेणाह । **तत्र दिङ्मात्रमिति** । उदाहरति । **मूर्धान इति** । आस्माका अस्मदीयाः । "युष्मदस्मदोरन्यतरस्यां खञ्च" इत्यण्प्रत्यये "तस्मिन्नणि च" इत्यास्माकादेशः । अत्रास्माकप्रकृत्यास्मच्छब्देनास्मदर्थमहित्वैव तावतानुपयोगाद् दैन्यविशिष्टोऽस्मदर्थः सामान्यविशेषभावसंबन्धेन लक्ष्यत इत्याह । **सर्वदैन्येति** । व्यङ्ग्यं पुनर्वीररुद्रवैरिणां वैनतेयसंनिधाने वाताशिनामिव विक्रमविमुखत्वमित्येतदभिसंधायाह । **अत्रेति** ॥ ४३ ॥ **विशदिमेति** । अत्र विशदिमधवलिम्नोर्विषयभेदान्मिथो न पौनरुक्त्यम् । अनयोर्वियद्विलेपनदिगन्तपरिपूरणविधानार्थत्वेनानुवाद्यत्वाद्विधेयेन गौरा इत्यनेनापि न पौनरुक्त्यमिति विज्ञेयम् । अत्र विलिप्तपदं मूर्तोचितस्य विलेपनस्यामूर्ते वियत्यनुपपद्यमानत्वात् स्वार्थपरित्यागे-

अत्र विशदिमविलिप्तवियत इत्यत्यन्ततिरस्कृतवाच्यत्वम् । अनेनैव क्रमेण वाक्यगतत्वेनाप्युदाहार्यम् ।

अथार्थशक्तिमूलो वस्तुना वस्तुध्वनिर्यथा

अब्दानृतून् विना मासान् शुक्लपक्षान् विना तिथीन् ।
रात्रीर्विनापि काङ्क्षन्ते काकतीयरिपुस्त्रियः ॥ ४५ ॥

अत्र ऋतुप्रभृतीनां कामोद्दीपकत्वात् तदभावो रिपुस्त्रीभिराकाङ्क्ष्यत इति प्रतीयते । तेन तासां प्रियवियोगरूपं वस्तु व्यज्यते । अनेन प्रतापरुद्रस्य सर्वे शत्रवो निहता इति वाच्यादतिशयः । तथा प्रियाविरहविधुराः शत्रुस्त्रियः कतिपयवत्सरान् जीविताशया प्रथममृतूनामभावं वाञ्छन्ति । अनन्तरं तानपि गमयितुमशक्ताः कतिपयमासेषु प्राणान् धारयितुमुद्युक्ता ज्योत्स्नावतां पक्षाणां विनाशं वाञ्छन्ति । अनन्तरं मासानप्यपनेतुमपारयन्त्यः कतिपयतिथिषु जीविताशया रात्रीणामसृष्टिमभिलषन्तीति बहुवस्तु वस्तुना व्यज्यते।

वस्तुनालंकारध्वनिर्यथा

दृष्ट्वा काकतिवीररुद्रनृपतेः कीर्तिं जगद्व्यापिनीं
वस्तुं वाञ्छति शंभुरत्र शयितुं लक्ष्मीपतिः काङ्क्षति ।

नोपरञ्जनातिशयं कार्यकारणभावसंबन्धेन लक्षयदाकाशे प्रकाशाधिक्यं व्यनक्तीत्यभिप्रायेणाह । **अत्रेति** । **अनेनैवेति** । वाक्यगतत्वमेवात्र भेदकमिति भावः । अत्र जहदजहल्लक्षणयोर्वस्तुमात्रं व्यङ्ग्यम् । तच्च शब्दैकव्यापारात् व्यञ्जनादेव अन्यथा लक्षणाया एवानुपादेयत्वप्रसङ्गादिति द्रष्टव्यम् । तदुक्तं काव्यप्रकाशे 'यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते । फले शब्दैकगम्येऽत्र व्यञ्जनान्नापरा क्रिया ॥' इति ॥ ४४ ॥ शब्दशक्तिमूलापेक्षया भेदबाहुल्येन बहुवक्तव्यत्वादर्थशक्तिमूलान् आदावुदाहर्तुमाह । **अथेति** । **अब्दानिति** । अत्र ऋत्वाद्यभावाकाङ्क्षाया वाच्यत्वेऽपि तस्याः कामोद्दीपकत्वहेतुकत्वं व्यङ्ग्यमेवेत्याभिप्रायेणाह । **अत्रेति** । तस्य व्यङ्ग्यमाह । **तेनेति** । तेनानन्तरोक्तव्यङ्ग्येनेत्यर्थः । तस्यापि व्यङ्ग्यमाह । **अनेनेति** । प्रियवियोगेनेत्यर्थः । व्यज्यत इत्यनुषज्यते । एवमुत्तरोत्तरव्यङ्ग्य एव कविसंरम्भविश्रान्तेस्तस्य वाच्यादुत्कर्षो येनास्य ध्वनिव्यपदेश इत्याह । **इति वाच्यादिति** । किं च प्रथमकक्ष्यायां प्रतीयमानस्य ऋत्वाद्यभावाकाङ्क्षालक्षणस्य वस्तुनो व्यञ्जकवस्तुत्रैविध्यात् त्रैविध्यमित्याह । **तथेत्यादिना** ॥ ४५ ॥ **दृष्ट्वेति** । अत्र कीर्तौ शंभुप्रभृतीनां निवासाकाङ्क्षादि-

स्नातुं धावति दिव्यतापसगणः संवार्धितुं वार्धय-
श्रेष्ठन्ते सविलासमभ्रमुरपि स्प्रष्टुं शनैरीहते ॥ ४६ ॥

अत्र हरस्य कैलासभ्रान्तिः हरेःक्षीरार्णवभ्रान्तिरिति भ्रान्तिमदलंकारो व्यज्यते ॥ अलंकारेण वस्तुध्वनिर्यथा

प्रतापरुद्रस्य रणे कृपाणः सद्यः समुद्यद्रुधिरारुणश्रीः ।
आलम्बते रोषकषायितस्य काळीकटाक्षस्य विजृम्भितानि ॥

अत्रालम्बत इति निदर्शनालंकारेण सकलरिपुक्षयः क्षणात् कृत इति वस्तु व्यज्यते ॥

अलंकारेणालंकारध्वनिर्यथा

काकतीयविभोः कीर्तिपुण्डरीके विजृम्भिते ।
धत्ते मधुकरक्रीडां तमालश्यामलं नभः ॥ ४८ ॥

अत्र कीर्तिपुण्डरीके नभो भ्रमरक्रीडां धत्त इति निदर्शनालंकारेणाश्रयाश्रयिणोरनानुगुण्यरूपोऽधिकालंकारो व्यज्यते । आश्रयस्य कीर्तिपुण्डरीकस्य वैपुल्यं भ्रमरसादृश्यप्रतिपादनेनाल्पत्वं नभसः प्रतीयते । एषु स्वतःसिद्धार्थशक्तिमूलत्वम् ।

अथ कविप्रौढोक्तिसिद्धार्थशक्तिमूलो वस्तुना वस्तुध्वनिर्यथा

श्रावं श्रावं खुरळिविहरत्कार्तिकेयेषुजात-
च्छिद्रच्छद्मश्रवणपदवीचारिणीं चारणौघैः ।

लक्षणेन वस्तुना तेषां यथाक्रमं कैलासक्षीरोदमन्दाकिनीचन्द्राभ्रमातङ्गभ्रान्तिरूपो भ्रान्तिमदलंकारो व्यज्यते । तदेतदाह । **अत्र हरस्येति** । अत्र व्यङ्गयस्य प्राधान्येनालंकार्यत्वेऽपि ब्राह्मणश्रमणन्यायेन प्रत्यभिज्ञानबलादलंकारव्यपदेशो न विरुध्यते । एवमन्यत्राप्यलंकारध्वनौ वेदितव्यम् ॥ ४६ ॥ **प्रतापेति** । कषायितस्यारुणीकृतस्य । अत्र कृपाणस्य चण्डिकाकटाक्षविजृम्भितालम्बनासंभवाद्विजृम्भितानीव विजृम्भितानीति सादृश्याक्षेपादसंभवद्वस्तुसंबन्धरूपो निदर्शनालंकारः ॥ ४७ ॥ **काकतीयेति** । पूर्ववन्निदर्शनालंकारः ॥ ४८ ॥ **अनानुगुण्यरूप इति** । आधारस्य नभसोऽल्पत्वादाधेयस्य यशसोऽधिकत्वाच्चेति भावः । तच्च व्यज्यत इत्याह । **आश्रयस्येति** । **एषु स्वतः सिद्धेति** । व्यञ्जकस्य लोकसिद्धार्थत्वादिति भावः । अथ कविप्रौढोक्तिसिद्धार्थशक्तिमूलेषु वस्तुना वस्तुध्वनिमुदाहरति । **श्रावं श्रावमिति** । श्रावं श्रावं पुनः पुनः श्रुत्वेत्यर्थः ।

शश्वद्गीतां भुवनमहितां काकतीन्द्रस्य कीर्तिं
क्रौञ्चक्ष्माभृद्भवति महतो विस्मयान्निश्चलाङ्गः ॥ ४९ ॥

अत्र प्रतापरुद्रस्य कीर्तिः स्थावराणामपि विस्मयकारिणीति वस्तु व्यज्यते ॥

वस्तुनालंकारध्वनिर्यथा

वीररुद्रभटान् दृष्ट्वा जयलक्ष्मीवृतान् रणे ।
कर्षन्त्यरिवधूकेशान् कानने कण्टकिद्रुमाः ॥ ५० ॥

अत्र जयलक्ष्मीसमालिङ्गितान् वीररुद्रभटान् दृष्ट्वा समदना इव कण्टकिद्रुमाः शत्रुवधूकेशान् कर्षन्तीवेत्युत्प्रेक्षा व्यज्यते ।

अलंकारेण वस्तुध्वनिर्यथा

*ओसरइ सहीहि समं लज्जा वहुआए सिढिलमाणाए ।
अप्पग्गहणभयेणव्व सविहगए मणोहरे दइए ॥ ५१ ॥

अत्रोत्प्रेक्षयालिङ्गनरूपं वस्तु व्यज्यते ॥

अलंकारेणालंकारध्वनिर्यथा

---

*अपसरति सखीभिः समं लज्जा वध्वाः शिथिलमानायाः ।
आत्मग्रहणभयेनेव सविधगते मनोहरे दयिते ॥

"आभीक्ष्ण्ये णमुलि नित्यवीप्सयोः" इति द्विर्भावः । खुरलिर्मल्लादिसाधनशाला । तत्र विहरतः क्रीडतः कार्तिकेयस्य कृत्तिकापत्यस्य स्कन्दस्येषुणा शरेण जातं यच्छिद्रं तस्य छद्मना व्याजेन या श्रवणपदवी । बहिर्निर्गतं बाणरन्ध्रमेव श्रवणसरणिर्बभूवेति भावः । तत्र चरति ताच्छील्येन तां तथोक्ताम् । पुरा किल कार्तिकेयः खुरलीविहरणवेलायां परशुरामस्पर्धया क्रौञ्चगिरिं ददारेति प्रसिद्धिः । भुवनानां महितां पूज्यमानामिति शेषषष्ठ्या निष्ठान्तेन समासः । अत एव "क्तेन च पूजायाम्" इत्यादिषु कारकषष्ठ्या एव समासनिषेध इति हरदत्तः । अत्र क्रौञ्चाद्रेर्निश्चलाङ्गत्वे विस्मयादिवेति हेतोरुत्प्रेक्षणादुत्प्रेक्षालंकारो व्यञ्जकाप्रयोगात् गम्यः । एवमलंकारे सत्यपि क्रौञ्चक्ष्माभृदिति वस्त्वेव स्थावराणामपि विस्मयकारिणी कीर्तिरिति वस्तु व्यनक्ति न पुनरलंकारभागः । अतो वस्तुना वस्तुध्वनेरेवेदमुदाहरणम् ॥ ४९ ॥ **वीररुद्रेति** । निगदव्याख्यानमेतत् ॥५०॥ **ओसरईति** । त्वोदवापोता इत्यपशब्दस्यौकारः । भयेणवेत्यत्र 'इवस्य पिवमिवतिवद्वा' इति इवशब्दस्य केवलो वकारो हेतूत्प्रेक्षाव्यञ्जकः ॥ ५१ ॥

अभयं याचमानानां काकतीयेन्द्रविद्विषाम् ।
रक्षां नाङ्गीकरोतीव वनं शाखाग्रकम्पनैः ॥ ५२ ॥

अत्र नाङ्गीकरोतीवेत्युत्प्रेक्षया प्रतापरुद्रशत्रुभ्यो रक्षणं कर्तुं वनमपि बिभेतीवेत्युत्प्रेक्षा व्यज्यते ।

कविनिबद्धवक्तृप्रौढोक्तिसिद्धार्थशक्तिमूलो वस्तुना वस्तुध्वनिर्यथा

*जह तह व होदु अज्जा णरणाह करेहि रक्खणं सासिणो ।
जं ताए कढक्खोक्का आणत्ता तं मसीकादुं ॥ ५३ ॥

अत्र विरहातुरा आर्या चन्द्रिकाससहमाना रोषोज्ज्वलितया कटाक्षोल्कया चन्द्रं मषीकरोति स रक्षणीय इत्यनेन वस्तुना इतः परं सा जीवितं धारयितुमशक्ताधुनैव त्वया समागन्तव्यमिति वस्तु व्यज्यते ॥

वस्तुनालंकारध्वनिर्यथा

कस्त्वं शुभ्राखिलाङ्गश्चरसि ननु यशो वीररुद्रस्य वर्ते
कोऽयं ते दिव्यदेहः स्फुरति परिसरे मत्सुहृत्तत्प्रतापः ।
प्रच्छाद्यालं स्फुरद्भिः कुमुदसरसिजैः ख्यापितं †वःस्वरूपं
सोमार्कौ स्वागतं वामवधिगिरिरहं कल्पितो निस्तमस्कः॥

---

*यथा तथा वा भवत्वार्या नरनाथ कुरु रक्षणं शशिनः ।
यत्तया कटाक्षोल्का आज्ञप्ता तं मषीकर्तुम् ॥

अभयमिति । अत्र क्रियोत्प्रेक्षयोर्व्यङ्ग्यव्यञ्जकभाव इत्याह **अत्रेति** ॥ ५२ ॥ अथ कविनिबद्धवक्तृप्रौढोक्तिसिद्धार्थेषु वस्तुना वस्तुध्वनिसुदाहरति । **जह तह वेति** । 'नवाच्ययो दातादौ' इति ह्रस्वः । विलम्बितागमनं प्रियं प्रति विदग्धदूतीवचनमेतत् ॥ ५३ ॥ **कस्त्वमिति** । अत्र प्रथमसार्धे लोकालोकवीररुद्रयशसोः प्रश्नोत्तरवाक्यानि चत्वारि । द्वितीयार्धमेकं लोकालोकवाक्यं । **मत्सुहृदिति** । उभयोरेकजन्यत्वादिति भावः । मे सुहृदिति क्वचिदपपाठो लेखकदोषात् । युष्मदस्मदादेशानां पदात् परत्वनियमात् । अत्र तु वाक्यादित्वेन तदभावादिति । अत एवोक्तम् । 'समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः' इति । **प्रच्छाद्यालमिति** । न प्रच्छादनीयमित्यर्थः । "अलंखल्वोः—" इति क्त्वाप्रत्यये ल्यवादेशः । ख्यापितं व इत्यत्र द्वित्वेऽभिधेये व इति पाक्षिकं

---

†वामिति पाठान्तरम् ।

अत्र प्रतापरुद्रयशःप्रतापयोस्सोमार्कसादृश्यप्रतीतेरुपमा व्यज्यते॥

अलंकारेणालंकारध्वनिर्यथा

*उवह हळा वहुआए तह आरूढो वि णिब्भरो माणो ।
णिवइसमाअमसंभमसंजाअभओव्व ओसरइ ॥ ५५ ॥

अत्रोत्प्रेक्षया प्रियप्रार्थनां विनैव मानिनीमनः प्रसन्नमिति विभावनालंकारो व्यज्यते ॥

अलंकारेण वस्तुध्वनिर्यथा

अप्राप्य सेवावसरं नाथ कान्तावृतस्य ते ।
त्वत्कीर्तिं सेवमानेव श्यामा सर्वाङ्गपाण्डुरा ॥ ५६ ॥

अत्र सेवमानेवेत्युत्प्रेक्षया सर्वथा स्वीकार्यत्वादिरूपं वस्तु व्यज्यते ॥

एवं प्रबन्धादिगतत्वेन यथासंभवमुदाहरणानि द्रष्टव्यानि विस्तरभयादिह नोक्तानि ॥

अथ शब्दशक्तिमूलध्वनिः । स च वस्त्वलंकारमूलत्वेन द्विविधः। तथा चोक्तम्

'अलंकारोऽथ वस्त्वेव शब्दाद्यत्रावभासते ।

---

*पश्यत हला वध्वास्तथारूढोऽपि निर्भरो मानः ।
नृपतिसमागमसंभ्रमसंजातभय इवापसरति ॥

वहुवचनम् । 'युष्मदि गुरावेकेषाम्' इति जयादित्यवचनात् । निस्तमस्को वाह्यभागेऽपीति भावः ॥ ५४ ॥ **उवहेति** । उवहेति पश्यतेत्यर्थेऽव्ययम् । हळेति च सख्याह्वाने । 'वा सख्यामामि हळाहळ' इति । भओव्वेत्यत्र 'मिवतिववअवव्व इवार्थे' इतीवार्थे द्वित्वं प्राप्तो वकारः ॥ ५५ ॥ **विभावनालंकार इति** । अकारणकार्योत्पत्तेस्तल्लक्षणत्वादिति भावः । **अप्राप्येति** । श्यामा यौवनवती । अत्र विरहपाण्डिम्नः कीर्तिसेवाहेतुकत्वमुत्प्रेक्ष्यते ॥ ५६ ॥ अवशिष्टा अर्थशक्तिमूला अन्यत एव द्रष्टव्या इत्याह । **एवमिति** । अत्रानुक्तौ हेतुमाह । **विस्तरेति** । उक्तोदाहरणावहितचेतसामुदाहरणान्तरावगमस्य सुलभत्वात् पुनस्तदुपादानं ग्रन्थगौरवमेवावहेदिति शब्दप्रपञ्चपरं विस्तरशब्दं प्रयुञ्जानस्य हृदयम् । "प्रथने वावशब्दे" इति घञ्प्रतिषेधादप्प्रत्ययः । 'स तु शब्दस्य विस्तर' इत्यमरः ॥ शब्दशक्तिमूलध्वनेर्द्वैविध्ये वृद्धसंवादमाह । **तथा चोक्तमिति** । यद्यप्यलंकारोऽपि वस्त्वेव तथाप्यलंकारो

प्रधानत्वेन स ज्ञेयः शब्दशक्त्युद्भवो द्विधा ॥' इति ।

तत्रालंकारध्वनिर्यथा

*एसो सच्चं राओ सामा खु तुमं समाअमो दोण्णं ।
किं उण ण पदोसकहा दीसइ एदं खु अच्चरिअं ॥ ५७ ॥

अत्र प्रकरणेन कान्तानृपवाचकाभ्यां श्यामाराजशब्दाभ्यां निशाचन्द्रप्रतीतेरुपमा व्यज्यते ॥

वस्तुध्वनिर्यथा

कान्तारवाससंतप्ताः संश्रृणुध्वं हितादितः † ।
कुरुध्वमधुना राजपादसेवां नरेश्वराः ॥ ५८ ॥

अत्र राजपादसेवामिति शब्दशक्त्या प्रकृतस्य प्रतापरुद्रस्य प्रतीतिः प्रकरणाज्जायते । अनेन प्रतापरुद्रस्य सेवा कर्तव्या किमरण्यवासेन संतप्ता इति वस्तु व्यज्यते ॥

उभयशक्तिमूलध्वनिर्यथा

जिष्णुरेष भुजस्तम्भजृम्भमाणाद्भुतायुधः ।

---

*एष सत्यं राजा श्यामा खलु त्वं समागमो द्वयोः ।
किं पुनर्न प्रदोषकथा दृश्यते एतत्खल्वाश्चर्यम् ॥

विचित्रं वस्तु, इतरत्तु शुद्धमिति प्रतिपादयितुं वस्त्वेवेत्येवकारः ॥ **एसो इति** । नायिकां प्रति सखीवाक्यमेतत् । **समागम इति** । युज्यते इति शेषः । प्रदोषो दोषः कालविशेषश्च । अत्र श्यामाराजशब्दवाच्ययोः कान्तानृपयोः प्रकृतयोरप्रकृतनिशाचन्द्राभेदाध्यवसायेन प्राप्तस्य प्रदोषस्य कालविशेषलक्षणस्य प्रतिषेधेन विरोधः प्रतीयते । तद्द्योतकमाश्चर्यपदम् । परिहारस्तु दोषनिषेधादिति विरोधाभासोऽलंकारः ॥ ५७ ॥ व्यङ्ग्यं विविनक्ति । **अत्रेति** । अनेकार्थपदगुम्फनमहिम्ना कवेरर्थान्तरं विवक्षितमेव प्रतीयते । तस्यासंबद्धत्वपरिहाराय प्रकृतेनौपम्यं कल्पनीयम् । तेन व्यङ्ग्यस्योपमालंकारस्य श्लिष्टशब्दान्वयव्यतिरेकानुविधायित्वाच्छब्दशक्तिमूलत्वमिति भावः ॥ **कान्तारेति** । हितादाप्तादितोऽस्मात् मत्त इत्यर्थः। संश्रृणुध्वमित्यत्र कर्मणो हितोपदेशस्याविवक्षितत्वादकर्मकत्वम्। तदुक्तम्—'धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात् । प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया ॥' इति । अत एव "समो गम्यृच्छि—"इत्यादिनात्मनेपदम् । अत्र प्रकरणानुगृहीतस्य राजपदस्य महिम्ना प्रतापरुद्रसेवा कर्तव्या नैवं दुःखमनुभवितव्यमिति वस्तु व्यज्यत इत्याह । **अत्रेति** ॥ ५८ ॥ **जिष्णुरिति** ।

---

†हितार्थिनः इति पाठान्तरम् ।

मुञ्चन्तु क्ष्माभृतः सर्वे निजपक्षविजृम्भितम् ॥ ५९ ॥

अत्र क्ष्माभृतो निजपक्षविजृम्भितं मुञ्चन्तु जिष्णुरेष इत्यत्र शब्दशक्तिमूलता। भुजस्तम्भजृम्भमाणाद्भुतायुध इत्यत्रार्थशक्तिमूलता ॥

असंलक्ष्यक्रमव्यङ्ग्यो रसादिध्वनिः। तथा चोक्तं शृङ्गारतिलके।

'रसभावतदाभासभावशान्त्यादिरक्रमः।
भिन्नो रसाद्यलंकारादलंकार्यतया स्थितः ॥' इति।

रसभावोदाहरणं तत्स्वरूपनिरूपणप्रपञ्चे रसप्रकरणे भविष्यति ॥

गुणीभूतव्यङ्ग्यं अष्टविधं निरूप्यते

गुणीभूतव्यङ्ग्यं मध्यमं काव्यमष्टविधम्।

तथा चोक्तं काव्यप्रकाशे

'अगूढमपरस्याङ्गं वाच्यसिद्ध्यङ्गमस्फुटम्।
संदिग्धतुल्यप्राधान्ये काक्वाक्षिप्तमसुन्दरम् ॥' इति।

कामिनीकुचकलशवद्गूढस्यैव चमत्कारकारित्वादगूढव्यङ्ग्यंमध्यमं काव्यम्। यथा

जिष्णुर्जयशील इन्द्रश्च। अद्भुतायुधं खड्गादिकं वज्रायुधं च। क्ष्माभृतो राजानः पर्वताश्च। पक्षा बलानि गरुतश्च ॥ ५९ ॥ **शब्दशक्तिमूलतेति**। शब्दपरिवृत्तिसहिष्णुत्वाभावादिति भावः। **अर्थशक्तिमूलतेति**। तत्सहिष्णुत्वादिति भावः। अयं तु वाक्यगत एव ॥ असंलक्ष्यक्रमव्यङ्ग्यस्य रसादिध्वनित्वे संमतिमाह। **रसभावेति**। तदाभासा रसभावाभासाः। आदिग्रहणेन भावोदयभावसंधिभावशबलत्वानि गृह्यन्ते। अक्रमः असंलक्ष्यक्रम इत्यर्थः। न चात्र रसवदाद्यलंकारशङ्का कार्येत्याह। **भिन्न इति**। तत्र हेतुमाह। **अलंकार्यतयेति**। प्रधानतयेत्यर्थः। रसादीनामङ्गभाव एवालंकारत्वात्। तदुक्तम्। 'प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गं तु रसादयः। काव्ये तस्मिन्नलंकारो रसादिरिति मे मतिः ॥' इति। उदाहरणमुत्तरत्र भविष्यतीत्याह। **रसेति** ॥ अथ मध्यमकाव्यस्योक्तलक्षणत्वाद्विभागमाह। **गुणीभूतेति**। संवादव्याजेनोद्दिशति। **अगूढमित्यादिना**। **गूढस्यैवेति**। 'सर्वमभ्यर्हितं द्रव्यं प्रच्छादनमपेक्षते' इति न्यायादिति भावः। व्यङ्ग्यस्य द्रुतप्रतीतावगूढत्वं मध्यमप्रतीतौ गूढत्वं विलम्बितप्रतीतावस्फुटत्वम्। तत्राद्यन्तयोर्मध्यमत्वं मध्यमस्योत्तमत्वं चेति विवेकः ॥ अगूढ-

औन्नत्यं यदि वर्ण्यते शिखरिणः क्रुध्यन्ति नीचैः कृता
गाम्भीर्यं यदि कीर्त्यते जलधयः क्षुभ्यन्ति गाधीकृताः ।
तत्त्वां वर्णयितुं बिभेमि यदि वा जातोऽस्म्यगस्त्यः स्थित-
स्त्वत्पार्श्वे गुणरत्नरोहणगिरे श्रीवीररुद्रप्रभो ॥ ६० ॥

अत्र यदि वा जातोऽस्म्यगस्त्यः स्थित इत्यनेन जलनिधिपर्वतेभ्यो न बिभेमीति व्यङ्ग्यमत्रागूढम् ॥

अपरस्याङ्गं यत्र रसादे रसादिरङ्गं तदपि गुणीभूतव्यङ्ग्यमेव ।

यथा

वीतव्रीडमपास्तमानमुदयद्वैस्वर्यमाविर्भवत्-
स्वेदं निर्भरगात्रवेपथुमिलन्मूर्च्छं गलद्बाष्पकम् ।
संजातप्रळयं च काकतिमहीनाथस्मरोद्वेजिता
भूपाः शैलगुहासु यान्ति विजनं भीत्या समालिङ्गिताः॥

अत्र शृङ्गारस्य भयरसाङ्गत्वम् ।

वाच्यसिद्ध्यङ्गं यथा

मुदाहरति । **औन्नत्यमिति** । वामनीकृतविन्ध्याचलश्चुलुकीकृतसिन्धुसलिलश्च कुम्भसंभव इति महती प्रथा । अतोऽगस्त्योऽस्मीत्यनेन शैलसमुद्रेभ्यो न बिभेमीति व्यङ्ग्यस्य वाच्यायमानत्वादगूढमित्याह । **अत्रेति** ॥ ६० ॥ **अपरस्याङ्गमिति** । अनयोर्विवक्षितावर्थौ क्रमेणाह । **यत्रेति** । अत्र प्रथमादिशब्देन भावादयो वाक्यार्थीभूतो वाच्यश्च गृह्यन्ते । द्वितीयादिशब्देन च भावादयोऽनुरणनं च गृह्यन्ते । तेन यत्राङ्गिनो रसभावादेर्वाच्यस्य वा रसभावादिरनुरणनं वाङ्गत्वेन निबध्यते तदपराङ्गमित्यर्थः । उदाहरति । **वीतव्रीडमिति** । एकत्रोत्क्रोशनादन्यत्रालापाच्च मानत्यागः । वैस्वर्यं गद्गदभाषित्वम् । मूर्च्छा शून्येन्द्रियत्वम् । प्रलयो नष्टचेष्टता । शैलगुहास्वित्यत्रापिशब्दोऽनुक्तोऽपि सामर्थ्याल्लभ्यते। अतस्तत्रापि विजनं कञ्चन कोणप्रान्तं प्रविशन्तीति भावः । अत्र प्रस्तुतविशेषणसाम्यादप्रस्तुतनायकधर्मप्रतीतेः समासोक्तिः । अत्रान्यपोषकत्वेनाङ्गस्यापि शृङ्गारस्य वर्ण्यमानत्वेन प्राधान्यात् तद्वशेन गुणीभूतव्यङ्ग्यमित्येव व्यपदेशो न पुनरङ्गीभूतभयानकरसापेक्षया ध्वनिरिति । अत एवोक्तं काव्यप्रकाशे । 'क्वचित् केनाचिद् व्यवहारः' इति । एवमपराङ्गान्तरमुदाहार्यम् ॥ ६१ ॥ तृतीयं भेदमाह । **वाच्येति** । वाच्यस्य सिद्धेरुत्पत्तेरङ्गमिति व्युत्पत्त्यैव स्वतः-

करालः काकतीन्द्रस्य करवालनवाम्बुदः ।
धारया शमयत्युग्रं प्रतापज्वलनं द्विषाम् ॥ ६२ ॥

अत्र जलधारा व्यङ्ग्या । सा च करवालनवाम्बुद इत्यस्य वाच्यभूतस्य रूपकस्य सिद्धिकृदिति गुणीभूतव्यङ्ग्यम् ॥

अस्फुटं यथा

वीररुद्रकृपाणस्य महिमा कोऽप्यनङ्कुशः ।
प्रसूते कीर्तिगङ्गां यः पीत्वा द्विषदसृङ्नदीम् ॥ ६३ ॥

अत्र कृपाणस्य जह्नोराधिक्यप्रतिपादनात् व्यतिरेकः परमस्फुटः प्रतीयते ॥

संदिग्धं यथा ।

काकतिक्ष्मापतेर्दृष्टिरनुरागतरङ्गिता ।
लग्ना कल्हारमालेव वध्वास्तुङ्गे कुचद्वये ॥ ६४ ॥

अत्रालिङ्गनेच्छायां वाक्यविश्रान्तिरथवा स्तनमण्डलालोक एवेति संदेहः ॥

तुल्यप्राधान्यं यथा

नृपाः प्रतापरुद्रस्य निषेवध्वं पदाम्बुजे ।
अन्यथास्य मनस्तादृक्प्रसादं कलुषायते ॥ ६५ ॥

सिद्धस्य वाच्यस्योपोद्बलकादपराङ्गादस्य भेदो दर्शित इति वेदितव्यम् । उदाहरति । **कराळ इति** । अत्र जलधारा व्यङ्ग्येत्यभिधायाः प्रकरणात् खड्गधारायामेव नियन्त्रणादिति भावः । अत एव न श्लेष इत्युक्तं वाहिन्यः काकतीन्द्रस्येत्येतद्व्याख्यानावसरे ॥ ६२ ॥ **रूपकस्य सिद्धिकृदिति** । यतो रूपकं स्वनिर्वाहाय प्रतीयमानजलधारासपेक्षते । अन्यथा करवाल एव नवाम्बुदः करवालो नवाम्बुद इवेति वा रूपकोपमितसमासयोः संदेहः स्यात् । न चात्र प्रयुज्यमानस्य कराळत्वस्योपमितसमासबाधकत्वम् । केवलकरवालविशेषणत्वाङ्गीकारेण समानधर्मत्वाभावात् । न चास्तु नाम संदेह इति वाच्यम् । साधकबाधकाभाव एव तस्यालंकारत्वादिति ॥ अस्फुटमुदाहरति । **वीररुद्रेति** । जह्नुः पीतामेव नदीं पुनरजीजनदयं पुनरन्यथेत्युपमानादुपमेयस्याधिक्यलक्षणस्य व्यतिरेकस्य विलम्बेन प्रतीतेरस्फुटमित्याह । **अत्रेति** ॥ ६३ ॥ संदिग्धप्राधान्यमुदाहरति । **काकतीति** । अत्रालिङ्गनेच्छारूपव्यङ्ग्यस्य चमत्कारकारित्वात् प्राधान्यमुत वाच्यस्येति संदेहात् संदिग्धप्राधान्यमत्रेत्याशयेनाह । **अत्रालिङ्गनेति** ॥ ६४ ॥ तुल्यप्राधान्यमुदाहरति । **नृपा इति** ।

अत्र प्रतापरुद्रस्य पादसेवा यदि त्यज्यते तदानीं नगरेषु वासो दुर्लभ इति व्यङ्ग्यार्थस्य वाच्यस्य च समं प्राधान्यम् ॥

असुन्दरं यथा

*एअसिलामहिलाणं सोऊण णरेंददंसणामोअं ।
गुरुअणनिअंतिआए वहुआए सामलं वअणं ॥ ६६ ॥

अत्र नरेन्द्रदर्शननिमित्तं हर्षमुत्पश्यन्त्या वध्वा मुखं श्यामलमिति वाच्यस्यैव चारुत्वम् । गुरुजननियन्त्रिताहं नरेन्द्रं द्रष्टुं न गतवत्यस्मि इति व्यङ्ग्यार्थस्याचारुत्वम् ॥

यत्र काक्वार्थान्तरमाक्षिप्यते तदपि गुणीभूतव्यङ्ग्यमेव ।

यथा

†पिअसहि कहेहि अहिआ खोणी लच्छी सरस्सई मज्झ ।
जां बहु मण्णइ सो णरणाहो गुणविसेसण्णो ॥ ६७ ॥

---

*एकशिलामहिळानां श्रुत्वा नरेन्द्रदर्शनामोदम् ।
गुरुजननियन्त्रिताया वध्वाः श्यामलं वदनम् ॥

†प्रियसखि कथयाधिका क्षोणी लक्ष्मीः सरस्वती मत्तः ।
यां बहु मन्यते स नरनाथो गुणविशेषज्ञः ॥

अकलुषं कलुषं भवति कलुषायते । लोहितादित्वात् क्यष्प्रत्ययः । "वा क्यषः" इत्यात्मनेपदम् । सर्वत्र कविना व्यञ्जनैकप्रवणेन भाव्यम् । अत्र तु वाच्यस्य व्यङ्ग्येन सह समप्राधान्यसंपादनात् गुणीभाव इति भावः । प्राधान्यस्य संदेहसादृश्ययोः सहृदय एव प्रमाणम् । उद्धतैरन्यथापि वक्तुं शक्यत्वादित्युक्तं भट्टगोपालेन ॥ ६५ ॥ सप्तममुल्लङ्घ्य बुद्धिस्थत्वादष्टमं भेदमुदाहरति । **असुन्दरमिति** । एतेनैतेषामुद्देशक्रमो न विवक्षित इति सूच्यते । **एअसिलेति** । अत्र गुरुजनपराधीना काचिदेकशिलामहिलानां नरेन्द्रसंदर्शनसंतोषमहालाभं श्रुत्वा मलिनमुखाभूदिति वाच्यस्यातिचारुत्वादात्मनस्तदलाभरूपस्य व्यङ्ग्यस्यासुन्दरत्वमित्याह । **अत्र नरेन्द्रेति** ॥ ६६ ॥ अवशिष्टं भेदमाचष्टे । **यत्र काक्केति** । काकुर्नाम शब्दधर्मः । तत्प्रयोगे सर्वत्र शब्दस्पृष्टत्वेन व्यङ्ग्यस्य गुणीभाव एव । तदुक्तं लोचने । 'काकुयोजनायां सर्वत्र गुणीभूतव्यङ्ग्यतैव' इति । काव्यप्रकाशकारस्तु 'गुरुः खेदं खिन्ने मयि भजति नाद्यापि कुरुषु' इत्यादौ क्वचित् काकोः प्रश्नमात्रपर्यवसानात् व्यङ्ग्यस्य मयि न योग्यः खेदः कुरुषु योग्य इत्येवंरूपस्य गुणीभावानौचित्येन प्राधान्यात् ध्वनित्वमप्यङ्गीचकार । उदाहरति । **पिअसहीति** । 'मइममममहमज्झङसौ' इति पञ्चम्येकवचनेऽस्मदो मज्झादेशः ।

अत्र क्षोणी मदधिकेति काकुकल्पनयाधिका न भवतीति वस्तु व्यज्यते ॥

चित्रं तु काव्यं शब्दार्थालंकारचित्रतया बहुविधं । तत्प्रपञ्चोऽप्यलंकारप्रकरणे व्यक्तीभविष्यति ।

॥ महाकाव्योपकाव्यादिप्रबन्धनिरूपणम् ॥

अथ महाकाव्यादयः प्रबन्धा निरूप्यन्ते ।

नगरार्णवशैलर्तुचन्द्रार्कोदयवर्णनम् ।
उद्यानसलिलक्रीडामधुपानरतोत्सवाः ॥ ६८ ॥
विप्रलम्भो विवाहश्च कुमारोदयवर्णनम् ।
मन्त्रद्यूतप्रयाणाजिनायकाभ्युदया अपि ॥ ६९ ॥
एतानि यत्र वर्ण्यन्ते तन्महाकाव्यमुच्यते ।
एषामष्टादशानां यैः कैश्चिदूनमपीष्यते ॥ ७० ॥

तत्त्रिविधम् । गद्यमयं पद्यमयमुभयमयं चेति ।

अपादः पदसंघातो गद्यं पद्यं चतुष्पदम् ।

गद्यकाव्यं कादम्बर्यादि । पद्यकाव्यं रघुवंशादि ।

असर्गबन्धमपि यदुपकाव्यमुदीर्यते ॥ ७१ ॥

असर्गबन्धं सूर्यशतकादि ।

गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते ।
वक्त्रं चापरवक्त्रं च सोच्छ्वासत्वं च भेदकम् ॥७२॥

'ङसेर्लुक्' इति वैकल्पिको लुक् । शित्त्वात् पूर्वस्य दीर्घः । अत्राधिक्यनिषेधस्य वाचकाभावात् केवलवाच्यसामर्थ्यलभ्यत्वेन व्यङ्ग्यत्वम् । तस्य च काकुसंस्पर्शाद् गूढत्वकृतचारुत्वातिशयभङ्गेन गुणीभूतत्वमेव । तदेतत् सर्वं मनसि निधायाह । **अत्रेति** ॥ ६७ ॥ अधमकाव्यप्रपञ्चोऽलंकारप्रकरणे भविष्यतीत्याह । **चित्रं त्विति** ॥ पूर्वं प्रबन्धानां ध्वन्याश्रयत्वमुक्तं । तत्स्वरूपस्य लक्षणमन्तरेण दुर्ज्ञेयत्वात् तन्निरूपणं प्रतिजानीते । **अथेति** । तत्र महाकाव्यलक्षणमाह । **नगरेत्यादिना** । एतच्च सर्गनिबन्धचतुर्वर्गफलचतुरोदात्तनायकत्वादीनामुपलक्षणम् । तत्प्रपञ्चस्तु काव्यादर्शे द्रष्टव्यः ॥ ६८—७१ ॥ चम्पूकाव्यं दमयन्त्यादि । आख्यायिका नाम गद्यकाव्यविशेषः । तल्लक्षणमाह । **वक्त्रमिति** ।

वर्ण्यते यत्र काव्यज्ञैरसावाख्यायिका मता ।

*यत्र वक्त्रापरवक्त्रनामानौ वृत्तविशेषौ वर्ण्येते सोच्छ्वासपरिच्छिन्नाख्यायिका हर्षचरितादि ।

॥ क्षुद्रप्रबन्धनिरूपणम् ॥

अथ क्षुद्राः प्रबन्धा निरूप्यन्ते ।

येन केनापि ताळेन गद्यपद्यसमन्वितम् ॥ ७३ ॥
जयत्युपक्रमं मालिन्यादिप्रासविचित्रितम् ।
तदुदाहरणं नाम विभक्त्यष्टकसंयुतम् ॥ ७४ ॥

यत्रादौ जयत्युपक्रमं मालिन्यादिवृत्तं रम्यं पद्यं निबध्यते अनन्तरमपि चेत्युपक्रमाण्यष्टवाक्यानि सप्रासानि सताळानि प्रतिविभक्ति निबध्यन्ते अनन्तरं विभक्त्याभासास्तत् उदाहरणम् ।

संबोधनविभक्त्या यत् प्रचुरं पद्यपूर्वकम् ।

उच्छ्वासः सर्गादिरिव परिच्छेदभेदः । **भेदक्रमिति** । कथाया इति शेषः । तदुक्तमभिनवगुप्ताचार्यैः । 'आख्यायिकोच्छ्वासादिना वक्त्रापरवक्त्रादिना युक्ता । कथा तु तद्विरहिता' इति । दण्डिना पुनरुभयोर्नाममात्रभेदो न जातिभेद इत्युपपादितम् । 'तत्कथाख्यायिकेत्येका जातिः संज्ञाद्वयाङ्किता' इत्यादिना । वक्त्रं नामाष्टाक्षरपादो मात्रावृत्तविशेषः । अपरवक्त्रमर्धसमवृत्तभेदः । उभयोर्लक्षणं तु वृत्तरत्नाकरे 'वक्त्रं नाद्यान्नसौ स्यातामब्धेर्योऽनुष्टुभि ख्यातम्' 'अयुजि ननरला गुरुः समे तदपरवक्त्रमिदं नजौ जरौ ॥' इति । अथ क्षुद्रप्रबन्धेषूदाहरणस्य लक्षणमाह। **येन केनेति**। ताळेन चञ्चत्पुटादिना गद्यैः क्रमेण कलिकोत्कलिकापरपर्यायैर्विभक्तिविभक्त्याभासाङ्कितैर्वाक्यैः पद्यैः प्रतिवाक्यमादौ तत्तद्वाक्यसमानविभक्तिकनायकनामाङ्कितैः श्लोकैश्च समन्वितम् । मालिनी नाम वृत्तविशेषः । 'ननमयययुतेयं मालिनी भोगिलोकैः' इति लक्षणात् ॥ ७२—७४ ॥ अत्र लक्षणस्य न्यूनत्वाद्वर्तमानपदानां च संकीर्णत्वादुभयं वारयन् व्याचष्टे । **यत्रेत्यादिना** । अत्र संबोधनविभक्तिरष्टमी । प्रबन्धान्ते सर्वविभक्त्यङ्कितो नवमश्लोकश्चेत्यादिविशेषाणां साक्षिश्लोकाः साहित्यचिन्तामणौ द्रष्टव्याः । अन्ते कविप्रबन्धनामाङ्कितं पद्यविशेषं कुर्यात् । तदुक्तम् 'अन्तेऽनुष्टुभमार्यां वा कविकृत्याख्ययान्विताम् । कुर्याच्चाटुप्रबन्धानामयं साधारणो विधिः ॥' इति । चक्रवाळलक्षणमाह । **संबोधनेति** । पद्यपूर्वकमित्यनेन गद्यानां कलिकात्वेनानु-

---

*कोशान्तरे वाक्यमिदं नोपलभ्यते ।

विमुक्तपुनराकृष्टशब्दं स्याच्चक्रवाळकम् ॥ ७५ ॥
आद्यन्तपद्यसंयुक्ता संस्कृतप्राकृतात्मिका ।
अष्टभिर्वा चतुर्भिर्वा वाक्यैः स्कन्धसमन्विता ॥ ७६ ॥
प्रतिस्कन्धं भिन्नवाक्यरीतिर्देवनृपोचिता ।
सर्वतो देवशब्दादिरेषा भोगावळी मता ॥ ७७ ॥
वर्ण्यमानाङ्कबिरुदवर्णनप्रचुरोज्ज्वला ।
वाक्याडम्बरसंयुक्ता सा मता बिरुदावळी ॥ ७८ ॥
ताराणां संख्यया पद्यैर्युक्ता तारावळी मता ।

एवं कविप्रौढोक्तिसिद्धाः क्षुद्राः प्रबन्धा यथासंभवमूह्याः । अथैतेषामुदाहरणानि विस्तरभयादिह नोक्तानि ॥

इति श्रीविद्यानाथविरचिते प्रतापरुद्रयशोभूषणेऽलंकारशास्त्रे काव्यप्रकरणम् समाप्तम् ॥

प्रवेश उक्तः । विमुक्तः सन् पुनराकृष्टो विमुक्तपुनराकृष्टः । स्नातानुलिप्तादिवत् पूर्वकालसमासः । तथाभूतः शब्दो द्वित्राक्षरपदं यस्य तत् तथोक्तम् । शृङ्खलितदळाद्यन्तपदमित्यर्थः । अत्र गद्यपद्ययोरावृत्त्यादिकमन्यतो द्रष्टव्यम् । तदुक्तम् । ‘ओजस्विपदभूयिष्ठमाद्यन्ताशीःसमन्वितम् । चतुर्धा वाष्टधा वृत्तं चक्रवाळं प्रचक्षते ॥’ इति ॥ ७५ ॥ भोगावळीमाह । **आद्यन्तेति** । स्कन्धः परिच्छेदभेदः । अत्र भोगोपकरणोद्यानवसन्तनायकगुणादिवर्णनं प्रायेण कर्तव्यम् ॥ ७६—७७ ॥ विरुदावळीमाह । **वर्ण्यमानेति** । अत्र स्वविक्रमकुलक्रमागतविरुदवर्णनातिरिक्तं भोगावळीवत् द्रष्टव्यम् ॥ ७८ ॥ तारावळीमाह । **ताराणामिति** । संख्यया सप्तविंशत्येत्यर्थः ॥ नन्वन्येऽपि चतुरुत्तरचतुर्भद्रादिचाटुप्रबन्धाः किमिति न लक्ष्यन्ते इत्यत्राह । **एवमिति** । उदाहरणानुक्तौ हेतुमाह । **अथेति** ॥

इति पदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलचलमल्लिनाथसूरिसूनुना विश्वजनीनविद्यस्य विद्वन्मणेः पेद्दयार्यस्यानुजेन कुमारस्वामिसोमपीथिना विरचिते प्रतापरुद्रीयव्याख्याने रत्नापणाख्याने काव्यस्वरूपनिरूपणं नाम द्वितीयं प्रकरणम् ॥

॥ अथ नाटकप्रकरणम् ॥

॥ अथ नाट्यप्रधानाः प्रबन्धा निरूप्यन्ते ॥

तत्र नाट्यस्वरूपं निरूप्यते

चतुर्विधैरभिनयैः सात्त्विकाङ्गिकपूर्वकैः ।
धीरोदात्ताद्यवस्थानुकृतिर्नाट्यं रसाश्रयम् ॥ १ ॥
भावाश्रयं तु नृत्यं स्यान्नृत्तं ताललयान्वितम् ।

एषा दशरूपकोक्ता प्रक्रिया । नृत्तनृत्ययोर्नाटकाद्यङ्गत्वादिह स्व-

---

अथ श्राव्यप्रबन्धनिरूपणानन्तरं नाटकादिदृश्यप्रबन्धनिरूपणं प्रतिजानीते । **अथेति** । अभिनयत्यभिव्यनक्ति पदार्थानित्यभिनयः । पचाद्यजन्तः । 'अभिपूर्वस्तु नीञ्धातुराभिमुख्यार्थनिर्णये । यस्मात् पदार्थान् नयति तस्मादभिनयः स्मृतः ॥' इति । तैश्चतुर्विधैः । तत्र परगतसुखदुःखभावनया भावितान्तःकरणत्वं सत्त्वम् । ततो भवा भावाः सात्त्विकाः स्तम्भादयः । तदभिनयोऽनिमेषनयनत्वादिः । अङ्गं हस्तादि । तद्व्यापारः पताकादिराङ्गिकाभिनयः । पूर्वशब्देन वाचिकाहार्याभिनयौ गृह्येते । अत्र पाठ्यापरपर्यायं काव्यनाटकरूपं वाचिकम् । तदभिनयो रसोचितरागानुषङ्गादिः । 'आहार्याभिनयो नाट्योचितालंकारधारणम् ।' अभिनयादिलक्षणं तु संगीतचूडामणौ । 'अभिव्यञ्जन् विभावानुभावादीन् नाटकाश्रयान् । उत्पादयन् सहृदये रसज्ञानं निरन्तरम् ॥ अनुकर्तृस्थितो योऽर्थोऽभिनयः सोऽभिधीयते । आङ्गिको वाचिकश्चैव सात्त्विकाहार्यकाविति ॥ स चतुर्धा कृतस्तज्ज्ञैराङ्गिकोऽङ्गक्रियोच्यते । रागानुषङ्गि यद्वाक्यं नाट्ये तद्वाचिकं स्मृतम् । सत्त्वक्रिया सात्त्विकं स्यादाहार्यो भूषणादिकम् ॥' इति । धीरोदात्तादिनायकानामवस्था धीरोदात्तादयः । अनियतत्वादवस्थात्वमेव तेषां न जातित्वमित्युक्तं नायकप्रकरणे । तासामनुकृतिरनुकरणं चतुर्विधाभिनयेनाभिनेयतादात्म्यापत्तिरित्यर्थः । **रसाश्रयमिति** । वक्ष्यमाणक्रमेण वाक्यार्थीभूतरसविषयमित्यर्थः । अतोऽत्र वाक्यार्थाभिनय इति वेदितव्यम् । नट अवस्पन्दन इत्यस्माद्धातोरीषच्चलनार्थाण्ण्यत्प्रत्यये नाट्यमिति व्युत्पत्त्या सात्त्विकाभिनयबाहुल्यं सूच्यते ॥ १ ॥ प्रसङ्गान्नृत्यनृत्तयोर्लक्षणमाह । **भावेति** । भावाः पदार्थीभूता विभावाद्या आश्रया विषयत्वेन यस्य तत् भावाश्रयम् । अत एवात्र पदार्थाभिनयो द्रष्टव्यः । नृतेर्गात्रविक्षेपवाचिनो निष्ठान्तादर्हार्थे यति नृत्यमिति व्युत्पत्त्या आङ्गिकाभिनयबाहुल्यं सूच्यते । अत एव नाट्याद्भेदद्योतकस्तुशब्दः । रसविषयं सात्त्विकबहुलं नाट्यम् । भावविषयमाङ्गिकबहुलं मार्गापरपर्यायं नृत्यमिति विवेकः । **नृत्तमिति** । गीतादिपरिमाणावच्छेदः । कालवि-

रूपनिरूपणं कृतम् । तथोक्तं दशरूपके

मधुरोद्धतभेदेन तद्द्वयं द्विविधं पुनः ।
लास्यताण्डवरूपेण नाटकाद्युपकारकम् ॥

तेन नाट्येन दश रूपकाणि भवन्ति ।

'नाटकं सप्रकरणं भाणः प्रहसनं डिमः ।
व्यायोगसमवाकारौ वीथ्यङ्केहामृगा दश'॥ इति ।

नाट्याश्रयत्वेनाभेद इति शङ्का न युज्यते ॥ २ ॥
वस्तुनेतृरसास्तेषां रूपकाणां हि भेदकाः ।

वस्तु त्रिविधम् । प्रख्यातमुत्पाद्यं मिश्रं चेति । तथोक्तं दशरूपके ।

'प्रख्यातोत्पाद्यमिश्रत्वभेदात् तत्त्रिविधं मतम् ।' इति

इतिहासनिबन्धनं प्रख्यातम्, कविकल्पितमुत्पाद्यम्, संकरायत्तं

शेषस्तालश्चञ्चत्पुटादिः । तदुक्तम् । 'कालो लघ्वादिमितया क्रियया संमितो मितिम् । गीतादेर्विदधत्तालः स च द्वेधा बुधैः स्मृतः ॥' इति । लयोऽपि 'तालान्तरालवर्ती यः कालोऽसौ लयनाल्लयः ।' इत्युक्तलक्षणः कालविशेषः । एतदुभयाश्रयं देश्यापरपर्यायं नृत्तमित्यर्थः । अस्य स्वकपोलकल्पितत्वं परिहरति । **एषेति** । **नृत्येति** । क्वचिदवान्तरपदार्थाभिनयेन शोभाहेतुत्वेन च नाटकादावुपयोगात्तदङ्गत्वमिति विज्ञेयम् । तदेतत्संवादव्याजेनानयोः पुनर्द्वैविध्यमाह । **मधुरेति** । मधुरं लास्यमुद्धतं ताण्डवमित्यर्थः । **तेनेति** । नृत्यनृत्तोपकृतेनेत्यर्थः । **दश रूपकाणीति** । नाटिकासट्टकादीनामत्रैवान्तर्भावादिति भावः । तत्प्रकारस्तु दशरूपके द्रष्टव्यः । नाट्याभेदेऽपि वस्त्वादिभेदाद्रूपकभेद इत्याह । **नाट्याश्रयत्वेनेति** । वस्तु कथाशरीरम् । तस्येतिवृत्तमिति नामान्तरम् । तदुक्तं भावप्रकाशे । 'वस्तु यत् स्यात् प्रबन्धस्य शरीरं कविकल्पितम् । इतिवृत्तं तदेवाहुर्नाट्याभिनयकोविदाः ॥' इति । तत् द्विविधम् । आधिकारिकं प्रासङ्गिकं चेति । तत्राधिकारः फलस्वाम्यं तद्वानधिकारी । अधिकारेणाधिकारिणा वा निर्वृत्तमाधिकारिकं प्रधानम् । यथा रामायणे सीतारामवृत्तान्तः । प्रसङ्गेन निर्वृत्तं प्रासङ्गिकमङ्गभूतम् । तत्तु द्विविधम् । पताका प्रकरी चेति । तत्र दूरानुवर्तिनी कथा पताका । यथा सुग्रीवादिवृत्तान्तः । अल्पानुवर्तिनी प्रकरी । यथा जटायुश्श्रमणादिवृत्तान्तः ॥ २ ॥ एवमेकमाधिकारिकं द्विविधं प्रासङ्गिकमिति त्रैविध्यं सिद्धवत्कृत्य पुनस्त्रैविध्यमाह । **वस्तु त्रिविधमित्यादि** । प्रख्यातं महावीरचरितादि । उत्पाद्यं मालतीमाधवीयादि । मिश्रमुत्तररामचरितादि । एवमाधिकारिकपताकाप्रकरीणां प्रत्येकं प्रख्यातादिभेदभिन्नत्वेन त्रैविध्ये वस्तुनो नववि-

मिश्रम् चेति एवमादिवस्तुभेदान्नायकभेदाद्रूपकाणां परस्परं भेदः। तथा हि। नाटके प्रख्यातमितिवृत्तम्। धीरोदात्तो नायकः। शृङ्गारवीररसयोरन्यतरस्य प्राधान्यम्। अन्येषां रसानामङ्गत्वेनानुप्रवेशः। प्रकरण उत्पाद्यमितिवृत्तम्। धीरशान्तो नायकः। शृङ्गाररसस्यैव प्राधान्यम्। भाणे उत्पाद्यमितिवृत्तम्। धूर्तविटो नायकः। शृङ्गारवीरयोः सूचनामात्रसारता। प्रहसने कल्प्यमितिवृत्तम्। पाषण्डप्रभृतयो नायकाः। हास्यरसः प्रधानम्। डिमे प्रख्यातमितिवृत्तम्। देवगन्धर्वपिशाचादयो धीरोद्धता नायकास्ते षोडश। रौद्ररसः प्रधानम्। वीरशृङ्गारयोरनुप्रवेशः। व्यायोगे प्रख्यातमितिवृत्तम्। धीरोद्धतो नायकः। वीररसः प्रधानम्। समवाकारे देवासुरादयो द्वादश नायकाः। वीररसः प्रधानम्। कल्पितमितिवृत्तं प्रसिद्धं वा। वीथ्यां कल्पितमितिवृत्तम्। धीरोद्धतो नायकः। शृङ्गाररसस्य सूचनामात्रसारता। अङ्के प्रख्यातमितिवृत्तम्। प्राकृतजनो नायकः। करुणरसः प्रधानम्। ईहामृगे मिश्रमितिवृत्तम्। धीरोद्धतो नायकः। शृङ्गाररसस्याभासत्वम्।

अथ तेषां सामग्री निरूप्यते। तत्र पञ्च सन्धयः। तथा चोक्तं दशरूपके।

'मुखं प्रतिमुखं गर्भः सावमर्शोपसंहृतिः।' इति

संधिर्नामैकेन प्रयोजनेनान्वितानां कथानामवान्तरप्रयोजनसंबन्धः।

धत्वं विज्ञेयम्। एतदेवाभिप्रेत्याह। **एवमादिवस्तुभेदादिति**। दिव्यमर्त्योभयात्मना वस्तुनः पुनरपि त्रैविध्याङ्गीकारे तद्वदन्येऽपि बहवो भेदाः कल्पयितुं शक्यन्त एव। लक्ष्येषु ते स्वयमेवोहनीया इति विस्तरभिया नेह पृथग्व्युत्पाद्यन्ते। वस्त्वादयो रूपकभेदका इत्युक्तम्। तद्विविनक्ति। **तथा हीत्यादिना**। स्पष्टोऽर्थः। वस्त्वादिभेदाद्रूपकभेदो निरूपितः। अधुना वस्त्वेकदेशविशेषभूतसंध्यादिस्वरूपं निरूपयति। **अथेत्यादिना**। तत्र संमतिव्याजेन संधीनां विभागमाह। **मुखमिति**। सावमर्शा अवमर्शसहिता उपसंहृतिर्विमर्शो निर्वहणं चेत्यर्थः। एतेषां सामान्यलक्षणमाह। **सन्धिरिति**। प्रयोजनमत्र त्रिवर्गरूपं फलं तच्च धर्मार्थकामेष्वेकैकस्य स्वव्यतिरिक्ताभ्यां द्वाभ्यामुपसर्जनाभ्यां व्यासेन समासेन च संबन्धे कैवल्ये च द्वादशविधम्। तदुक्तम्।

तत्रारम्भबीजसंबन्धो मुखसंधिः । प्रयत्नबिन्दुसंबन्धः प्रतिमुखसंधिः। प्राप्त्याशापताकयोः संबन्धो गर्भसंधिः । नियताप्तिप्रकर्योः संबन्धो विमर्शसंधिः । फलागमकार्ययोस्संबन्धो निर्वहणसंधिः । तथा चोक्तं दशरूपके ।

'बीजबिन्दुपताकाख्यप्रकरीकार्यलक्षणाः ।
आरम्भयत्नप्राप्त्याशानियताप्तिफलागमाः ॥
अर्थप्रकृतयः पञ्च पञ्चावस्थासमन्विताः ।
यथासंख्येन जायन्ते मुखाद्याः पञ्च संधयः ॥' इति ॥

अथारम्भादीनां लक्षणं निरूप्यते ।

औत्सुक्यमात्रमारम्भः फललाभाय भूयसे ॥ ३ ॥
प्रयत्नस्तु फलाप्राप्तौ व्यापारोऽतित्वरान्वितः ।

'फलं त्रिवर्गस्तच्छुद्धमेकानेकानुबन्धि च' इति । तेनैकेन मुख्येनान्वितानामितिवृत्तखण्डानामवान्तरैकप्रयोजनसंबन्धः संधिरित्यर्थः । तदुक्तम् । 'एककार्यान्वितेष्वत्र कथांशेषु प्रयोगतः । अवान्तरैककार्यस्य संबन्धः संधिरिष्यते ॥' इति । अथावस्थार्थप्रकृतिसंबन्धे मुखादिसंधयो जायन्त इत्याह । **तत्रेति** । अत्र संमतिमाह । **बीजेति** । अर्थप्रकृतयः प्रयोजनसिद्धिहेतव इति केचित् । कथाशरीरकारणानीति भोजराजादयः । तद्विशेषाः पूर्वोक्ता बीजादयः पञ्च । फलसिद्धये स्वीक्रियमाणस्य नायकव्यापाररूपस्योपायस्य पूर्वोक्ता आरम्भादयः पञ्चावस्था भवन्ति । तदुक्तम् । 'अवस्थाः पञ्च कार्यस्य प्रारब्धस्य फलार्थिभिः।' इति । तदेतदुभयसंबन्धे पञ्च संधयो जायन्त इत्यर्थः । तत्र साधनत्वात् बीजस्यादावुपक्षेपः । साध्यत्वात् कार्यस्यान्ते । अविच्छेदार्थं बिन्दोस्तयोर्मध्ये । पताकाप्रकर्योस्तु बीजकार्ययोर्मध्ये यथायोगं निवेश इति विज्ञेयम् । तत्र पताकाया विकल्पमाह कोहलः । तन्मते पताकास्थाने 'अपताके निवेशः स्याद्बिन्दोर्बीजस्य वा क्वचित् ।' इति भावप्रकाशोक्तो विशेषो द्रष्टव्यः । अवस्थानामुद्देशक्रमः सामर्थ्यलब्धः स्पष्ट एव । अवस्थापञ्चकं क्रमेण लक्षयति । **औत्सुक्येति** । कालाक्षमत्वलक्षणोऽभिलाषप्रकर्ष औत्सुक्यम् । मात्रशब्दो वक्ष्यमाणप्रयत्नादिव्यवच्छेदकः । फलस्य त्रिवर्गरूपस्य लाभाय न पुनः क्षुद्रस्य । अत्र फलगतं भूयस्त्वं लाभे उपचर्यते । नायकव्यापारस्य स्वरूपात्किञ्चिदुच्छूनत्वमारम्भ इत्यर्थः ॥ ३ ॥ आरम्भादीनां सर्वेषां नाटक एवोदाहरणं भविष्यतीति लक्षणमात्रमत्र परीक्ष्यते । **प्रयत्नस्त्विति** । फलाप्राप्ताविति सतिसप्तमी ।

उपायापायशङ्काभ्यां प्राप्त्याशा कार्यसंभवः ॥ ४ ॥
अपायाभावतः कार्यनिश्चयो नियताप्तिका ।
समग्रफलसंपत्तिः फलागम उदाहृतः ॥ ५ ॥

अथ बीजादिपञ्चकं निरूप्यते ।

स्तोकोद्दिष्टः कार्यहेतुर्बीजं विस्तार्यनेकधा ।
अवान्तरार्थविच्छेदे बिन्दुरच्छेदकारणम् ॥ ६ ॥
प्रतिपाद्यकथाङ्गं स्यात् पताका व्यापिनी कथा ।

फलप्राप्ताविति पाठे विषयसप्तमी । कार्यसंपादनयोग्यता प्रयत्न इत्यर्थः । **उपायेति**। उपायेनापायशङ्कया च कार्यस्य संभवः संभावनाप्रतिबन्धकोपनिपातेन शङ्क्यमानत्वं प्राप्त्याशेत्यर्थः । नियताप्तिं लक्षयति । **अपायेति** । प्रतिपक्षनिवृत्त्या कार्यनिश्चयो नियताप्तिरित्यर्थः । **समग्रेति** । बाधकबाधनेन फलपर्यन्तत्वादैकार्थं फलागम इत्यर्थः ॥ ४—५ ॥ अथार्थप्रकृतिपञ्चकं क्रमेण लक्षयति । **स्तोकेति** । स्तोकोद्दिष्टः स्वल्पोपक्षिप्तः अनन्तरमनेकधा मूलस्कन्धशाखापलाशादिवन्नायकोपनायकप्रतिनायकभेदेन बहुधा विस्तारी कार्यस्य त्रिवर्गरूपस्य फलस्य यो हेतुस्तद्बीजमिव बीजम् । तच्च क्वचिदात्माधीनसिद्धेर्नायकस्यात्मोत्साहात्मकं क्वचिदमात्याधीनसिद्धेस्तदुत्साहात्मकं क्वचिदुभयाधीनसिद्धेरुभयोत्साहात्मकं चेति द्रष्टव्यम् । अत्रामात्यगतोऽप्युत्साहो याजकव्यापारो यजमानस्येव नायकस्यैव फलं जनयतीति बोद्धव्यम् । **अवान्तरेति** । अवान्तरार्थैरवान्तरप्रयोजनैर्विच्छेदे सामर्थ्यात् परमप्रयोजनस्येति भावः । तदविच्छेदकारणं बिन्दुः । तदुक्तं भावप्रकाशे । 'फले प्रधाने विच्छिन्ने बीजस्यावान्तरैः फलैः । तस्याविच्छेदको हेतुर्बिन्दुरित्याह कोहलः' ॥ इति ॥ ६ ॥ **प्रतिपाद्येति** । प्रतिपाद्यकथायाः फलोद्देशप्रवृत्तत्वेन प्रधानभूताया रामादिनायकव्यापाररूपाया अङ्गं तत्संबन्धित्वादिति भावः । तदुक्तमाचार्यैः 'प्रधानं फलसंबन्धि तत्संबन्ध्यङ्गमिष्यते ।' इति । तथाभूता कथा सुग्रीवाद्युपनायकव्यापाररूपा पताका व्यापिनीत्यनेन प्रकरीव्यवच्छेदः । ननु पताकायामपि पृथक्फलमिच्छन्ति शारदातनयादयः । सुग्रीवादीनां तथा दर्शनात् । नैतन्न्यायसहम् । अङ्गानां प्रधानफलेनैव फलवत्त्वनियमादिति चेन्नैष दोषः । दध्नेन्द्रियकामस्येत्यादावङ्गभूतानामपि दध्यादीनां फलसंबन्धाङ्गीकारात् । नन्वङ्गप्रधानफलयोरेकाश्रयत्वं दृष्टान्ते दार्ष्टान्तिके तु न तथेति वैषम्यमिति चेन्मैवम् । फलसंतुष्टस्यैवानुचरस्यार्थक्रियाकारित्वेन तत्फलस्यापि स्वामिफलत्वाभिमानात् ।

अव्यापिनी प्रकरिका कार्यं निर्वाहकृत् फले ॥ ७ ॥

अथ मुखं निरूप्यते ।

मुखं बीजसमुत्पत्तिर्नानार्थरससंभवा ।
अङ्गानि द्वादशैतस्य बीजारम्भसमन्वयात् ॥ ८ ॥

बीजारम्भानुगुण्येन मुखसंधेरङ्गानि प्रयोक्तव्यानि ।

उपक्षेपः परिकरः परिन्यासो विलोभनम् ।
युक्तिः प्राप्तिः समाधानं विधानं परिभावना ॥
उद्भेदभेदकरणान्यन्वर्थानि यथाक्रमम् ॥ ९ ॥

यथाक्रममेषां स्वरूपं निरूप्यते

अव्यापिनीति । लघुः प्रकरः प्रकरी । गौरादित्वाद् ङीष् । तदुक्तम् । 'स्त्री स्यात् काचिन्मृणाल्यादिर्विवक्षापचये यदि ।' इति । यथा पुष्पादिप्रकरः परेषामेव वेदिकादीनां शोभायै भवति एवमृतुवर्णनजटायुश्श्रमणादिवृत्तान्तरूपा प्रकर्यपि प्रधानस्यैव फलं जनयति न पुनः स्वस्येति ग्रन्थान्तरोक्तो विशेषो द्रष्टव्यः । अव्यापिनीति विशेषनिषेधस्तु पताकोक्तप्रतिपाद्यकथाङ्गत्वमात्राभ्यनुज्ञापर इति द्रष्टव्यम् । **कार्यमिति** । प्रधानफलनिर्वाहकोऽन्तिमः कथावयवः कार्यमित्यर्थः ॥ ७ ॥ इत्थमवस्था अर्थप्रकृतयश्च निरूपिताः । तदुभययुगलपञ्चकसमन्वयसंभूतसंधिपञ्चकलक्षणं क्रमेणाह । **मुखमित्यादिना** । एतदेव लक्षणं दशरूपकादावप्युक्तम् । तत्र नानाभूतानामर्थानां प्रयोजनानां रसानां च हेतुर्बीजसमुत्पत्तिर्मुखसंधिरिति कश्चिद् व्याचष्टे । नानार्थशब्दस्य रसविशेषणत्वमङ्गीकृत्यानेकप्रकारप्रयोजनरसहेतुरित्यन्यः । मतद्वयेऽपि सर्वेष्वपि रूपकेषु लक्षणानुगतिलाभायार्थशब्दस्य त्रिवर्गव्यतिरिक्तं प्रयोजनजातं विवक्षितम् । अत एवोक्तमुभाभ्यां तेनात्रिवर्गफले प्रहसनादौ रसोत्पत्तिहेतोरेव बीजत्वमिति । भावप्रकाशकारस्तु 'यथा कामोपयोग्यत्र श्रृङ्गारो दृश्यते रसः । अर्थोपयोगी वीरः स्याद्रौद्रोऽपि स्यात् क्वचित् क्वचित् ॥ रक्षारूपेण धर्मार्थोपयोगी करुणो भवेत् । अद्भुतोऽपि मनःप्रीतिप्रदत्वात् काम्यसाह्यकृत् ॥ ते भयानकबीभत्सहास्याः काव्येषु योजिताः । तत्तन्नेतृमनोवृत्तिवशात् प्रायस्त्रिवर्गगाः ॥' इत्यनेन श्रृङ्गारादीनां यथायोगं त्रिवर्गोपयोगित्वमङ्गीचकार । तन्मतेऽनेकविधत्रिवर्गलक्षणप्रयोजनकरसहेतुत्वं विवक्षितम् । लक्षणानुगतिरपि सुलभैव । यदत्र युक्तं तद् ग्राह्यम् । अङ्गानामुत्पत्तिमाह । **अङ्गानीति** ॥ ८ ॥ उद्दिशति । **उपक्षेप इति** । **अन्वर्थानीति** । न पृथक् लक्षणापेक्षेति भावः ॥९॥ तथापि मन्दबुद्ध्यनुग्रहार्थमुपक्षेपादीनां क्रमेण लक्षणं प्रतिजानीते । **यथाक्रममेषामिति** । कण्टकशोधनमङ्गलक्षणानां यथायोगमुदाहरणप्रदेश एव करिष्यामः । मिथः प्रयोगक्रमो न विव-

बीजन्यास उपक्षेपः। बीजस्य बहूकरणं परिकरः। बीजनिष्पत्तिः परिन्यासः। बीजगुणवर्णनं विलोभनम्। बीजानुकूलसंघटनप्रयोजनविचारो युक्तिः। बीजसुखागमः प्राप्तिः। बीजसंनिधानं समाधानम्। बीजसुखदुःखहेतुर्विधानम्। बीजविषयाश्चर्यावेशः परिभावना। गूढबीजप्रकाशनमुद्भेदः। बीजानुगुणप्रोत्साहनं भेदः। बीजानुगुणप्रस्तुतकार्यारम्भः करणम्। एतानि द्वादश मुखसंधेरङ्गानि। एतेषां मध्ये उपक्षेपपरिकरपरिन्यासयुक्त्युद्भेदसमाधानानामावश्यिकत्वम्।

अथ प्रतिमुखसंधिः।

लक्ष्यालक्ष्यस्य बीजस्य व्यक्तिः प्रतिमुखं मतम्।
बिन्दुप्रयत्नानुगमादङ्गान्यस्य त्रयोदश ॥ १० ॥

बिन्दुप्रयत्नानुगुण्येन प्रतिमुखसंधेरङ्गानि प्रयोक्तव्यानि।

विलासः परिसर्पश्च विधूतं शमनर्मणी।
नर्मद्युतिः प्रगमनं विरोधः पर्युपासनम्॥
वज्रं पुष्पमुपन्यासो वर्णसंहार इत्यपि ॥ ११ ॥

एषां स्वरूपं निरूप्यते

संभोगविषयमनोरथो विलासः। दृष्टनष्टपदार्थानुसरणं परिसर्पः। अनिष्टवस्तुविक्षेपो विधूतम्। अरत्युपशमनं शमः। परिहासवचनं नर्म। अनुरागोद्घाटनोत्था प्रीतिर्नर्मद्युतिः। उत्तरोत्तरवाक्यैरनुरागबीजप्रकाशनं प्रगमनम्। छद्मना हितागमननिरोधनं विरोधः। इष्टजनानुनयः पर्युपासनम्। प्रमुखनिष्ठुरवचनं वज्रम्। अनुरागप्रकाशनविशिष्टवचनं पुष्पम्। अनुरागहेतुवाक्यरचनोपन्यासः। चतुर्वर्णनिर्वर्णनं वर्णसंहारः। एतेषां मध्ये परिसर्पप्रगमनवज्रोपन्यासपुष्पाणां प्राधान्यम्।

क्षित इति वक्ष्यामः। अथ साङ्गं प्रतिमुखसंधिमाह। **लक्ष्येति**। केनचिदंशेन लक्ष्यत्वमपरेणांशेनालक्ष्यत्वं चेत्यर्थः। प्रत्यङ्कनिबद्धकार्यानुकूलानेकप्रयोजनमध्ये कतिपयनिष्पत्तिर्लक्ष्यत्वं कतिपयानिष्पत्तिरलक्ष्यत्वं चेति मतान्तरम्। तादृशस्य बीजस्य व्यक्तिः प्रकाशनं प्रतिमुखमिति ॥ १०—११ ॥ अथ साङ्गं गर्भसन्धि-

अथ गर्भसंधिः

गर्भस्तु दृष्टनष्टस्य बीजस्यान्वेषणं मुहुः ।
अस्याप्त्याशापताकानुगुण्येनाङ्गोपकल्पनम् ॥ १२ ॥

पताकाप्राप्त्याशानुगुण्येन गर्भसंधेरङ्गानि प्रयोक्तव्यानि ।

अभूताहरणं मार्गो रूपोदाहरणक्रमाः ।
संग्रहश्चानुमानं च तोटकाधिबले तथा ॥
उद्वेगसंभ्रमाक्षेपा द्वादशाङ्गान्यनुक्रमात् ॥ १३ ॥

एषां स्वरूपं निरूप्यते

प्रस्तुतोपयोगिच्छद्माचरणमभूताहरणम् । तत्त्वार्थानुकीर्तनं मार्गः। वितर्कप्रतिपादनवाक्यं रूपम् । प्रस्तुतोत्कर्षाभिधानमुदाहृतिः । संचिन्तितार्थप्राप्तिः क्रमः । *प्रस्तुतोपयोगिसामदानवचनं संग्रहः । लिङ्गादभ्यूहनमनुमानम् । रोषसंभ्रमवचनं तोटकम् । इष्टजनातिसंधानमधिबलम् । अपकारिजनात् भयमुद्वेगः । शङ्कात्रासौ च संभ्रमः । इष्टार्थोपायानुसरणमाक्षेपः । एतेषां मध्येऽभूताहरणमार्गतोटकाधिबलाक्षेपाणां प्राधान्यम् ।

अथ विमर्शसंधिः

गर्भसंधौ प्रसिद्धस्य बीजार्थस्यावमर्शनम् ।
हेतुना येन केनापि विमर्शः संधिरिष्यते ।
नियताप्तिप्रकर्युक्तेरङ्गान्यत्र त्रयोदश ॥ १४ ॥

नियताप्तिप्रकर्यानुगुण्येन विमर्शसंधेरङ्गानि प्रयोक्तव्यानि ।

माह । **गर्भ इति** । प्रतिमुखसन्धौ लक्ष्यालक्ष्यतया दृष्टनष्टस्य बीजस्यापायशङ्कानुवृत्त्या विच्छेदानुवृत्तेर्मुहुः पौनःपुन्येनान्वेषणं गर्भसंधिरिति । अत्र पताकाया वैकल्पिकत्वात् तदभावपक्षेऽपि प्राप्त्याशा नियतैव । पताकास्थाने तु बीजविन्द्वोरन्यतरस्य निवेश इत्यनुपदमेवोक्तम् ॥ १२—१३ ॥ अथ साङ्गं विमर्शसंधिमाह । **गर्भसंधाविति** । येन केनापि हेतुना क्रोधव्यसनादिनार्थस्यावमर्शनं पर्यालोचनं क्रोधव्यसनादिजन्यो गर्भनिर्भिन्नबीजार्थसंबन्धः फलप्राप्त्यवसायात्मको विचारनिर्णयो विमर्श इत्यर्थः । तदुक्तम् । 'गर्भनिर्भिन्नबीजार्थसंबन्धो

---

* प्रस्तुतोपयोगिसमाधानवाक्यमिति पाठान्तरम् ।

तत्रापवादः संफेटो विद्रवद्रवशक्तयः ।
द्युतिः प्रसङ्गश्चलनं व्यवसायो निरोधनम् ॥
प्ररोचनं विचलनमादानं तु त्रयोदश ॥ १५ ॥

एतेषां स्वरूपं निरूप्यते

दोषप्रख्यापनमपवादः । रोषसंभाषणं संफेटः । वधबन्धादिकं विद्रवः । गुरुतिरस्कृतिर्द्रवः । विरोधशमनं शक्तिः । तर्जनोद्वेजने द्युतिः । गुरुकीर्तनं प्रसङ्गः । उपमानं चलनम् । स्वशक्तिप्रशंसनं व्यवसायः । क्रोधसंरब्धानामन्योन्यविक्षेपो निरोधनम् । सिद्धवद्भाविश्रेयःकथनं प्ररोचनम् । स्वगुणाविष्करणं विचलनम् । कार्यसंग्रह आदानम् ।

अथ निर्वहणसंधिः

बीजवन्तो मुखाद्यर्था विप्रकीर्णा यथायथम् ।
ऐकार्थ्यमुपनीयन्ते यत्र निर्वहणं हि तत् ॥ १६ ॥
फलाप्तिकार्यानुगुण्यादङ्गान्यस्य चतुर्दश ।

फलाप्तिकार्यानुगुण्येन निर्वहणसंधेरङ्गानि चतुर्दश प्रतिपादनीयानि ।

संधिर्विरोधो ग्रथनं निर्णयः परिभाषणम् ॥ १७ ॥
प्रसादानन्दसमयाः कृत्याभाषोपगूहनम् ।
पूर्वभावोपसंहारौ प्रशस्तिश्च चतुर्दश ॥ १८ ॥

व्यसनादिजः । विचारनिर्णयो यस्तु स विमर्श इति स्मृतः ॥' इति ॥१४—१५॥ अथ साङ्गं निर्वहणसंधिमाह । **बीजवन्त इति** । संसर्गे मतुप् । बीजयुक्ता इत्यर्थः । यथायथं यथास्वं विप्रकीर्णा निजस्थानेषूपन्यस्ता इत्यर्थः । एको मुख्योऽर्थः प्रयोजनं येषां तेषां भावस्तत्त्वम् । यत्र बीजयुक्ता मुखसंध्याद्यर्थाः परमप्रयोजनसंबन्धं लभन्ते स निर्वहणसंधिरित्यर्थः । अत्रोपक्षेपादिषु यत्र क्वचन कार्यकारणभावसद्भावस्तत्रैव क्रमोऽङ्गीकर्तव्यो न त्वन्यत्र । वस्तुस्वरूपविचारे क्रमाङ्गीकारे कारणाभावाल्लक्ष्येषु व्युत्क्रमदर्शनाच्च । तदुक्तम् । 'वस्तुनेतृरसादीनामानुगुण्येन योजयेत् । विवक्षितोऽत्र नाङ्गानां क्रम इत्येव निर्णयः ॥' इति । न च तेषां प्रधानवस्तुसंबन्ध एव निबन्धनीय इति वाच्यम् । अन्यथापि दोषाभावात् । तदुक्तं नाटकप्रकाशे 'उपक्षेपादयः प्रबन्धेष्वाधिका-

एतेषां स्वरूपं निरूप्यते

बीजोपशमनं संधिः । कार्यमार्गणं विरोधः । कार्योपक्षेपणं ग्रथनम् । बीजानुगुणकार्यप्रख्यापनं निर्णयः । मिथोजल्पनं परिभाषा । पर्युपासनं प्रसादः । वाञ्छितार्थप्राप्तिरानन्दः । दुःखप्रशमनं समयः । लब्धस्थिरीकरणं कृतिः । प्राप्तकार्यानुमोदनमाभाषणम् । अद्भुतार्थप्राप्तिरुपगूहनम् । इष्टकार्यदर्शनं पूर्वभावः । कार्यार्थोपसंहृतिः संहारः । शुभशंसनं प्रशस्तिः ।

एवं चतुःषष्ट्यङ्गसमन्विताः पञ्च सन्धयः प्रतिपादिताः । एतेषां षट् प्रयोजनानि संभवन्ति । विवक्षितार्थप्रतिपादनम् गोप्यार्थगोपनम् प्रकाश्यार्थप्रकाशनम् अभिनयरागसमृद्धिः चमत्कारित्वम् इतिवृत्तविस्तरश्चेति । तत्रेतिवृत्तं सूच्यमसूच्यं चेति द्विविधम् । असूच्यमपि द्विविधम् । दृश्यं श्राव्यं च । तत्र सूच्यस्य सूचनाक्रमः पञ्चविधः । तथोक्तं दशरूपके

रिका वा प्रासङ्गिका वा प्रयोक्तव्या यथा संदर्भस्य शोभायै भवन्ति' इति ॥ १६—१८ ॥ विभज्य लक्षितानि संध्यङ्गानि संख्यया संकलय्योपसंहरति । **एवं चतुःषष्टीति** । तत्राङ्गानां प्रयोजनमाह । **एतेषामिति** । **अभिनयरागसमृद्धिरिति** । अभिनयदर्शनेन सामाजिकमनोरञ्जनसमृद्धिरित्यर्थः । नन्वेतेषां प्रयोजनकथनमनुपपन्नम् । अङ्गानां प्रधानफलेनैव फलवत्त्वनियमादिति न वाच्यम् । तस्यादृष्टफलवत्त्वे नियतत्वात् । एतत्तु दृष्टं फलम् । तदुक्तं शृङ्गारप्रकाशे 'अङ्गानां षड्विधं ह्येतत् दृष्टं शास्त्रे प्रयोजनम् ।' इति । प्रयोजनानामेतेषां लक्ष्येषूदाहरणमूहनीयमित्युपेक्ष्य पुनरपि वस्तुनो द्वेधा विभागमाह । **तत्रेतिवृत्तमिति** । द्वितीयं द्वेधा विभजति । **असूच्यमिति** । तत्र 'नीरसोऽनुचितस्तत्र संसूच्यो वस्तुविस्तरः । दृश्यस्तु मधुरोदात्तरसभावनिरन्तरः ॥' इत्याद्ययोर्व्यवस्था द्रष्टव्या । श्राव्यं चेत्यत्र चशब्दः श्राव्यगतावान्तरभेदाननुक्तमश्राव्यभेदं च समुच्चिनोति । श्राव्यं च सर्वश्राव्यं नियतश्राव्यं चेति द्विधा । द्वितीयं च जनान्तिकमपवारितं चेति द्विधा । एतेषां लक्षणं तु 'सर्वश्राव्यं प्रकाशं स्यादश्राव्यं स्वगतं मतम् ॥' 'त्रिपताककरेणान्यानपवार्यान्तरा कथाम् । अन्योन्यामन्त्रणं यत् स्यात्तज्जनान्ते जनान्तिकम् ॥' 'रहस्यं कथ्यतेऽन्यस्य परावृत्त्यापवारितम् ।' इति । त्रिपताकग्रहणं पताकस्याप्युपलक्षणार्थम् । तदुक्तं तद्विदिभिः । 'त्रिपताकः पताकश्च गण्डश्रोत्रं गतः करः । जनान्तिके रहस्ये च दोषे श्रवसि कीर्तितः ॥' इति । लक्षणं त्वनयोः संगीतरत्नाकरे ।

'विष्कम्भचूलिकाङ्कास्यप्रवेशाङ्कावतारणैः ।' इति एतेषां स्वरूपं निरूप्यते

वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः ॥ १९ ॥
संक्षेपार्थस्तु विष्कम्भो मध्यपात्रप्रयोजितः ।

स द्विविधः । शुद्धः संकीर्णश्चेति । केवलसंस्कृतप्रायः शुद्धः । संस्कृतप्राकृतमिश्रितः संकीर्णः ।

अथ चूलिका

अन्तर्यवनिकासंस्थैश्चूलिकार्थस्य सूचना ॥ २० ॥

यत्र नेपथ्यगतैः पात्रैरर्थः सूच्यते सा चूलिका ।

अथाङ्कास्यम्

अङ्कान्तपात्रैरङ्कास्यमुत्तराङ्कार्थसूचना ।

यत्र पूर्वाङ्कान्तपात्रैरुत्तराङ्कार्थः सूच्यते तदङ्कास्यम् ।

अथ प्रवेशकः

वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः ॥ २१ ॥

'तर्जनीमूलसंलग्नकुञ्चिताङ्गुष्ठको भवेत् । पताकः संहताकारः प्रसारिततलाङ्गुलिः ॥ स एव त्रिपताकः स्याद्वक्रितानामिकाङ्गुलिः ॥' इति । विष्कम्भेत्यादिश्लोकशेषः पुनः 'अर्थोपक्षेपकैः सूच्यं पञ्चभिः प्रतिपादयेत् ।' इति । प्रथमाङ्के प्रस्तावनानन्तरं विष्कम्भं कुर्यादिति भोजराजः । अन्यत्राङ्कद्वयमध्ये इत्यन्ये । मतद्वयमप्यङ्गीकृत्य तल्लक्षणमाह । **वृत्तेति** । वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः भूतभाविकथासूचक इत्यर्थः । संक्षेपार्थः संक्षेपैकप्रयोजनकः । मध्यपात्रेणैकेनानेकेन वा प्रयोजितः । तत्रैकमध्यपात्रोऽनेकमध्यपात्रश्चेति शुद्धो द्विविधः । नीचमिश्रस्तु संकीर्ण एकविधः । तदुक्तम् । 'एकानेककृतः शुद्धः संकीर्णो नीचमध्यमैः' । इति । तत्र संकीर्णेऽपि मध्यपात्रसंभवात् तत्प्रयोजितत्वं न विहन्यते। अत एव नात्र नायकपात्रप्रवेश इति वेदितव्यम् ॥ १९ ॥ चूलिकां लक्षयति । **अन्तरिति** । अन्तःप्रधाना यवनिका अन्तर्यवनिका तत्र संस्था येषां तैर्यवनिकान्तर्वर्तिभिरप्रविष्टरङ्गैरित्यर्थः । विशेष्यमध्याहृत्य व्याचष्टे । **यत्रेति** । अङ्कास्यं लक्षयति । **अङ्कान्तेति** । यत्र कुत्राप्यङ्कान्तपात्रैरिति शङ्काङ्कुरमुत्पाटयन् व्याचष्टे । **यत्र पूर्वेति** ॥ २० ॥ प्रवेशकं लक्षयति । **वृत्तेति** । नीचपात्रैश्चेटीप्रमुखैरेकेन द्वाभ्यां बहुभिर्वा मध्यमासंकीर्णैर्वृत्तवर्तिष्यमाणानां पूर्वोत्तराङ्कशेषाणा-

प्रवेशकस्तु नाद्येऽङ्के नीचपात्रप्रयोजितः ।

नीचपात्रप्रयुक्तः प्रवेशकः आद्येऽङ्के न प्रयोक्तव्यः ।

अथाङ्कावतारः

यत्र स्यादुत्तराङ्कार्थः पूर्वाङ्कार्थानुसंगतः ॥ २२ ॥
असूचिताङ्कपात्रं तदङ्कावतरणं मतम् ।
एभिः सूच्यं सूचयित्वा दृश्यमङ्कैः प्रदर्शयेत् ॥ २३ ॥

तत्राङ्कस्वरूपं निरूप्यते

प्रत्यक्षनेतृचरितो बिन्दुव्याप्तिपुरस्कृतः ।
अङ्को नानाप्रकारार्थसंविधानरसाश्रयः ॥ २४ ॥

मेवेत्यर्थः । अत एवास्य विष्कम्भवत् प्रथमेऽङ्के न प्रवेश इत्याह । **नाद्येऽङ्के इति** ॥ २१ ॥ अङ्कावतारं लक्षयति । **यत्र स्यादिति** । पूर्वोत्तराङ्कार्थयोर्विष्कम्भादिविच्छेदेन न भाव्यमिति भावः । **असूचितेति** । पूर्वाङ्कवर्तिनामेव पात्राणामत्रानुप्रवेशान्न तत्सूचनमिति भावः । 'अङ्काभ्यन्तरभावित्वमङ्कास्याङ्कावतारयोः । भवेदङ्कबहिर्भावो विष्कम्भे च प्रवेशके ॥ उभयं चूलिकायां तु यथायोगमिति स्थितिः ॥' इति ॥ २२—२३ ॥ दृश्यमङ्कैः प्रदर्शयेदित्युक्तम् । तत्र कीदृशोऽङ्क इत्याकाङ्क्षायामाह । **तत्राङ्केति** । प्रत्यक्षं रङ्गप्रवेशेन साक्षान्निर्दिश्यमानं नेतृचरितं नायकव्यापारो यत्र स तथोक्तः । बिन्दुव्यक्तिपुरस्कृतः बिन्दुसूचनार्थं परिच्छिन्न इत्यर्थः । नानाप्रकारार्थानामनेकावान्तरप्रयोजनानां संविधानानां कथासंनिवेशविशेषादीनां 'रसानामङ्गभूतानामङ्गिनो वा रसस्य च । न चातिरसतो दूरं वस्तु विच्छिन्नतां नयेत् ॥ रसं वा न तिरोदध्यात् वस्त्वलंकारलक्षणैः ॥' इत्युक्तरीत्या परस्परानुपमर्दिनामाश्रयः । अत्राङ्के 'दूराध्वानं वधं युद्धं राज्यदेशादिविप्लवम् । संरोधं भोजनं स्नानं सुरतं चानुलेपनम् ॥ अम्बरग्रहणादीनि प्रत्यक्षाणि न निर्दिशेत् । नाधिकारिवधः क्वापि त्याज्यमावश्यकं न च ॥ अधिकारिवधस्यापि क्वचित् स्यात् कल्पनार्हता । अर्वाक् प्रकारात् स पुनः प्रत्युज्जीविष्यते यदि ॥ नायकस्य यदेकाहचरितप्रतिपादकः । एकप्रयोजनाश्लिष्टस्तत्रैवासन्ननायकः ॥ विदूषकादिभिः पात्रैर्योज्यस्त्रिचतुरैरपि । समस्तपात्रनिष्कामावसानोऽङ्कोऽभिधीयते ॥' इत्यादि प्रतिपादिता प्राचीनालङ्कारिकपद्धतिरनुसरणीया ॥ २४ ॥ एवं सूच्यासूच्यवस्तुखण्डप्रतिपादकमङ्कविष्कम्भादिकं स्वरूपतो निरूपितम् । अथ सर्वस्यापि काव्यार्थस्य सूचिका भारती वृत्तिर्निरूपणीया । तस्याश्चत्वार्यङ्गानि । आमुखं प्ररोचना वीथिः प्रहसनं चेति । तत्र वीथिप्रहसनयोः प्रायेण प्रबन्धादावनुदाहरणेन कृताकृतत्वाद्दशरूपकमध्ये प्राधान्येनापि

अथामुखं निरूप्यते

सूत्रधारो नटीं ब्रूते मारिषं वा विदूषकम् ।
स्वकार्यप्रस्तुताक्षेपि चित्रोक्त्या यत्तदामुखम् ॥ २५ ॥

प्रस्तावना वा तत्र स्यात् कथोद्धातः प्रवर्तकम् ।
प्रयोगातिशयश्चेति त्रीण्यङ्गान्यामुखस्य तु ॥ २६ ॥

एषामङ्गानां स्वरूपं निरूप्यते

स्वेतिवृत्तसमं वाक्यमर्थं वा यत्र सूत्रिणः ।

पठितत्वाच्च तल्लक्षणं प्राचीनालंकारमार्गेण तत्रैव भविष्यतीत्युपेक्ष्याल्पवक्तव्यां प्ररोचनामुदाहरणसमय एव दर्शयिष्यन् संप्रति साङ्गस्यामुखस्य स्वरूपनिरूपणं प्रतिजानीते । **अथेति** । तत्र पुरुषविशेषप्रयोज्यः संस्कृतप्रधानो वाग्व्यापारो भारती । प्रस्तुतार्थप्रशंसनेन श्रोतॄणां प्रवृत्त्युन्मुखीकरणं प्ररोचना । तदुक्तम् । 'भारती संस्कृतप्रायो वाग्व्यापारो नराश्रयः । उन्मुखीकरणं तत्र प्रशंसातः प्ररोचना ॥' इति । आमुखविशेषः प्रस्तावनेति केचित् । प्रस्तावनाविशेष आमुखमित्यपरे । अस्यैव पर्यायः प्रस्तावनेति दशरूपककारः । तन्मतानुसारेण लक्षणमाह । **सूत्रधार इति** । द्वावत्र सूत्रधारौ । एकः पूर्वरङ्गविधायकः । इतरस्तु नटस्थापकाद्यपरपर्यायः पूर्वसूत्रधारसदृशगुणाकृतिः प्रस्तावनाप्रवर्तकः । अत्र तु नटीमारिषादिसंभाषणादयमेव विवक्षितः । अस्य गृहिणी नटी । मारिषः पारिपार्श्विकः । नर्मसचिवो विदूषकः । एतेषां लक्षणानि भावप्रकाशे । 'आसूत्रयन् गुणान् नेतुः कवेरपि च वस्तुनः । रङ्गप्रसाधनप्रौढः सूत्रधार इहोदितः ॥ चतुरातोद्यभेदज्ञा तत्कलासु विशारदा । करणाभिनयज्ञा च सर्वभाषाविचक्षणा ॥ नटानुयोक्त्री कृत्येषु नटस्य गृहिणी नटी । भरतेनाभिनीतं यो भावं नानारसाश्रयम् ॥ परिष्करोति पार्श्वस्थः स भवेत् पारिपार्श्विकः । तदात्वप्रतिभो नर्मचतुर्भेदप्रयोगवित् ॥ वेदविन्नर्मवादी यो नेतुः स स्याद्विदूषकः ॥' इति । स्वकार्यसभिमतरूपकप्रयोगेण परिषदाराधनात्मकं प्रस्तुतं काव्यार्थरूपं वस्त्वादिचतुष्टयं तदाक्षेपिण्या उभयप्रतिपादिकयेत्यर्थः । अत एव चित्रोक्त्या नाट्यादिकं यद् ब्रूते तदामुखमित्यर्थः । तदुक्तम् । 'पूर्वरङ्गं विधायादौ सूत्रधारे विनिर्गते । प्रविश्य तद्वदपरः काव्यार्थं स्थापयेन्नटः ॥ दिव्यमार्त्ये स तद्रूपो मिश्रमन्यतरस्तयोः । सूचयेद्वस्तु बीजं वा मुखं पात्रमथापि वा ॥' इति । स्थापको दिव्यं वस्तु दिव्यो भूत्वा मार्त्यं वस्तु मर्त्यो भूत्वा मिश्रं वस्तूभयोरन्यतरो भूत्वा सूचयेदित्यर्थः ॥ २५—२६ ॥ अथामुखाङ्गत्रये कथोद्धातं लक्षयति । **स्वेति** । पात्रं कर्तृ । सूत्रिणः सूत्रधारस्य वाक्यमर्थं वाक्यार्थं वा । प्रवर्तकं लक्ष-

गृहीत्वा प्रविशेत् पात्रं कथोद्घातो द्विधैव सः ॥ २७ ॥
प्रस्तूयमानकालस्य गुणवर्णनया स्वतः ।
प्रविशेत् सूचितं पात्रं यत्र तत् स्यात् प्रवर्तकम् ॥ २८ ॥
एषोऽयमित्युपक्षेपात् सूत्रधारप्रयोगतः ।
पात्रप्रवेशो यत्रायं प्रयोगातिशयो मतः ॥ २९ ॥
वीथ्यङ्गान्यामुखाङ्गत्वादुच्यन्तेऽत्र स्वभावतः ।
उद्घात्यकावलगिते प्रपञ्चत्रिगते छलम् ॥ ३० ॥
वाक्केल्यधिबले गण्डमवस्यन्दितनालिके ।
असत्प्रलापव्याहारमृदवानि त्रयोदश ॥ ३१ ॥

एषां स्वरूपं निरूप्यते

गूढार्थपदपर्यायमालारूपेण प्रश्नोत्तरमालारूपेण चोद्घात्यकं द्विविधम् । अवलगितमपि द्विविधम् ।

यत्रैकत्र समावेशात् कार्यमन्यत्र सिद्धयति ।
वस्तुनोऽन्यत्र वा यत्स्यात् द्विधावलगितं मतम् ॥

अन्यकार्यच्छद्मना अन्यकार्यकरणम् । अन्यकार्यप्रसङ्गात् प्रकृ-

---

यति । **प्रस्तूयमानेति** । कालस्य ऋतुं कंचिदुपाद्रायेति वचनप्राप्तस्य शरद्वसन्तादेर्गुणवर्णनया आसन्नप्रवेशपात्रसाम्येनेति भावः । 'प्रकटितरामाम्भोजः कौशिकवाग्लक्ष्मणानन्दी । सुरचापनमनहेतोरयमवतीर्णः शरत्समयः ॥' इत्यत्र रामलक्ष्मणविश्वामित्राणां शरद्वर्णनसाम्येन प्रवेशकथनात् प्रवर्तकम् । प्रयोगातिशयं लक्षयति । **एष इति** । एतदिदमोरन्यतरशब्दप्रयोगेणोपक्षेपादित्यर्थः ॥ २७—२९ ॥ नन्वनन्तरमुद्घात्यकादीनि वीथ्यङ्गान्युच्यन्ते कथं तेषामामुखे संगतिरित्याशङ्कयोभयेषामङ्गानामभेदादविरोध इति संगमयन्नाह । **वीथ्यङ्गानीति** । न चैवं वीथ्यामुखयोरङ्गिनोर्नाममात्रभेद इति शङ्कनीयम् । वीथ्यां कथोद्घातादिविशेषाङ्गविकलत्वं सूत्रधारादिसंबन्धवैधुर्यमुद्घात्यकादिसर्वाङ्गावश्यकत्वं पाक्षिकप्राधान्यं च आमुखे पुनरेतद्वैरूप्यमित्यनयोरत्यन्तविलक्षणत्वात् । अथ साधारणाङ्गान्युद्देशपूर्वकं लक्षयति । **उद्घात्यकेत्यादिना** ॥ ३० ॥ ३१ ॥ अन्योन्यालापे गूढार्थपदं ततः पर्यायश्चेत्येवमेका माला । प्रश्नोत्तरं चेति द्वितीया । द्वेधावलगितमित्याह । **अन्यकार्येति** । पूर्वत्र प्रकृतकार्यसिद्धिः प्रयत्नपूर्वकत्वमुत्तरत्र प्रासङ्गिकत्वं चेत्यर्थः । असद्भूतं पारदार्यादिप्रसंगेन दुष्टम् । पूर्वाचार्यास्तु स्तोत्रं हास्येन विशिंषन्ति । 'असद्भूतं मिथः स्तोत्रं प्रपञ्चो हास्य-

तकार्यसिद्धिश्च । असद्भूतं मिथः स्तोत्रं प्रपञ्चः । त्रिगतं द्विविधं पूर्वरङ्गाङ्गं प्रस्तावनाङ्गं चेति । पूर्वरङ्गे नटादिसल्लापोऽत्र तु साम्यादनेकार्थयोजनं त्रिगतम् । प्रियसदृशैर्वाक्यैरप्रियैर्विलोभनं छलम् । साकाङ्क्षस्यापि वाक्यस्य निवर्तनमुक्तिप्रत्युक्तिरूपेण वाक्केलिर्द्विविधा । स्पर्धयान्योन्यवाक्याधिक्यमधिबलम् । सहसोदितं प्रस्तुतविरोधि गण्डम् । रसवशादुक्तान्यथाव्याख्यानमवस्यन्दितम् । सोपहासानिगूढार्थप्रहेलिका नालिका । असंवन्धकथाप्रायः प्रलापोऽसत्प्रलापः। अन्यार्थं हास्यलोभकरं वचनं व्याहारः। दोषाणां गुणत्वप्रतिपादनं मृदवम् । एतेषां मध्ये यथासंभवं कानिचित् प्रस्तावनायां प्रयोक्तव्यानि ।

क्तन्मतम् ।' इति । त्रिगतं द्विविधम् । तत्रैकं पूर्वरङ्गाङ्गमपरमामुखाङ्गमिति विविञ्चन्नुभयोः क्रमेण लक्षणमाह । **पूर्वरङ्ग इति** । नटादिसल्लाप इत्यत्रादिग्रहणान्मारिषसूत्रधारौ गृह्येते । तदुक्तं भावप्रकाशे पूर्वरङ्गप्रस्तावे । 'सूत्रधारो नटश्चैव तथा वै पारिपार्श्विकः । सल्लापं यत्र कुर्वन्ति तदेव त्रिगतं स्मृतम् ॥' इति । **अत्रत्विति** । प्रस्तावनायाम् । **साम्यादिति** । शब्दसाम्यादित्यर्थः। तदुक्तं दशरूपके । 'श्रुतिसाम्यादनेकार्थयोजनं त्रिगतं त्विह । नटादित्रितयालापः पूर्वरङ्गे तादिष्यते ॥' इति । छलं व्यक्तम् । **साकाङ्क्षस्येति** । निवर्तनं *उपरि प्रस्तुतमोंनमः शिवायेतिवदिति भावः । उक्तेः प्रत्युक्तिरुक्तिप्रत्युक्तिः । अत्र द्विस्त्रिरिति शेषं प्राञ्चः पूरयन्ति । **अन्योन्यवाक्येति** । परस्परसामर्थ्यप्रकाशकवाक्याधिक्यमित्यर्थः । सहसोदितमविमृश्योक्तं प्रस्तुतविरोधि गण्डम् । अर्थभेदेन प्रस्तुतोपयोगि गण्डमिति केचित् । तदुक्तम् । 'गण्डं प्रस्तुतसंवन्धि भिन्नार्थं सहसोदितम्' इति । रसवशादित्युक्तेन सम्वध्यते न तु व्याख्यानेन। **सोपहासेति**। निगूढो गोपितो वाह्य आभ्यन्तरो वा मुख्यार्थो यत्र सा तथोक्ता। अत एव अन्तर्लापा वहिर्लापा चेति द्विविधा प्रहेलिका। तदुक्तं विदग्धमुखमण्डने । 'व्यक्तीकृत्य कमप्यर्थं स्वरूपार्थस्य गोपनात् । यत्र वाह्यान्तरावर्थौ कथ्येते सा प्रहेलिका ॥' इति । **प्रलाप इति** । रसस्वप्नोन्मादशैशवादिप्रयुक्त इति शेषः । अत एव नायमसंगतिर्नाम वाक्यदोषः । अन्यार्थमित्यर्थान्तरोद्देशेन हास्यप्रलोभकारीत्यर्थः। **दोषाणामिति** । वैपरीत्यस्याप्युपलक्षणमेतत् । तदुक्तम् 'दोषा गुणा गुणा दोषा यत्र स्युर्मृदवं हि तत्' इति । एतेषामङ्गानां कार्त्स्न्येन प्रयोगनिर्वन्धो नास्तीत्याह । **एतेषामिति** । रूपकोपोद्घातरूपां प्रस्तावनां निरूप्य संप्रति रूपकस्व-

---

* 'कुलशोकहरं कुमारमेकं कुहनाभैरवपारणोन्मुखाभ्याम् ।
उपहृत्य कृतादरं पितृभ्यामुपरि प्रस्तुतमोंनमः शिवाय' ॥ इति महेश्वरानन्दे

अथ दशरूपकाणां स्वरूपं निरूप्यते । तत्र

साङ्गैर्मुखप्रतिमुखगर्भमर्शोपसंहृतैः ।
पूर्वं प्रकृतिरन्येषामाधिकारिकवृत्तवत् ॥ ३२ ॥
वीरशृङ्गारयोरेकः प्रधानं यत्र वर्ण्यते ।
प्रख्यातनायकोपेतं नाटकं तदुदाहृतम् ॥ ३३ ॥

तत्र नान्दीस्वरूपं निरूप्यते ।

अर्थतः शब्दतो वापि मनाक् काव्यार्थसूचनम् ।
यत्राष्टभिर्द्वादशभिरष्टादशभिरेव वा ॥
द्वाविंशत्या पदैर्वापि सा नान्दी परिकीर्तिता ॥ ३४ ॥

नाटकादिरूपकाणामादौ विहितं पद्यं नान्दीत्युच्यते । वेणीसंहा-

रूपनिरूपणं प्रतिजानीते । **अथेति** । तत्र सर्वप्रकृतित्वेन प्रधानस्य नाटकस्य स्वरूपमाह । **साङ्गैरिति** । यत्रेत्थमिदं कर्तव्यमिति कृत्स्नाङ्गसमेतप्रधानोपदेशः सा प्रकृतिः । यथा दर्शपूर्णमासादिः । कृत्स्नाङ्गोपदेशाभावेऽन्यतः सिद्धाङ्गाकाङ्क्षा-यां तद्वदिदं कर्तव्यमिति अतिदेशेन यत्रानुपदिष्टाङ्गपरिपूरणं सा विकृतिः । यथै-न्द्राग्नादिः । तद्वदत्रापि संधिपञ्चकाङ्गादिकृत्स्नोपदेशेन परिपूर्णत्वादातिदेशिकाङ्ग-योगेन विकृतिभूतानां प्रकरणादीनां नाटकं प्रकृतिः । तदेतदाह । **प्रकृतिरन्ये-षामिति** । फलस्वाम्यमधिकारः । तद्वानधिकारी । अधिकारेणाधिकारिणा वा निर्वृत्तमाधिकारिकं प्रधानम् । वृत्तशब्देनात्र प्रख्यातमुचितं चेति वृत्तं विवक्षितं तद्युक्तमित्यर्थः । प्रधानमित्यनेन रसान्तराणामङ्गत्वेनानुप्रवेशः सूच्यते । प्रख्या-तो रामायणादिप्रसिद्धः नायको धीरोदात्तो राजर्षिर्दिव्यो वा । तदुपेतं नाटकम् । एवमेवोक्तं दशरूपके । 'अभिगम्यगुणैर्युक्तो धीरोदात्तः प्रतापवान् । कीर्तिकामो महोत्साहस्त्रय्यास्त्राता महीपतिः ॥ प्रख्यातवंशो राजर्षिर्दिव्यो वा यत्र नायकः । तत् प्रख्यातं विधातव्यं वृत्तमत्राधिकारिकम् ॥ यत्तत्रानुचितं किंचिन्नायकस्य रसस्य वा । विरुद्धं तत् परित्याज्यमन्यथा वा प्रकल्पयेत् ॥' इति । पूर्वरङ्गो नाम नाटकादौ कर्तव्यः प्रत्यूहपरिपन्थी कर्मविशेषः । तदुक्तम् । 'यन्नाट्यवस्तुनः पूर्वं रङ्गविघ्नोपशान्तये । कुशीलवाः प्रकुर्वन्ति पूर्वरङ्गः स कीर्तितः ॥' इति । तस्य प्रत्याहारादीनि द्वाविंशतिरङ्गानि तन्मध्येऽवश्यं कर्तव्या नान्दी । तदुक्तं बादरायणेन "यद्यप्यङ्गानि भूयांसि पूर्वरङ्गस्य नाटके । तथाप्यवश्यं कर्तव्या नान्दी विघ्नोपशान्तये ॥" इति । अतस्तत्स्वरूपं निरूप्यत इत्याह । **तत्र नान्दीति** । 'चन्द्रनामाङ्किता प्रायो मङ्गळार्थपदोज्ज्वला । आशीर्नमस्क्रिया-वस्तुनिर्देशो वा प्रकल्प्यते ॥' इत्यादि विशेषोऽप्यत्र द्रष्टव्यः । असाधारणत्व-मस्या निवारयन् व्याचष्टे । **नाटकादीति** । स्पष्टमन्यत् ॥ ३२—३४ ॥

रेऽष्टपदा नान्दी। अनर्घराघवे द्वादशपदा। बालरामायणे द्वाविंशतिपदा। कैश्चिन्नान्द्यां पदनियमो नाभ्युपगतः। नान्द्यन्तरं प्रविष्टेन सूत्रधारेण रङ्गप्रसाधनपुरःसरं भारतीवृत्त्याश्रयणेन श्लोकैः काव्यार्थः सूचनीयः। तथोक्तं दशरूपके

'रङ्गं प्रसाध्य मधुरैः श्लोकैः काव्यार्थसूचकैः।
ऋतुं कंचिदुपादाय भारतीं वृत्तिमाश्रयेत्॥' इति

एषा प्रक्रिया नाटकस्यैव मुख्या।

अथ प्रकरणम्

उत्पाद्येनेतिवृत्तेन धीरशान्तप्रधानकम्।
शेषं नाटकतुल्याङ्गं भवेत् प्रकरणं हि तत्॥ ३५॥

अथ भाणः

अनन्तरकर्तव्यमाह। **नान्द्यन्तरमिति**। सूत्रधारेण द्वितीयेन। रङ्गप्रसाधनं नाम सभापतावुपविष्टे रङ्गप्रविष्टसाम्प्रदायिकसंपादितो यवनिकापगमाविर्भूतपात्रविशेषप्रकीर्णपुष्पाञ्जलिपरिष्कृतो नृत्तगीतवाद्यविशेषप्रयोगो केवलगीतवाद्यविशेषप्रयोगो गीतादेरेकैकशः प्रयोगो वा। एतच्च 'संगीतज्ञैर्बुधैः सार्धं नायके प्रेक्षके स्थिते। प्रविश्य रङ्गभूमिं ते तिष्ठन्तः सांप्रदायिकाः॥' इत्यादिना सङ्गीतरत्नाकरे प्रपञ्चितम्। तदपेक्षायां तत्रैव द्रष्टव्यम्। भारत्या लक्षणमुक्तम्। अत्रार्थे संवादमाह। **रङ्गमिति**। अत्र स्वोक्तिसंवादवाक्यगतयोः काव्यार्थसूचनभारतीवृत्त्याश्रयणयोरुद्देश्यविधेयभाववैरूप्यं फलभेदाभावान्न दोषायेति द्रष्टव्यम्। 'नाटकेऽङ्का न कर्तव्याः पञ्चन्यूना दशाधिकाः।' इति। अस्याः सामग्र्या असाधारणत्वमाह। **एषेति**। मुख्या नियतेत्यर्थः। प्रकरणं लक्षयति। **उत्पाद्येनेति**। इतिवृत्तेनोपलक्षितं शेषं वस्तु। नाटकतुल्यान्यङ्गान्यासुखादीनि यत्र तत् तथोक्तम्। अयमतिदेशो यथायोगमुत्तरत्राप्यनुषञ्जनीयः। धीरशान्तप्रधानकमित्यत्र प्रधानग्रहणमुद्देष्टव्यधर्मान्तरसूचकम्। तानि च दशरूपके 'अथ प्रकरणे वृत्तमुत्पाद्यं लोकसंश्रयम्। अमात्यविप्रवणिजामेकं कुर्याच्च नायकम्॥ धीरप्रशान्तं सापायं धर्मकामार्थतत्परम्। शेषं नाटकवत् संधिप्रवेशकरसादिकम्।' विपदन्तरितार्थसिद्धिः सापायः। किं च 'त्रेधात्र नायिका ज्ञेया कुलस्त्री गणिकोभयम्। तद्वशाद्रूपकं त्रेधा तृतीयं धूर्तसंकुलम्॥ गणिका प्राकृतं ब्रूते कुलस्त्री संस्कृतं तथा।' इति विकृत्यन्तरापेक्षया संध्यादीनां प्रकर्षेण करणात् प्रकरणम्॥ ३५॥ भाणं लक्ष-

भारतीवृत्तिभूयिष्ठं शौर्यसौभाग्यसंस्तवैः ।
सूच्येते वीरशृङ्गारौ विटेन निपुणोक्तिना ॥ ३६ ॥
कल्पितेनेतिवृत्तेन धूर्तचारित्रवर्णनम् ।
एकोऽङ्को मुखनिर्वाहौ यत्र भाणः स संमतः ॥ ३७ ॥

अथ प्रहसनम्

यत्र सन्ध्यङ्गवृत्त्यङ्गवर्णनं भाणवन्मतम् ।
हास्यो रसः प्रधानं स्याद्भवेत् प्रहसनं हि तत् ॥ ३८ ॥

तच्च त्रिविधम् । शुद्धं वैकृतं संकीर्णं चेति । तत्र शुद्धम् ।

पाषण्डविप्रप्रभृतिचेटीचेटसमाकुलम् ।
वेषभाषादिसहितं शुद्धं हास्यवचोऽन्वितम् ॥ ३९ ॥

अथ वैकृतम्

कामुकादिवचोवेषैः षण्डकञ्चुकितापसैः ।
प्रहासाभिनयप्रायं वैकृतं तत् प्रकीर्त्यते ॥ ४० ॥

अथ संकीर्णम्

यद्वीथ्यङ्गैः समाकीर्णं संकीर्णं धूर्तसंकुलम् ॥ ४१ ॥

यति । **भारतीति** । शौर्यसौभाग्ययोः संस्तवैः धूर्ता द्यूतकरादयस्तेषां चारित्रं स्वेनान्येन वानुभूतमिति शेषः । स्पष्टमन्यत् । 'एकपात्रप्रयोज्येऽस्मिन्कुर्यादाकाशभाषितम् । अन्येनानुक्तमप्यन्यो वचः श्रुत्वेव यद्वदेत् ॥ इति किं भणसीत्येतद् भवेदाकाशभाषितम् । लास्याङ्गदशकं चात्र योज्यं गेयपदादिकम् ॥ भावप्रकाशिकाद्येषु तत्प्रपञ्चः परीक्ष्यताम् । अत्रोपरम्यतेऽस्माभिरतिविस्तरभीरुभिः ॥' यत्रैक एव विटः स्वकृतं परकृतं वा भारतीवृत्तिभूयिष्ठं भणति स भाणः॥३६—३७॥ प्रहसनं लक्षयति । **यत्रेति** । हास्यवचःप्रचुरत्वादिदं प्रहसनमुच्यते । तत्र शाक्यश्रोत्रियादिवेषभाषाविशिष्टं शुद्धम् । विटकामुकवृद्धकञ्चुकिप्रमुखवचोवेषानुकारि वैकृतम् । वीथ्यङ्गविशिष्टं धूर्तचेष्टितसंकुलं संकीर्णम् । तदेतत् त्रिविधं विभज्य क्रमेण लक्षयति । **तच्चेत्यादिना** । तत्र शुद्धमाह । **पाषण्डेति** । पाषण्डाः शाक्यादयः । विप्रा जातिमात्रोपजीविनोऽत्यन्तमृजवो वा । प्रभृतिपदेन तादृशा एव वैश्यादयो गृह्यन्ते । चेट्यादयो लक्षितचराः प्रधानभूतहास्यरसविभावभूतैरेतैः समाकुलम् । **वेषभाषादिसहितमिति** । अर्थादेतेषामेवेति गम्यते । विकृतमाह । **अथेति** । कामुकादयो भुजङ्गाद्याः । तेषां वचोवेषौ येषां तैस्तथोक्तैः । तथा षण्डकञ्चुकितापसैस्तद्वेषभाषायुक्तैरेवान्वितमिति शेषः । संकीर्णमाह । **यदिति** । वीथ्यङ्गैरुद्घात्यकादिभिः । धूर्ताश्चौरद्यूतकरादयः॥३८—४१॥

अथ डिमः

यत्र वस्तु प्रसिद्धं स्याद्वृत्तयः कैशिकीं विना ।
नेतारो देवगन्धर्वयक्षरक्षोमहोरगाः ॥ ४२ ॥
भूतप्रेतपिशाचाद्याः षोडशात्यन्तमुद्धताः ।
हास्यश्रृङ्गाररहिता रसा रौद्रप्रधानकाः ॥ ४३ ॥
चत्वारोऽङ्काः संधयश्च चत्वारो मर्शवर्जिताः ।
मायेन्द्रजालसंग्राममसूर्यचन्द्रग्रहादयः ॥
शेषं नाटकवत् सर्वं स डिमः परिकीर्त्यते ॥ ४४ ॥

अथ व्यायोगः

यत्र ख्यातेतिवृत्तं स्यादुद्धतो नायको मतः ।
गर्भावमर्शराहित्यं डिमवद्रसपोषणम् ॥
एकवासरकार्यं च स व्यायोगो महारणः ॥ ४५ ॥

अथ समवकारः

यत्रामुखं नाटकवत् संधयो मर्शवर्जिताः ।

डिमं लक्षयति । **यत्रेति** । प्रसिद्धं वस्तु त्रिपुरदाहादयः । वृत्तयः कैशिकीवर्जास्तिस्रः रसा दीप्ता एव । अत एवोक्तम् 'श्रृङ्गारहास्यविधुरैः रसैर्दीप्तैर्निरन्तरः' इति । अतः शान्तरसस्य प्रसक्तिरेव नास्तीति भावः । रौद्रः स्थायित्वेन प्रधानं येषां ते रौद्रप्रधानकाः । मर्शो विमर्शः । मायादयोऽनुभावाः । तत्र मायेन्द्रजालयोर्लक्षणं भावप्रकाशे 'सद्रूपोद्भावना माया स्वत एवासतः पुरा । अथवान्यपदार्थानामन्यथा कृतिरेव वा ॥ अदेशकालपारोक्ष्यं परोक्षस्यैव वस्तुनः । मन्त्रौषधादिभिः सोऽयमिन्द्रजाल इतीरितः ॥' इति । चन्द्रग्रहादय इत्यत्रादिशब्देनोल्कानिर्घातादयो गृह्यन्ते । गतमन्यत् । डिम सङ्घात इति धातोः नायकसंघातव्यापारात्मकत्वात् डिम इति धनिकः ॥ ४२—४४ ॥ व्यायोगं लक्षयति । **यत्रेति** । शान्तश्रृङ्गारहास्यरहिता रौद्रप्रधानकाः षड्रसाः कैशिकीवर्जमितरवृत्तयश्चेत्येतड्डिमवद्रसपोषणमित्यतिदेशेन लभ्यते । अस्त्रीनिमित्तोऽत्र महारणः । तदुक्तम् । 'अस्त्रीनिमित्तसंग्रामो जामदग्न्यजयो यथा ।' इति । व्यायुज्यन्तेऽस्मिन् बहवः पुरुषा इति व्यायोगः ॥ ४५ ॥ समवकारं लक्षयति । **यत्रेति** । शेषं नाटकतुल्याङ्गमित्यतिदेशानुषङ्गादेवानुपदिष्टा मुखाद्यखिलाङ्गलाभेऽप्यत्रामुखं नाटकवदित्यतिदेशो रूपकाणामिदमावश्यिकमिति सूचनायेति द्रष्टव्यम् । एककार्याणामपि नायकानां पयोधिमथने सुधालक्ष्मीप्रमुखफल-

नेतारो द्वादश पृथक्फला देवासुरादयः ॥ ४६ ॥
वीरप्रधानाश्च रसास्त्रयोऽङ्कास्तेषु च क्रमात् ।
वस्तुस्वभावदैवादिकृताः स्युः कपटास्त्रयः ॥ ४७ ॥
पुररोधरणाग्न्यादिनिमित्ता विद्रवास्त्रयः ।
धर्मार्थकामानुगुणास्तिस्रः शृङ्गाररीतयः ॥ ४८ ॥
प्रथमेऽङ्के निबद्धव्या कथा यामत्रयावधिः ।
यामावधिर्द्वितीयेऽङ्के तृतीयेऽङ्केऽर्धयामिका ॥
असौ समवकारः स्याद्वीथ्यङ्गैः कैश्चिदन्वितः ॥ ४९ ॥

अथ वीथी

यत्र भाणवदङ्गानां कॢप्तिर्वृत्तिस्तु कैशिकी ।
शृङ्गारः परिपूर्णत्वात् सूचनीयोऽतिभूयसा ॥
उद्घात्यकादीन्यङ्गानि सा वीथी वीथिवन्मता ॥ ५० ॥

भेदं दृष्ट्वाह । **नेतार इति** । वीरप्रधाना इत्यनेन शृङ्गारादीनामङ्गत्वेनानुप्रवेशः । अत एवात्र मन्दकैशिक्यो वृत्तयश्चेति गम्यते । **त्रयोऽङ्का इति** । प्रथमेऽङ्के मुखप्रतिमुखयोर्द्वितीये गर्भस्य तृतीये निर्वहणस्य च निबन्धो द्रष्टव्यः । अङ्कत्रये कपटविद्रवशृङ्गारत्रिकाणां त्रयाणां क्रमेण निबन्ध इत्याह । **तेषु च क्रमादिति** । कपटो नाम मोहः । तदुक्तं भावप्रकाशे 'कपटस्य स्वरूपं तु भ्रमो मोहात्मकः स्मृतः' इति । स च निमित्तानुरोधेन त्रिविध इत्याह । **वस्तुस्वभावेति** । 'वस्तुस्वभावकपटः क्रूरसत्त्वादिसंभवः । दैविकः कपटो वह्निवर्षवातादिसंभवः ॥ शत्रुजः कपटस्तत्र संग्रामादिसमुद्भवः ॥' कपटजन्यं पलायनं विद्रवः । सोऽपि कपटवत् त्रिविध इत्याह । **पुररोधेति** । पुररोधरणादिनिमित्तोऽरिकृतो विद्रवः । अग्न्यादिनिमित्तो दैविको विद्रवः । व्यालव्याघ्रादिनिमित्तो वस्तुस्वभावकृतो विद्रवः । व्रतादिजनितः कामो धर्मशृङ्गारः । महाराज्याद्यर्थप्राप्तिहेतुरर्थशृङ्गारः । परदारसुरापानादिसुखललितः कामशृङ्गारः । अङ्कत्रयवर्तिनो वस्तुनः कालनियममाह । **प्रथमेऽङ्के इत्यादि** । यथालाभमुद्घात्यकादीनामनुप्रवेश इत्याह । **वीथ्यङ्गैरिति** । समन्तादवकीर्यन्तेऽस्मिन्नर्था इति समवकारः । शेषं स्पष्टम् ॥ ४६—४९ ॥ वीथीं लक्षयति । **यत्रेति** । एकोऽङ्को मुखनिर्वाहावित्यादिको भाणवदित्यतिदेशलभ्यः । विशेषमाह । **वृत्तिरित्यादिना** । शृङ्गारोऽतिभूयसा सूचनीय इत्यनेन रसान्तराणामत्यल्पशः सूचनं गम्यते । उद्घात्यकादीनि प्रस्तावनायामुक्तानि । यत्रैवं सामग्री सा वीथी । वीथीवदङ्गानां मार्गवत् पङ्क्तिवद्वा मता । एकपात्रेण पात्रद्वयेन वा योगोऽ-

अथाङ्कः

यत्रेतिवृत्तं प्रख्यातं प्रधानं करुणो रसः ।
स्त्रीणां विलासो वाग्युद्धं नेतारः प्राकृता नराः ॥
भाणवत् संधिवृत्त्यादि स उत्सृष्टोऽङ्कसंज्ञिकः ॥ ५१ ॥

अथेहामृगः

मिश्रमीहामृगे वृत्तं चतुरङ्कं त्रिसन्धिकम् ।
मर्त्यदिव्यौ च नियमान्नायकप्रतिनायकौ ॥ ५२ ॥
धीरोद्धतौ स्त्रियं दिव्यां हर्तुकामौ च कामुकौ ।
अवधं युद्धमन्योन्यमाभासरसयोस्तयोः ॥ ५३ ॥

एषा प्रक्रिया दशरूपकोक्तरीत्यनुसारेण ।

त्रान्यतोऽवगन्तव्यः । इदमप्यत्रानुसंधेयम् । 'अस्यां प्रायेण लास्याङ्गदशकं योजयेन्न वा । सामान्या परकीया वा नायिकात्रानुरागिणी ॥ वीथ्यङ्गप्रायवस्तुत्वान्नोचिता कुलपालिका । लक्ष्यमस्यास्तु विज्ञेयं माधवीवीथिकादिकम् ॥' इति ॥ ५० ॥ अङ्कं लक्षयति । **यत्रेति** । इतिवृत्तं प्रख्यातमुत्पाद्यं वेति केचित् । प्राकृतादिव्यतिरिक्ताः । अत एव शारदातनयेनोक्तम् । 'दिव्यैरयुक्तः पुरुषैः शेषैरन्यैः समन्वितः' इति । सुगममन्यत् । य एवंविधः सोऽयं पुत्रादीनामिव प्राकृतनायकादीनामाश्रयत्वादङ्क इति संज्ञितः । अयमङ्को नानाप्रकारेति लक्षणमुल्लङ्घ्य सृष्टत्वादुत्सृष्ट इत्युच्यते । अत एवोत्सृष्टिकाङ्क इति नाटकान्तर्गताङ्कव्यवच्छेदार्थमिति धनिको व्याचष्ट ॥ ५१ ॥ ईहामृगं लक्षयाति । **मिश्रमिति** । गर्भावमर्शरहितास्त्रयः संधयो यस्मिंस्तत् त्रिसन्धिकम् । आभासरसयोरनुरागशून्यनायिकानुरक्तत्वादिति भावः । अत एवोक्तं दशरूपके 'दिव्यस्त्रियमनिच्छन्तीमपहारादिनेच्छतः' इति ॥ ५२—५३ ॥ अवधं युद्धमजायुद्धकल्पमित्यर्थः । गतमन्यत् । मृगवदलभ्यां नायिकां नायकोऽस्मिन् ईहते ईहामृगः । अस्या रूपकसामग्र्याः स्वोन्मेषमूलत्वं वारयति । **एषेति** ।

नाटकोदाहरणप्रारम्भः ।

तत्र साङ्गं नाटकमुदाह्रियते

भद्रां कौतुकवेदिमागतवतोरन्योन्यमासेदुषो:
शैलैर्मेरुहिमाचलप्रभृतिभिर्देवैर्हरीन्द्रादिभिः ।
व्याप्तां पार्श्वयुगे पुरोऽम्बुजभुवा पश्चाच्च मेनादिभिः
साध्वीभिः शिवयोरपाङ्गसरणिर्वैवाहिकी पातु वः॥ १॥

एषा द्वाविंशतिपदा नान्दी। अस्यां विवाहप्रवृत्तयोः शिवयोः वर्णनया सकलनरेन्द्रपरिकरस्य प्रतापरुद्रस्य काकतीयराज्यलक्ष्मीप्राप्तिर्नाटकप्रयोजनरूपा किंचिदर्थशक्त्या सूच्यते।

देयात् सिद्धिं महालक्ष्मीर्जगद्रक्षाधुरन्धरा ।
विष्णुवक्षःस्फुरन्मालाविहितालयतोरणा ॥ २ ॥

एषा च नान्दी प्रतापरुद्रराज्यलक्ष्मीमङ्गळविधिलक्षणा ।

नान्द्यन्ते सूत्रधारः । (समन्तादवलोक्य सहर्षम्)

केवलोद्देशलक्षणाभ्यां रूपकसामग्र्या दुर्ग्रहत्वाद्रूपकान्तराणामेतदुदाहरणेनोदाहृतकल्पत्वं हृदि निधाय जिज्ञासुजनानुग्रहार्थं नाटकमात्रमत्रोदाह्रियत इति प्रतिजानीते । **तत्रेति** । अथ साङ्गं नाटकमुदाहर्तुमारभमाणो विद्यानाथस्तत्प्रत्यूहपरिपन्थिनः पूर्वरङ्गस्य प्रधानाङ्गभूतामाशीरूपमङ्गळान्वितां नान्दीमादावुदाहरति । **भद्रामिति** । भद्रां विचित्रवितानमणितोरणादिपरिष्कारेण मङ्गळाम् । पार्श्वयुगे वधूवरप्रत्यासन्नैर्मेरुहरिप्रभृतिभिर्व्याप्ताम् । पुरोभागेऽम्बुजभुवा याज्ञिकेन ब्रह्मणा । तदुक्तं श्रीकण्ठलीलायां कल्याणकाण्डे 'दाता महीभृतां नाथो होता देवश्चतुर्मुखः । वरः पशुपतिः साक्षात् कन्या विश्वारणिस्तथा ॥' इति । मेना हिमाचलमहिषी । तदादिभिः साध्वीभिः पुरन्ध्रीभिः पश्चाद्भागे व्याप्तां कौतुकवेदिं विवाहोत्सववितर्दिकामागतवतोः प्राप्तयोरन्योन्यमासेदुषोर्यथा मिथः संस्पर्शस्तथासीनयोरित्यर्थः । यथास्थानमुपविश्यान्वारब्धायामित्यापस्तम्बस्मरणात् । शिवयोः पार्वतीपरमेश्वरयोः । 'पुमान् स्त्रिया' इत्येकशेषः । विवाहे भवा वैवाहिकी । अपाङ्गसरणिरन्योन्यदर्शनमित्यर्थः । इदमपि तत्रैवोक्तम् । 'देवोऽपि देवीमालोक्य सलज्जां हिमशैलजाम् । न तृप्यति नतापाङ्गी सा च देवं वृषध्वजम् ॥' इति । स वः पात्विति संबन्धः । लक्ष्येण लक्षणं योजयति । **एषेति** । **नान्द्यन्त इति** । नान्दीं प्रयुज्य पूर्वसूत्रधारे विनिर्गत इत्यर्थः । सूत्रधार इति द्वितीयो नटाख्य इत्यर्थः । रङ्गप्रविष्ट इति शेषः । इदमनुपदमेव रङ्गं प्रसाध्येत्यादिना तत्कृत्यमुक्तं । तदाह । **समन्तादिति** । सहर्षं सूचन-

कथमासूत्रित एव समन्ततो रङ्गमङ्गळविधिः ।

तथाहि

आविष्कुर्वन्ति मुरजाः सर्वतः शब्दमाधुरीम् ।
सङ्गीतोपनिषद्विद्यां वीणाः प्रस्तावयन्त्यमूः ॥ ३ ॥

एतद्रङ्गप्रसाधनम् ।

(सप्रहर्षम्)—

भूभृत्सुतामहादेवौ पितरौ यस्य विश्रुतौ ।
नरनागाकृतिः श्रीमान् स देवः श्रेयसेऽस्तु वः ॥ ४ ॥

मात्रादेव सांप्रदायिकैः सन्नद्धमानद्धादिकमिति सप्रसादमित्यर्थः । त्रिविधं रङ्गप्रसाधनमुक्तम् । तत्र द्वितीयमुदाहरति । **आविरिति** । शब्दानां वाद्यविशेषाणां माधुरीं श्रोत्रप्रियत्वम् । माधुर्यशब्दात् ष्यञन्तात् ङीष्प्रत्यये 'यस्य' इति यलोपे माधुरीति सिद्धम् । अत एवाह वामनः । 'ष्यञः षित्करणादीकारो बहुलम्' इति । सङ्गीतोपनिषत् संगीतरहस्यम् । तामेव विद्याम् । उभयत्र मौरजिका वैणिकाश्च लक्ष्यन्ते । अथ श्लोकैः काव्यार्थसूचकैरित्यादिना भारतीवृत्त्याश्रयणमुक्तम् । तदुदाहरति । **भूभृदिति** । यस्य देवस्य भूभृत्सुतामहादेवौ पार्वतीपरमेश्वरौ पितरौ मातापितराविति विश्रुतौ । 'पिता मात्रा' इत्येकशेषः । कदाचिल्लीलया गौरीगिरीशौ गजाकारेण विहरमाणौ गजाननमजीजनताम् । तदुक्तं स्कान्दपुराणे । 'प्रशस्तमत्तमातङ्गवपुर्भूत्वाथ भूतपः । भ्रममाणो वने तस्मिन् क्रीडां स्वीकृतवान् विभुः ॥ तमालोक्य महादेवी महेशेच्छानुवर्तिनी । करिणीरूपमास्थाय तेन सा विचचार ह ॥' इत्यादिना । एकस्मिन्नर्धे नरस्येतरस्मिन् करिणश्चाकृतिर्यस्य सोऽयं नरनागाकृतिः । तथापि श्रीमान् रमणीयः । स देवो गणेशो वः सामाजिकानां श्रेयसेऽस्त्विति वाच्यार्थः । सूच्यार्थस्तु यस्य कथानायकस्य भूभृत्सुता राजपुत्री मुम्मडम्बा महादेवस्तन्नामको महाराजः पितराविति विश्रुतौ नरनागा नरश्रेष्ठाः । 'सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः' इत्यभिधानात् । उपमितसमासः । तदाकृतिः नलनहुषदिलीपादिसदृशः इत्यर्थः । स देवो राजा । 'देवः सुरे घने राज्ञि' इति विश्वः । अत्र द्वयोरप्यर्थयोर्वाच्यत्वाभावान्न श्लेषः । नापि शब्दशक्तिमूल उपमालंकारध्वनिः । संबन्धान्तरे संभवति सादृश्यमूलकत्वकल्पनानपेक्षणात् । किं तु सूचकत्वसंबन्धाच्छब्दशक्तिमूलो वस्तुध्वनिः । अत एवोक्तमलंकारसर्वस्वे श्लेषालंकारप्रस्तावे । 'यत्र सूचनव्यापारोऽस्ति तत्र शब्दशक्तिमूलो वस्तुध्वनिर्बोद्धव्यः' इति । क्रतुं कंचिदुपादायेतीममंशमुदाहरति ।

(ऊर्ध्वमवलोक्य)—चिरादनुकूलेन कालेनापगतदुर्दिनानि दिङ्मुखानि । यतः ।

विहरद्राजहंसश्रीर्विलसन्मित्रमण्डलः ।
प्रसाधयति सन्मार्गं प्रसन्नः शरदागमः ॥ ५ ॥

काव्यार्थसूचकाभ्यां श्लोकाभ्यामृतुसमाश्रयणेन संस्कृतप्रायनराश्रितवाग्व्यवहाररूपा भारती वृत्तिः कथिता ।

(सविनयमुपसृत्य सभाभिमुखमञ्जलिं बध्वा ।)

भो भो मध्यमभुवनभागधेयविवर्तस्यैकशिलानगरपुण्यराशेः काकतीयकुलदेवतायाः स्वयंभूदेवस्य सततमहोत्सवमासेदिवांसो विद्वांसः कलार्णवनाट्यवेदाचार्यस्य पुत्रमभिनयदर्पणं मामभिमतरूपकप्रयोगानुज्ञया परमनुगृह्णीत ।

(आकाशे कर्णं दत्वा) किं ब्रूथ ।

यस्मिञ्जगन्मङ्गळमस्ति वस्तु यस्मै स्वयंभूः स्पृहयत्यजस्रम् ।
तच्छ्रोत्रयोर्लोचनयोः पथान्नः शृङ्गाटकं नाटकमाविरस्तु॥६॥

इति

ऊर्ध्वमित्यादिना । विहरन्ती राज्ञश्चन्द्रस्य हंसानां च श्रीर्यत्र स तथोक्तः अन्यत्र राजहंसा राजश्रेष्ठास्तल्लक्ष्मीविहारभूमिरित्यर्थः। विलसत् प्रकाशमानं मित्रमण्डलं सूर्यमण्डलमन्यत्र सुहृत्समूहो यत्र स तथोक्तः।प्रसन्नःएकत्र मेघापगमादन्यत्र स्वभावाच्चेति भावः ।सन्मार्गं नक्षत्रमार्गमन्यत्र साधुमार्गम्। प्रसाधयति भूषयति। अत्र प्रस्तुतशरद्विशेषणसाम्येनाप्रस्तुतराजसूचनात् समासोक्तिः। अत एवेदं गुणीभूतव्यङ्ग्यं न पुनः पूर्ववत् ध्वनिरिति बोद्धव्यम् । लक्ष्ये लक्षणं योजयति। **काव्यार्थेति**। अथ सामाजिकानुग्रहमाशास्ते । **सविनयमित्यादिना** । भागधेयविवर्तस्य भाग्यपरिपाकस्य । कलार्णवो नाम नाट्यवेदाचार्यः । आकाशभाषितेन तदीयमुत्तरमाह । **आकाश इति** । तल्लक्षणं तु 'किं ब्रवीष्येवमित्यादि विना पात्रं ब्रवीति यत् । श्रुत्वेवानुक्तमप्येकस्तत् स्यादाकाशभाषितम् ॥' इति । **यस्मिन्निति** । स्वयंभूरीश्वरो यस्मै वस्तुने अजस्रं स्पृहयति । 'स्पृहेरीप्सितः' इति संप्रदानत्वाच्चतुर्थी । जगन्मङ्गळं तद्वस्तु यस्मिन्नाटकेऽस्तीति योजना । वाचिकाभिनयेन श्राव्यत्वादितराभिनयेन दृश्यत्वाच्चाह । **श्रोत्रयोरित्यादि** । शृङ्गाटकं चतुष्पथं तन्नाटकमाविरस्तु । इतिशब्द उत्तरसमाप्तौ । संवादेन संतुष्यन्नुत्तरार्ध

(सहर्षम्) अस्मन्मनोरथसंवाद्येव परिषदादेशः। यत् प्रतापरुद्रचरितानुबन्धः प्रबन्धः सामाजिकानां मनसि वर्तते । अहो सर्वं सुघटितमनुविधात्रा विधात्रा । यतः

सभा स्वयंभूपरमेश्वरस्य प्रतापरुद्रस्य गुणा महार्घाः ।
अहं च नाट्यश्रुतिपारदृश्वा सुधामुचस्तस्य कवेश्च वाचः ॥

एषा प्रशंसयाभिमुखीकरणरूपा भारतीवृत्तेरङ्गं प्ररोचना ।

(साविमर्शम्) कथमस्मत्प्रेयसी संगीतशारिका चिरयति ।

प्रविश्य **नटी**—(पुरोऽवलोक्य) सस्पृहम्—

*किं भारईए सुव्वइ मंजीररवो सहाए विहरंतीए ।
अह संगीअसुइ व्वा विण्णादं णट्टप्पमुहतूरणिणाओ ॥ ८ ॥

एतत्साम्यादनेकार्थयोजनरूपं त्रिगतं प्रस्तावनाङ्गम् ।

(उपसृत्य)—†'अज्ज इअम्हि आणवेदु को णिओओ अणुट्ठीअदु-त्ति ।

सूत्रधारः—आर्ये

यद्गेहे कलकण्ठनादमधुरं गास्यामि गीतिं ध्रुवां
लास्यं चारुभिरङ्गहारललितैराविष्करिष्यामि यत् ।

---

* किं भारत्याः श्रूयते मञ्जीररवः सभायां विहरन्त्याः ।
अथ संगीतश्रुतिर्वा विज्ञातम् नाट्यप्रमुखतूर्यनिनादः ॥

† आर्य इयमस्मि आज्ञापयतु को नियोगोऽनुष्ठीयतामिति ।

मुद्घाटयति । **सहर्षमित्यादि** । अघटमानघटकं दैवानुकूल्यं जातमित्याह । **अहो इति** । सभा गुणग्राहिणीति भावः । महार्घा महामूल्याः । नटानामाम्नायो नाट्यम् । 'छन्दोगौक्थिक' इति ञ्यप्रत्ययः । तस्य श्रुतिशब्देन चूतवृक्षादिवत् समानाधिकरणसमासः । तस्याः पारं दृष्टवान् नाट्यश्रुतिपारदृश्वा । दृशेः क्वनिप् । सुधामुचोऽमृतवर्षिण्यः । प्ररोचनामुदाहरणे योजयति । **प्रशंसयेति** । प्रस्तुतार्थस्येति शेषः । **अभिमुखीकरणरूपेति** । सामाजिकानामिति शेषः । 'प्रेक्षकाद्युन्मुखीकारः प्रस्तुतार्थप्रशंसया प्ररोचना' इति लक्षणात् । **किमिति** । भारईए इत्यत्र एकारस्य 'एदोतोः क्वचित् स्वरूपेण ह्रस्वः' इति ह्रस्वः । एवमन्यत्रापि वृत्तानुसारेण द्रष्टव्यम् । लक्ष्ये लक्षणं योजयति । **एतदिति** । प्रस्तावनाङ्गमित्यनेन पूर्वरङ्गाङ्गत्रिगतव्यवच्छेदः । सूत्रधारो विलम्बवर्तीं नटीमुपालभते । **यदिति** । ध्रुवालक्षणं वक्ष्यामः । माधुर्यं गायनीविशेषगुणः । तदुक्तं

रम्यं यत् किल रङ्गमङ्गळविधिं संपादयिष्याम्यहं
प्रागित्युक्तवती तदद्य निपुणे निर्व्यूढमेवं त्वया ॥ ९ ॥

एतत् प्रियसदृशैरप्रियैर्वाक्यैरुपालम्भनाच्छलम् ।

नटी—(सभयम्) *णट्टसामग्गिं समग्गीकादुं विलंविअं। सज्जीकिआ क्खु एसा । केण उण रुव्वएण पओओ उअक्कमीअदु ।

सूत्र०—नन्विदमेव रूपयतु । (इति पत्रिकां ददाति)

नटी—(गृहीत्वा संस्कृतमाश्रित्य वाचयति)

तेजःपर्यायहरयोः किं किं संबोधनं मतम् ।
किमाशीर्वादविषयो विद्यानाथकृतिश्च का ॥ १० ॥

(समन्दस्मितम्)†णिगूढत्थं खु एदं छेआणं वअणं पडिभादि कीरिसं उत्तरं णिरूवेदु अज्जो ।

---

* नाट्यसामग्रीं समग्रीकर्तुं विलम्बितम् । सज्जीकृता खलु एषा केन पुना रूपकेण प्रयोग उपक्रम्यताम् ।

† निगूढार्थं खल्वेतच्छेकानां वचनं प्रतिभाति कीदृशमुत्तरं निरूपयत्वार्यः ।

शार्ङ्गदेवेन । 'रूपयौवनशालिन्यो गायन्त्यो गातृवन्मताः । माधुर्यधुर्यध्वनयश्चतुराश्चतुरप्रियाः॥' इति । चारुभिः प्रियदर्शनैः अङ्गहारेषु ललितैः ललितादिसुकुमाराङ्गहारैरित्यर्थः । 'सप्तमी शौण्डैः' इति बहुवचनेनाद्यर्थलाभः । लास्यं मृदुनर्तनम् । 'लास्यं तु सुकुमाराङ्गं मकरध्वजवर्धकम्' इति लक्षणात् । गास्य...भि त्यादीनां स्थानिनोऽस्मदोऽहमिति विशेषणं ध्रुवागानादीनामविलम्वसूचनार्थम् । अत्र ध्रुवागानादिकं सर्वं निर्वहामीति प्रागुक्तवत्या भवत्या सर्वमेवं निर्व्यूढमिति विपरीतलक्षणया न निर्व्यूढमिति लभ्यते । अत्र नर्तनोपयोगिकरपादादिकमङ्गविशेषः करणं तु पुष्पपटादि । तदुक्तं संगीतरत्नाकरे । 'स्यात् क्रिया करपादादेर्विलासेनात्रुटद्रसा । करणं नृत्तकरणं भीमवद्भीमसेनवत् ॥' इति । तत्समुदायसाध्यो नर्तनप्रयोगविशेषः । अङ्गानासुचितदेशप्रापणेन हरप्रियाङ्गप्रयोगत्वेन वाङ्गहारः इत्युच्यते । तदुक्तम् । 'अङ्गानामुचिते देशे हरणं सविलासकम् । अनेककरणोत्पाद्यमङ्गहारोऽभिधीयते ॥ यद्वा हारो हरस्यायं प्रयोगोऽङ्गैरिति स्मृतः ।' इति । ललितादिलक्षणं बह्वपेक्षमिह विस्तरभयान्न लिख्यत इत्यन्यतो द्रष्टव्यम् । **संस्कृतमाश्रित्येति** । पत्रिकागतस्य स्वभाषितत्वाभावात् वाचयति पठति । वचिरयं चौरादिकः । नालिकाख्यमङ्गं वक्तुं वहिर्लापां प्रहेलिकामाह । **तेज इति** । नालिकालक्षणे सोपहासविशेषणं कृताकृतमिति हृदयम् । अत एवोक्तम् । **एषा निगूढार्था नालिकेति । णिगूढत्थमिति** । छेका विदग्धाः । कथं कथानायकनामधेयानुवन्धमनोहरं खलु नाटकम् । अत्र कथमित्याश्चर्ये । प्रतापोपपदाङ्कितं

सूत्र०—अयि सुव्यक्तमेतत्। प्रतापरुद्रकल्याणमिति प्रतीयत एव।

एषा निगूढार्था नालिका।

नटी—*कहं कहाणाअअणामहेआणुबंधमणोहरं क्खु नाडअम्। पआवोववदंकिअं तस्स रण्णो णाम कहं जाअति पुच्छीआदि।

सूत्र०—प्रिये श्रूयताम्।

तं सुजातं समुद्वीक्ष्य क्षोण्यां रविमिवोदितम्।
प्रतापरुद्र इत्याख्यामकरोत् काकतीश्वरः॥ ११॥

अन्यच्च।

विष्णोर्विश्वैकवीरस्य काकतीयकुले स्थितम्।
अवतारममुं ज्ञात्वा वीररुद्रं प्रचक्षते॥ १२॥

नटी—†लोआणं कण्णजुअलस्स भाअहेएण एदं णामजुअलं सुणीअदि। चिरस्स णट्टविज्जाणुवट्टणं फलिअं जेण लोअमंगलं काकइणरिंदचरिअं अभिणिज्जइ।

एतन्नाट्यप्रसङ्गेन प्रकृतकार्यावलगनादवलगितं द्वितीयम्।

सूत्र०—अहो प्रज्ञासंवादोऽयमायुष्मत्याः यदियं कवीनां प्रश्नोत्तरमालिका। यथा किल

किं लोकश्रवसोर्भाग्यं मङ्गळश्रवणं मुहुः।
किं मङ्गळं प्रतापाङ्करुद्रस्य चरिताद्भुतम्॥ १३॥

---

* कथं कथानायकनामधेयानुबन्धमनोहरं खलु नाटकम्। प्रतापोपपदाङ्कितं तस्य राज्ञः कथं नामधेयं जातमिति पृच्छयते।

† लोकानां कर्णयुगलस्य भागधेयेन एतन्नामयुगलं श्रूयते। चिरस्य नाट्यविद्यानुवर्तनं फलितं येन लोकमङ्गळं काकतिनरेन्द्रचरितमभिनीयते॥

तस्य राज्ञो नाम कथं जातमिति पृच्छयते। अत्र कथंशब्दः कारणवाची। 'कारणेऽपि कथं तर्के विस्मये संपदुद्भवे' इति भावप्रकाशवचनात्। सूर्यसदृशत्वात् प्रतापरुद्र इति संज्ञा संजातेत्युत्तरमाह। **तमिति**। वीरावतारत्वात् वीररुद्रसंज्ञापि समभूदित्याह। **विष्णोरिति**। लोकानां कर्णयुगलस्य भागधेयेनैतन्नामयुगलं श्रूयते। अथावलगितस्य द्वितीयं भेदमुदाहरति। **चिरस्सेति**। प्रकृतकार्यं नाटकप्रयोगरूपम्। **अहो इति**। प्रतापोऽङ्कश्चिह्नं यस्य रुद्रस्य तथोक्तस्य द्वितीय उद्घात्यकभेदोऽयमित्याह। **एतदिति**। मिथः स्तोत्रमात्रमपि

एतत्प्रश्नोत्तरमालारूपमुद्घात्यकम् ।

नटी—×*अय्यपरिवट्टणेण सव्वं संघटिअदि ।

सूत्र०—आर्ये

त्वया दारैरुदारश्रीर्नाट्यसंपदियं मम ।
प्रबन्धलक्ष्मी रीत्येव विदर्भफणितिस्पृशा ॥ १४ ॥

एष मिथःस्तोत्ररूपः प्रपञ्चः ।

नटी—†एआरिसगुणमहग्घपआवरुद्दचरिअं अहिकरिअतो तस्स कइणो संपुण्णो सरस्सईपसादो ।

सूत्र०—आर्ये एवमेव नन्वेषा कविभारत्योर्वाक्केलिः । यथा किल

मातर्भारति वत्स किं तव कृपां याचेऽद्य किं प्रस्तुतं
जिह्वा काकतिवीररुद्रनृपतौ स्तोत्राय सन्नह्यति ।
ज्ञातं ते विहरन्तु वाग्लहरयः संध्यानटद्धूर्जटि-
त्वङ्गन्मौलितरङ्गिणीकलकलारम्भप्रियंभावुकाः ॥ १५ ॥

एषान्योन्यसंलापरूपा वाक्केलिः ।

× आर्यपरिवर्तनेन सर्वं संघट्यते ।

† एतादृशगुणमहार्घप्रतापरुद्रचरितमधिकुर्वतस्तस्य कवेः संपूर्णः सरस्वतीप्रसादः ।

प्रपञ्चलक्षणं मत्वाह । **अय्येत्यादिना** । **त्वयेति** । दारैः कलत्रेण 'भार्या जायाथ पुंभूम्नि दाराः' इत्यमरः । विदर्भकविप्रिया फणितिर्विदर्भफणितिः तत्स्पृशा रीत्या वैदर्भ्या । कविभारत्योरुक्तिप्रत्युक्त्योस्त्रिरावृत्तिरूपां वाक्केलिमाह । **मातरिति** । अत्र मातृशब्देन कवेर्भारत्यां भक्तिविशेषो वत्सशब्देन तस्यास्तस्मिन् वात्सल्यातिशयश्च सूच्यते । कविराह । **तवेति** । भारती प्रयोजनं पृच्छति । **अद्येति** । कविस्तदाह । **जिह्वेति** । भारती स्मरणमभिनीयैवाह । **ज्ञातं ते इति** । प्रार्थनानिमित्तमिति शेषः । संध्यानटद्धूर्जटित्वङ्गन्मौलितरङ्गिणीकलकलारम्भस्य संध्याताण्डवप्रवृत्तखण्डपरशुदोधूयमानजटाजूटविजृम्भमाणजाह्नवीकल्लोलकोलाहलस्य प्रिया भवन्तीति प्रियंभावुकाः । तत्कल्पा इत्यर्थः । 'कर्तरि भुवः' इति खुकञ्प्रत्यये मुमागमः । वाग्लहरयो

---

* 'अय्यपरिणन्तणेन' इति पाठान्तरम्

नटी—*अम्हाणं ईरिसणरिंदचरिआणुऊलो णट्टाडंबरो होइ ण वे त्ति सज्झसेण वेवइ मे हिअअम् ।

सूत्र०—(किंचित् सासूयम्) आः किमुच्यते । निरवद्या ननु मन्नाट्यविद्यासामग्री । कीदृशी पुनस्तव गीतिर्योग्यतया भविष्यति ।

नटी—†संगीदसारस्स महण्णवो उव्वोल्लइ । अवहाणजाणपत्तं आरूहदु अज्जो ।

एतदन्योन्यवाक्याधिक्यादधिबलम् ।

सूत्र०—चिरमवहित एवास्मि । नन्वियमुपक्रम्यते ध्रुवा ।

नटीकर्तृकध्रुवागानप्रतिज्ञावचनं संभ्रमोदितमिति गण्डम् ।

नटी—(सास्मितम्) ‡कहं अज्जो धुअं गाअइ ।

सूत्र०—अयि कथमर्धोक्त एव त्वरा नाट्यविद्येति शेषं न जिघ्रति ।

एतदुक्तस्यान्यथायोजनरूपमवस्यन्दितम् ।

आर्ये नूनं ध्रुवागानोत्सुकं तव चेतस्तदारभ्यतां गीतिः ।

---

* अस्माकमीदृशनरेन्द्रचरितानुकूलो नाट्याडम्बरो भवति न वेति साध्वसेन वेपते मे हृदयम् ।

† संगीतसारस्य महार्णव उद्वेल्यते । अवधानयानपात्रमारोहत्वार्यः ।

‡ कथमार्यो ध्रुवां गायति ।

वाग्वैखर्यः । विहरन्तु प्रवर्तन्ताम् । यदि ज्ञातमित्येकं वाक्यं तदा 'समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः' इति नियमात् वाक्यान्तरवर्तिपदस्य निमित्तत्वायोगात् पदात् परस्य युष्मदो विधीयमानः 'तेमयावेकवचनस्य' इति तयादेशो न स्यात् । **अम्हाणमिति** । सूत्रधारः स्वसामर्थ्यमाविष्कुर्वन्नाह । **किंचिदित्यादि** । आः कोपे । ननुरवधारणे । योग्यतया सामर्थ्येन कर्त्र्या । नटी स्वसामर्थ्याधिक्यमाविष्करोति । **संगीतेति** । संगीतसारस्य महार्णव उद्वेल्यते प्रवर्ध्यते । अवधानयानपात्रमारोहत्वार्यः । अवहितो भवेत्यर्थः । अत एवाधिबलमिदमित्याह । **एतदिति** । **चिरमित्यादि** । गण्डान्तं स्पष्टम् । सूत्रधारवाक्यं विडम्बयति । **सास्मितमिति** । कथमार्यो ध्रुवां गायति । ध्रुवा नाट्यविद्येति मे विवक्षितम् । तदर्धोक्त एव त्वमन्यथा मन्यस इत्याह । **अयीति** । त्वरा कर्त्री । **ध्रुवागानोत्सुकमिति** । अन्यथा तन्मयि नारो-

5855

नटी—(तथा करोति)

* लच्छी सरस्सई अइमा धवलिअभुवणंतरा विराअंती ।
विलसंतकुवलअसिरी राअस्स पसाहणं कुणइ ॥ १६ ॥

सूत्र०—(आकर्ण्य सरसावेशम्)

गाढालिङ्गनसंमर्दप्रत्यक्षरगलत्सुधाम् ।
ध्रुवां करोमि सर्वाङ्गे श्रोत्रैकामृतवर्षिणीम् ॥ १७ ॥

एष रसवशादसंगतार्थव्याहाररूपोऽसत्प्रलापः ।

नटी—(सोपहासम्) †सुउमारा क्खु एसा अय्यस्स णिद्दआलिंगणवेल्लणं ण सहइ ।

एष हास्यलोभकरो व्याहारः ।

सूत्र०—(सव्रीडम्)

---

* लक्ष्मीः सरस्वती चेयं धवलितभुवनान्तरा विराजन्ती ।
विलसत्कुवलयश्री राज्ञः प्रसाधनं कुरुते ॥

† सुकुमारा खल्वेषार्यस्य निर्दयालिङ्गनवेल्लनं न सहते ।

पयेदिति भावः । नटी राज्यलक्ष्मीं शरत्कालसरसीं च प्रस्तुत्य प्रवृत्तां ध्रुवां गायति। **लच्छीति** । इमा इयं लक्ष्मीः राज्यलक्ष्मीः शौक्ल्यनिमित्तत्त्वनिबन्धनेन यशसा धवलितानि भुवनान्तराणि लोकान्तराणि यस्याः सा तथोक्ता । विलसत्कुवलयश्रीः उल्लसदुर्वीमण्डलशोभा च राज्ञो नृपस्य प्रसाधनं करोति । अन्यत्र इयं सरसी धवलितं कालुष्यापगमेन निर्मलीकृतं भुवनान्तरमुदकमध्यं यस्याः सा तथोक्ता । विलसत्कुवलयश्रीरुल्लसन्नीलोत्पलसंपत्तिश्च । राज्ञश्चन्द्रस्य प्रसाधनं करोति । रूपकेषु तावन्मार्गाभिनयेन प्रावेशिकीप्रभृतयः पञ्च ध्रुवाः प्रयोक्तव्याः । तदुक्तम् । 'ध्रुवाः पञ्च प्रयोक्तव्या रसाभिनयसिद्धये' इति । तत्रेयमन्तरा नाम ध्रुवा । तल्लक्षणं तु भावप्रकाशे । 'सर्वासामन्तरा वस्तुरसादिवशकल्पिता । अन्तरा सा ध्रुवा ज्ञेया नाट्याभिनयरञ्जिनी ॥' इति । विशेषान्तराणि तत्रैव द्रष्टव्यानि । विस्तरभयादिह न लिख्यन्ते । रसप्रयुक्तं प्रलापमुदाहरति । **गाढेति** । पूर्वं श्रोत्रयोरेकं मुख्यममृतं वर्षति ताच्छील्येन तां तथोक्ताम् । संप्रति गाढालिङ्गनसंमर्देन प्रत्यक्षरं द्राक्षासदृक्षादशेषादपि वर्णात् गलत्सुधां सतीं ध्रुवां सर्वाङ्गे करोमि । सूत्रिणोऽसत्प्रलापमुद्घाटयितुमाह । **सोपहासमिति** । सुकुमारा खल्वेषार्यस्य कर्तुर्निर्दयालिङ्गनस्य वेल्लनं क्षेपणं प्रेरणं प्रयोगमिति यावत् । न सहते । 'क्षिप प्रेरणे' इत्यस्य धातोः 'क्षिपेर्वेल्लः' इत्यादिना

5855

रसास्वादेन तरला ये माद्यन्ति विपश्चितः ।
त एव भावुका लोके भवन्ति हृदयालवः ॥ १८ ॥

एतद्दोषस्य गुणत्वारोपान्मृदवम् ।

नटी—*अय्यो अणंतरकरणिज्जं णिरूवेदु ।

सूत्र०—नन्वयमिदानीं सभापतिर्देवः स्वयंभूरुपश्लोक्यते ।

सर्वाङ्गविलसत्सर्वमङ्गळालंकृताकृतेः ।
रुद्रस्य महिमा भाति विश्वानुग्रहकारिणः ॥ १९ ॥

(नेपथ्ये) । भोः सत्यं सत्यम् । सर्वाङ्गविलसत्सर्वमङ्गळालंकृताकृतिरेवायं रुद्र इति ।

सूत्र०—(सहर्षम्) कथमुपक्रान्तमेवास्मद्वाक्यानुगुण्येन प्रस्तुतस्यानुगुणं कुशलैः कुशीलवैः यतः काकतीश्वरगुणवर्णनायोद्यतयोर्वैतालिकयोर्वचनमिवोपक्षिप्यते ।

अयं कथोद्घातः । इदमेव गुणवर्णनात् प्रवर्तकं च ।

(पुरोऽवलोक्य) कथमेतौ वैतालिकावित एवाभिवर्तेते ।

---

* आर्यः अनन्तरकरणीयं निरूपयतु ।

वेल्लादेशः । दोषं गुणीकरोति । **रसेति** । तरला रसलोला ये विपश्चितो विदग्धा रसास्वादेन माद्यन्ति परवशा भवन्ति त एव लोके भावुकाश्चर्वणनिपुणाः सन्तो हृदयालवः सहृदया भवन्ति । 'हृदयादालुजन्यतरस्याम्' इत्यालुच्प्रत्ययः । येषां काव्यानुशीलनाभ्यासवशात् विशदीभूते मनोमुकुरे वर्णनीयतन्मयीभवनयोग्यता अत एव हृदयसंवादभाजः सहृदया इत्यभिनवगुप्ताचार्याः । आर्योऽनन्तरकरणीयं निरूपयतु । सूत्रधारोऽनन्तरकर्तव्यं प्रतिज्ञापूर्वकमाचरति । **नन्वित्यादिना** । सर्वाङ्गे विलसन्त्या सर्वमङ्गळया पार्वत्या अलंकृताकृतेरर्धाङ्गजानेरित्यर्थः । अत्र सर्वाङ्गव्यापिसमस्तमङ्गळालंकृतत्वलक्षणस्य वीररुद्रविषयार्थान्तरस्यानुगुणं सूत्रधारवाक्यमवलम्ब्य वचनमुपक्षिप्यते । **नेपथ्य इति** । उक्तमर्थमुद्घाटयति । **कथमिति** । कुशीलवा नटविशेषाः । 'भूमिकाभिरनेकाभिः कर्मवागङ्गचेष्टितैः । यथाप्रकृतिसंधानकुशलास्ते कुशीलवाः ॥' इति लक्षणात् । अत एवायं कथोद्घातभेद इत्याह । **अयमिति** । एतच्छन्दोपक्षेपेण प्रयोगातिशयमुदाहरति । **कथमेताविति** । वैतालिकलक्षणं तु भावप्रकाशे 'तत्तत्प्रहरकयोग्यैः रागैस्तत्कालवाचिभिः श्लोकैः । सरभसमेव वितालं गायन् वैतालिको भवति ॥' इति । इति प्रस्तावना । कथादौ विष्कम्भं कुर्यादिति

एषोऽयमित्युपक्षेपात् प्रयोगातिशयः प्रस्तावनाङ्गम् ।

तदेहि । आवामप्यनन्तरकरणीयाय सज्जीभवावः (इति निष्क्रान्तौ)

इति समग्राङ्गा प्रस्तावना ।

(ततः प्रविशतः काम्पिल्यकल्लूतकौ वैतालिकौ)

प्रथमः—(सहर्षम्)

योऽयं जातस्त्रिलोकीप्रथितसुचरिते काकतीयान्ववाये
यस्मै श्रेयांस्यजस्रं वितरति भगवान् देवदेवः स्वयंभूः ।
यस्याज्ञा सर्वपृथ्वीपतिमुकुटमणिश्रेणिकेलीवयस्या
सोऽयं भूपालमौलिर्जयति गुणमहान् रुद्रदेवो नरेन्द्रः ॥

स्वयंभूदेवश्रेयोवितरणरूपबीजन्यासादुपक्षेपोऽङ्गम् ।

द्वितीयः—सखे किमुच्यते

यो रुद्रो रजताचले स्थितिमगादर्धाङ्गनारिः पुरा
सोऽयं संप्रति काकतीश्वरकुले सर्वाङ्गनारिः स्थितः ।

मतमवलम्ब्य प्रस्तावना । वृत्तस्य वर्तिष्यमाणस्य च वीररुद्रचरितस्य निदर्शकं मध्यपात्रद्वयप्रयोजितं शुद्धविष्कम्भमुदाहरति । **ततः प्रविशत इत्यादिना** । इतः परं स्वप्नोपदेशपर्यन्तो वृत्तकथाभागः । तत्रोपक्षेपमुदाहरति । **योऽयमिति** । मणिमुकुटश्रेण्याः केलीवयस्या क्रीडासखी । सर्वैरपि भूपालैरस्याज्ञा शिरसा धार्यत इति भावः । योऽयमित्यत्रेदंशब्दः प्रसिद्धिमात्रपरो न तु यच्छब्दापेक्षितार्थबोधकः । अन्यथोत्तरवाक्ये तच्छब्दप्रयोगानुपपत्तेः । यतोऽनुवादवाक्यगतयच्छब्दसंनिहितानां तदेतदिदमदसां प्रसिद्धिपरत्वम् । एवं विधेयवाक्यगततच्छब्दसन्निहितानामेतदिदमदसामपि । तथैव लोकवेदयोः प्रयोगदर्शनादित्यादि बहुधा प्रपञ्चितमस्मन्महोपाध्यायमल्लिनाथसूरिणैकावलीतरले । अतः सोऽयमित्यत्राप्येवमेव द्रष्टव्यम् । पुरा किल काकतिकुलसंभूते गणपतिनाम्नि महाराजे दुहितृमात्रसंताने कदाचित् दैवयोगेन कालपरिपाकमुपेयुषि तन्महिषी रुद्रदेवी नाम राज्ञी बहूनि वर्षाणि तद्राज्यमकण्टकं परिपाल्य परिणता सती दौहित्रे प्रतापरुद्रे राज्यधुरां निदधे । तामिमां कथां मनसि निधायाह । **यो रुद्र इति** । अर्धाङ्गं नारी यस्यासावर्धाङ्गनारिः । समासान्तविधेरनित्यत्वज्ञापनात् 'नद्यृतश्च' इति कबभावपक्षे 'गोस्त्रियोरुपसर्जनस्य' इति ह्रस्वः । सर्वाङ्गेण नारी सर्वाङ्गनारी रुद्रदेवीरूपेण स्थित इत्यर्थः । तत्पुरुषत्वात् परवल्लिङ्गता । अथवात्रापि बहुव्रीहिः । प्रक्रियापि पूर्ववदेव । अवतारभेदादाकारभेदेऽपि तस्मिन्

स्थाने यद्विषमावलोकनकलामात्रेण भस्मीकृता-
न्यासन्वैरिपुराणि चित्रमधुना खड्गे विषं धार्यते ॥ २१ ॥

प्रथमः—सखे साधु समर्थितम् । अन्यथा कथमस्मै महाराजाय स्वप्ने कुलगुरुसदृशः स्वयंभूदेवस्तादृशीं श्रेयःसंग्रहकारिकामुपदिष्टवान् ।

स्वयंभूदेवप्रसादरूपस्य बीजस्य बहूकरणात् परिकरः ।

द्वितीयः—(सविमर्शाश्चर्यम्) कथमवगतं राजरहस्यं वयस्येन ।

प्रथमः—सखे कस्य वा न विदितमिदम् । यत् सर्वस्मिन्नपि निजनगरे महोत्सवमादिशता रुद्रनरेश्वरेण कुलदेवतायाः स्वप्नोपदिष्टाः प्रसादविशेषाः प्रख्याप्यन्त एव ।

कुलदेवताप्रसादरूपस्य बीजस्य प्रख्यापनेन परिनिष्पत्तेः परिन्यासः ।

द्वितीयः—अहो निरन्तरप्रसादोन्मुखता देवस्य । यथा काकतीयप्रसवेषु श्रेयांस्युत्तरोत्तरमनुबध्यन्ते ।

एतत् बीजस्य श्रेयोऽनुबन्धरूपगुणख्यापनाद्विलोभनम् ।

तदस्मिन्नेव महीयसि महे महीमण्डलाखण्डलं चलमर्तिगण्डमुपश्लोकयितुमावयोरयमेवावसरः । तदेहि राजकुलं प्रविशावः ।

प्रथमः—वयस्य सांप्रतं पुरोधःप्रमुखानमात्यवृद्धानपि पुरस्कृत्य कल्याणस्वप्नक्रमं मीमांसमानो नृपतिरभ्यन्तरास्थानीमाधितिष्ठति ।

रुद्रे पौरुषभेदाभावो नाश्चर्यावह इत्याह । **स्थाने इति** । यद्यतः विषमावलोकनं तृतीयदृष्टिः अन्यत्र क्रोधदृष्टिः । तस्य कलामात्रेणांशमात्रेण वैरिपुराण्यसुरनगराणि 'स तिस्रः पुरो भित्त्वैभ्यो लोकेभ्योऽसुरान् प्राणुदत' इति श्रुतेरिति भावः । अन्यत्र शत्रुनगराणि । स्थाने युक्तमित्यर्थेऽव्ययम् । कैलासवासिनो रुद्रस्य कण्ठे विषं काकतिकुलवासिनस्तु स्त्रीरूपस्य खड्गे विषमिति महदेतदद्भुतमित्याह । **चित्रमिति** । 'गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः' इति भावः । अथ वर्तिष्यमाणकथाभागे परिकरमुदाहरति । **सख इत्यादिना** । संग्रहकारिकां संग्रहश्लोकम् । रुद्रनरेश्वरेण रुद्रदेव्या । स्त्रीव्यक्तावपि पुंस्त्वेन निर्देशे स्वयमेवोपपत्तिं वक्ष्यति । काकतीयप्रसवेषु काकतीयसन्तानेषु । अनुबध्यन्ते अविच्छेदेन संबध्यन्ते । महीयसि महे महोत्सवे । उद्दण्डपुरुषखण्डको वीरप्रकाण्डकश्चलमर्तिगण्ड इति विरुदशब्देनोच्यते । **वयस्येति** । मीमांसमानो विचारयन् ।

तदावामपि तावदितो गत्वा यथावसरं प्रतीक्षावहे ।

(इति परिक्रम्य निष्क्रान्तौ) ।

अयं शुद्धविष्कम्भः ।

अङ्कारम्भः ॥

(ततः प्रविशति यथानिर्दिष्टवेषो राजा चामरग्राहिणी च)

राजा—(सहर्षातिशयम्) अहो प्रसादातिशयः परमेश्वरस्य ।

सोमार्काभिजनं तमद्य जयति श्रीकाकतीयान्वयः
पातिव्रत्यमुपैति सांप्रतममीष्वस्मासु विश्वंभरा ।
अस्माभिर्निजदोःप्रसूतिमधुना धन्यामजो मन्यते
यत्कर्तव्यमुपादिशत् कुलपतिर्देवः स्वयंभूः स्वयम् ॥२२॥

पुरोधसः—महाराज भवादृशा एव परमर्हन्ति तादृशमहिम्नो देवस्य हितोपदेशान् । अथवा किमत्राभिनवम् । पुत्राणां हितोपदेशाधिकारः पितुरेव । यदित्थं कथयन्ति तद्विदः ।

सैवोमा चेति निर्दिष्टा सोमा चेति प्रथामगात् ।
तव माता शिवा साक्षाद्देवो गणपतिः पिता ॥ २३ ॥

मन्त्रिणः—एवमेवैतत् । अन्यथा कथमीश्वरप्रसादादृते निरङ्कुशं स्त्रीव्यक्तिविशेषस्य लोकाधिपत्यम् । एवं मानुषशंभुना गणपतिमहाराजेनाभ्यन्तरस्यानुभवमहिम्नः सदृशमत्र पुत्र इति व्यवहारः कृतः । तदनुगुणा च रुद्र इत्याख्या ।

इति शुद्धविष्कम्भः । अङ्कमारभते । **तत इति** । हर्षानुभावं प्रियभाषणमाह । **सोमेति** । अभिजनो वंशः । तं प्रसिद्धम् । अमीष्वेवमनुग्रहपात्रेष्विति भावः । अजो ब्रह्मा । निजदोःप्रसूतिं क्षत्रजातिम् । राजन्यो मनुष्याणामिति तस्या बाहुजत्वश्रवणात् । कुत इत्यत आह । **यदिति** । रुद्राम्बायाः पितरौ सोमाम्बागणपतिदेवौ तयोरुमामहेश्वरात्मकत्वं लोकविदितं । ततः स्वयंभूमहाराजयोः पितापुत्रभावोऽस्ति । अतो हितोपदेशो युज्यत एव इत्याह । **अथवेत्यादिना** । **सैवेति** । सैव तव माता उमा चेति निर्दिष्टा सती लोकैरिति शेषः । सोमा चेति प्रथां प्रसिद्धिमगात् । परस्परसमुच्चयार्थौ चकारौ । पिता गणपतिस्तु साक्षात् प्रमथाधिपः शिवो देव इति तत्पित्रोः शिवयोश्च तादात्म्यमिति भावः । अथामुष्या भविष्यति निरङ्कुशः प्रभाव इति विभाव्य महाराजो दुहितरं पुत्र इति व्यवहृतवान् इत्याह । **एवमिति** । अभ्यन्तरस्यानुभवमहिम्नः दुहितृभा-

पुरो०—(सकौतुकम्) कीदृशी देवस्य स्वप्नोपदेशपरिपाटी ।

राजा—(सादरम्) इदानीं निवेद्यते ।

कदाचित् कल्याणे रजनिसमये स्मेरवदनं
पुरः प्रादुर्भूतं सयुवतिवपुः साक्षनिटिलम् ।
स्रवन्तीचन्द्राभ्यां महितमुकुटं प्रेक्ष्य किमपि
स्वयंभूदेवोऽसावयमिति हठोत्थानमभजम् ॥ २४ ॥

अनन्तरं स्वप्न एव

वपुषा तं नमस्कृत्य स्तुवन् सूनृतया गिरा ।
स्वामिने काकतीयानां रत्नासनमुपाहरम् ॥ २५ ॥

चामरग्राहिणी—*अहो देवस्स अणुसंधाणं जं सिविणे वि कुलसामिणो समाराहणम् ।

---

* अहो देवस्यानुसंधानं यत् स्वप्नेऽपि कुलस्वामिनः समाराधनम् ।

विमाहात्म्यगोचराया अन्तःकरणवृत्तेरित्यर्थः । अत एवाह तत्रभवान् कविकुलशिरोमणिः कालिदासः । 'सतां हि संदेहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः ।' इति । अत्र दुहितरि । तदनुगुणा व्यवहारानुगुणा । रुद्र इति पुंस्त्वेन समाख्येत्यर्थः । प्राचामियं शैली यदयं लिङ्गव्यत्यासेन निर्देश इति । यथा स्त्रीव्यक्तौ शिखण्डीति पुंस्त्वेन व्यवहारः । यथा चेन्द्रं पुमांसमपि श्रुतिरेव सुब्रह्मण्येति स्त्रीत्वेन निर्दिशति । तथा च षड्विंशब्राह्मणम् । 'सुब्रह्मण्यों सुब्रह्मण्यों सुब्रह्मण्योमिति स्त्रियमिव त्रिराह' इति । एवमुत्तरत्रापि द्रष्टव्यम् । स्वप्नोपदेशक्रममादरवशात् प्रतिज्ञापूर्वकं निवेदयति । **राजेति** । **कदाचिदिति** । कल्याणे शुभग्रहयोगादिना मङ्गले रजनिसमये स्मेरवदनं प्रसादोन्मुखत्वात् । सयुवतिवपुरर्धाङ्गजानिरित्यर्थः । साक्षनिटिलं फाललोचनसहितमित्यर्थः । उभयत्र बहुव्रीहिगर्भो बहुव्रीहिः । 'बहुव्रीहौ सक्थ्यक्ष्णोः' इति षजन्तः साक्षशब्दः । स्रवन्ती मन्दाकिनी । किमपि वक्तुमशक्यं वस्तु प्रेक्ष्य हठशब्देन चिरन्तनतटाकोदकाच्छादितहरितद्रव्यमुच्यते । तदुत्सार्यमाणमपि स्वच्छन्दतो मुहुरुदकमाच्छादयतीति स्वच्छन्दव्यवहारो लक्ष्यत इत्युक्तमाचार्यैरुद्भिदधिकरणे । एवमत्र संभ्रमेणाप्याच्छादनसंभवात् संभ्रमो लक्ष्यत इति वदामः । तेन हठोत्थानं संभ्रमोत्थानमिति वेदितव्यम् । स्वप्ने देवतादिदर्शने फलं दैवज्ञवल्लभे । 'सुगन्धपुष्पाक्षतपूर्णकुम्भशक्रध्वजच्छत्रमहीपतीनाम् । उद्यद्दिनेशेन्दुसुहृत्सुराणां सितद्विजादर्शसुवासिनीनाम् ॥ सुवर्णधान्याब्जफलेग्रहीणां भक्ष्यान्नरत्नाम्बरवाहनानाम् । संदर्शनं श्रेष्ठमुशन्ति सन्तः स्वप्ने मृतानां च सुचेष्टितानाम् ॥' इति ।

पुरो०—किमुच्यते । आविष्टभक्तयः खलु स्वयंभूदेवे काकतीयनरदेवाः । ततः ।

राजा—

शय्याशिरस्थानकृतस्य पूर्णकुम्भस्य तोयैः परिकल्प्य पाद्यम् ।
अतीन्दुसारैर्मणिभिः किलाहमपूजयं दैवतमस्मदीयम् ॥२६॥

अथ च

विभुः स्वयंभूरवदच्छुचिस्मितां गिरं स्ववामार्धवधूपलालिताम् ।
स्पृशन् करेणाभयदानशालिना कृताञ्जलिं मां विनयानताननम् ॥

यत् किल

अभजमित्यनद्यतने लङ् । तेन चतुर्थयामादर्वाचीनः स्वप्न इति सूच्यते । तत्फलस्य राज्यलक्ष्मीप्राप्तिरूपस्य विजययात्रया द्वित्रमासविलम्बसंभवात् । तदुक्तं बृहस्पतिमते स्वप्नाध्याये । 'स्वप्नस्तु प्रथमे यामे वत्सरेण विपच्यते । द्वितीये चाष्टभिर्मासैस्त्रिभिर्मासैस्तृतीयके ॥ अरुणोदयवेलायां दशाहेन फलं भवेत् । गोविसर्जनवेलायां सद्यः स्वप्नफलं भवेत् ॥' इति । वपुषा नमस्कृत्य साष्टाङ्गं प्रणम्येत्यर्थः । 'सत्यं प्रियं च वचनं यत् तत् सूनृतमुच्यते ।' नृतेर्मूलविभुजादित्वात् कप्रत्ययः । 'अन्येषामपि' इति सोर्दीर्घः । आविष्टं भक्तिर्येषाभिति लिङ्गसामान्ये नपुंसकपूर्वपदो बहुव्रीहिः स्त्रीपूर्वपदत्वे भक्तिशब्दस्य प्रियादिपाठात् 'अप्रियादिषु' इति निषेधेन 'स्त्रियाः पुंवद्—' इत्यादिना पुंवद्भावप्रतिषेधप्रसङ्गात् । अत एवाह वृत्तिकारः । 'दृढभक्तिरित्येवमादिषु स्त्रीपूर्वपदत्वस्याविवक्षितत्वात् समाधेयम्' इति । भोजराजस्तु 'कर्मसाधनस्यैव भक्तिशब्दस्य प्रियादिपाठो न भावसाधनस्य । दृढभक्तिरित्यादौ तु भावसाधनत्वान्न कश्चिद्विरोधः' इत्याह । प्रपञ्चितं चैतत्तातपादैः संजीविन्यादौ तत्र तत्रेत्यस्माभिरुपरम्यते । तस्मादत्रापि स्त्रीपूर्वपदो वा बहुव्रीहिरनुसंधेयः । शय्याशिरःस्थाने पूर्णकुम्भस्थापनं मङ्गळार्थम् । तदुक्तं स्मृतिरत्नावल्याम् । 'माङ्गळ्यं पूर्णकुम्भं तु शिरःस्थाने विधाय च । वैदिकैर्गारुडैर्मन्त्रैः रक्षां कृत्वा स्वपेन्निशि ॥' इति । अतीन्दुसारैरत्युज्ज्वलैः । स्वप्ने देवतार्चने 'सुरपूजोत्सवसेवा नैवेद्यं नृत्तगीतवाद्यं च' इत्यादिना दैवज्ञवल्लभोक्तं महाफलं द्रष्टव्यम् । मणिपूजाफलं च पुष्पसारसुधानिधौ । 'सुवर्णकुसुमैर्दिव्यैर्मणिविद्रुमविस्तृतैः । राजतै रत्नसंभूतैरथवा चित्रवस्त्रकैः ॥ येऽर्चयन्ति हरं भक्त्या नरास्ते स्युर्महेश्वराः ।' इति । पूजानन्तरं वृत्तमाह । **विभुरिति** । स्ववामार्धवधूपलालितां पार्वत्यानुमोदिताम् । अभयदानशालिना प्रसादसूचकेनेत्यर्थः । उन्मस्तकैरुल्लङ्घितशिरस्कैरातिप्रभूतैरित्यर्थः । मध्यमलोकस्य भाग्यैरदृष्टपरिपाकैस्तपोविशेषैः कृच्छ्रचान्द्रायणादिभिः । सच्चरितैः स्वस्ववर्णा-

उन्मस्तकैर्मध्यमलोकभाग्यैस्तपोविशेषैरनघैः पृथिव्याः ।
सम्यक्फलैः सच्चरितैः प्रजानां प्रतापरुद्रोऽयमिहावतीर्णः ॥

वत्स काकतीयकुलप्रदीप

स्वीकृते पुत्रभावेन दौहित्रे प्राङ्ममाज्ञया ।
अस्मिन्निधेहि धौरेये गुर्वीमुर्वीधुरामिति ॥ २९ ॥

पुरो०—(सप्रमोदम्) महाराज काकतीयकुलयोगक्षेमविधानदक्षिणेन दाक्षायणीपतिना साक्षादेवमादिष्टम् । तवाप्ययमेव मनोरथः । प्रियंकरश्चायं महोत्सवः प्रजानाम् । तदारोहतु प्रागतिसृष्टयौवराज्यस्य प्रतापरुद्रस्य भुजाशिखरं सागरमेखला । ततस्ततः ।

इयं प्रयोजननिर्धारणरूपा युक्तिः ।

राजा—तद्वचनमाकर्णयन्ती निर्भरहर्षविकस्वरलोचना मेदिन्यपि देवस्य पार्श्वे दृष्टा ।

चामर०—*महाराअस्स हिअअणुवट्टमाणाए वसुंधराए उइदो क्खु हरिसाविब्भावो ।

एषा स्वयंभूदेवस्य वचनाकर्णनेन मेदिन्याः सुखागमेन प्राप्तिः ।

राजा—काकतीयकुलश्रेयसां देव एव प्रमाणमिति तस्याज्ञा मया शिरसि धृता । देवोऽपि सप्रसादातिशयमवलोक्यान्तर्हितोऽभूत् ।

---

* महाराजस्य हृदयमनुवर्तमानाया वसुन्धराया उचितः खलु हर्षाविर्भावः ।

श्रमोचितव्यापारैः । अत्र भाग्यादिनिमित्तभेदात् विच्छित्तिविशेषं वक्तुं मध्यमलोक एव समष्टिव्यष्टिभ्यामाश्रितः । प्रजापृथिवीव्यतिरिक्तमध्यमलोकासंभवादिति द्रष्टव्यम् । एवं चास्मिन् राज्यं शासति सस्याकरादिसंपत्तिः प्रजासमृद्धिश्च प्रभवतीति फलितम् । **वत्सेति** । रुद्राम्बायाः पुंस्त्वेन संबोधनम् । प्राक् जन्मकाले । धुरं वहतीति धौरेयो धुरन्धरः । 'धुरो यड्ढकौ' इति ढक् । 'ऋक्पू—' इत्यादिना समासान्तोऽप्रत्ययस्ततष्टाप् । **सप्रमोदमिति** । 'अस्मिन्नर्थे विप्रतिपत्तेरभावादिति भावः । तदुक्तं बृहस्पतिमते । देवताश्च द्विजा गावः पितरो लिङ्गिनस्तथा । यद्वदन्ति नरं स्वप्ने तत्तथैव विनिर्दिशेत् ॥' इति । प्रियं करोतीति प्रियंकरः । 'क्षेमप्रियमद्रेऽण् च' इति खश्प्रत्ययः । अतिसृष्टं दत्तम् । स्वप्नशेषमाह । **तद्वचनमिति** । स्वप्ननिवेदनं निगमयति । **काकती-**

इदं मेदिनीप्राप्तिहेतोर्बीजस्य स्वयंभूदेवस्योपदेशाङ्गीकरणात् समाधानम् ।

मन्त्रिणः—विश्वप्रियंकरः स्वप्नप्रत्ययः । किं तु काकतीयनरेन्द्रवृद्धोचितमाचारमनुवर्तमानस्य देवस्य नगरनिवासवैमुख्यं तथा कुलधुरंधरस्य वीररुद्रस्य विश्वरक्षाक्षमे बाहुपरिघे राज्यधुराविश्रान्तिरिति च विषादहर्षयोः सीमानं स्पृशत्यस्माकं मनः ।

एतत्सुखदुःखहेतुभूतं विधानम् ।

चामर०—*अच्चरिअं अच्चरिअं कुलामच्चमुहेणेव्व पव्वईवल्लहेण एव्वमुवदिट्ठम् ।

इयं बीजविषयाश्चर्यरूपा परिभावना ।

राजा—(सहर्षातिशयम्) (अमात्यान् प्रति)

अयं काकतीयकुलश्रेयःकल्पलताप्ररोहः स्वयंभूदेवानुग्रहः सर्वेषामपि श्रवणमहोत्सवः क्रियताम् ।

एष बीजप्रकाशनादुद्भेदः ।

मन्त्रिणः—यदाज्ञापयति काकतीयपरमेश्वरः ।

राजा—किमिदानीं कर्तव्यम् ।

पुरो०—महाराज किमन्यत् । सज्जीक्रियतां प्रतापरुद्रदेवस्य राज्याभिषेकसंभारः ।

एष बीजानुगुणप्रोत्साहनरूपो भेदः ।

मन्त्रिणः—दिग्विजययात्रावशीकृतानां सर्वपार्थिवानां वर्गेणानीतैः सकलतीर्थसलिलैः प्रकाशितं स्वयंभूदेवप्रसादं महाभिषेकमनुभवतु राजपुत्रः ।

पुरो०—उचितमनुमन्त्रितं मन्त्रिभिः ।

---

* आश्चर्यमाश्चर्यम् । कुलामात्यमुखेनैव पार्वतीवल्लभेनैवमुपदिष्टम् ।

येति । विश्वेति । प्रियंकरादिशब्दा अनुपदमेवोक्ताः । धुरंधरशब्दस्तु नायकप्रकरणे । **अयं काकतीयेत्यादि** । स्पष्टम् । षड्विधानि मौलादिरूपाणि बलानि । 'मौलं भृतं सुहृच्छ्रेणी द्विषदाटविकं बलम्' इत्यमरकोशाभिधानात् । अत्र विष्कम्भादौ वैतालिकवाक्योपक्षिप्तस्याङ्गवशादनुवर्तमानस्य बीजस्य नाय-

राजा—तर्हि जैत्रयात्रासाधनानि सज्जीक्रियन्तां षड्विधानि बलानि । अहमपि सज्जो भवामि ।

एष आरम्भः । इदं बीजानुगुणारम्भरूपं करणम् । एवमारम्भबीजसंबन्धरूपः साङ्गो मुखसंधिः ।

(नेपथ्ये) वैतालिकौ—सुखाय माध्यन्दिनी संध्या भवतु देवस्य । यदिदानीं

लोकालोकगिरीन्द्रकन्दरतमःसंदोहदर्पापहं
त्वत्तेजःपटलं कियन्ति भुवनान्याक्रम्य संक्रीडते ।
इत्यालोकनकौतुकीव शिथिलस्वीयाधिकारश्रमो
भास्वानेष समग्रदीप्तिरधुना व्योमाग्रमारोहति ॥ ३० ॥

अपि च

उद्गायन्ति शरन्निशाकरकरस्तोमत्विषस्त्वद्गुणान्
क्रीडन्त्यो मलयाद्रिचन्दनलताकुञ्जे भुजङ्गाङ्गनाः ।
पीत्वा तत्तदुदीर्णवर्णगलितां प्रत्यग्रधारां सुधां
वाताहारतया प्रभूतमयशः प्रक्षालयन्त्यो निजम् ॥३१॥

इदानीं खलु

कव्यापारस्य स्वरूपात् किंचिदुच्छूनत्वलक्षणारम्भसंबन्धान्मुखसंधिरित्याह । **एवमिति** । मध्याह्नवर्णनमारभते । **सुखायेति** । लोके यत् किंचन विप्रकृष्टं वस्तु दिदृक्षवो वृक्षाग्रमाद्रिशृङ्गं वारोहन्ति । तत्समाधिमावर्तनविकर्तनस्याह । **लोकालोकेति** । संक्रीडते । 'क्रीडोऽनुसंपरिभ्यश्च' इत्यात्मनेपदम् । स्वीयाधिकारस्तमोऽपहत्वलक्षणस्तन्निमित्तः श्रमः शिथिलो यस्य स तथोक्तः । एतच्च राजतेजस एव तद्भारोद्वहनादिति वेदितव्यम् । अत एवालोकनकौतुकीवेत्युत्प्रेक्ष्यते । तत्र निमित्तमुपादत्ते । **अधुनेति** । **उद्गायन्तीति** । मलयाद्रिचन्दनलताकुञ्जे दिवाविहारदेशे इत्यर्थः । तदुक्तं भावप्रकाशे 'सरितः पुलिनं वेला कान्तारारामभूधराः । लतागृहाणि चित्राणि शय्या किसलयाञ्चिता ॥ दिवा विहारदेशाः स्युः ।' इति । क्रीडन्त्यः निजरमणैरिति शेषः । तत्तदिति वीप्सायां द्विर्भावः । उदीर्णवर्णादुच्चारिताक्षरात् । गलितां गलन्तीमित्यर्थः । 'मतिबुद्धिपूजार्थेभ्यश्च' इत्यत्र चशब्दस्यानुक्तसमुच्चयार्थत्वात् । अत एवाह वृत्तिकारः । 'सुप्तशयितेत्येवमादयो वर्तमाने द्रष्टव्याः' इति । इदमेव कवेर्विवक्षितम् । यदन्यत्र प्रत्यक्षरगलत्सुधा-

आघ्राय किरणान् भानोर्यजुरामोदमेदुरान् ।
यतन्ते कृतिनः सर्वे कर्तुं माध्याह्निकीं क्रियाम् ॥ ३२ ॥

राजा—(आकर्ण्य सर्वान् प्रति) साधयत यूयमभिमताचरणाय । अहमपि तावदभ्यन्तरं प्रविशामि ।

(इति यथोचितमुत्थाय परिक्रम्य निष्क्रान्ताः सर्वे)

इति नाटकप्रकरणे कल्याणस्वप्नो नाम प्रथमोऽङ्कः ।

॥ द्वितीयोऽङ्कः ॥

(नेपथ्ये)—*इदो इदो अज्जो ।

(ततः प्रविशति वृद्धकञ्चुकी)

कञ्चुकी—(सहर्षम्) चिराय यौवनमतिशयानया चरितार्थया जरयानया सञ्चरे । यया दीर्घायुषा प्रतापरुद्रमहाभिषेकमहोत्सवमनुभवितास्मि ।

एष मध्याह्नवर्णनया विच्छिन्नस्य प्रकृतार्थस्य पुनरवमर्शाद्बिन्दुः ।

अपि च

पदे पदे स्खलन्तं मां वाचा गत्याथ चेष्टया ।
अवलोक्य हसन्नास्ते स्वामी रुद्रनरेश्वरः ॥ १ ॥

---

* इत इत आर्यः ।

मित्यवोचत् । अत एव प्रत्यग्रधारामतिरसामित्यर्थः । **आघ्रायेति** । यजुरेवामोदः परिमलविशेषः तेन मेदुरांस्तन्मयानित्यर्थः । 'यजुर्वेदे तिष्ठति मध्येऽह्नः' इति श्रुतेः । 'भञ्जभासमिदो घुरच्' एतेन भानुकिरणानां पुष्पसमाधिसिद्धेः ज्ञात्वेत्यस्मिन्नर्थे आघ्राय इति पदं बोद्धव्यम् । मध्याह्ने कर्तव्या माध्याह्निकी । 'कालाट्ठञ्' इति शैषिकष्ठञ्प्रत्ययः ।

इति नाटकप्रकरणे प्रथमोऽङ्कः ।

चूलिकामुदाहरति । **नेपथ्य इत्यादिना** । **ततः प्रविशतीति** । नेपथ्यमेव न रङ्गमन्यथा चूलिकालक्षणभङ्गप्रसङ्गात् । **यौवनमतिशयानयेति** । अत्रैव पुरुषार्थलाभादिति भावः । **जरया संचर इति** । 'समस्तृतीयायुक्तात्' इत्यात्मनेपदम् । पुरुषार्थमाह । **ययेति** । अनुभवितास्मि । अनद्यतने लुट् । बिन्दुं योजयति । **एष इति** । इतोऽपि जरायाः श्लाघ्यत्वमेवेत्याह । **पदे पदे**

(सविमर्शाश्चर्यम्)

काकतीयनरेन्द्रस्य राज्यश्रीर्मूलवेश्मनः ।
युवराजगृहानद्य गवाक्षैः स्वैरमीक्षते ॥ २ ॥

एष राज्यलक्ष्म्याः प्रतापरुद्रगतगभिलाषाद्विलासः ।

(पुरोऽवलोक्य)

कथमयं राजपुत्रपरिचारको दारकः ससंभ्रमं मामभिवर्तते ।

(प्रविश्य) **दारकः**—*अय्य पणमामि ।

कञ्चुकी—भद्र कल्याणास्पदं भूयाः । किमनुमतं राजपुत्रस्य दिग्विजयप्रस्थानं रुद्रनरेश्वरेण ।

दारकः—†कहं कहं वि अणुमदम् ।

कञ्चुकी—स्वनामानुगुणमिदं राजपुत्रस्य यत् सज्जीकृतसाधनं महाराजं सपादोपग्रहं निवार्य स्वयमेव जैत्रयात्रायामुत्तिष्ठते ।

दारकः—‡अय्य अणणुहूदजुज्झपरिस्समो जुवराओ । दुक्खरो खु दिअंतजओ कहं भविस्सइ ।

कञ्चुकी—भद्र निरङ्कुशाः स्वयंभूदेवप्रवृत्तयः । विष्णोरवतारः खल्वयं वीररुद्रोऽप्यचिन्त्यमहिमा ।

एष दृष्टनष्टबीजानुसरणरूपः परिसर्पः ।

अत्र स्वप्नवृत्तान्तख्यापनाल्लक्ष्यस्य दिग्विजययात्रोद्यमेनालक्ष्यस्य बीजस्योत्पादनादुद्भेद इति प्रतिमुखसंधिरयम् ।

---

* आर्य प्रणमामि ।

† कथं कथमपि अनुमतम् ।

‡ आर्य अननुभूतयुद्धपरिश्रमो युवराजः । दुष्करः खलु दिगन्तजयः कथं भविष्यति ।

इति । **सपादोपग्रहमिति** । सव्यदक्षिणपाणिभ्यां सव्यदक्षिणपादोपस्पर्शरूपो गुरुनमस्कारः पादोपग्रहः । तदुक्तं मनुना । 'व्यत्यस्तपाणिना कार्यमुपसंग्रहणं गुरोः । सव्येन सव्यः स्प्रष्टव्यो दक्षिणेन तु दक्षिणः ॥' इति । उत्तिष्ठते उद्युङ्क्ते । 'उदोऽनूर्ध्वकर्मणि' इत्यात्मनेपदम् । **भद्रेति** । अत्र पूर्वाङ्के स्वप्नदृष्टस्य मध्याह्नवर्णनया नष्टस्य च बीजस्य स्वयंभूदेवप्रसादरूपस्य भद्र निरङ्कुशा इत्यनेनानुसर्पणात् परिसर्प इत्यर्थः । अत एवायं प्रतिमुखसंधिरित्याह । **अत्रेति** ।

दारकः—*एव्वं एदम् । अमाणुसो खु सो पहावो ।

कञ्चुकी—कुत्रेदानीं राजपुत्रः ।

दारकः—†काअईअकुलदुग्गादेवीसमाराहणेण विअअपत्थाणमंगलं काऊण तत्थ हणुमदअलपेरंतबहिरुज्जाणे णिवेसिअखंधावारो अमच्चपरिवुदो जुवराओ चिठ्ठई। ता अणुजाणीहि मम तत्थ पत्थाणम्।

कञ्चुकी—भद्र साधय । अहमपि राजकुलं प्रविशामि ।

(इति यथोचितं परिक्रम्य निष्क्रान्तौ)

इयं चूलिका ।

प्रवेशकः ।

(ततः प्रविशति यथानिर्दिष्टः प्रतापरुद्रो मन्त्रिणः परिजनश्च)।

प्रता०—

किं राज्येन शमोन्मुखं रचयता तातं कुलालम्बनं
किं चास्मिन् समुदाहरन्ति महतो दोषान् बहून् सूरयः।
धर्माध्वा च खिलीकृतोऽयमधुना कः संचरेदस्खलं-
स्तत्रेष्टं किल यौवराज्यमपि मे बाल्योत्सवे क्रीडतः॥३॥

---

* एवमेतत् । अमानुषः खलु स प्रभावः ।

† काकतीयकुलदुर्गादेवीसमाराधनेन विजयप्रस्थानमङ्गळं कृत्वा तत्र हनुमदचलपर्यन्तबहिरुद्याने निवेशितस्कन्धावारः अमात्यपरिवृतो युवराजस्तिष्ठति। तदनुजानीहि मम तत्र प्रस्थानम् ।

उद्भेदः प्रकाशनम्। भद्रेत्यादिवाक्येनेति भावः। **एवमेतदित्यादि** । स्पष्टम् । इयं चूलिका । **किमिति** । तातं शमोन्मुखं विरक्तं रचयता राज्येन मय्यर्पितेन सतेति शेषः । किं न मे किंचित् साध्यमस्तीति भावः । न केवलमस्मिन् राज्ये पितृवियोगादिष्टहानिरनेकमहादोषसंभवादनर्थप्राप्तिश्चेत्याह । **किं चेति** । अत एवोक्तं महाभारते शान्तिपर्वणि भीमं प्रति युधिष्ठिरेण । 'असंतोषोऽप्रमोदश्च मदो रागोऽप्रशान्तता । बलमोजोऽभिमानश्च समुद्वेगश्च सर्वतः ॥ एभिः पाप्मभिराविष्टं राज्यं त्वमभिकाङ्क्षसि ॥' इति । नन्वेवं सति 'यदह्ना कुरुते कर्म प्रजा धर्मेण पालयन् । दशवर्षसहस्राणि तस्य भुङ्क्ते महत् फलम् ॥' इत्यादिना राज्ये महाफलप्रतिपादकमन्वादिवचनविरोधः स्यादित्याशङ्क्य तस्य युगान्तरविषयत्वान्न विरोध इत्याशयेनाह । **धर्माध्वेति** । अयं यज्ञदानतपोज्ञानलक्षणः खिलीकृतः संप्रति पादमात्रावशिष्टत्वादिति भावः। अतं

तद्वयं महाराजभुजपरिघमसृणितेषु दिगन्तेषु विजययात्राविनोदन विहरामहे ।

एतद्राज्येऽनिच्छाभिधानाद्विधूतम् ।

मन्त्रिणः—राजपुत्र सर्वपथीनया काकतीयान्वयभाग्यसंपदा त्वां धुरंधुरं लब्ध्वा नरेन्द्रश्चिरमासक्तां धुरं शिथिलयितुमध्यवस्यति । आचारश्चायं काकतीश्वराणां यद्धौरेये पुत्रे शमोन्मुखत्वम् । कुलस्वामिना स्वयंभुवाप्येवमेवानुशिष्टम् । अनतिक्रमणीया राजपुत्रेण गुर्वोर्गरीयसी खल्वाज्ञा । कलिकालदोषशिथिलधर्मप्रतिष्ठां निर्वोढुं वोढुं च महतीं महीधुरमवतीर्णस्य काकतीयविष्णोस्तव न साम्प्रतं प्रत्याख्यातुम् ।

प्रताप०—(सानुरोधम्)

स्वयंभूस्तात इत्येतावीश्वरौ दिव्यमानुषौ ।
तयोरन्यतरो राजा युवराजोऽस्मि सर्वथा ॥ ४ ॥

मन्त्रिणः—राजपुत्र साधारणोऽयं विनयः काकतीश्वराणां स्वयंभुवि महाराजे ।

एष प्रकृतविषयारत्युपशमाच्छमः ।

एवोक्तं सूर्यसिद्धान्ते । 'कृतादीनां व्यवस्थेयं धर्मपादव्यवस्थया ।' इति । आदिपुराणेऽप्युक्तम् । 'न विद्वत्ता न शुद्धोऽर्थो न शुद्धिर्मनसः कलौ' इति । अधुना कलिकाले अस्खलन्नप्रमत्तः कः संचरेत् । न कोऽपि संचरितुं शक्नुयादित्यर्थः । 'शकि लिङ् च' इति लिङ् । तृतीयाभावान्नात्मनेपदम् । तद्यौवराज्यमपि नेष्टं किल किमुत दुष्टं राज्यमिति भावः । मसृणितेषु निष्कण्टकीकृतेषु अत एव स्वस्य न प्रयास इति विनयोक्तिः । **राजपुत्रेति** । सर्वान् पथो व्याप्नुवन्त्या सर्वपथीनया । 'तत्सर्वादेः' इति खप्रत्ययः । **आचारश्चेति** । 'धर्म्ये वर्त्मनि संस्थाप्य प्रजा वर्तेत धर्मवित् । पुत्रसंक्रामितश्रीश्च वने वन्येन वर्तयेत् ।' इति व्यासस्मरणात् । गुर्वोर्दिव्यमानुषयोर्गरीयसी गुरुतरा पूज्यतमेति यावत् । 'प्रियस्थिर—' इत्यादिना गुरोर्गरादेशः । किं च धर्मसंस्थापनार्थमेवावतीर्णस्य विष्णुमूर्तेस्तवेदं दुष्परिहरमित्याह । **कलिकालेति** । प्रत्याख्यातुं परिहर्तुम् । तर्हि तावत् स्वयंभूदेव एव महाराजोऽस्तु पूर्ववदेवाहं युवराज एवेति वचनभङ्ग्या राज्यमङ्गीकरोति । **स्वयंभूरिति** । अरत्युपशमात् विषयद्वेषनिवृत्तेः ।

परिजनः—*काअईअकुलट्ठविरो तत्तभवन्तो सअंभूदेवो धुरं धारेदु । राअउत्तो उण रज्जसिरिअं अंके आरोवेदु ।

प्रताप०—(समन्दस्मितं परिजनमवलोकयति)

एतत् परिहासवचोरूपं नर्म ।

परि०—†चिरेण चरिअत्था मेइणी संवुत्ता ।

गोत्तगिरिसिहरणिठ्ठुरविअडसिलावसइवब्बरंगीए ।
खोणीए होदु वासो बाहुम्मि पआवरुद्दस्स ॥ ५ ॥
जह हरिचंदस्स भुए जह रहुणाहस्स बाहुफलअम्मि ।
काअइलच्छीपइणो बाहुम्मि तहा मही रमदु ॥ ६ ॥

प्रता०—(सबाहुस्फुरणमधोमुखस्तिष्ठति)

एषा परिजनवचनोत्था प्रीतिर्नर्मद्युतिः ।

मन्त्रिणः—राजपुत्र काकतीयपुरुषोत्तमस्य तव पाणिग्रहणाय स्पृहयन्ती राज्यलक्ष्मीर्विलम्बनं न सहते ।

परि०—

‡विज्जावहूणं अहिअं दंठूण पइम्मि पणअविस्संभं ।
खोणी लच्छी अ कहं विलंबिअं सहउ जुवराए ॥ ७ ॥

मन्त्रिणः—इत्थमेव ।

---

* काकतीयकुलस्थविरस्तत्रभवान् स्वयंभूदेवो धुरं धारयतु । राजपुत्रः पुना राज्यश्रियमङ्के आरोपयतु ।

† चिरेण चरितार्था मेदिनी संवृत्ता ।
गोत्रगिरिशिखरनिष्ठुरविकटशिलावसतिवर्बराङ्ग्याः ।
क्षोण्या भवतु वासो बाहौ प्रतापरुद्रस्य ॥
यथा हरिश्चन्द्रस्य भुजे यथा रघुनाथस्य बाहुफलके ।
काकतिलक्ष्मीपतेर्बाहौ तथा मही रमताम् ॥

‡ विद्यावधूनां अधिकं दृष्ट्वा पत्यौ प्रणयविस्रम्भम् ।
क्षोणी लक्ष्मीश्च कथं विलम्बितं सहतां युवराजे ॥

सबाहुस्फुरणमिति । पुंसो दक्षिणबाहुस्फुरणं शुभनिमित्तमिति वक्ष्यते । नर्मवचनमनुरागबीजोद्घाटनम् । **विज्जेति** । वधूनां भर्तृवाल्लभ्यमवलोक्य सपत्न्यः समुत्सुका भवन्तीति भावः । राज्यश्रियो वासकसज्जिकासमाधिमाह ।

स्वतेजसा परिष्कृत्य प्रधानागारमुत्सुका ।
प्रतीक्षतेऽद्य राज्यश्रीर्युवराजसमागमम् ॥ ८ ॥

एष मन्त्रिणां परिजनस्य च वाक्यैर्बीजानुरागप्रकाशनात् प्रगमः ।

परि०---*कहं अम्दरिओ खु एसो महूसओ दिसाविजअजत्ताए।

एतद्दिगन्तयात्रया प्रकृतकार्यविलम्बनान्निरोधः ।

मन्त्रिणः---(सावज्ञम्) कथं चिरयन्त्यन्ध्रचमूपतयः । अथवा किं तैः । वयमपि न केवलं मन्त्रशस्त्राः किं तु बहुशः समरापदानाराधितस्वामिन एव ।

एतन्निष्ठुरवचनरूपं वज्रम् ।

(प्रविश्य) **दौवारिकः**---†जेदु जेदु जुअराओ । एदे खु चमूपइणो पडिहारभूमिभाअम्मि सज्जीकिअचउरंगबला वट्टन्ति ।

मन्त्रिणः---अचिरं भोः प्रवेशय ।

दौवा०----तथा (इति निष्क्रम्य सेनाधिपतिभिः सह पुनः प्रविष्टः) ।

सेना०----(यथोचितं प्रणम्य) स्वामिन् काकतीयकुलतिलक सर्वतोमुखाटोपा वाहिन्यः शौर्योदन्वन्तं भवन्तमनुप्राप्ता एव तदनुग्रहयालुना कटाक्षेण निरीक्ष्यन्ताम् ।

---

* कथमन्तरितः खल्वेष महोत्सवो दिग्विजययात्रया ।

† जयतु जयतु युवराजः । एते खलु चमूपतयः प्रतीहारभूमिभागे सज्जीकृतचतुरङ्गबला वर्तन्ते ।

स्वतेजसेति । गतार्थमेतत् । **कहमिति** । निरोधनलक्षणे छद्मनेत्युक्तं । तत् कारणमात्रोपलक्षणमिति द्रष्टव्यम् । **सावज्ञमिति** । समरमेवापदानमद्भुतकर्म तेनाराधितस्वामिनः प्रसादितेश्वराः । वज्रलक्षणे प्रत्यक्षग्रहणं केवलस्याप्युपलक्षणमित्याशयेनाह । **एतन्निष्ठुरेति** । द्वारे नियुक्तो दौवारिको वेत्रधरः । 'तत्र नियुक्तः' इति ठक् । 'द्वारादीनां च' इत्यैजागमः । **स्वामिन्निति** । सर्वतोमुखाटोपाः सर्वतोदिक्संभ्रमा वाहिन्यः सेनाः । शौर्योदन्वन्तमिति रूपकबलादुदकसंभ्रमवत्यो नद्यश्चेति लभ्यते । अनुग्रहयालुनानुग्रहीत्रा कटाक्षेण अनुग्रहदृष्ट्येत्यर्थः । गृह्न ग्रहणे इत्यस्माद्धातोरदन्ताच्चुरादिणिचि 'स्पृहिगृहि—'

एतदनुनयवचनरूपं पर्युपासनम् ।

मन्त्रिणः—राजपुत्र तर्हि समारुह्यतां प्रतिपक्षनिवारणो वारणः। आलोक्यन्तां निरन्तरपरिपन्थिप्रमाथिन्यो वरूथिन्यः । प्रस्तूयतां सेनापुरःसराक्रान्तसकलसामन्तनिजस्थानं प्रस्थानम् ।

प्रताप०—यथाभिरुचितममात्येभ्यः । (इति गन्धगजाधिरोहणं नाटयति)

मन्त्रिणः—

करोदग्रेण महसा विष्वगाक्रमितुं दिशः ।
आरोहति गजं वीररुद्रो भास्वानिवोदयम् ॥ ९ ॥

एतत् प्रकृतानुगुण्येन विशेषसंबन्धवचनं पुष्पम् ।

(सर्वे युवराजहस्तिनं पुरस्कृत्य ससंबाधं किंचित् परिक्रामन्ति ।)

सेना०—(सोत्साहप्रणामम्) स्वामिन्नितो दीयतां दृष्टिः ।

धावत्पादातपादाहतिदलितमहीरन्ध्रनीरन्ध्रनिर्यद्-
धूलीजालाम्बुदान्तर्विलसदसिलताविद्युदुद्दामदीप्ताः ।
उद्यन्निस्साणराणस्तनितपटपटाहिक्कटाः प्रारभन्ते
प्रावृट्लक्ष्मीं ध्वजिन्यः करिकरटतटस्यन्दिदानाम्बुधाराः॥

इत्यादिनाळुच्प्रत्ययः । अतो लोपस्य स्थानिवत्त्वान्न लघूपधगुणः । **राजपुत्रेति** । परिपन्थिप्रमाथिन्यः शत्रुघातिन्यः वरूथिन्यः सेनाः। **प्रस्तूयतामिति**। प्रस्थानारम्भ एव नार्सारैः सामन्तनगराण्याक्रम्यन्त इति सेनाबाहुल्यं सूच्यते । **यथेति** । गन्धोपलक्षितो गजो गन्धगजः । यद्यपि गजशास्त्रे त्रैवर्णिकजातिगजेषु गन्ध उक्तस्तथाप्यौचित्यादत्र क्षत्रियजातिरुच्यते । तदुक्तं 'भद्रश्रीहरितालसुग्गुलुशिलागन्धोऽतिशूरो रणे नानाशस्त्रनिपातवेगसहनः स्तम्बेरमः क्षत्रियः ॥' इति । अत्र शुभाशुभगन्धविभागस्तदभिव्यक्तिस्थानं च तत्रैवोक्तम् । 'स्वेदे द्वारमले शुभाशुभकरं गन्धं सुधीर्लक्षयेत् सेव्यो भूरुहलाजपाटलघृतप्रख्यः प्रशस्ताह्वयः । एतस्मादपरः शुभोऽयमुदितः सत्त्वेन रूपेण यो युक्तः सोऽपि मतङ्गजः सुमुचितः कल्याण इत्युच्यते ॥' इति । **करेति** । करेणोदग्रेणोद्धतेन महसा तेजसा भुजबलेनेत्यर्थः । अन्यत्र करैः किरणैः । उदयं पूर्वपर्वतम् । अत्र मन्त्रिणां वीररुद्रं प्रति रागप्रकाशविशिष्टवचनात् पुष्पं नामाङ्गमित्याह । **एतदिति** । प्रकृतानुगुण्येन बीजानुकूल्येनेत्यर्थः । विशेषबन्धो रागविशेषबन्ध इत्यर्थः। **धावदिति** । पदातीनां समूहः पादातम् । भिक्षादित्वादण्प्रत्ययः । निस्साणराणो निस्साणध्वनिः । **राण इति** । यद्यपि 'वशिरण्योरुपसंख्यानम्' इति

(अन्यतो निरूप्य)

बले चलति संभ्रमं प्रतिभये विजेतुं दिशः
पुरन्दरहरिज्जयव्यवसिताः सहायोद्धताः ।
चलन्ति चिरमत्सराः शिखरिणो यथा दन्तिनो
भरावनमदुन्नमद्भुजगराजफक्कत्फणाः ॥ ११ ॥

परि०—(विलोक्य साश्चर्यम्) *महंतो खु एसो तिलंगसुभडाणमुस्साहो ।

(संस्कृतमाश्रित्य)

उद्यत्तोमरडामराः प्रतिपदप्रोत्क्षिप्तकौक्षेयकाः
स्वैरोद्गीर्णमुसुण्ढयः पटुतराकृष्टध्वनत्कार्मुकाः ।
भ्राम्यद्भीमगदाः समग्रविहरत्प्रासाः स्फुरत्पट्टसाः
खेलन्त्यन्ध्रचमूभटाः सवपुषो रौद्रप्रकारा इव ॥ १२ ॥

मन्त्रिणः—अहो तुरङ्गतरङ्गास्त्रिलिङ्गाधिपतेः ।

---

* महान् खल्वेष त्रिलिङ्गसुभटानामुत्साहः ।

कबभावे घञ् वाधितः अत एवोक्तममरकोशे 'रणक्वणः' इति तथापि स्रावादिवत् बाहुलको घञ् द्रष्टव्यः । पटशब्दादव्यक्तानुकरणात् 'नित्यवीप्सयोः' इति द्विर्भावे 'सर्वप्रातिपदिकेभ्यः—' इत्याचारे क्विप् कथंचित् कल्पनीयः । ततो लटः शत्रादेशः । पटदित्यस्यैवानुकरणत्वे पूर्वावयवस्य तकाराभावश्चिन्त्यः। करटतटं गण्डस्थलम् । सेनाङ्गेषु मतङ्गजसन्नाहमाह । **बल इति** । चिरमत्सराः पक्षच्छेदात् प्रभृति प्ररूढवैराः अत एव पुरन्दरहारिज्जयव्यवसिताः प्राचीविजयोद्युक्ता इत्यर्थः । इयन्तं कालं तूर्णीं स्थित्वेदानीं वैरनिर्यातने हेतुमाह । **सहायोद्धता इति** । यथा कस्यचिद्वस्तुनो भाराक्रान्तः कश्चन भागो नमति भागान्तरं तून्नमति तद्वद्दन्तिभाराक्रान्तभूतलद्वारा भुजगराजस्य केषांचित् फणानामवनमनमितरेषामुन्नमनं द्रष्टव्यम् । फक्कनमत्र संकोचः । फक्क नीचैर्गताविंत्यस्माद्धातोर्लटः शत्रादेशः । अत्र यथाशब्दमाहात्म्याद्यद्यप्युपमा प्रतीयते तथाप्युपमानभूतानां विशिष्टशिखरिणामुपमेयदन्तिरूपतयाभ्यूहनादुत्प्रेक्षायां पर्यवस्यतीत्युपमोपक्रमोत्प्रेक्षेयम् ॥ पत्तिसंपत्तिमाह । **उद्यदिति** । तोमरा दण्डविशेषास्तैर्डामरा भयंकराः कौक्षेयकाः खड्गाः । 'कुलकुक्षि—' इत्यादिना ढकञ्प्रत्ययः । स्वैरोद्गीर्णमुसुण्ढयः स्वेच्छोद्यतदारुमयायुधविशेषाः । कर्मणे प्रभवतीति कार्मुकं धनुस्तद्विशेषो वा । गदाः प्रसिद्धाः । प्रासाः कुन्तापरपर्यायाः क्षेपणीया आयुधविशेषाः । तदुक्तं वृत्तिकारेण । 'अकर्तरि च कारके संज्ञायामि-

उत्क्षिप्योत्क्षिप्य पादौ रवितुरगशिरस्ताडनायेव पूर्वौ
पाश्चात्याभ्यां पदाभ्यामपि धरणिमवष्टभ्य संरब्धनुन्नाम् ।
वालैर्व्याधूयमानैः प्रतिनृपतिहयोत्साहमुन्मार्जयन्तः
क्रामन्त्यश्वाः सहेलक्रमणपरिणमत्पञ्चधाराप्रपञ्चाः ॥ १३

(विलोक्य) अहो विदलितपरबलमनोरथानां रथानां संभ्रमः। तथा हि

रथाः सरभसं भ्रमन्निबिडहेमनेमिक्षत-
क्षमातलसमुच्चलद्बहुलधूलिजालाम्बुदैः ।
तिरोहितमसूयया सपदि भानवीयं रथं
विधाय मुखरीभवन्त्यनिभृताक्षधूर्निस्वनाः ॥ १४ ॥

त्यत्र प्रास्यत इति प्रासः' इति । रौद्रप्रकारा रौद्रभेदाः । तोमरादीनामभिधानं वैजयन्त्याम् । 'तोमरोऽस्त्री लोहहुलदण्डः कासूश्च सर्वला ।' 'हुलं द्विफलपत्राग्रम् ।' 'मुसुण्ढी स्यात् दारुमयी वृत्तायःकीलसंचिता ।' 'कार्मुकं तु चतुर्हस्तम् ।' 'पट्टसो लोहदण्डो यस्तीक्ष्णधारः क्षुरोपमः' इति । तुरङ्गसामग्रीमाह । **उत्क्षिप्येति** । पश्चिमपादाभ्यां भुवि स्थित्वा मुहुरग्रपादोत्क्षेपणमश्वानां पुरुषाख्यस्थानभेदः । तदुक्तम् । 'मुहुः पश्चिमपादाभ्यां भुवि स्थित्वाग्रपादयोः । ऊर्ध्वं प्रेरणया स्थानमश्वानां पुरुषः स्मृतः ॥' इति । अत्र पूर्वपादोत्क्षेपणस्य सूर्याश्वशिरस्ताडनफलकत्वमुत्प्रेक्ष्यते । **उत्क्षिप्येति** । 'नित्यवीप्सयोः' इति द्विर्भावः । पश्चाद्भवौ पाश्चात्यौ । 'दक्षिणापश्चात्पुरसस्त्यक्' । संरब्धा संरम्भविषयीभूता सती नुन्नेत्यसंबन्धे संबन्धरूपातिशयोक्तिः । तां धरणिमवष्टभ्यालम्ब्य तत्र स्थित्वेत्यर्थः । सहेलक्रमणेन विनोदगत्या परिणमन्तः प्रयत्नं विना प्रवर्तमाना इत्यर्थः । धारा नामास्कन्दितादयो गतिभेदाः पञ्च । तदुक्तं वैजयन्त्याम् । 'अश्वानां तु गतिर्धारा विभिन्ना सा च पञ्चधा ।' इति । 'आस्कन्दितं धौरितकं रेचितं वाल्गितं प्लुतम् । गतयोऽमूः पञ्च धाराः ॥' इत्यमरश्च । एतासामेवाश्वशास्त्रे संज्ञान्तरेणोक्तानां प्रत्येकं त्रैविध्ये पञ्चदशविधत्वम् । तदुक्तम् । 'गतिः पुला चतुष्का च तद्वन्मध्यजवा परा । पूर्णवेगा तथा चान्या पञ्च धाराः प्रकीर्तिताः ॥ एकैका त्रिविधा धारा हयाशिक्षाविधौ मता । लघ्वी मध्या तथा दीर्घा ज्ञात्वैता योजयेत् क्रमात् ॥' इति । तदेतन्मनसि निधायाह । **पञ्चधाराप्रपञ्चा इति** ॥ लोके कश्चिद्वीरभटः प्रतिभटमभिभूय गर्जति तत्समाधिमत्र भानुरथाभिभाविनां वीररुद्ररथानामाह । **रथा इति** । असूयया स्पर्धयेवेत्यर्थः । अक्षाणां चक्राधारकाष्ठानां धुरोऽग्राणि अक्षधुरः । 'अक्षं रथाङ्ग आधारे' इति वैजयन्ती । अनक्ष इति निषेधात् 'ऋक्पूर—' इत्यादिना न

प्रताप०—(सर्वतोऽवलोक्य सप्रमोदम्) कथं समग्रसाधनानि सैन्यानि ।

बृंहमाणगजाकीर्णा ह्रेषमाणहयाकुलाः ।
संक्रीडत्स्यन्दनाः क्ष्वेडाः सुभटाः सैन्यसंपदः ॥ १५ ॥

मन्त्रिणः—युवराजालोकनादुद्वेलः सैन्यसागरो वर्तते ।

अभ्यापतन्तीरभितो महीभृद्वाहिनीर्बह्वीः ।
काकतीयकुलाम्भोधिरेष स्वैरं ग्रसिष्यते ॥ १६ ॥

सेनापतयः—यदादिशन्त्यमात्याः । (इति सप्रणामं) विजययात्राकुतूहलिन्यो ध्वजिन्यः सांप्रतं युवराजस्याज्ञां प्रतिपालयन्ति ।

प्रताप०—(सप्रसादममात्यानालोकयति) ।

मान्त्रिणः—(सोत्साहम्) प्रतिष्ठन्तां प्राचीं प्रति सैन्यानि ।

सेना०—यथादिशन्त्यमात्याः । (इति प्रस्थाननाटितकेन समन्तादवलोक्य सहर्षातिशयम्)

समासान्तः । निभृतो निश्चलो न भवतीत्यनिभृतो नित्यप्रवृत्त इत्यर्थः । तथाभूतोऽक्षधूर्निस्वनो येषां ते तथोक्ताः । **बृंहमाणेति** । बृंहमाणा बृंहणशीलाः । ताच्छील्ये चानश् प्रत्ययः न तु शानच् बृहि शब्द इत्यस्य धातोः परस्मैपदित्वात् ; अत एव भट्टमल्लः । 'हेषते ह्रेषतेऽश्वानां हस्तिनां बृंहतीति च' इति । संक्रीडत्स्यन्दनाः कूजद्रथाः । 'क्रीडोऽनुसंपरिभ्यश्च' इत्यत्र 'समोऽकूजने' इति नियमात् परस्मैपदम् । अत एवोक्तम् तेनैव । 'उत्सर्जति संक्रीडत्येतौ शकटकूजने' इति । क्ष्वेडन्ते सिंहनादं कुर्वन्तीति क्ष्वेडाः । ञिक्ष्विदा स्नेहनमोचनयोरित्यस्माद्धातोः पचाद्यच् । पृषोदरादित्वाद्दकारस्य डकारः । कविकल्पद्रुमकारस्तु डान्त एवायं धातुरित्याह । धातूनामनेकार्थत्वादुक्तार्थलाभः । अत एव 'क्ष्वेडा तु सिंहनादः स्यात्' इत्यमरः । क्ष्वेडदिति क्वाचित्कः शत्रन्तपाठोऽस्य धातोरनुदात्तेत्त्वादुपेक्षणीयः । **अभ्यापतन्तीरिति** । महीभृद्वाहिनीः शत्रुभूपालसेनाः अन्यत्र पर्वतप्रभवा नदीः । तदुक्तं मानसोल्लासे । 'व्रजेदब्धिरिवाक्षोभ्यो निगरन्नरिवाहिनीः । शूराणां सिंहनादैश्च हेषारावैश्च वाजिनाम् । महारथमहाध्वानैर्मातङ्गघनगर्जितैः ।' इति । सुत्राम्ण इन्द्रस्येमां सौत्रामणीं दिशं प्राचीं सुशकुनं शुभनिमित्तम् । 'शकुनन्तु शुभाशंसिनिमित्ते शकुनः खगः ।' इति विश्वः । अनुकूलवायोः शुभनिमित्तत्वं च तत्रैव । 'दक्षिणाक्षिपरिस्पन्दात् दक्षिणस्य भुजस्य च । मनसश्च प्रसादेन स्वानुकूलानिलेन च ॥ एवं निमित्तैर्निश्चित्य विजयं भूप्रतिर्व्रजेत् ॥' इति । उपन्यासाख्यमङ्गं लक्ष्ये योजयति

पवनेनानुकूलेन प्रसारितपटाञ्चलाः।
उद्युञ्जन्त इवाक्रष्टुं ध्वजाः सौत्रामणीं दिशम्॥ १६॥

(सर्वे सुशकुनमभिनन्दन्ति)

एष प्रस्थानानुगुणशकुनगुणकथनादुपन्यासः।

प्रताप०—(पुरोऽवलोक्य) कथं कराभ्यामुत्क्षिप्तसाक्षतकनकपात्रः समागत एव विप्रवरः।

(प्रविश्य)

विप्रः—(सविनयमग्रतः स्थित्वा प्राध्वं दक्षिणभुजमुद्यम्य) विजयतां विजयतां वीररुद्रः। राजपुत्र स्वयंभूदेवमहोत्सवाद्यनन्तरं महीसुरवराशीर्वादवासिताः काकतीयमहाराजेन प्रेषिताः खल्विमे मङ्गळाक्षताः।

प्रताप०—(सप्रणामादरं गृहीत्वा तान् निजोत्तमाङ्गे गजमूर्धनि च निधाय)

आमूलात् फलिता प्रसक्तिलतिका पत्युः स्वयंभूप्रभो-
राज्ञा क्षत्रियमौलिमण्डनमणेस्तातस्य सानुग्रहा।

एष इति। उपन्यासलक्षणेऽपि प्रकृतानुगुण्येनेत्येतदनुषज्यत इत्याशयेनाह। **प्रस्थानानुगुणेति**। बीजोपयोगित्वात् प्रस्थानस्य प्रकृतत्वम्। तदनुगुणस्य शकुनस्यानुरागहेतुभूतस्य कथनादुपन्यास इत्यर्थः। विप्रविशेषप्रवेशं सूचयति। **कथमिति**। **सविनयमिति**। प्राध्वमाशीर्वादानुकूल्येनोद्यम्य 'आनुकूल्यार्थकं प्राध्वम्' इत्यमरः। मकारान्तमव्ययं चैतत्। ननु यात्रायां कनकपात्रादिमङ्गळद्रव्यदर्शनं कार्यसिद्धिकरमस्तु। किं त्वेकस्मिन् ब्राह्मणे दृष्टे कार्यहानिरिति किंवदन्त्याः का गतिरिति चेन्नैष दोषः। तस्याः कृपणब्राह्मणविषयत्वात्। विशिष्टब्राह्मणदर्शने महाफलस्मरणात्। इदमपि तत्रैवोक्तम्: 'पूर्णकुम्भे तथादर्शे दध्नि मद्ये तथामिषे। मीने शङ्खे ध्वजे छत्रे चामरे चारुयोषिति॥ चाषे मृगे भरद्वाजे फलपुष्पाक्षतेषु च। वृषभे समदे नागे सितवाहे द्विजोत्तमे॥ सुवर्णे दिव्यरत्ने च वीणायां पटहेऽपि च। बद्धे चैकपशौ दृष्टे यात्रा भवति सिद्धिदा॥' इति। वसन्तराजीयेऽप्युक्तम्। 'धृतातपत्रः शुभशुक्लवासाः पुष्पार्चितश्चन्दनचर्चिताङ्गः। विप्रः शिखावान् कृतभोजनश्च ददाति दृष्टः पथि सर्वसिद्धिम्॥' इति। महोत्सवादीत्यत्रादिशब्देन धेन्वादिदानं गृह्यते। तदुक्तं मानसोल्लासे 'ततः कृत्वा महापूजामुद्दिश्य कुलदेवताम्। धेनुं भूमिं हिरण्यं च विप्रेभ्यो विधिनार्पयेत्। तदाशिषः समादाय नीराजितहयद्विपः॥' इति। **आमूला-**

विप्राशीर्वचनानि मन्त्रसुरभीण्याकाङ्क्षितान्यन्वहं
पौराणां च जयोत्तराणि तदमूरीषज्जयाः स्युर्दिशः ॥ १७ ॥

एष ब्राह्मणक्षत्रियादिवर्णकीर्तनाद्वर्णसंहारः ।

मन्त्रिणः—राजपुत्रस्य स्वभावनिरर्गलस्य तव भुजार्गलयोरोजायितस्य कियती भूतलविजयविडम्बना ।

परि०—*विअलच्छीपाणिग्गहणसमअदिण्णा विअ मङ्गळक्खदा जुवराअस्स सीसे दीसंदि ।

विप्र—राजपुत्र तत्तद्दिग्विजययात्रावार्ताहारिणः पुरुषा नातिचिरादेव प्रेषणीया इति महाराजस्याज्ञा ।

प्रताप०—शिरसि कृतस्तातस्य नियोगः । (अमात्यान् प्रति) कतिचन यूयं काकतीश्वरसेवार्थं निवर्तध्वम् । कतिपये विजययात्रापराः प्रवर्तध्वम् ।

अमात्याः—(सप्रणामम्) यदाज्ञापयति युवराजः ।

विप्रः—स्वस्ति विजयाय शिवाः पन्थानः सन्तु राजपुत्राय ।

प्रताप०—(सप्रश्रयम्) भगवन्ननुजानीहि । वयमितः प्रतिष्ठामहे ।

(इति यथोचितं परिक्रम्य निष्क्रान्ताः सर्वे)

इति नाटकप्रकरणे विजययात्राविलासो नाम द्वितीयोऽङ्कः ।

---

* विजयलक्ष्मीपाणिग्रहणसमयदत्ता इव मङ्गळाक्षता युवराजस्य शीर्षे दृश्यन्ते ।

दिति । संपूर्णः स्वयंभूप्रसाद इत्यर्थः । पौराणामाकाङ्क्षितानि मनोरथाः । नपुंसके भावे क्तः । जयोत्तराणि जयप्रधानानि । तत्तस्मादमूश्चतस्र एव दिशः ईषज्जयाः सुलभजया इत्यर्थः । 'ईषद्दुर्' इत्यादिना खल्प्रत्ययः । दिग्विजये देवताप्रसादादिकं बृहतीफलभञ्जने महोपलप्रयोगमनुकरोतीति भावः । अङ्गं योजयति । **एष इति** । **राजपुत्रस्येति** । ओजःशब्दो वृत्तिविषये तद्वति वर्तते इति पदमञ्जरीकारः । अतस्तद्वतः सिंहशार्दूलादेरिवाचरितमोजायितं बलमित्यर्थः । 'कर्तुः क्यङ् सलोपश्च' इति क्यङन्तात् भावे क्तः । 'ओजसोऽप्सरसो नित्यम्' इति नित्यः सलोपः । **स्वस्तीति** । **विजयायेति** । क्रियाग्रहणाच्चतुर्थी । राजपुत्रायेति स्वस्तियोगे । **सप्रश्रयमिति** । **प्रतिष्ठामह इति** । 'समवप्रविभ्यः स्थः' इत्यात्मनेपदम् ।

इति नाटकप्रकरणे द्वितीयोऽङ्कः ।

(ततः प्रविशतो लेखहस्तौ जाङ्घिकौ) ।

एतत्पूर्वाङ्कान्तपात्रेण विप्रेण निर्दिष्टयोः पात्रयोरुत्तराङ्के प्रवेशादङ्कास्यम् ।

प्रथमः—(सानुसन्धानाश्चर्यम्) अहो प्रतापरुद्रस्य महिमानुभावः । यस्य विजययात्रासंभ्रमेणैव व्याकुलीकृतानि द्वयानामपि भूभृतां कटकानि ।

द्वितीयः—वयस्य किमुच्यते

काकतीयप्रदीपोऽयमंशश्चातुर्भुजः स्वयम् ।
यद्वज्रकवचायन्ते प्रसादाश्च स्वयंभुवः ॥ १ ॥

एष स्वयंभूदेवप्रसादरूपस्य बीजस्यान्वेषणाद् गर्भसंधिः ।

प्रथमः—(अध्वक्रममभिनीय पुरोऽवलोक्य) प्राप्तेयमन्ध्रनगरी । (किंचित्प्रवेशनाटितकेन समन्ततो निरूप्य) अहो निरतिशयमौदार्यं रुद्रनरेश्वरस्य । यदेते वैतालिकाः सर्वतो भोगावलीप्रमुखांश्चाटुप्रबन्धान् उच्चैः पठन्तः स्वभावरमणीयाः प्रतिरवेण पाठयन्तीव ककुभः ।

द्वितीयः—(सम्यङ्निर्वर्ण्य सप्रत्यभिज्ञाश्चर्यमपवार्य) सखे पश्य पश्य ।

सम्यङ्मागधवेषधारणतिरोभूता अपि क्ष्माभुजः
सूच्यन्ते प्रभुतारहस्यपिशुनैराविष्कृतैर्लक्षणैः ।
हस्ताग्रैर्ध्वजचक्रलाञ्छिततलैर्वक्षस्थलैर्विस्तृतै-
राकारैरमनुष्यमात्रसुलभैर्वृत्तैरनीचैरपि ॥ २ ॥

तत इति । जङ्घया चरत इति जाङ्घिकौ वार्ताहरौ । अङ्कास्यं योजयति । **एतदिति** । महिमानुभावो महिमातिशयः । द्वयानां पर्वतानां राज्ञां च । कटकानि पर्वतनितम्बप्रदेशा राजधान्यश्च । 'कटकं वलये सानौ राजधानीनितम्बयोः' इति विश्वः । **काकतीयेति** । चातुर्भुजो वैष्णवः । वज्रकवचायन्ते वज्रकवचवदाचरन्ति । 'कर्तुः क्यङ् सलोपश्च' इति क्यङ्प्रत्ययः । ङित्वादात्मनेपदम् । गर्भसंधिं योजयति । **एष इति** । **बीजस्येति** । प्रतिमुखसंधौ लक्ष्यालक्ष्यतया दृष्टनष्टस्येति शेषः । एतच्चान्वेषणादित्यनेन लभ्यते । वैतालिकभोगावलीप्रमुखा उक्तलक्षणाः । **पाठयन्तीति** । प्रतिदिशं प्रतिध्वनिरुत्पद्यत इत्यर्थः । **अपवार्येति** । रहस्यकथनार्थमिति भावः । **सम्यगिति** ।

प्रथमः—नूनमेते प्रतापरुद्रसमरपराङ्मुखा वक्षस्स्थलविरचितवराहलक्ष्माणः प्राणत्राणार्थमनया रीत्या काकतीयमहाराजं प्रसादयितुमध्यवस्यन्तीति तर्कयामि ।

एतत् प्रस्तुतोपयोगिप्रतिराजच्छद्माचरणादभूताहरणम् । जाङ्घिकेन पुनस्तैस्तैर्लक्षणैर्नरेश्वराभ्यूहनादनुमानं च ।

द्वितीयः—अहो विजययात्राश्रवणकुतूहलिता पौराणाम् । यदावामनुसरन्ति पुनः पुनः प्रश्नमालया तत् सखे प्रकाश्यतां प्रतापरुद्रस्य भुजयोर्विजयोदाहरणम् ।

प्रथमः—(किंचिदुच्चैः) भो भोः श्रूयतां काकतीयकुलश्लाघाकामधेनुः प्रियोदन्तः ।

जेत्रा काकतिवीररुद्रविभुना सर्वा दिशो निर्जिताः
क्ष्मापालाः करदीकृताः कृतमिदं निर्वीरमुर्वीतलम् ।
यस्योद्यद्भुजवैभवं सरभसारोहद्द्विषत्कामिनी-
मञ्जीरध्वनिपूर्णकन्दरमुखैर्व्याकुर्वते पर्वताः ॥ ३ ॥

मागधलक्षणमुक्तम् । 'राज्ञः पुरजनस्यापि मङ्गळाचारशंसिनः । मान्यैर्मागधिकागीतैर्मागधा इत्युदीरिताः ॥' इति । प्रभुतैव रहस्यं गूढं वस्तु मागधवेषतिरोहितत्वात् तेषामिति भावः । ध्वजचक्रग्रहणं राज्यसूचकरेखोपलक्षणार्थम् । तदुक्तं वराहसंहितायाम् । 'चक्राब्जपरशुतोरणशक्तिधनुःकुम्भसन्निभा रेखाः । कुर्वन्ति चमूनाथं मकरध्वजसन्निभा महीपालम् ॥' इति । वक्षोविस्तारफलमपि तत्रैव । 'उरो ललाटं वदनं च पुंसां विस्तीर्णमेव त्रितयं प्रशस्तम् ।' इति। वृत्तैर्जङ्घादाविति शेषः । 'वृत्तजङ्घो भवेत् भूपो वृत्तलिङ्गो भवेद्धनी ।' इति वचनात् । अनीचैरुन्नतैः वक्षःप्रभृतिषु दीर्घैर्वा हनुप्रभृतिषु । तदपि तत्रैवोक्तम् । 'वक्षोऽथ कक्षौ नखनासिकास्यं कृकाटिका चेति षडुन्नतानि ॥ हनुलोचनबाहुनासिकं स्तनयोरन्तरमत्र पञ्चमम् । अतिदीर्घमिदं तु पञ्चकं न भवत्येव नृणामभूभृताम् ॥' इति । अत एवामनुष्यमात्रसुलभैः भूपतिव्यतिरिक्तदुर्लभैरित्यर्थः॥ सूचितमर्थं दृढयति । **नूनमिति** । अस्या अपि रीतेर्दास्यावान्तरभेदत्वादिति भावः । यदाहुः—'पद्यमङ्गुलविच्छेदमुरोविन्यस्तमक्षरम् । तन्नामकरणं चेति दास्यमेतच्चतुष्टयम् ॥' इति । शिष्टं स्पष्टम् । प्रियोदन्तः प्रियवार्ता । **जेत्रेति** । करदीकृताः बलिप्रदाः कृताः । अभूततद्भावे च्विप्रत्ययेनेयन्तं कालमजय्या अपि जिता इति लभ्यते । निर्वीरं प्रतिवीररहितम् । ये करं न प्रयच्छन्ति ते प्राणैरेव वियोजिता इत्यर्थः । ततः किं जातमत आह । **यस्येति** । व्याकुर्वते व्या-

एष तत्त्वानुकीर्तनरूपो मार्गः ।

द्वितीयः—सखे नूनमेषु दिवसेषु काकतीयमहाराजो निरन्तरं पुरस्कृतपुरोधःप्रवरामात्यवृद्धो युवराजविजयमाशंसमानो गमयति वासराणि ।

प्रथमः—उचितमाचिन्तितं वयस्येन ।

द्वितीयः—(पुरोऽवलोक्य सहर्षम्)। कथमस्मदीयं वचनमाकर्ण्य नूनं महाराजाय निवेदयितुममात्यपुत्रः सहर्षसंभ्रमं राजकुलाभ्यन्तरं प्रविशति । तदावामपि प्रतीहारभूमिमध्यास्य काकतीश्वरावसरं प्रतिपालयिष्यावः । (इति परिक्रामतः)

एतद् वितर्कप्रतिपादनाद्रूपम् ।

(ततः प्रविशत्यमात्यपुत्रः)

अमात्यपुत्रः—(सप्रमोदम्) अहो मम धन्यता यदीदृशानां महोत्सवानां निवेदयितास्मि संवृत्तः । यन्मया विज्ञापितैः श्रवणप्रियंकरैर्वार्तामृतैः स्वप्नसाक्षात्कृतादपि स्वयंभूदेवप्रसादात् प्रमोदयिष्यते काकतीयवृषा ।

एषोत्कर्षवचनरूपोदाहृतिः ।

(पुरोऽवलोक्य) कथमयं महाराजः पुरोहितैरमात्यैरन्येन परिजनेन च परिवृतो महास्थानमण्टपमधितिष्ठति । तदहमुपसर्पामि । (इति परिक्रामति)

(ततः प्रविशति यथानिर्दिष्टो राजा मन्त्रिणश्च पुरोधसश्च)

राजा—(सविमर्शाश्चर्यम्) (अमात्यान् प्रति)—अहो शैशवेऽप्युचितकारित्वं वत्सस्य वीररुद्रस्य । यदस्मदनुरोधार्थमिमानमात्यान् निवर्त्य स्वयमेव जिगीषुः प्रस्थितः ।

मन्त्रिणः—(सबहुमानम्) महाराज भवता खलु पितृमान् कुमारः ।

चक्षते । अप्रियाणि प्रियाणि क्रियन्त एभिरिति प्रियंकराणि । 'आढ्यसुभग—' इत्यादिना ख्युन्प्रत्यये मुमागमः । काकतीयवृषा काकतीन्द्रः । **भवता खलु पितृमानिति** । कारणगुणानां कार्ये संक्रान्तिरुचितैवेति भावः ।

पुरो०—विजयप्रस्थानात् प्रभृति नक्तन्दिवमुन्मिषन्ति कल्याणानि । तद्विजिता एव दिशो राजपुत्रेण ।

राजा—भवतामाशिष एव काकतीयकुलश्रेयांसि स्वयं प्रदुहते ।

परि०— काअइअकुलस्स किं णु ण संपुण्णं पुण्णेण जस्सिं अवइण्णो भुवणेक्कभद्दो पआवरुद्दो ।

राजा—(सौत्सुक्यम्) कथं चिरयति वत्सस्य विजययात्राश्रवणमहोत्सवः ।

अमात्यपुत्रः—(सविनयसंभ्रमसमुपसृत्य सप्रणामम्) देव मध्यमलोकपाल युवराजप्रेषितौ विजयवार्ताहारिणौ प्रघाणप्राङ्गणमधिवसतः ।

एष संचिन्त्यमानार्थप्राप्तिरूपः क्रमः ।

(सर्वे सहर्षातिशयं निरूपयन्ति) ।

मन्त्रिणः—भद्र शीघ्रं प्रवेशय ।

अमात्यपुत्रः०—यदादिशन्ति महामन्त्रिणः (इति निष्क्रम्य सह ताभ्यां पुनः प्रविष्टः)

पुरुषौ—(प्रणमन्तावुपसृत्य) देव विश्वैकविजयिना पुत्रेण वर्धसे । बाढमप्रमेयमहिमा प्रतापरुद्रभुजस्थेमा यच्छैशवेऽप्यतिशायिततरुणकाकतीयपराक्रमस्तस्य विक्रमः ।

राजा—(सहर्षातिशयममात्यानवलोक्य) मनोरथाभ्यामिव चिन्तितोपगताभ्यां महार्घं पारितोषिकं प्रतिपाद्यताम् । द्विगुणीकृतहर्षयोरनयोर्मुखाद्वत्सस्य विजयलक्ष्मीपरिग्रहवृत्तान्तश्रवणमहोत्सवेन चरितार्थयामः श्रोत्रवृत्तिम् ।

---

* काकतीयकुलस्य किं नु न संपूर्णं पुण्येन यस्मिन्नवतीर्णो भुवनैकभद्रः प्रतापरुद्रः ।

नक्तं च दिवा च नक्तन्दिवम् । 'अचतुर' इत्यादिना सप्तम्यर्थवृत्त्योरव्यययोर्द्वन्द्वसमासो निपात्यते । कल्याणानि शुभनिमित्तानि उन्मिषन्त्युद्भवन्ति । प्रदुहते । दुहतेः कर्मकर्तरि तङ् । 'न दुह' इति यक्प्रतिषेधः । प्रघाणो बहिर्द्वारप्रकोष्ठकः । अगारैकदेशे प्रघणः प्रघाणश्च निपातितः । तत् प्राङ्गणमधिवसतः ।

मन्त्रिणः—यदाज्ञापयति देवः (इति भौरिकमुखात् तथा कुर्वन्ति)

एष सामदानाचरणरूपः संग्रहः ।

पुरुषौ—(सप्रणामं गृहीत्वा मूर्ध्नि निधाय महाराजप्रसादमभिनन्दतः ।)

मन्त्रिणः—भद्रावित एत्य युवराजविजयविहृतयः पराक्रमपल्लविता महाराजसदसः कर्णपूरीक्रियन्ताम् ।

पुरुषौ—सावधानमवधारयतु महाराजः ।

प्रथमः—देव देवस्य प्रसादेन वाजिनीराजनासामिध्यमानस्य वीतिहोत्रस्य विजयप्रदानेन द्विगुणितोदग्रप्रतापे प्रतापरुद्रे प्रतिष्ठमाने

यात्रारम्भमहेष्वहंप्रथमिकानिर्यच्चमूडम्बर-
क्षुण्णक्षोणितलोत्थितेऽतिबहुले पांसौ वियद्व्यापिनि ।
जेतव्याः सकला दिशः स्वविभुतामन्तः पिधायाधिक-
त्रासात् क्वापि पलायिता इव दृशां नैवाभवन् गोचराः ॥

अनन्तरं च

उद्वेलच्चतुरर्णवीकलकलो नायं चमूडम्बरो
नेदं दुन्दुभिगर्जितं त्रिपुरजित्कल्पान्तढक्कारवः ।
इत्याटोपपटीयसीषु परितो धाटीषु भारानम-
च्छेषाशेषफणासु विस्मितमथ त्रस्तं दिगीशैरपि ॥ ५ ॥

'उपान्वध्याङ्वसः' इति सकर्मकत्वम् । भूरि सुवर्णं तल नियुक्तो भौरिकः कनकाध्यक्षः । नीराजना नाम राष्ट्रसमृद्धये शरत्कालकर्तव्यः शान्तिकर्मविशेषः । स च गजप्राधान्येनाश्वप्राधान्येन च द्विविधः । तदुक्तं शौनकेन 'नवम्यामाश्वयुज्मासे कार्तिकायामथापि वा । हस्तिनीराजनं कुर्याद्राजा जनसमृद्धये ॥ अश्वनीराजनं कुर्यादश्वानां हितकाम्यया । तद्वच्चैवाश्वयुज्मासे पूर्वपक्षे नृपोत्तमः ॥' इति । तत्र द्वितीयं प्रत्याह । **वाजिनीराजनेति** । वीतिहोत्रस्य हुतभुजः । **यात्रेति** । महेषूत्सवेषु । अहं प्रथमोऽहं प्रथम इति यस्यां क्रियायामसावहंप्रथमिका । मयूरव्यंसकादित्वात् समासः । स्वार्थे कप्रत्ययः । स्वविभुतां निजव्यापकत्वम् । अत्रानुपहितदिग्गतं विभुत्वं चोपहितास्वपि प्राच्यादिषूपचर्यते । अत्र सेनारजोव्याप्तिनिमित्तस्य दिशामदर्शनस्य भयनिमित्तपलायनहेतुकत्वोत्प्रेक्षणादुत्प्रेक्षालंकारः । **उद्वेलदिति** । परितो धाटीषु 'शत्रुदेशावमर्दाय सद्यः

पुरोधसः—अहो निरङ्कुशमोजायितमन्ध्रचमूपतीनाम् ।

द्वितीयः—अथ युवराजाज्ञया प्रथमं माघवनीं दिशं प्रचलितानि सैन्यानि ।

रथेनाभिमुखायातं वीररुद्रो विलोक्य माम् ।
मृष्यते नायमित्यर्कः सैन्यरेणौ तिरोहितः ॥ ६ ॥

मन्त्रिणः—ततस्ततः ।

द्वितीयः—अनन्तरं सेनाग्रगैरेव पौरस्त्यान् क्षुद्रक्षत्रियान् निर्जित्य सर्वपथीनेनाटोपेन पटीयासि तस्मिन् महति बले प्रचलति

युद्धाय समनह्यन्त कलिङ्गाः स्फुटपौरुषाः ।
माद्यद्द्विपघटोद्दामसंभ्रमाडम्बरोद्धताः ॥ ७ ॥

तैः सार्धमन्ध्रचमूपतीनां पराक्रमधने महत्यायोधने

पीत्वा मांसोपदंशं द्विरदगलगलद्रक्तमैरेयधारां
मत्तो मस्तिष्कलग्नैर्दलितनृपवपुःकीकसैः सृष्टदंष्ट्रः ।
बिभ्रद्रौद्रान्त्रमालां जनितजनभयो भैरवाकारघोरः
संग्रामोर्व्याः कलिङ्गैर्बलिविधिमकरोद्वीर रुद्रस्य खड्गः ॥

सुभटघोटकैः । विजिगीषोः प्रवृत्तिर्या सा धाटीति निगद्यते ॥' इत्युक्तलक्षणासु आटोपपटीयसीषु संरम्भपटुतरासु सर्वतोमुखसंभ्रमास्वित्यर्थः । इति विस्मितमित्यन्वयः । उद्वेलार्णवकोलाहलकल्पान्तपटहप्रणादकल्पयोश्चमूसंरम्भदुन्दुभिगर्जितयोरभूतपूर्वयोरनुभवादद्भुतमभूदित्यर्थः । अथ सैनिकाभिनिवेशदर्शनानन्तरं दिगीशैरिन्द्रादिभिरपि त्रस्तं किमुतान्यैरन्तरालवर्तिभिरिति भावः । उभयत्र भावे क्तः । मघोन इन्द्रस्येमां माघवनीं दिशं प्राचीम् । सैन्यरजसा सूर्ये तिरोहिते सत्युत्प्रेक्ष्यते । **रथेनेति** । मासर्कमयं वीररुद्रो न मृष्यते न सहते परिपन्थिवुद्धयेति भावः । पौरस्त्यान् प्राच्यान् सर्वान् पथो व्याप्नुवता सर्वपथीनेन । **युद्धायेति** । माद्यद्द्विपानां घटाः संग्रामादौ सज्जनानि । 'करिणां घटना घटा' इत्यमरः । तासामुद्दामसंभ्रमेणाधिकाटोपेने आडम्बरेण संग्रामपटहप्रणादेनोद्धताः । युद्धे वीररुद्रखड्गस्य कालभैरवसमाधिमाह । **पीत्वेति** । मांसेनोपदस्य मांसोपदंशं मांसमुपदंशं कृत्वेत्यर्थः । 'उपदंशस्तृतीयायाम्' इति णमुल्प्रत्ययः । मांसस्य दंशनक्रियाकर्मत्वेऽपि पानक्रियाकरणत्वात् तृतीयोपपदत्वम् । 'तृतीयाप्रभृतीन्यन्यतरस्याम्' इति विकल्पादुपपदसमासः । मस्तिष्कं नाम मस्तकस्थितो गोर्दापरपर्यायो मेदोविशेषः । तल्लग्नैः कीकसैरस्थिभिः सृष्टदंष्ट्रः ।

पुरो०—मानुषवेषतिरोहितेनापि काकतीयविष्णुना किंचिदाविष्कृतो निजप्रभावः ।

मन्त्रिणः—(सहर्षातिशयाद्भुतम्) अहो पराक्रमातिभूमिः प्रतापरुद्रस्य ।

परि०—*सरिसं खु एदं जं महाराअरुद्दणरेसरणंदणेण किदव्वं जं काअइकुलप्पसवाणं खमं जं कुलदेवदाए सअंभूदेवस्स प्पसत्तिविसेसाणं जुत्तं तं खु किअं जुवराएण ।

राजा—(सप्रमोदगद्गदम्) ततस्ततः ।

प्रथमः—अनन्तरम्

छिन्नोद्यद्वैरिवीरप्रतिभयमुकुटाटोपसंजातराहु-
भ्रान्तिभ्रश्यत्पतङ्गाभयकरपृतनारेणुबद्धान्धकारा ।
आसीत् संग्रामवेला विहरदसिलतोद्भिन्नमत्तेभकुम्भ-
प्रोद्यन्मुक्तौघतारानिकरपरिवृतस्वर्वधूवक्त्रचन्द्रा ॥ ९ ॥

अनन्तरं युवराजाज्ञया

वृत्रारातिदिगन्तरालविजयप्रख्यातविक्रान्तयः
पारेपूर्वपयोधिकल्पितजयस्तम्भाः स्फुरत्तेजसः ।
वेलाकाननवासिगीतविभवं देवस्य दोर्विक्रमं
शृण्वन्तो मुहुरन्ध्रसैन्यपतयः प्राप्ता दिशं दाक्षिणाम् ॥ १० ॥

तत्र च

---

* सदृशं खल्वेतत् यन्महाराजरुद्रनरेश्वरनन्दनेन कर्तव्यं यत् काकतिकुलप्रसवानां क्षमं यत् कुलदेवतायाः स्वयंभूदेवस्य प्रसक्तिविशेषाणां युक्तं तत् खलु कृतं युवराजेन ।

छिन्नेति । प्रतिभयेन भयंकरेण मुकुटाटोपेन संजातया राहुभ्रान्त्या भ्रश्यतः क्लिश्यमानस्य पतङ्गस्य सूर्यस्याभयकरणेनाभयसाधनेन । मुकुटाच्छादकतया राहुभ्रान्तिनिवर्तकत्वेनेति भावः । चमूरेणुना बद्धान्धकारा अत एव संग्रामवेलायां रात्रित्वं प्रतीयते तत्र इभकुम्भनिर्गताः मुक्ता एव ताराः । अप्सरोमुखमेव चन्द्रोऽभूदित्याह । **विहरदिति** । **वृत्रेति** । वृत्रारातिरिन्द्रः । तस्य दिक् प्राची । पारं पूर्वपयोधेः पारेपूर्वपयोधि । 'पारे मध्ये षष्ठ्या वा'

मुनौ लोपामुद्रासुहृदि निकटस्थेऽपि महता
भवन्त्येता नद्यः कलुषपयसस्सैन्यरजसा ।
इतीव व्योमाग्रे मलयपवनान्दोलितशिखाः
पताकाः सोत्प्रासाः प्रतिपदमनृत्यन्नतितराम् ॥ ११ ॥

अनन्तरं पाण्ड्यप्रमुखान् दाक्षिणात्यान् क्षितीश्वरान् शरणमुपगतान् काकतीयवीररुद्रः स्वचमूपतिनिर्विशेषं संभाव्य तैः सह प्रतीचीं दिशं प्रचलितः ।

मन्त्रिणः—साधु साधु समाचरितमात्मनीनं पाण्ड्यैर्यत् पूर्वमेव देवस्य चरणमूलं प्राप्ताः । ततस्ततः ।

द्वितीयः—तत्र च

पाश्चात्यानां ध्वजेषु स्थितमधिकभरस्रस्तदण्डेषु गृध्र-
व्रातैर्यच्चण्डतुण्डाहतिविहतपटेष्वाहताक्षिप्तपक्षैः ।
अस्त्रं गारुत्मतं तत् समजनि विजयप्रार्थिनामन्ध्रसैन्य-
प्रष्ठानां जन्यमन्यन्निजनिबिडभुजादण्डकण्डूविडम्बः ॥

अनन्तरं

जित्वा प्रतीचीमथ वीररुद्रः प्रत्यर्थिनारीनयनाम्बुपूर्णाम् ।

इत्यव्ययीभावः । **मुनाविति** । लोपामुद्रासुहृदि मुनावगस्त्ये निकटस्थे समीपस्थेऽपि अगस्त्योदये नद्यो निर्मला भवन्ति । तदुक्तं वराहसंहितायाम् । 'उदये च मुनेरगस्त्यनाम्नः कुसुमायोगमलप्रदूषितानि । हृदयानि सतामिव स्वभावात् पुनरम्बूनि भवन्ति निर्मलानि ॥' इति । तथापि कालुष्यमिति विरोधद्योतकोऽपिशब्दः । सोत्प्रासाः सोपहासाः । लोके कश्चित् प्रबलं कंचन विजित्य सोपहासमुन्नतस्थले चलच्छिखो नरीनर्ति । तद्वदिति भावः । **साध्विति** । आत्मने हितमात्मनीनम् । 'आत्मन्विश्वजन' इत्यादिना खप्रत्ययः । **पाश्चात्यानामिति** । पश्चाद्भवाः पाश्चात्याः ; 'दक्षिणापश्चात्पुरसस्त्यक्' । तेषां ध्वजेषु गृध्रव्रातैः स्थितमिति यत्तदेव गारुत्मतमस्त्रं समजनि । युद्धात् पूर्वं गृध्रैरेव तत्फलं कृतमिति भावः । तदुक्तं वराहसंहितायाम् । 'क्रव्यादकौशिककपोतककाककङ्कैः केतुस्थितैर्महदुशन्ति भयं नृपस्य ।' इति । अत्र क्रव्यादा गृध्रादय इति तद्व्याख्यातोत्पलपरिमलकारः । तर्हि पुनर्युद्धस्य किं फलमत आह । **विजयेति** । प्रष्ठानामग्रगामिनाम् । 'प्रष्ठोऽग्रगामिनि' इति निपात्यते । जन्यं युद्धम् । कण्डूविडम्बः कण्डूयापनयनम् । **जित्वेति** । क्त्वाप्रत्ययेनैवानन्तर्ये

रेवां समुत्तीर्य गजानुबद्धसेतुं विजेतुं गतवानुदीचीम् ॥१३॥

तत्राङ्गवङ्गकलिङ्गमालवप्रभृतयः सर्वे भूपाला मिलित्वा युद्धाय-बद्धादराः पुरतः प्रादुरभवन् ।

मन्त्रिणः—अहो परमनात्मवेदितोदीच्यानां यत्प्रतापरुद्रस्यापि परिपन्थिनो भवन्ति ।

राजा—ततस्ततः ।

प्रथमः—अनन्तरं सममनीकिनीभिरापतन्तीभिः राजकानि वि-लोक्य सगर्वमेवमुक्तं सेनापतिभिः

'रे रे घूर्जर जर्जरोऽसि समरे लम्पाक किं कम्पसे
वङ्ग त्वङ्गसि किं मुधा बलरजःकाणोऽसि किं कोङ्कण ।
प्राणत्राणपरायणो भव महाराष्ट्रापराष्ट्रोऽस्यमी
योद्धारो वयमित्यरनिाभिभवन्त्यन्ध्रक्ष्माभृद्भटाः*' ॥१४॥

एतद्रोषसंरब्धवचनरूपं तोटकम् ।

परि०—†साहु साहु चमूवईणं वअणं । एव्वं फणिअ उण की-रिसं उवक्कंदं तेहिं ।

प्रथमः—किं कथ्यते । सैनिकानां निरुपमः पराक्रमः ।

यस्तत्राभवदाहवस्तमखिलं जानाति भागीरथी
यात्याक्षीत्सुरभूयकारणनिजाहंकारमुच्छृङ्खलम् ।
आराद्वीक्ष्य समग्रमन्ध्रसुभटप्रोद्घूर्णखड्गावली-
धारातीर्थमुपेत्य दिव्यनगरीमारोहतो भूपतीन् ॥ १५ ॥

† साधु साधु चमूपतीनां वचनम् । एतत् भणित्वा पुनः कीदृशमुपक्रान्तं तैः ।

सिद्धे अथशब्दो विलम्बाभावसूचनार्थः । नयनाम्बुपूर्णां दुस्तरामित्यर्थः । तरणो-पायमाह । **गजानुबद्धसेतुमिति** । रेवां नर्मदाम् । सममनीकिनीभिः से-नाभिः सह । राजकानि राजसमूहान् । 'गोत्रोक्षा—' इत्यादिना वुञ्प्रत्ययः । **रे रे इति** । व्याख्यातं नायकप्रकरणे । **रोषसंरब्धवचनरूपमिति** । रोष-संबन्धसंभ्रमवचनरूपमित्यर्थः । स्वात्मनि तनुत्यजामन्ते स्वयमेव दिव्यत्वं संपादयामीति स्वर्गङ्गाया योऽयं महानहंकारस्तन्निवारकोऽयं महाहवस्तदतिशा-यिमहिमेत्यनुपमः सैनिकपराक्रम इत्याह । **यस्तत्रेति** । सुराणां भावः सुरभू-

* 'वयमन्ध्रनाथसुभटाः प्रत्यर्थिदावानलाः' इति पाठान्तरम् ॥

अनन्तरं तत्र प्रलीनात्मनः प्रतिपक्षभूपालानन्वेष्टुकामास्त्रिलिङ्ग-सैनिकास्तत्तद्देशवेषभाषादिकमाविष्कुर्वाणाः सर्वतः पर्यटन्ति स्म । जीवग्राहं गृहीत्वा समानयन्ति स्म युवराजान्तिकम् ।

मन्त्रिणः—साधीयान् खलु सैनिकानामुद्यमः ।

एतत् प्रकृतोपयोगित्वेन वञ्चनादधिबलम् ।

राजा—ततस्ततः ।

द्वितीयः—अनन्तरं नरपतयो निजपरिजनेष्वप्यकृतविश्वासाः प्रतापरुद्रस्य पादमूलमेव शरणमुपगताः ।

परिजनः—*अहो णरवईणं सज्झसकाअरत्तणं† ।

एष भयप्रतिपादनादुद्वेगः ।

प्रथमः—किमुच्यते कातर्यमिति ।

अङ्गाः संगरभीरवः समभवंश्चोलाः पलायाकुलाः‡

काश्मीराः स्मरणीयविक्रमकथा स्थूणा निरीणाश्रियः ।

लम्पाका भयकम्पमानवपुषो वङ्गा निरङ्गीकृता

नेपालाः परिपालनव्यसनिनः सिंहाश्च नीरंहसः ॥ १६ ॥

---

* अहो नरपतीनां युद्धकातरत्वम् ।

त्यम् । 'भुवो भावे' इति क्यप् । अत्याक्षीत् त्यक्तवती । आरात् समीपे । भयेन प्रच्छन्नवृत्तीन् पार्थिवान् प्रच्छन्नमार्गेणैवासाधयन्नित्याह । **अनन्तरमिति । जीवग्राहं गृहीत्वेति** । जीवतीति जीवः । इगुपधलक्षणः कप्रत्ययः। जीवन्तं गृहीत्वेत्यर्थः । 'न च हन्यात् स्थलारूढं न क्लीबं न कृताञ्जलिम् । न भीतं न परावृत्तं सतां धर्ममनुस्मरन् ॥' इति भीतवधे मनुना निषेधस्मरणादिति भावः । 'समूल' इत्यादिना णमुल्प्रत्ययः । कषादित्वादनुप्रयोगः । इष्टजनातिसन्धानमधिबललक्षणम् । तत्रेष्टं प्रकृतोपयोगि । जनातिसंधानं वञ्चनमित्येवमर्थं मत्वा योजयति । **एतदिति** । प्रकृतोपयोगि छद्माचरणमात्रमभूताहरणं । तेन परवञ्चनमधिबलमित्यनयोर्भेद इति द्रष्टव्यम् । **एष इति । भयप्रतिपादनादिति** । अपकारिकृतभयप्रतिपादनादित्यर्थः । कातर्यमेव राज्ञां श्लोकत्रयेणाह । **अङ्गा इत्यादिना** । पलायः पलायनम् । तत्राकुलाः । 'उपसर्गस्यायतौ' इति लत्वम् । निरीणश्रियो गतसंपदः । रीणातेर्ल्वादित्वान्निष्ठानत्वम् । निरङ्गीकृताः नि-

---

† 'जुज्झकाअरत्तणम्' इति पाठान्तरम् ॥

‡ 'प्रलापाकुलाः' इति पाठान्तरम् ॥

अपि च

काम्भोजाः क्षतकुम्भिनीपरिचयाः प्राप्तव्रणाः सेवणा
गौडाः पीडितविग्रहाः श्रितकुलग्रावाङ्कणाः कोङ्कणाः ।
लाटाः पाटितमूर्तयः परिगलद्धीविह्वलाः सिंहलाः
कर्णाटाः परिपूर्णवेपथुभृतस्तन्द्रालवो मालवाः ॥ १७ ॥

किं च

भोजा व्यर्थभुजायुधाः क्षतनिजश्रीकेलयः केरलाः
पाण्ड्याः खण्डितविक्रमाः प्रकटितह्रीजर्जरा घूर्जराः ।
पाञ्चालाः प्रणतिप्रपञ्चितभियश्चाटूत्कटाः कीकटाः
काम्पिल्लयाः श्रितपल्लयः कृतयशोभङ्गाः कलिङ्गा अपि ॥

(सर्वे हर्षातिशयं नाटयन्ति ।)

परि०—(साश्चर्यम्) *अहो वीररुद्दस्स अइसइदतिहुवणाइ जुज्झावदाणाइ ।

राजा—(सहर्षम्) महतीं प्रतिष्ठामारोपितं खलु काकतीयकुलं विश्वैकविजयिना वत्सेन ।

पुरोधसः—आमूलचूड फलिताः प्रसत्तयः काकतीयान्वयदेवतानाम् ।

राजा—ततस्ततः ।

प्रथमः—अनन्तरं सकलदिग्विजयसमुत्तेजिततेजोविलासः सर्वनरेश्वराणां तानि तान्युपायनानि स्वीकृत्य समग्रसैन्यैः सपक्षैर्महीभृद्गणैराश्रितेन महता बलार्णवेन न्यवर्तत विश्वैकवीरो वीररुद्रः ।

मन्त्रिणः—(सहर्षम्) कुत्रेदानीं राजपुत्रः ।

द्वितीयः—साम्प्रतं किंकुर्वाणराजलोकः सर्वानपि सेनापतीन्

---

* अहो वीररुद्रस्यातिशयितत्रिभुवनानि युद्धापदानानि ।

रवयवीकृताः । नीरंहसो निर्वेगाः । **काम्भोजा इति** । कुम्भिनी भूमिः । तन्द्रालवोऽलसा निरुद्योगा इत्यर्थः । 'स्पृहिगृहि' इत्यादिना आलुच्प्रत्ययः । **भोजा इति** । चाटूनि त्रायस्वेत्यादीनि प्रियवाक्यानि तैरुत्कटाः । श्रितपल्लयः प्राप्ताल्पग्रामाः । आमूलचूडमामूलाग्रम् । किंकुर्वाणराजलोकः किङ्करीभवद्राजवर्गः । मौलं मूलव-

नगरं प्रस्थाप्य कतिपयमौलपरिवृतः काकतीयवीरः स्वैरं गोदावरीपरिसरारण्येषु मृगयाकुतूहली विहरते।

मन्त्रिणः—(सविमर्शम्) महाराज नूनं त्वय्येव शासति वसुमतीं यौवराज्यमेव बहुमन्यते राजपुत्रः।

एषा प्राप्त्याशा। दिग्विजयाकृष्टनरेश्वरवृत्तान्तस्य व्यापित्वात् पताका निरूपिता।

राजा—तदचिरमेव युष्माभिरानेतव्यो वत्सः अनुनेतव्यश्च राज्याभिषेकाय।

मन्त्रिणः—यदाज्ञापयति देवः। (इति निष्क्रान्ताः)

नेपथ्ये—(ससंभ्रमम्) भो भो नागरिकाः सत्वरमपसरत दूरम्। यदिदानीं

आलानं तरसा निपात्य निगळान्युच्छिद्य धूताङ्कुशो
वेगोत्पातितधूर्गतः कटतटीनिर्यन्मदाम्बुस्रुतिः।
भ्रश्यत्पण्यपथं चलद्गजहयं विभ्यज्जनौघं पुरं
विष्वग्व्याकुलयत्यमन्दरभसः स्वैरं करिग्रामणीः॥

एष शङ्कात्रासरूपः संभ्रमः।

राजा—(आकर्ण्य सस्मितम्) कथं व्याकुलयति कटकं करीन्द्रः।

पुरुषः—महाराज नूनमिदानीं नगरं प्रविशतां नरेश्वरोपायनानां द्विपानां गन्धानिलाय संक्रुध्यन् निरर्गलो जातः प्रधानहस्ती।

पुरो०—

पित्रा स्वयंभूपतिनोपदिष्टं प्रतापरुद्रस्य महाभिषेकम्।
निर्विघ्नमापादयितुं गजास्यः करेणुराजाकृतिरभ्युपैति॥२०॥

लम्। **एषा प्राप्त्याशेति**। राज्याभिषेकस्य मृगयालक्षणप्रतिबन्धकोपनिपातेन शङ्क्यमानत्वादिति भावः। पताकां योजयति। **दिग्विजयेति**। **आलानमिति**। आलानं बन्धस्तम्भः। निगळानि शृङ्खलानि। पातितधूर्गतः पातिताधोरणः करिग्रामणीः राजप्रियो गणपतिर्नाम गजश्रेष्ठः। भ्रश्यत्पण्यपथमित्यादौ शङ्कात्रासयोर्निरूपणात् संभ्रम इत्याह। **एष इति**। कटकं नगरम्। **पित्रेति**। गजास्यो गणेशः। अत्रेष्टार्थस्य महाभिषेकस्य निर्विघ्नमित्यनेन गणे-

एष गर्भबीजोद्भेदनादाक्षेपः ।

राजा—(सहर्षम्) तर्हि वयमपि प्रमदवनद्वारप्रासादमारुह्य गजेन्द्रमवलोकयिष्यामः । (इत्युत्थाय परिक्रम्य निष्क्रान्ताः सर्वे)

इति नाटकप्रकरणे वीररुद्रविजयो नाम तृतीयोऽङ्कः ।

(ततः प्रविशति धात्री चेटी च ।)

धात्री—(सरोषम्) *हंजे एआरिससहस्सकज्जपज्जाउलराअउल-महूसवे वि सअला वि रअणी केण समं तुए णीदा । ईरिसमहग्घाई भूसणाई कुदो चोरिआई । कहं ण विण्णादं तुए दासीएउत्तीए । सअला दिसो जेऊण चउरंतसामंतपरिवारो पआवरुद्दो णअरं पविट्ठो । कुलदेवदाए पसत्तीए महाराअस्स अण्णाए पुरोहिदाणं अणुरोहेण अमच्चाणं अणुवट्टणेण पआणं भाअहेएण खोणीए तवोविसेसेण अंहारिसस्स परिअणस्स सुकअपरिपाएण अब्भुपगअमहारज्जाहिसेओ जुवराओ संजाओ । एव्वं वि एआइणीं मं महूसवाउलिअं मोत्तुण कंहि ठिदा ।

---

* हञ्जे एतादृशसहस्रकार्यपर्याकुलराजकुलमहोत्सवेऽपि सकलापि रजनी केन समं त्वया नीता । ईदृशमहार्घाणि भूषणानि कुतश्चोरितानि । कथं न विज्ञातं त्वया दास्याःपुत्र्या । सकला दिशो जित्वा चतुरन्तसामान्तपरिवारः प्रतापरुद्रो नगरं प्रविष्टः । कुलदेवतायाः प्रसत्त्या महाराजस्याज्ञया पुरोहितानामनुरोधेनामात्यानामनुवर्तनेन प्रजानां भागधेयेन क्षोण्यास्तपोविशेषेणास्मादृशस्य परिजनस्य सुकृतपरिपाकेनाभ्युपगतमहाराज्याभिषेको युवराजः संजातः । एवमप्येकाकिनीं मां महोत्सवाकुलितां मुक्त्वा कथं स्थिता ।

शप्रसादरूपोपायानुसरणादाक्षेपः । इष्टार्थोपायानुसरणमाक्षेप इति लक्षणात् । अत एवात्र गर्भबीजोद्भेदनादित्याह । तस्य प्राप्त्याशासंवन्धित्वेनैवंविधत्वादिति । अन्तःपुरोचितं राज्ञो वनं प्रमदवनम् । 'ङ्यापोः—' इति ह्रस्वः ।

इति तृतीयोऽङ्कः ।

नीचपात्रद्वययुक्तं प्रवेशकं प्रारभते । **तत इति** । तत्र प्रतीहारप्रवेशात् पूर्वः कथाभागः पूर्वाङ्कशेषतया वृत्तः । उत्तरस्तूत्तराङ्कशेषतया वर्तिष्यमाण इति द्रष्टव्यम् । हञ्जे चेटि । 'हण्डे हञ्जे हलाह्वाने नीचां चेटीं सखीं प्रति ।' इत्यमरः । **ईरिसेति** । महार्घाणि महामूल्यानि । दास्याःपुत्र्या । 'पुत्रेऽन्यतरस्याम्'

अनेन रोषवशान्नियताप्तिप्रदर्शनमुखेन बीजस्यावमर्शाद्विमर्शसंधिः। चेटीगतदोषप्रख्यापनादपवादोऽङ्गम्।

चेटी—*सामिणि अवराहं सहस्स। (इति पादयोः पतति)

धात्री—(सभ्रूभङ्गम्) †दासीएउत्ति पटंचलेण सप्पदंसणं पडिमज्जेसि जं पणामेण ईरिसापराहं सिढिलेसि।

एष रोषसंभाषणरूपः संफेटः।

चेटी—‡ईरिससहावा एव्व तुमं। ता णिक्कारणकोविणीं होदीं अणुवट्टिउं अहं ण पज्जत्ता।

धात्री—(सरोषशिरःकम्पम्) §वक्कशीलदुल्ललिए लूणकण्णणासिअं तुमं बन्धिऊण काराघरभाअणं करोमि। (इति बाहुबन्धनं नाटयति)

एष बन्धनरूपो विद्रवः।

चेटी—(सभयकम्पम्) ‖सामिणि रक्खेहि रक्खेहि असरणं णिरवराहं इमं जणं। तुह अत्तिआए हिडिंबस्समं गच्छंतीए अहं बलक्कारेण णीदा। तद्ध पडिऊलं देव्वं पसादअंतीए बिलंबिदं किं करेमि।

---

* स्वामिनि अपराधं सहस्व।

† दास्याःपुत्रि पटाञ्चलेन सर्पदशनं परिमार्जयसि यत् प्रणामेनेदृशापराधं शिथिलयसि।

‡ ईदृशस्वभावैव त्वम्। तत् निष्कारणकोपिनीं भवतीमनुवर्तितुमहं न पर्याप्ता।

§ वक्रशीलदुर्ललिते लूनकर्णनासिकां त्वां बध्वा कारागृहभाजनं करोमि।

‖ स्वामिनि रक्ष रक्ष अशरणं निरपराधमिमं जनम्। तवात्तिकया हिडिम्बाश्रमं गच्छन्त्याहं बलात्कारेण नीता। तत्र प्रतिकूलं दैवं प्रसादयन्त्या विलम्बितं किं करोमि।

इति विकल्पादलुक्। विमर्शसंधिं योजयति। **अनेनेति**। अनेन ग्रन्थसंदर्भेणेत्यर्थः। प्रतिपक्षनिवृत्त्या कार्यनिश्चयो नियताप्तिः तस्याः प्रदर्शनमुखेन बीजस्य गर्भसंधौ प्रसिद्धस्यावमर्शनात् पर्यालोचनात्। तव अत्तिकया ज्येष्ठभगिन्या; 'अत्तिका भागिनी ज्येष्ठा' इत्यमरः। प्रतीहार-

धात्री—(सरोषहुङ्कारम्) *एआरिसं राअउलमहूसवं उज्झिअ हिडिंबालअगंडसेलेसुं किंत्ति मत्तअं ताढिज्जइ मंदभाइणीए ।

एष गुरुतिरस्कृतिरूपो द्रवः ।

चेटी—†सामिणि सहेहि विलंबिअं । तुए कादव्वं मंगलोवआरं सिग्घं णिव्वट्टेमि । (इति वपुषा प्रणमति)

धात्री—(सप्रसादम्) ‡हंजे उट्ठेहि उट्ठेहि ।

एषा विरोधशमनरूपा शक्तिः ।

चेटी—(सहर्षमुत्थाय हस्तावलम्बं दत्त्वा) §इदो इदो तत्त-होदी ।

धात्री—(किंचित् परिक्रम्य पुरोऽवलोक्य च) ‖कहं एसो पडि-हारप्पवरो ससंभमं णिग्गओ ता पच्चासण्णो विअ महाहिसेअसमओ । तेण राअवुत्तस्स मंगलणीराअणदीवरिञ्छोलिं णिव्वट्टेदुं अब्भंतरं पविसावो ।

(इति निष्क्रान्तौ ।)

प्रवेशकः ।

(ततः प्रविशति प्रतीहारः ।)

प्रती०—(साटोपं परिक्रम्य द्वारि नरपतिकुलकलकलमसहमानः सावमानं कनकवेत्रलतामुद्यम्य)

रे रे नरेश्वराः संशृणुध्वम्

---

* एतादृशं राजकुलमहोत्सवमुज्झित्वा हिडिम्बालयगण्डशैलेषु किमिति मस्तकं ताडयिष्यति मन्दभागिनी ।

† स्वामिनि सहस्व विलम्बितम् । तत्त्वया कर्तव्यं मङ्गलोपचारं शीघ्रं निवर्तयामि ।

‡ सखि उत्तिष्ठ उत्तिष्ठ ।

§ इत इतस्तत्रभवती ।

‖ कथमेष प्रतीहारप्रवरः ससंभ्रमं निर्गतः । तत् प्रत्यासन्न इव महाभिषेकसमयः । तेन राजपुत्रस्य मङ्गलनीराजनदीपरिञ्छोलिं निवर्तयितुमभ्यन्तरं प्रविशावः ।

प्रवरो वृद्धप्रतीहारः । दीपरिञ्छोलिं दीपपद्धतिं ॥ प्रवेशकः ॥ **तत इति**

दन्तिव्यूहमुपायनीकृतममुं कुर्वन्तु पुर्या बहि-
र्यस्योद्यद्धनबृंहितैर्न घटिकाघण्टाध्वनिः श्रूयते ।
दूरे चास्तु रथाश्वमेतदखिलं यस्यातिसंमर्दतो
निष्क्रामत्प्रविशच्च नागरकुलं न स्वैरमाचेष्टते ॥ १ ॥

एषा तर्जनोद्वेजनरूपा द्युतिः ।

(किंचिदुच्चैः) भो भो कुलामात्यवृद्धाः प्रधानाधिकारिणः परिजनाः पौराश्च संश्रृणुध्वम् । एषा रुद्रदेवस्याज्ञा । यथा किल

पूर्वैः काकतिवंशजैर्नृपतिभिः सम्यग्धृता या चिरं
यस्या मानुषशम्भुना गणपतिक्षोणीभुजाऽभूत् प्रथा ।
येयं मद्गुजया कुलाद्रिवसतिं विस्मारिता मेदिनी
सेयं संप्रति वीररुद्रभुजयोर्यातु प्रतिष्ठां स्थिराम् ॥ २ ॥

एषा स्ववंशजानां कीर्तनाद्गुरुकीर्तनरूपः प्रसङ्गः ।

(पुनः साटोपं परिक्रम्य) अधिकृताः किमिदानीमारभध्वे । किमुपक्रान्तः स्वयंभूदेवसमाराधनविधिः । कच्चिद्दत्ताः पुरदेवताभ्यो बलयः । किमभ्यर्चिताः सर्वे वर्णवृद्धाः । कच्चित् प्रसाधिता महाभिषेकवेदिः । किं सज्जीकृतानि कनककलशेषु पुण्यतीर्थसलिलानि । कच्चिदभ्यर्णमुपनीतान्युत्तमोपकरणानि । किं मङ्गळमुहूर्ते कृतावधाना ज्योतिर्विदः । कच्चिदलंकृताखिलिङ्गनगरीमृगीदृशश्च । यदिदानीं वसुमतीपाणिग्रहणोचितमङ्गळाचारवेषः प्रतापरुद्रः काकतीयमहाराज्यलक्ष्मीमहान्तःपुरे वर्तते । तत्त्वरध्वम् । (अन्यतो गत्वा सभ्रूक्षेपमवलोक्य) कथं राजानो न विरमन्ति । (किंचिदुपसृत्य) भो भो भूपाला यथावकाशमाध्वम् । सज्जीकुरुध्वमुपायनजातम् । न वृथा संमर्दं सहते मम वेत्रयष्टिः ।

दन्तीति । **रथाश्वमिति** । सेनाङ्गत्वादेकवद्भावः । नागरकुलं पौरसमूहः । स्वैरमसंबाधेन । **संश्रृणुध्वमिति** । संपूर्वाच्छृणोतेरविवक्षितकर्मकात् 'समो गम्यृच्छि—' इत्यादिनात्मनेपदम् । काकतिभूपतीनां भूपरिपालनमुदितोदितं भवतीत्याह । **पूर्वैरिति** । विस्मारितेत्यत्र 'गतिबुद्धि' इत्यादिनाणिकर्तुः कर्मत्वम् । तस्मिन्नभिधेये कर्मणि क्तः । 'ण्यन्ते कर्तुश्च

एतदवमानरूपं छलनम् ।

(समन्तादवलोक्य सगर्वातिशयम्) अहो तृणीकृतजगतां क्षितिभृतामुद्वेलं संमर्दं निवारयतो मम प्रभावः । अथवा काकतीयदौवारिकाणां लिखितपठितमेव राजनिवारणम् ।

एष स्वशक्त्याविष्करणरूपो व्यवसायः ।

(प्रविश्य पटाक्षेपेण दौवारिकः)

दौवारिकः—(साक्षेपम्) अरे केन खल्वसमयविदा भूपतयो निवारिताः । महोत्सवदिदृक्षवः सर्वे प्रविशन्तु ।

प्रथमः—(सरोषम्) अरे काकतीयकुलवृद्धप्रतीहारं मामसमयवेदिनमुदाहरसि ।

द्वितीयः—भवतु यो वा को वा भवान् । प्रवेष्टव्या नरपतय इति महाराजस्याज्ञा ।

एतत् प्रतीहारयोरन्योन्यरोषसंरब्धवचनरूपं विरोधनम् ।

प्रथमः—किमनेन समं शुष्ककलहेन । तावत् प्रधानागारद्वारवेदिकामध्यमध्यासीनं पुरोहितपुरस्कृतं युवराजमेवोपसर्पामि ।

(इति परिक्रामति)

द्वितीयः—अहमपि यथानिर्दिष्टमनुतिष्ठामि ।

(इति परिक्रामति)

(ततः प्रविशति यथानिर्दिष्टः प्रतापरुद्रः पुरोधसो मन्त्रिणश्च

पुरो०—काकतीयकुलतिलक युवराजेन भवता लीलयैव दिशो दश विजिता इत्यमी सम्यगद्य सत्याशिषो वयम् । किं च

अद्यान्वयः काकतिभूपतीनां प्राप्तस्त्रिलोकीप्रथितां प्रतिष्ठाम् ।
राजन्वती भूरियमद्य जाता वीतोपसर्गाः सकलाः प्रजाश्च ॥

कर्मणः' इति वचनात् । उत्तमोपकरणानि छत्रचामरादीनि । अभ्यर्णमन्तिकम् । उपनीतानि समर्पितानि । लिखितपठितमाबाल्यादभ्यस्तं न नूतनं भवतीत्यर्थः । स्नातानुलिप्तादिवत् 'पूर्वकाल' इति समासः । पटाक्षेपेण नेपथ्यापसरणेन सूचनं विनैव प्रविश्येत्यर्थः । अभिषेकानन्तरकार्यं सिद्धवत्कृत्याह । **अद्येति** । राजन्वती सुराज्ञी । 'राजन्वान् सौराज्ये' इति निपातनात् साधु ।

एषा सिद्धवज्ज्ञाविश्रेयःकथनात् प्ररोचना ।

मन्त्रिणः—

सूर्यसोमान्वयामात्यमहत्ताद्याधरीकृता ।
अस्माभिरधिकुर्वाणैः काकतीयकुलस्थितिम् ॥ ४ ॥

एतत् प्रकृतानुगुणप्रशंसनाद्विचलनम् ।

पुरो०—राजपुत्र सज्जीकृतेयं महाभिषेकसामग्री काकतीयनरेश्वरक्रमाधिष्ठितं भद्रासनं भवदधिरोहणं प्रतीक्षते । तत् परिपालय स्वयंभूदेवानुगृहीतां महाराजस्याज्ञाम् ।

एतत् कार्यसंग्रहरूपमादानम् ।

प्रताप०—तर्हि कुलदेवतां स्वयंभूदेवं नमस्कृत्य गुर्वाज्ञां वोढुमिच्छामि ।

पुरो०—सदृशोऽयमाचारः काकतीयकुलप्रदीपस्य भवतः । किं तु प्रत्यासीदति महाभिषेकसमयः । तदचिरेणैव विहितकर्तव्येन राजपुत्रेणागन्तव्यम् । वयमितः करणीयशेषं परिपालयामः ।

प्रताप०—यथादिशन्ति काकतीयान्वयप्रत्यायायितारः ।

(इत्युत्थाय यथोचितं परिक्रम्य निष्क्रान्ताः सर्वे)

इति नाटकप्रकरणे त्वरितमहोत्सवो नाम चतुर्थोऽङ्कः ।

वीतोपसर्गा निरुपद्रवाः । विचलनं नाम स्वगुणाविष्करणं । तत् प्रकृतानुगुण्येन विशिंषन् योजयति । **एतदिति** । **राजपुत्रेति** । भद्रासनमभिषेकोपयोगी पीठविशेषः । तदुक्तं वास्तुशास्त्रज्ञैः 'श्लक्ष्णं षडङ्गुलोत्सेधं षोडशाङ्गुलविस्तृतम् । *द्विद्वाशाङ्गुलायामं क्षीरदारुसमुद्भवम् ॥ पद्माङ्कितं भवेद्भद्रपीठं स्नपनकर्मणि ॥' इति । एतत् सिंहासनमिति वसिष्ठादयो व्यवहरन्ति । प्रत्यायायितारो विश्वासयितारः स्वाधीनत्वसम्पादका वा । पक्षद्वयेऽपि ग्राह्यवाच इत्यर्थः । प्रतिपूर्वादिणो ण्यन्तात् तृच्प्रत्ययः । 'प्रत्ययोऽधीनशपथज्ञानविश्वासहेतुषु' इत्यमरः । सर्वमन्यत् सुगमम् ।

इति नाटकप्रकरणे चतुर्थोऽङ्कः ।

---

* 'द्वाविंशदङ्गुलायामम्' इति पाठान्तरम् ।

ततः प्रविशन्ति ज्योतिर्विदः ।

ज्योतिर्विदः—(ससंभ्रमं परिक्रम्य) भो भो त्वरध्वम् । कुत्र पुरोधसः कुत्र वा मन्त्रिणः । समानीयतां स्वयंभूदेवसमाराधनासक्तचित्ततया विलम्बमानो राजपुत्रः । येन प्रत्यासन्नतरो वर्तते महाभिषेकमुहूर्तः ।

एतदुत्तराङ्कस्य पूर्वाङ्कानुसंगतत्वादङ्कावतरणम् ।

(सविमर्शाश्चर्यम्) अहो विश्वातिशायिनी काकतीयकुलप्रतिष्ठा । यतः

आदेष्टा कुलदेवता स भगवान् यस्य स्वयंभूः शिवो
यं सज्जीकुरुते पराक्रमजितः क्षोणीपतीनां गणः ।
यस्मै च स्पृहयत्यशेषजगती तं वीररुद्राकृते-
र्विष्णोर्वीक्ष्य महाभिषेचनविधिं नन्दन्ति सर्वे जनाः ॥

एष स्वयंभूदेवोपदेशनरेश्वरविजयप्रमुखसंध्यादिबीजनानार्थानां महाप्रयोजनीभूतमहाभिषेकार्थतया योजनान्निर्वहणसंधिः।

(सोल्लासम्) नूनमिदानीं

स्वप्नेऽप्यासूत्रितामाज्ञां पालयन्तं कुलोद्वहम् ।
न मान्त्यन्तर्मुदः शंभोर्विभोरप्यभिनन्दतः ॥ २ ॥

एष मुखसंधौ प्रसिद्धस्य स्वप्नोपदेशरूपस्य बीजस्योपगमात् संधिः ।

(किंचिदुच्चैः)

कल्याणी सकलापि भूतसरणिः क्षेमप्रदा देवताः
श्रेयःप्रस्रवनिर्भरा द्विजनुषामाशीर्गिरो जाग्रति ।

तत इति । ज्योतिर्विदो मौहूर्तिकाः । अत्र पूर्वाङ्कवर्तिभिर्मौहूर्तिकैरसूचितैरेवालानुप्रविष्टैरभिहितस्याङ्कार्थस्य पूर्वाङ्कार्थानुगतत्वादङ्कावतरणमित्याह । **एतदुत्तरेति** । **आदेष्टेति** । अत्र बीजयुक्तानां मुखसंध्याद्यर्थानां परमप्रयोजनसंबन्धलाभात् निर्वहणसंधिरित्याह । **एष इति** । **स्वप्न इति** । आसूत्रितां सूचितामप्याज्ञां पालयन्तमभिनन्दतोऽनुमोदमानस्य शंभोर्विभोर्व्यापकस्याप्यन्तर्मुदो न मान्ति । अप्रमेयो विचित्रो हर्षोऽभूदित्यर्थः । संध्याख्यमङ्गं योजयति । **एष इति** । उपगमात् पुनरुपगमनादित्यर्थः । **कल्याणीति** ।

आरूढाः पदमुन्नतं ग्रहगणाः श्रेयान् मुहूर्तः शुभैः
नक्षत्राणि शिवंकराणि शुभदाश्चान्ये निमित्तोदयाः ॥३॥

तद्वयमेव राजपुत्रानयनाय प्रयतिष्यामहे ।

एष प्रकृतकार्यमार्गणाद्विरोधः ।

(सत्वरं परिक्रम्य पुरोऽवलोक्य च सहर्षसंभ्रमम्) नन्वागत एव प्रतापरुद्रः ।

विप्रैर्मङ्गळसूक्तिपाठमुखरैरालोकशब्दोद्यतैः
भूपालैः करसंभृतोपकरणैराप्तैरमात्यात्मजैः ।
श्लाघ्यैर्वन्दिजनैर्दिगन्तविजयश्लाघासमुद्घोषणैः
स्त्रीवर्गैश्च यथोचितं परिवृतो नीराजनोद्योगिभिः ॥ ४ ॥

तद्वयं चास्थानीमेव गत्वा समुचितमाचरिष्यामः ।

(इति परिक्रामन्ति)

(ततः प्रविशति यथानिर्दिष्टः प्रतापरुद्रो मन्त्रिणश्च)

मन्त्रिणः—(सविनयमग्रतो भूत्वा) काकतीयकुलतिलक इत

भूतसरणिः पृथिव्यादिभूतसमूहः । कल्याण्यप्राप्तविकारतया शुभशंसिनीत्यर्थः । श्रेयःप्रस्रवेण श्रेयःसंपादनेन निर्भराः द्विजनुषां द्विजानामाशीर्गिरो जाग्रति नित्यं प्रवर्तन्त इत्यर्थः । ग्रहगणाः सूर्यादयः । उन्नतं पदमुच्चसंज्ञं स्थानम् । तदुक्तं वराहमिहिराचार्यैः । 'अजवृषभमृगाङ्गनाकुलीरा झषवणिजौ च दिवाकरादितुङ्गाः।' इति । आरूढाः प्राप्ताः । एतत्फलमुक्तं वृद्धवसिष्ठसंहितायाम् । 'उत्पातदोषादिविवर्जितेऽह्नि नराधिपानामभिषेक इष्टः । मूलत्रिकोणस्वगृहोच्चमित्रगृहास्थितैर्वाथ तदंशसंस्थैः ॥ शुभे विलग्ने सततं ग्रहेन्द्रा दिशन्ति लक्ष्मीं विपुलां च कीर्तिम् ॥' इति । मुहूर्तशब्देनात्र षड्वर्गरूपः कालविशेषो विवक्षितः । स च क्रूरसौम्यग्रहसंबन्धवशात् द्विविधः । तदुक्तम् । 'लग्नमर्धं तृतीयांशो नवांशो द्वादशांशकः । त्रिंशांशश्चेति षड्वर्गः क्रूरसौम्यवशात् द्विधा ॥' इति । तत्रायं सौम्य इत्याह । **श्रेयानिति** । शुभैः सौम्यग्रहैः श्रेयानतिप्रशस्त इत्यर्थः । तदपि तत्रैवोक्तम् । 'षड्वर्गो भवति सदा शुभखचरसमुद्भवः शुभदः । पापसमुत्थस्त्वशुभस्तस्माद्ग्राह्यस्तु सौम्यषड्वर्गः ॥' इति । नक्षत्राणि रोहिण्यादीनि रोहिण्याद्यन्यतमनक्षत्रमित्यर्थः । एकदा बहूनामसंभवात् । शिवंकराणि क्षेमंकराणि । यद्यपि 'मेघर्तिभयेषु कृञः' इत्यत्र शिवंकरशब्दश्छन्दस्येव न भाषायामित्याह पदमञ्जरीकारः तथापि 'क्षेमंकरोऽरिष्टतातिः शिवतातिः शिवंकरः' इत्यमरकोशमूलोऽयं प्रयोग इत्यनुसंधेयम् । निमित्तोदयाः दिक्प्रसादादयः । **विप्रैरिति**।

इतः । इदं राज्यलक्ष्मीशुद्धान्तप्रधानागारं प्रविशतु स्वामी । न विलम्बार्हाः कुलदेवताया मनोरथाः ।

एतत् पट्टबन्धरूपकार्यस्योपक्षेपणाद्ग्रथनम् ।

ज्योति०—(किंचिदुच्चैः) भो भो कुलामात्याः

सन्नह्यध्वमुपाहरध्वमुचितद्रव्याण्युपाध्वं सुरान्
संप्राप्तः सुमुहूर्त एष विजयी कल्याणसंपत्खनिः ।
यस्मिन् प्राप्य महाभिषेकविभवं क्षोणीं प्रलीनाखिल-
क्ष्मापालां चिरमन्वशाद्गणपतिर्भूभृत्कुलग्रामणीः ॥ ५ ॥

एष ज्योतिर्विद्भिरनुभूतार्थख्यापनान्निर्णयः ।

परि०—(श्रुत्वा) *कहं पच्चासण्णे वि मुहूत्ते किं विलंबिअदि महामच्चेहिं ।

मन्त्रिणः—(उपसृत्य) नाथ किं विस्मृता गुर्वाज्ञा । नायमवसरो नरेश्वरविज्ञापनाकर्णनस्य । महास्थान्यामेवानुगृह्यन्ताममी ।

प्रताप०—शिरसि धृतैव खलु तातस्याज्ञा । किं तु नोपदिश्यते पुनरनन्तरकरणीयम् ।

एतत् प्रकृतानुगुण्येनान्योन्यपरिभाषणात् परिभाषणम् ।

---

* कथं प्रत्यासन्नेऽपि मुहूर्ते किं विलम्ब्यते महामात्यैः ।

मङ्गळसूक्तानि 'कनिक्रदज्जनुषं समाग्ने वर्चो विहवेष्वस्तु' इत्येवमादीनि । आलोकशब्दा जयजयेत्येवमादयः । 'आलोको वन्दिभाषणे' इति विश्वः । भूपा अपि वन्दिभ्रमभूमयो बभूवुरिति भावः । उपकरणानि छत्रचामरादीनि । वन्दिजनाः 'वन्द्यभूभृद्गुणोत्कर्षश्रावका वन्दिनः स्मृताः' इत्युक्तलक्षणाः । शुद्धान्तप्रधानागारमन्तःपुरप्रधानगृहम् । पुरा खलु गणपतिमहाराजो यस्मिन् मुहूर्तेऽभिषेकमनुभूय समस्तां भुवमेकातपत्रां बुभुजे एतादृशोऽयं मुहूर्तः संप्राप्तः। अतोऽवधानेन देवताराधनादिकं कर्तव्यमित्याह । **सन्नह्यध्वमिति** । सन्नह्यध्वं मुहूर्ते सावधाना भवतेत्यर्थः । उचितद्रव्याणि तीर्थकलशादीनि । सुरानुपाध्वमर्चयध्वम् । अत्रेदं पित्रादीनामप्युपलक्षणम् । यथाह वृद्धवसिष्ठः । 'आशिषो वाचनं कृत्वा पूजयेच्च सुरान् पितॄन् । आयुधानि च पट्टं च विप्रान् गन्धादिनार्चयेत् ॥' इति । अन्वशात् । शास्तेर्लङ् । **अनुभूतार्थख्यापनादिति** । अनुभूतस्य वीजानुगुणस्यार्थस्य ख्यापनादित्यर्थः । त्रयीसमभिमन्त्रणसुरभीकृतसलिलान् वेदत्रयाभिमन्त्रितोदकानित्यर्थः । अभिषेकमुहूर्तसूचकं जयघण्टि-

पुरो०—(सविनयसंभ्रममुपसृत्य) स्वीकृतमहाभिषेकोचितवेषः कनकवेदिकामारोहतु प्रतापरुद्रः। देव महाराजपर्यायेण भवद्भुजशिखरमारोहतु मेदिनी।

प्रताप०—तथा भवतु। (इति वेदिकामारोहति)

नृपाः—(सप्रणामं मङ्गळवेदिकां परिवार्य) विजयतां विजयतां काकतीयकुलस्वामी।

एष नरेश्वरपर्युपासनात् प्रसादः।

परि०—(विलोक्य सामोदकौतुकम्) *पुव्वपव्वअकणअसाणुं सहस्सरस्सी विअ सुमेरुकणअतडं महेन्दो विअ पक्खिचक्कवट्टिणं चक्कधरो विअ कणअवेदिं आरूढो पआवरुद्दो।

मन्त्रिणः—काकतीश्वर समारुह्यतां इदं भद्रासनम्। अमी पुरोधसो महाभिषेकाय तीर्थसलिलपूर्णान् कनककलशान् धारयन्ति।

प्रताप०—तथा भवतु (इति स्वयंभूदेवं काकतीयकुलवृद्धांश्च प्रणमन् सिंहासने समुपविशति)

पुरो०—(त्रयीसमभिमन्त्रणसुरभीकृतसलिलान् कनककलशानमात्यहस्तेष्वपि निधाय सादरम्)

प्रतापरुद्रनृपते काकतीयकुलोचितैः।
प्रजानुरञ्जनैः क्षोणीं पालयाचन्द्रतारकम्॥ ६॥

(इत्याशीर्वादसाधुवादायमानं पाणिग्रहणकौतुकत्वरमाणराज्यलक्ष्मीमञ्जीरशिञ्जितानुमोदितं स्वयंभूदेवप्रमोदाट्टहासोपबृंहितं काकतीयकुलश्रेयःप्रस्तावनाडिण्डिमं चिरावलम्बितधरणीभारखिन्नानां फणिपतिप्रभृतीनां प्रहर्षक्ष्वेडाविडम्बितं धर्मप्रतिष्ठामङ्गळकाहलीकोलाहल-

---

* पूर्वपर्वतकनकसानुं सहस्ररश्मिरिव सुमेरुकनकतटं महेन्द्र इव पक्षिचक्रवर्तिनं चक्रधर इव कनकवेदिमारूढः प्रतापरुद्रः।

काध्वनिमाशीर्वादसाधुवादादिरूपतया संभावयति। **प्रतापेत्यादि**। अथ विश्वातिशायिमहिम्नो वीररुद्रस्य राज्याभिषेकमहोत्सवो विश्वप्रियंकर इत्याह।

मनोहरं महाभिषेकमुहूर्तप्रशंसिनं कनकजयघण्टिकानिनादमनुसन्दधानाः सत्वरं प्रतापरुद्रमभिषिञ्चन्ति)

एष वाञ्छितार्थप्राप्तिरानन्दः ।

एकतो वैतालिकाः—(सहर्षातिशयमुच्चैः)

हे लोकाः पिबत श्रवःप्रसृतिभिः कल्याणवार्तामृतं
जातः काकतिवीररुद्रनृपते राज्याभिषेकोत्सवः ।
अद्यारभ्य कलिः कृतः कृतयुगं राजन्वती मेदिनी
देवाः पूर्णहविर्भुजस्तदधुना यूयं कृतार्थीकृताः ॥ ७ ॥

अन्यतो वैतालिकाः—

आरूढे वरवीररुद्रनृपतौ सिंहासनं शासितुं
तस्याज्ञा क्षितिपालमौलिवलभीः स्वच्छन्दमारोहति ।
लोकांस्त्रीनधिरोहतो निरवधी कीर्तिप्रतापौ हठा-
दारोहन्ति च विन्ध्यभूधरतटान् प्रत्यर्थिनः पार्थिवाः॥८॥

दक्षिणतो वैतालिकाः—

गायन्तीरनुमोदते निजवधूः शेषः शिरःकम्पनैः
लक्ष्मीं प्रीणयतेऽद्य कच्छपपतिर्वक्षस्थलीदर्शनात् ।
दिङ्नागाश्च करेणुकाशुचमपाकुर्वन्त्यनुव्रज्यया
दोष्णा काकतिवीररुद्रनृपतौ विश्वंभरां बिभ्रति ॥ ९ ॥

एकत इति । एकतः पुरत इत्यर्थः । श्रवःप्रसृतिभिः श्रवणचुलुकैः । कलिः कृतयुगं कृतः परिपूर्णधर्मत्वादिति भावः । कुतः । राजन्वती सुराज्ञी । 'राजन्वान् सौराज्ये' इति निपातनात् साधुः । **मेदिनीति** । 'राजा कालस्य कारणम्' इति भावः । **पूर्णहविर्भुज इति** । 'यजेत राजा क्रतुभिर्विविधैराप्तदक्षिणैः' इति विहितानुष्ठानादिति भावः । **अन्यत इति** । पश्चादित्यर्थः । **आरूढ इति** । स्वच्छन्दमनर्गलम् । आरोहति न कश्चिदप्यविधेयो भूपतिरस्तीति भावः । अनेनास्य राज्ञः प्रभुशक्तिरुक्ता । तदुक्तं मानसोल्लासे । 'आज्ञारूपेण या शक्तिः सर्वेषां मूर्धनि स्थिता । प्रभुशक्तिर्हि सा ज्ञेया प्रभावमहितोदया ॥' इति । **निरवधीति** । सूर्याचन्द्रमसोः सीमाचल इव कीर्तिप्रतापयोरवधिभूतः कोऽपि नास्तीत्यर्थः । हठशब्दो व्याख्यातः । वीररुद्रे सिंहासनमेकमारूढे सति तदाज्ञायास्तत्कीर्तिप्रतापयोस्तत्परिपन्थिनां च ततोऽप्युन्नतानि बहून्यारोहणस्थानानि बभूवुरिति महदेतदद्भुतमिति भावः । **गायन्तीरिति** । व्याख्यातमेतत् ।

उत्तरतो वैतालिकाः—

प्रस्थेभ्यः कुलभूभृतामपि हरिद्दन्तावलानां महा-
कुम्भेभ्योऽपि फणाभृतामाधिपतेर्मूर्ध्नां सहस्रादपि ।
कूर्मेन्द्रस्य च कर्परादपि जगद्विख्यातसारोन्नतौ
बाहौ संप्रति वीररुद्रनृपतेः प्राप्तप्रतिष्ठा मही ॥ १० ॥

एष सर्वदुःखशमनात् समयः ।

मन्त्रिणः—अहो प्रभावः काकतीयान्वयस्य ! यदिदानीं
प्रतापरुद्रस्य महाभिषेकपयःकणा ये निपतन्ति राज्ञाम् ।
प्रणामनम्रेषु शिरस्सु तेषां तैः कल्पितः स्वस्वपदाभिषेकः ॥

पुरो०—काकतीयकुलोत्तंस राज्यलक्ष्मीसंवरणस्रगिवेयमुत्तंसीक्रियताम् (इति पट्टबन्धमाचरन्ति)

सर्वे—(सप्रमोदातिशयम्) प्रियं नः प्रियं नः ।

एषा प्रकृतकार्यस्थिरीकरणात् कृतिः ।

मन्त्रिणः—(सर्वतोऽवलोक्य) कस्कोऽत्र भोः । आनीयतां छत्रं चामरयुगलं च ।

(प्रविश्य प्रधानप्रतीहारः)

प्रती०—यदाज्ञापयन्ति महामात्याः (इति परिक्रम्य तान्युपानयति । प्रान्तर्वर्तिनः नरपतयोऽभ्युपेत्य तानि सादरं गृहीत्वा यथोचितमाचरन्ति)

पुरो०—(सहर्षातिशयम्)

प्रस्थेभ्य इति । प्रस्थेभ्यः सानुभ्यः । कर्परात् पृष्ठास्थिकपालात् । **प्रतापेति** । शरणागता महीपतयः महाभिषेकसमये स्वस्वपदेषु स्थापिता इति भावः । उत्तंसीक्रियतां शिरोभूषणं क्रियताम् । 'शुक्लमाल्याम्बरभृतः प्राङ्मुखस्य महीपतेः । पट्टं शिरसि बध्नीयात् सिंहासनगतस्य च ॥' इति वसिष्ठस्मरणात् । पट्टस्तु 'राज्ञां नवाङ्गुलायामो मध्येऽष्टाङ्गुलविस्तृतः । चतुरङ्गुलविस्तारपार्श्वः स्वर्णमयः शुभः ॥ पट्टः पञ्चशिखो राज्यप्रजासौख्यसमृद्धये ।' इत्याद्युक्तलक्षणो द्रष्टव्यः । **कस्क इति** । स्वन्तस्य किमो वीप्सायां द्विर्वचनम् । कस्कादित्वात् सत्वम् ।

श्रूयन्ते बहवो महानृपतयः किं तैरनीदृक्क्रमै-
रीदृग्विश्वजनीनशौर्यगरिमा जागर्ति कः क्ष्मातले ।
बाल्यक्रीडितादिग्जयस्त्रिभुवनक्षेमंकरप्रक्रियः
किंकुर्वाणसमस्तभूपतिगणः श्रीवीररुद्रो यथा ॥ १२ ॥

एतदखिलातिशायित्वकथनमुखेन प्रकृतकार्यानुमोदनादाभाषणम् ।

तदिदानीं खलु

यत् काकतीयनृपराज्यविलासचिह्नं
यच्छायया वसुमती विजहाति तापम् ।
छत्रेण तेन कृतलक्ष्मणि वीररुद्रे
मुक्तातपत्रविभवाः सुहृदो द्विषश्च ॥ १३ ॥

एष राज्यप्राप्तिहेतुभूतच्छत्रारोपणरूपकार्यदर्शनात् पूर्वभावः ।

मन्त्रिणः—(सविनयमुपसृत्य) नाथ काकतीयलक्ष्मीपते सनाथाः सर्वाः प्रकृतयः सुराजानं त्वां दिदृक्षन्ते । तत् सांप्रतं महास्थानीं प्रसाधयतु देवः ।

पुरो०—आचारोऽयं काकतीश्वराणां यन्महाभिषेकानन्तरं प्र-

श्रूयन्त इति । महानृपतयो नलनहुषादयः । ईदृक्क्रमो वीररुद्रसदृशपरिपाटी तद्रहितैरनीदृक्क्रमैः । तत् कथमित्याशङ्क्य वीररुद्रे विशेषमाह । **ईदृगिति** । विश्वस्मै जनाय हितो विश्वजनीनः शौर्यगरिमा यस्य स तथोक्तः नीतिपुरस्कृतपराक्रम इत्यर्थः । शौर्यगरिमानमाह । **बाल्येति** । त्रिभुवनक्षेमंकरप्रक्रियः सम्यक्परिपालने प्रजाहितस्वभाव इत्यर्थः । यदाह मनुः । 'संग्रामेष्वनिवर्तित्वं प्रजानां चैव पालनम् । शुश्रूषा ब्राह्मणानां च राज्ञां श्रेयस्करं परम् ॥' इति । न केवलं पराक्रमेण । किन्तु सामादिभिरपि त्रिभिरुपायैः सर्वोऽपि राजलोको वशीकृत इत्याह । **किंकुर्वाणेति** । तदुक्तम् । 'एवं विजयमानस्य यस्य स्युः परिपन्थिनः । तानानयेद्वशे सर्वान् सामादिभिरुपक्रमैः ॥' इति । छत्रधारणं विशिनष्टि । **यदिति** । यत् काकतीयकुलक्रमागतमित्यर्थः । **यच्छाययेति** । दुष्टनिग्रहशिष्टप्रतिष्ठापनयोरुपलक्षणम् । तेन सुहृदो मुक्तातपत्रविभवाः मौक्तिकमयच्छत्रवैभवाः द्विषस्तु त्यक्तातपत्राश्चेत्युभयोपपादनम् । **नाथेति** । **सुराजानमिति** । 'न पूजनात्' इति न समासान्तः । **आचार इति** । अलब्धलाभो योगः । लब्धपरिपालनं क्षेमः ।

जानां योगक्षेमपरीक्षणम् ।

राजा—यदाज्ञापयन्ति धर्मविदः (इत्युत्तिष्ठति)

काकतीयकुलवृद्धाः—(ससंभ्रममुच्चैः)

प्रक्रान्तमुर्वीश्वरमौलिरत्नैः कुर्वन्तु नीराजनमम्बुजाक्ष्यः ।
प्रतापरुद्रस्य लसत्प्रतापप्रदीपनीराजितदिङ्मुखस्य ॥ १४ ॥

नृपतयः—(शिरस्यञ्जलिं बद्ध्वा) अहो चरितार्था सांप्रतमास्माकी चक्षुष्मत्ता यया खल्वीदृगनुभूयते । यतः

नीराजयन्त्यन्ध्रपुरीरमण्यः प्रदीपजालैर्वरवीररुद्रम् ।
चन्द्रानना गोत्रपतिं रजन्यस्तारागणैर्मेरुमिव स्फुरद्भिः ॥ १५ ॥

(सर्वे जयशब्दं कुर्वन्ति)

मन्त्रिणः—महाराज काकतीश्वर सज्जीकृतं सिंहासनं सर्वतः परिष्कृतमिदं महास्थानमण्टपं सनाथीक्रियताम् ।

प्रती०—(ससंभ्रमं पुरो भूत्वा) देव इत इतः ।

(राजा सगौरवं परिक्रम्य महास्थान्यां सिंहासनमारोहति । सर्वे प्रणम्य यथार्हमुपविशन्ति)

प्रती०—(समयोचितं परिक्रम्य वन्दमानान् मूर्धाभिषिक्तान् साभिमानं कनकवेत्रलतया निर्दिशन्)

कालिङ्गात्र निषीद कोङ्कणपते दूरे भवाङ्गेश्वर
प्रान्तं संश्रय मालवेन्द्र शनकैः स्वोपायनं प्रापय ।
पाण्ड्याग्रे भव सेवणक्षितिपते पश्चाद्भवाद्यैव वः
स्वामी काकतिवीररुद्रनृपतिः सर्वान् क्रमादीक्षते ॥ १६ ॥

तयोः परीक्षणं विचारः । अभिषेकानन्तरकर्तव्यं नीराजनमाह । **काकतीयकुलवृद्धा इति** । अम्बुजाक्षीविशेषणमेतत् । उच्चैरुन्नतम् । 'अधः प्रवर्तयेद्धूपं दीपमूर्ध्वं प्रवर्तयेत्' इति वचनादिति भावः । **उर्वीश्वरमौलिरत्नैः प्रक्रान्तमिति** । राज्ञां प्रणामानन्तरमित्यर्थः । प्रताप एव प्रदीपः तेन नीराजितानि दिङ्मुखानि येन तथोक्तस्य अत एव तत्फलं नीराजनमिहैवानुभूयते इति भावः। अस्माकमियमास्माकी । 'युष्मदस्मदोः' इत्यण्प्रत्यये 'तस्मिन्नणि च' इत्यस्मादेशः । चन्द्राननाः चन्द्रसदृशाननाः । अन्यत्र चन्द्र एवाननं यासां तास्तथोक्ताः । गोत्रस्य कुलस्य पतिम् । अन्यत्र गोत्राणां पर्वतानां पतिम् । परिष्कृतं

(नृपतयः प्रणम्य यथार्हमुपविशन्ति)

पुरो०—स्वस्ति काकतीयकुलावतीर्णाय सौवर्णकेतनाय महामहिम्ने । अद्य सुप्रजसा काकतीयान्वयेन सनाथानि त्रीण्यपि जगन्ति ।

शासितर्यविनीतानां नरेन्द्र त्वयि शासति ।
मध्यस्थतास्य लोकस्य चिरेणान्वर्थतां गता ॥ १७ ॥

राजा—(सविनयम्) स्वयंभूदेववरानुकूलानां भवदाशीर्वादानां फलमिदं यत्काकतीयक्षात्रं वर्धते ।

मन्त्रिणः—राजन् प्रतापरुद्र

सर्वेषां काकतीयानां भागधेयविभूतयः ।
एवंरूपा विवर्तन्ते यत्कुलप्रभवो भवान्* ॥ १८ ॥

पुरो०—न केवलं काकतीयानामेष पुण्यपरिपाकः अपि तु सर्वासामपि प्रजानाम् ।

(प्रविश्य प्रतीहारः)

प्रती—देव सर्वाः प्रकृतयो वर्णवृद्धान् पुरस्कृत्य प्रतीहारमध्यासते ।

मन्त्रिणः—शीघ्रं प्रवेश्यन्ताम् ।

प्रती०—यदाज्ञापयन्त्यमात्याः (इति निष्क्रम्य ताभिः सह पुनः प्रविशति)

(ततः प्रविशन्ति वर्णवृद्धाः)

वर्णवृद्धाः—(सहर्षं राजानमवलोक्य)

विचित्रवितानसुवर्णकलशादिना भूषितम् । सिंहासनलक्षणं मानसोल्लासे । 'रुचिरेण सुवर्णेन निर्मितं रत्नरञ्जितम् । अष्टभिः स्फाटिकैः सिंहैर्मूर्ध्नि तत् सुविराजितम् ॥ अधः काञ्चनविन्यस्तरत्नवेदित्रयान्वितम् । आस्थानमण्डपे राज्ञां सिंहासनमिदं परम् ॥' इति । सौवर्णकेतनाय महामहिम्ने गरुडध्वजावतारायेत्यर्थः । सुप्रजसा शोभनसंतानेन । 'नित्यमसिच् प्रजामेधयोः' इत्यसिच्प्रत्ययः । **शासितरीति** । अविनीतानां दुष्टानां मित्राणाममित्राणां चेति भावः । अत एवेयन्तं कालं स्वर्गपातालमध्यवर्तित्वेन मध्यस्थस्य मध्यमलोकस्य संप्रति पक्षपातराहित्येन माध्यस्थ्यमित्यन्वर्थतामित्यर्थः । **सर्वेषामिति** ।

---

* 'यत्कुलालम्बनं भवान्' इति पाठान्तरम् ।

वरः प्रतापरुद्रोऽयं वधूरेषा वसुंधरा ।
तयोर्घटयिता देवः स्वयंभूः सदृशक्रमः ॥ १९ ॥

एतत् स्वयंभूदेवस्य स्वयंसंधातृत्वादद्भुतप्राप्तेरुपगूहनम् ।

(सविनयमुपसृत्य) स्वामिन् विश्वंभरावल्लभ प्रतापरुद्र

सर्वाशीःफलविश्रमैकवसतेः किं वा तवाशास्महे
यद्वा विश्वविभौ स्वयंभुवि शिवे नस्तन्वतामाशिषः ।
किं चित्रं स विभुर्भवानपि समो गौरीश्रियोर्वल्लभा-
वाचन्द्रार्कमिमां क्षमां कृतयशोरक्षौ युवां रक्षताम् ॥

मन्त्रिणः—स्वामिन्नेते स्वायंभुवाः ।

(राजा सादरं प्रणमति)

अन्ये—(सहर्षातिशयमग्रतः स्थित्वा) महाराज काकतीश्वर

यस्त्वद्गोत्रमहत्तरस्य जगतां त्रातुः स्वयंभूविभो-
स्तत्तादृक्चरिताद्भुतैर्महिमभिः स्वीयैर्द्वितीयोऽभवत् ।
देवोऽसौ गणपेश्वरः प्रतिकलं स्फारप्रसादोन्मुखो
नप्तुस्ते कुलमण्डनस्य महतीं पुष्णातु राज्यश्रियम् ॥ २१ ॥

पुरो०—राजन्नेते गणपतीश्वरसूरयः ।

भागधेयविभूतयो भाग्यसंपदः । एवंरूपाः वीररुद्ररूपाः । विवर्तन्ते परिणमन्ति । **वर इति** । अत्र वसुन्धरावीररुद्रयोर्वधूवरयोः स्वयंभूदेवः स्वयमेव संधातेति अनुरूपघटनाद्भुतामिति भावः । अथ स्वयंभूदेवे विदुषामाशीर्वादमाह । **स्वामिन्निति** । सर्वाशीःफलानामैश्वर्यादीनां विश्रमेणासंकोचेनैकवसतेर्मुख्याधारस्य सर्वाणि श्रेयांसि प्राप्तवतस्तवाशास्यं नास्तीत्यर्थः । तथाप्यवाप्तसमस्तकामे स्वयंभुवि शिवेऽपि देवस्यानन्तभोगोऽस्त्वित्येवमाशिषः प्रयुञ्जानानामस्माकं तादृशे त्वय्यपि नैतदाश्चर्यमित्याह । **यद्वेति** । आशीर्वादप्रकारमाह । **स विभुरिति** । पुरा खलु काकतीयानां पूर्वो गणपतिमहाराजः स्वनामाङ्कितं गणपेश्वरं नाम महेश्वरं प्रतिष्ठाप्य तस्य स्वकुलदेवतया स्वयंभूदेवेन समं नानाविधवैभवं विधाय तत्र विद्वांसो बहवः स्थापिताः । तेषामाशीर्वादमाह । **महाराजेति** । यो गणपेश्वरस्तत्तादृक्चरितैरभिलषितप्रदानादिभिरद्भुतैः स्वीयैर्महिमभिः सामर्थ्यैस्त्वद्गोत्रमहत्तरस्य त्वत्कुलदेवतायाः स्वयंभूदेवस्य द्वितीयोऽभवत् । द्वावपि देवौ काकतिकुलयोगक्षेमधुरीणावित्यर्थः । असौ देवः । प्रतिकलं प्रतिक्षणम् । स्फारस्य प्रभूतस्य प्रसादस्यो-

(राजा सादरं नमस्करोति)

अपरे—(सप्रश्रयप्रमोदम्) स्वामिंस्त्रिलिङ्गदेशपरमेश्वर

यैर्देशस्त्रिभिरेष याति महतीं ख्यातिं त्रिलिङ्गाख्यया
येषां काकतिराजकीर्तिविभवैः कैलासशैलाः कृताः ।
ते देवाः प्रसरत्प्रसादमधुराः श्रीशैलकालेश्वर-
द्राक्षारामनिवासिनः प्रतिदिनं त्वच्छ्रेयसे जाग्रतु ॥ २२ ॥

पुरो०—(सोल्लासम्) राजन्नेकशिलानगरवासिनो महाद्विजास्त्वेते ।

(राजा यथोचितं वन्दते)

मन्त्रिणः—साधीयान् आशीर्वादक्रमः (इति यथोचितं सर्वानुपवेशयन्ति)

पुरो०—(सोल्लासम्) राजन्नेकशिलानगरीवल्लभ

साहस्रांशवमैन्दवं च महती ये द्वे कुले निर्मिते
ते जाते लघुनी गुणैर्विजयिनि श्रीकाकतीयान्वये ।
भूपालेषु भवत्प्रतापयशसोः पूर्णार्कचन्द्रश्रियोः
प्राप्यानुग्रहमूर्जितेषु पुनरप्येते लभेते स्थितिम् ॥ २३ ॥

(राजा सर्वान् पश्यति) (पुरोधसो यथार्हं सर्वानुपवेशयन्ति)

प्रकृतयः—विजयतां विजयतां प्रतापरुद्रमहाराजः ।

न्मुखः सन् राज्ञो देवस्य चाभेदोपचाराद्वीररुद्रस्य नप्तृत्वव्यवहारः । तस्य ते राज्यश्रियं पुष्णात्विति संबन्धः । अथ नगरवासिनां विदुषामाशीर्वादमाह । **यैरिति** । त्रयो लिङ्गरूपाः श्रीशैलनाथादयो देवा यस्मिन् देशे स त्रिलिङ्गोऽन्ध्रदेश इत्यर्थः । **द्राक्षारामेति** । तत्रत्यानामारामाणां तद्भूयिष्ठत्वादिति प्रौढोक्तिः । वस्तुतस्तु दक्षसंबन्धित्वात् द्राक्षाराम इति तन्नाम । तदुक्तं स्कान्दपुराणे भीमेश्वरखण्डे 'दक्षस्यारामभूमित्वात् द्राक्षारामोऽभिधीयते' इति । **साहस्रेति** । निर्मिते ब्रह्मणेति शेषः । लघुनी जाते निःसारे अभूताम् । अधुना भवत्प्रतापयशसोः पूर्णार्कचन्द्रश्रियोः सतोः भूपालेष्वनुग्रहं प्राप्य प्रबलविरोधे जीवनस्य दुर्लभत्वं मत्वेति भावः । ऊर्जितेषु समृद्धेषु सत्सु । तत्समभिव्याहारादेते सोमसूर्यकुले पुनरपि स्थितिं प्रतिष्ठां लभेते । महदनुग्रहस्य किमसाध्यमिति भावः ।

भूपाः सन्तु चिराय संश्रृणुमहे भास्वत्कुलालंकृती
रामोऽयं न जगाम लोचनपथं तेनैव खिन्ना वयम् ।
अद्य त्वां वरवीररुद्रनृपते तस्यावतारान्तरं
वीक्ष्यैवं चरितार्थतां सुमहतीमिहाय गाहामहे ॥ २४ ॥

मन्त्रिणः—स्वामिन् सांप्रतं यथार्हमर्हणया माननीयाः पौराणां श्रेणयः।

राजा—(सानन्दौदार्यम्)

जागर्तु राजशब्दोऽयं ममैवाज्ञाफलैकभूः ।
राज्योपभोगविभवः सर्वसाधारणो हि नः ॥ २५ ॥

सर्वे—(सप्रमोदम्) सदृशोऽयं प्रसादः काकतीयकुलतिलकस्य भवतः।

राजा—प्रसीदतु भगवान् स्वयंभूदेवः (इति पुरोहितावर्जितकनककलशसलिलधारापुरःसरं सकलभोगपुरस्सरान् ग्रामान् सप्रश्रयादरसत्कारं विप्रसात् करोति । अन्येषामपि नगरवासिनां यथाप्रभावं संभावनामाचरति)

भूपा इति । सन्तु नाम भूपाः किं तैरसर्वगुणाढ्यैरिति वाक्यशेषः । न चात्र विप्रतिपत्तिरित्याह । **चिराय संश्रृणुमहे इति** । 'समो गम्यृच्छि—' इत्यादिनात्मनेपदम् । सर्वगुणाढ्योऽपि रामो न लोचनगोचरं गत इति खेदो रामावतारस्य तव दर्शनान्निवृत्त इति धन्यतामनुभवाम इत्याह । **भास्वदिति**। अर्हणया पूजया । **जागर्त्विति** । आज्ञा प्रभुशक्तिः निग्रहानुग्रहादिसामर्थ्यमित्यर्थः । तत्फलस्यानुग्रहादेरेकभूर्मुख्यानिवासः राज्ञ एवाज्ञाश्रयत्वादिति भावः। तदुक्तं मानसोल्लासे 'अनुग्रहे निग्रहे च दाने चादानकर्मणि । प्रवृत्तौ च निवृत्तौ च ग्रहणे मोक्षणे तथा ॥ स्वयं समर्थो यः सोऽयं राजा साज्ञा निरर्गला ॥' इति। एवशब्दो भिन्नक्रमः । ममायं राजशब्द एव जागर्त्विति संबन्धः । राज्ञः कर्म राज्यम् । पुरोहितादित्वाद्यत्प्रत्ययः । आज्ञामात्रमेव मे भूयादनुभवः पुनरस्माकं सर्वेषामिति वाक्यार्थः । अथ पृथिव्यादिदानमाह । **राजेति** । प्रसीदतु भगवानिति परमेश्वरप्रीणनार्थत्वाद्विमलं नाम चतुर्थमिदं दानमिति द्रष्टव्यम् । यथाह व्यासः 'ईश्वरप्रीणनार्थं यत् ब्रह्मवित्सु प्रदीयते । चेतसा भक्तियुक्तेन दानं तद्विमलं शिवम् ॥' इति । सलिलधारापुरःसरमित्यत्रापस्तम्बः 'सर्वाण्युदकपूर्वाणि दानानि' इति । **सकलभोगेति** । भोगोपकरणसमग्रानित्यर्थः । प्रश्रयो विनयः । आदरः सत्कारः । तत्सहितं सात्त्विकमित्यर्थः । तदुक्तं व्यासेन । 'दातव्यमिति यद्दानं दीयतेऽनुपकारिणे । देशे काले च पात्रे च तद्दानं सात्विकं स्मृतम् ॥' इति । ग्रामान् विप्रसात् ब्राह्मणाधीनान् करोति । 'देये त्रा च' इति सा-

नृपतयः—(सामान्यानुरोधमुत्थाय महार्घाणि गजतुरगरथाभरणविशेषरूपाण्युपायनानि यथावकाशमुपनीय विरचिताञ्जलयः) स्वामिन् काकतीयमहाराज

त्रायस्वेत्यनुवाद एव भुवनत्राणैकबद्धव्रते
त्वद्भृत्या इति सिद्धसाधनमिदं विश्वैकनाथे त्वयि।
त्वद्गर्भे वसतिं गताः स्म इति च स्पष्टार्थमंशे हरेः
कुक्षिस्थाखिलविष्टपस्य सदृशं किं वात्र विज्ञाप्यते॥२६॥

(राजा सप्रसादममात्यानवलोकयति)

मन्त्रिणः—स्वामिन्नेते सोमार्कवंश्या नरपतयो महतीमर्हणामर्हन्ति। तेन स्वेषु स्वेषु पदेषु प्रतिष्ठापनीयाः प्रस्थापनीयाश्च।

राजा—तथा (इति नरपतीन् यथोचितं संभाव्य प्रस्थानमादिशति)

(राजानः सहर्षातिशयं प्रणम्य काकतीश्वरकृपावलोकननिर्वर्तितप्रयाणमङ्गला दिगन्तविहरणोद्यतया तदाज्ञया कृतसाहाय्या निष्क्रान्ताः)

प्रकृतयः—चिरमनुवर्तयितव्या काकतीयनरेश्वरपरिपालनपरिपाटी महाराजेन (इति निष्क्रान्ताः)

पुरो०—(साश्चर्यप्रत्यभिज्ञानम्)

चिह्नान्यस्य पदाब्जयोः पिशुनयन्त्युर्वीश्वरोपास्यतां
पाणी सूचयतः सचापकुलिशावुद्वाहलीलां भुवः।

तिप्रत्ययः॥ **त्रायस्वेति**। भुवनत्राणपरायणे त्वयि भुवनान्तःपातिनामस्माकं परित्राणप्रार्थनं पुनरुक्तमेवेत्यर्थः। **त्वद्भृत्या इति**। विश्वैकनाथे त्वयि विश्वान्तर्वर्तिनामस्माकं भृत्या इति वचनं चर्वितचर्वणमेवेत्यर्थः। त्वद्गर्भ इति स्पष्टार्थम्। व्युत्पन्नं प्रति स्फीतालोकमध्यवर्तिनः कलशस्य कलशोऽयमिति कथनवदिति भावः। सदृशमुचितम्। **तदाज्ञया कृतसाहाय्या इति**। तदाज्ञाकरा इत्यर्थः। **चिह्नानीति**। पदाब्जयोश्चिह्नानि मांसलत्वादीनि। उर्वीश्वरोपास्यतां पिशुनयन्ति सूचयन्ति। तदुक्तं सोमेश्वरेण। 'मांसलौ गूढगुल्फौ च कूर्मपृष्ठसमावपि। भवेतां चरणौ यस्य स भवेत् पृथिवीपतिः॥' इति। पाणी सचापकुलिशौ धनुर्वज्ररेखासहितावित्यर्थः। तदप्युक्तम्। 'चक्रासिचापवज्राभा रेखाः कुर्वन्ति भूपतिम्।' इति। शारदपुण्डरीकरुचिनी नेत्रे पुण्डरीकाक्षावतारमाख्यातः कथयतः इति यत् पूर्वोक्तं सिद्धस्य कस्यचिदनागतविदः पुरुषस्य वचनमधुना प्रत्यक्षमीक्षामहे। काकतीश्वरकुलवासनया वासितया कुल-

नेत्रे शारदपुण्डरीकरुचिनी लीलावतारं हरे-
राख्यातस्तदितीह सिद्धवचनं प्रत्यक्षमीक्षामहे ॥ २७ ॥

राजा—(सविनयव्रीडम्) किमसाध्यं स्वयंभूदेवमूर्त्यन्तराणां भूदेवतानां भवतामनुग्रहस्य ।

पुरो०—(सादरम्) महाराज काकतीश्वरकुलवासनावासितया भवदुपासनया परं प्रसेदिवान् परःसहस्रप्रसादोन्मुखः स्वयंभूनाथः किं ते भूयः प्रियमुपकरोतु ।

एषा वाक्यार्थसमाप्तिरूपा संहृतिः ।

राजा—(सप्रणामादरम्) काकतीयराज्यधुरायामवहितमेव स्वयंभूदेवेन । तथापीदमस्तु ।

भूरस्तु संपन्नसमस्तसस्या भूदेवताः पूर्णमनोरथाश्च ।
भूपाश्च धर्मप्रवणैकचित्ताः सर्वे जनाः सन्तु निरामयाश्च ॥

एषा शुभशंसनरूपा प्रशस्तिः ।

(इति निष्क्रान्ताः सर्वे)

इति नाटकप्रकरणे प्रतापरुद्रराज्याभिषेको नाम पञ्चमोऽङ्कः ।

एवं साङ्गं नाटकमुदाहृतम् ।

इति श्रीविद्यानाथकृतौ प्रतापरुद्रयशोभूषणेऽलंकारशास्त्रे
नाटकप्रकरणं समाप्तम् ।

धर्मत्वेन प्राप्तयेत्यर्थः । भवदुपासनया परं प्रसेदिवानतिप्रसन्नः । अत एव परे सहस्रात् परःसहस्राः । 'पञ्चमी—' इति योगविभागात् समासः । राजदन्तादित्वात् सहस्रशब्दस्य परनिपाते पारस्करादित्वात् सुडागमः । तस्याविभक्तित्वात् विसर्जनीयाभावात् सत्वमेवेति दशटीकासर्वस्वकारः । 'परश्शताद्यास्ते येषां परा संख्या शतादिकात्' इत्यमरः । तावतां प्रसादानामुन्मुखः स्वयंभूनाथः । प्रशस्तिसंज्ञकं मङ्गळमाह । **भूरस्त्विति** । सर्वमन्यत् सुगमम् ।

इति नाटकप्रकरणे पञ्चमोऽङ्कः ।

इति पदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलचलमल्लिनाथ-
सूरिसूनुना विश्वजनीनविद्यस्य विद्वन्मणेः पेद्दयार्यस्यानुजेन
कुमारस्वामिसोमपीथिना विरचिते प्रतापरुद्रीयव्याख्याने
रत्नापणाख्याने नाटकनिरूपणं नाम
तृतीयं प्रकरणम् ॥

अथ रसप्रकरणम् ।

अथ सर्वेषां प्रबन्धानां जीवितभूतस्य रसस्य स्वरूपं निरूप्यते ॥

*विभावानुभावसात्त्विकव्यभिचारिसामग्रीसमुल्लासितस्थायिभावो रसः ।

दृश्यश्राव्यभेदेन द्विविधा अपि प्रबन्धा निरूपिताः । तेषामात्मभूतस्य रसस्य स्वरूपनिरूपणं प्रतिजानीते । **अथेति** । रससामान्यलक्षणमाह । **विभावेति** । वक्ष्यमाणलक्षणा विभावादय एव सामग्री तया सरसकाव्यसं-

* 'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः' इति भरतसूत्रम् । स्थायिनां विभावैः ललनादिरूपैरालम्बनकारणैः उद्यानादिरूपैरुद्दीपनकारणैः, अनुभावैः कटाक्षभुजोत्क्षेपप्रभृतिभिः कार्यैः, व्यभिचारिभिर्निर्वेदादिरूपैस्सहकारिभिश्च संयोगात् क्रमेणोत्पाद्योत्पादकभावरूपात् गम्यगमकभावरूपात् पोष्यपोषकभावरूपाच्च संबन्धात् रसस्य निष्पत्तिः क्रमेणोत्पत्तिरभिव्यक्तिः पुष्टिश्च भवतीत्यर्थः । तथाहि विभावैरालम्बनोद्दीपनकारणैः रत्यादिको भावो जनितः, अनुभावैः कार्यैः प्रतीतियोग्यः कृतः, व्यभिचारिभिः सहकारिभिरुपचितो मुख्यया वृत्त्या रामादावनुकार्ये, तद्रूपतानुसंधानान्नर्तकेऽपि प्रतीयमानो रसः । यथा असत्यपि सर्पे सर्पतयावलोकिताद्दाम्नोऽपि भीतिरुदेति तथा सीताविषयिणी अनुरागरूपा रामरतिरविद्यमानापि नर्तके नाट्यनैपुण्येन तस्मिन् स्थितेव प्रतीयत इति रतेर्व्यञ्जनयाभिव्यक्तिरेव रसनिष्पत्तिरिति भट्टलोल्लटादयः ।

राम एवायं अयमेव राम इति, न रामोऽयमित्यौत्तरकालिके बाधे रामोऽयमिति, रामः स्याद्वा न वायमिति, रामसदृशोऽयमिति च सम्यङ्मिथ्यासंशयसादृश्यप्रतीतिभ्यो विलक्षणया चित्रतुरगादिन्यायेन रामोऽयमिति प्रतिपत्त्या ग्राह्ये नटे "सेयं ममाङ्गेषु सुधारसच्छटा सुपूरकर्पूरशलाकिका दृशोः । मनोरथश्रीर्मनसः शरीरिणी प्राणेश्वरी लोचनगोचरं गता ॥ दैवादहमत्र तया चपलायतनेत्रया वियुक्तश्च । अविरळविलोलजलदः कालः समुपागतश्चायम् ॥" इत्यादिकाव्यानुसंधानबलात् शिक्षाभ्यासनिर्वर्तितस्वकार्यप्रकटनेन च नटेनैव प्रकाशितैः कारणकार्यसहकारिभिः कृत्रिमैरपि तथानभिमन्यमानैः विभावादिशब्दव्यपदेश्यैः 'संयोगात्' गम्यगमकभावरूपात् अनुमीयमानोऽपि वस्तुसौन्दर्यबलाद्रसनीयत्वेन अन्यानुमीयमानविलक्षणः स्थायित्वेन संभाव्यमानो रत्यादिर्भावस्तत्रासन्नपि सामाजिकानां वासनया चर्व्यमाणो रसः । यथा कुज्झटिकाकुलिते देशेऽसतोऽपि धूमस्याभिमानात् धूमनियतस्य वह्नेरनुमानम् तथा नटेनैव ममैवैते विभावादयः इति प्रकाशितैः तत्रासद्भिरपि विभावादिभिः तन्नियता रतिरनुमी-

गृहीतया निपुणनटप्रदर्शितया वा सामाजिकभाव्यमानया समुल्लासित आस्वाद्यमानो निर्भरानन्दः संविद्रूपतां नीयमानः सन्नित्यर्थः । तदुक्तं भावप्रकाशे । 'प्रकाशानन्दचिद्रूपां रसतां प्रतिपद्यते । प्रकृष्यमाणो यो भावः स स्थायीति निगद्यते ॥' इति । एवंविधः सामाजिकनिष्ठो रत्यादिस्थायिभावो रस्यते स्वाद्यत इति व्युत्पत्त्या रस इत्युच्यते । तदुक्तम् । 'रसतेः स्वादनार्थत्वाद्रस्यन्त इति ते

यते । अनुमानाकारस्तु—रामोऽयं सीताविषयकरतिमान् सीताद्यात्मकविभावादिसंबन्धित्वात्, यन्नैवं तन्नैवं यथाहम्—इति । न च रतिसाक्षात्कार एव चमत्कारकारी न त्वनुमितिरपीति वाच्यम्, अनुमीयमानाया अपि रतेः निजसौन्दर्यबलाद्रसनीयत्वेनानुमेयान्तरविलक्षणत्वात् । न चानुमितेः क्षणिकत्वाद्रसस्य क्षणिकत्वापत्तिरिति वाच्यम् अनुमित्सयानुमितौ साध्यसिद्धेरप्रतिबन्धकत्वात् । तादृशानुमित्साधारा च सामाजिकसमवेतवासनैवेति कल्प्यते—इति श्रीशङ्कुकादयः ॥

भट्टनायकास्तु—काव्यस्याभिधाव्यापारवत् काव्यनाट्ययोस्ताद्विलक्षणं भावुकत्वभोजकत्वव्यापारद्वयमस्ति । काव्यार्थबोधोत्तरमेव तत्राद्येन भावुकत्वव्यापारेण विभावादिरूपसीतादयो रामसंबन्धिनी रतिश्च सीतात्वरामत्वसंबन्धांशमपहाय सामान्यतः कामिनीत्वरतित्वादिनैवोपस्थाप्यते । साधारणीकृतविभावादिसहकृतेन च भोजकत्वव्यापारेण रतिरास्वाद्यत इति रसास्वाद एव रसनिष्पत्तिरित्याहुः ॥

अभिनवगुप्तपादास्तु—लोके प्रमदादिभिः स्थाय्यनुमानेऽभ्यासपाटववतां काव्ये नाट्ये च तैरेव कारणत्वादिपरिहारेण विभावनादिव्यापारवत्त्वात् अलौकिकविभावादिशब्दव्यवहार्यैः ममैवैते शत्रोरेवैते तटस्थस्यैवैते न ममैवैते न शत्रोरेवैते न तटस्थस्यैवैते इति संबन्धविशेषस्वीकारपरिहारनियमानध्यवसायात् साधारण्येन प्रतीतैः अभिव्यक्तः सामाजिकानां वासनात्मतया स्थितः स्थायी इत्यादिको नियतप्रमातृगतत्वेन स्थितोऽपि साधारणोपायबलात्तत्कालविगलितपरिमितप्रमातृभाववशोन्मिषितवेद्यान्तरसंपर्कशून्यापरिमितभावेन प्रमात्रा सकलसहृदयसंवादभाजा साधारण्येन स्वाकार इवाभिन्नोऽपि गोचरीकृतश्चर्व्यमाणतैकप्राणः पुर इव परिस्फुरन्, हृदयमिव प्रविशन्, सर्वाङ्गीणमिवालिङ्गन्, अन्यत्सर्वमिव तिरोदधत्, ब्रह्मास्वादमिवानुभावयन् अलौकिकचमत्कारकारी शृङ्गारादिको रसः—इति ।

नव्यास्तु—काव्ये नाट्ये च कविना नटेन च प्रकाशितेषु विभावादिषु व्यञ्जनव्यापारेण दुष्यन्तादौ शकुन्तलादिरतौ गृहीतायामनन्तरं च सहृदयतोल्लसितस्य भावनाविशेषरूपस्य दोषस्य महिम्ना कल्पितदुष्यन्तत्वावच्छादिते स्वात्मन्यज्ञानावच्छिन्ने शुक्तिकाशकल इव रजतखण्डः समुत्पद्यमानोऽनिर्वचनीयः साक्षिभास्यशकुन्तलादिविषयकरत्यादिरेव रसः इति ॥

तथा चोक्तं दशरूपके

'विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः ।
आनीयमानः स्वादुत्वं स्थायी भावो रसः स्मृतः ॥' इति ।

भावस्य स्थायित्वं नाम सजातीयविजातीयानभिभूततया

रसाः ।' इति । उक्तार्थे वृद्धसंमतिमाह । **विभावैरिति** । व्यञ्जनादिसंबन्धादन्नस्येव विभावादिसमाश्रयणेन स्थायिभावस्यापि स्वादुत्वमित्यर्थः । तदुक्तम् । 'व्यञ्जनौषधिसंयोगो यथान्नं स्वादुतां नयेत् । एवं नयन्ति रसतामितरे स्थायिनं श्रिताः ॥' इति । अयं च रसोऽनुकार्ये रामादावुत्पन्नो रामाद्यभेदभावनया नटे प्रतीयत इत्युत्पत्तिवादिनो भट्टलोल्लटादयः । तादृशे नटे विभावादिभिरनुमितः सामाजिकैश्चर्व्यत इत्यनुमितिवादी श्रीशङ्कुकः । नटादिगतत्वपरिहारेण साधारणतयानुसंधीयमानः प्रकाशानन्दसंविद्रूपेण भोगापरनाम्ना भावुकव्यापारेण भुज्यत इति भुक्तिवादी भट्टनायकः । वक्ष्यमाणप्रकारेण सामाजिकाश्रयोऽभिव्यज्यत इत्यभिनवगुप्तादयः । अयमेव पक्षो यथायोगं पक्षान्तरनिराकरणपूर्वमुत्तरत्र सिद्धान्तीकरिष्यते । अथ स्थायिभावस्य लक्षणमाह । **भावस्येति** । इदमत्रानुसंधेयम् । काव्येनाभिनयेन वा निवेद्यमानरामादिसुखदुःखाद्यनुभवजनितवासनारूपः संस्कारापरपर्यायः सामाजिकमनोविकारो भावः । तदुक्तम् । 'सुखदुःखादिभिर्भावैर्भावस्तद्भावभावनम्' इति । तस्य भावुकस्य भावश्चित्तं तस्य भावनं वासितत्वं तद्भावभावनम् । स तावत् द्विविधः । सन्निहितो व्यवहितश्चेति । तत्राद्यः पटं प्रति तन्तुवद्रसं प्रति आकारमात्रव्यवहितः स्थायिभाव इत्युच्यते। तस्य साक्षाद्रसभावप्रतिपादनात् । तदुक्तम् । 'प्रकृष्यमाणो यो भावो रसतां प्रतिपद्यते । स एव भावः स्थायीति भरतादिभिरुच्यते ॥' इति । द्वितीयस्तु कुविन्दादिवद्भावान्तरव्यवहितो विभावादिः । तस्य स्थायिद्वारा रसोल्लासकत्वसमर्थनात् । एतेन सामाजिकमनोविकारविशेषोपाधिको ब्रह्मानन्दसब्रह्मचारिणो रसस्य सन्निहितपूर्वावस्थाविशेषः स्थायिभाव इति फलितम् । अत एवोक्तमभियुक्तैः । 'शृङ्गाराद्यनुभवयोग्यतया यदात्मनः सत्त्वं स भावः' इति । न च वस्तुतो भेदमात्रशङ्काकलङ्करहितस्य निरुपाधिकस्य सन्मात्रस्यावस्थासंबन्धः कथमिति शङ्कनीयम् । गगनमध्यमध्यासीनस्य सुधानिधेरुदकाद्युपाधिसंबन्धनिबन्धनचाञ्चल्यादिवदुपपत्तेः । एवंविधस्य भावस्येत्यर्थः । कस्यांचिन्नायिकायामनुरागस्य नायिकान्तरविषयानुरागः सजातीयः । तत्र बीभत्सादिर्विजातीयः। तैरनभिभूततयातिरस्कृतत्वेनाविरुद्धत्वेनेति यावत् । एतच्च बृहत्कथामालतीमाधवादौ द्रष्टव्यम् । यथा लवणोदः स्वानुप्रविष्टं मधुरमपि नादेयमुदकं लवणयत्येवमन्यानप्यात्मनैक्यं नयतः स्थायिभावस्य कुतस्तैः सह विरोधवार्तेति भावः । तदुक्तम् । 'विरुद्धैरविरुद्धैर्वा भावैर्विच्छिद्यते न यः । आत्मभावं नयत्यन्यान् स्थायीव लवणा-

यावदनुभवमवस्थानम् ।

तथा चोक्तं दशरूपके

'सजातीयैर्विजातीयैरतिरस्कृतमूर्तिमान् ।
यावद्रसं वर्तमानः स्थायी भाव उदाहृतः ॥'

अथ रसविशेषाः ।

शृङ्गारहास्यकरुणा रौद्रवीरभयानकाः ।
बीभत्साद्भुतशान्ताश्च रसाः पूर्वैरुदाहृताः ॥

एषां स्थायिभावाः ।

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा ।
जुगुप्साविस्मयशमाः स्थायिभावा नव क्रमात् ॥

अथ विभावः ।

विभावः कथ्यते तत्र रसोत्पादनकारणम् ।
आलम्बनोद्दीपनात्मा स द्विधा परिकीर्त्यते ॥

करः॥' इति। **यावदनुभवमिति**। संस्कारात्मनोऽस्य भावस्य संततचिन्तादिवशेन प्रबोधादुत्पद्यमानो विजातीयप्रत्ययासंवलितः प्रियतमादिस्मृतिसंतानो विभावादिमहिम्ना यावत्तन्मयमिव करोति तावदवस्थानमित्यर्थः । तदुक्तम् । 'अवस्थिताश्चिरं चित्ते संबन्धाच्चानुबन्धिभिः। वर्धिता ये रसात्मानस्ते स्मृताः स्थायिनो बुधैः ॥' इति । 'शृङ्गार एक एव रसः' इति शृङ्गारप्रकाशकारः । 'शान्तवर्जमष्टौ रसाः' इति धनिकादयः । 'शान्तवत्सलसहिता दश' इत्यन्ये । एवमादिविप्रतिपत्तिलब्धन्यूनाधिकसंख्यानिवारणाय रसविभागमाह । **शृङ्गारेति** । पूर्वैरभिनवगुप्ताचार्यादिभिः। अत्र चतुर्वर्गमध्ये सर्वप्राणिसुलभस्य कामस्य सर्वहृदयंगमत्वात् प्रथमं शृङ्गारः । ततस्तज्जन्यत्वेन हास्यः । ततः तद्विरोधित्वात् करुणः। ततस्तन्निमित्तभूतोऽर्थप्रधानो रौद्रः। ततोऽर्थकामयोर्धर्ममूलत्वात् धर्मप्रधानो वीरः। तस्य भीताभयप्रदानसारत्वात्तदनन्तरं भयानकः । ततस्तत्कारणभूतो बीभत्सः। वीराक्षिप्तभयानकाद्यनन्तरं वीररसफलभूतोऽद्भुतः । त्रिवर्गफलकरसानन्तरं मोक्षफलकः शान्तरस इत्येवमुद्देशक्रमोपपत्तिः । अथ रससामग्र्यां विभावस्य विभागं दर्शयन् लक्षणमाह । **विभाव इति** । तत्र विभावादिचतुष्टयमध्य इत्यर्थः । तत्र रसशब्देनात्र लौकिको रत्यादिभावः ओदनं पचतीत्यादिवद् भाविनीं वृत्तिमाश्रित्य व्यवह्रियते । मुख्यरसस्योत्पत्त्यभावात् । एवमुत्तरत्रापि द्रष्टव्यम् । लोके नायकाद्यालम्बनकारणं विशिष्टदेशकालाद्युद्दीपनकारणं च काव्यनाटकादिसुखेन सामाजिकान्तःकरणप्रतिविम्बिततया सामाजिकनिष्ठं सत् आलम्बनविभाव उद्दी-

रससमवायिकारणमालम्बनविभावः । इतरत्कारणजातमुद्दीपनविभावः । स चतुर्विधः । तथा चोक्तं शृङ्गारतिलके ।

‘आलम्बनगुणश्चैव तच्चेष्टा तदलंकृतिः ।
तटस्थश्चेति विज्ञेयश्चतुर्थोद्दीपनक्रमः ॥
आलम्बनगुणो रूपयौवनादिरुदाहृतः ।
तच्चेष्टा यौवनोद्भूतहावभावादिका मताः ॥
नूपुराङ्गदहारादि तदलंकरणं मतम् ।
मलयानिलचन्द्राद्यास्तटस्थाः परिकीर्तिताः ॥’

अथानुभावः ।

कार्यभूतोऽनुभावः स्यात् कटाक्षादिः शरीरजः ।

अथ सात्त्विकभावाः ।

परगतसुखादिभावनया भावितान्तःकरणत्वं सत्त्वं । ततो भवाः सात्त्विकाः ।

पनविभावश्चेति कथ्यत इत्यर्थः । एतच्च विशेषेण काव्यनाटकव्यापारजनितेन भाव्यते ज्ञायत इति विभाव इति व्युत्पत्त्या लभ्यते । तदुक्तम् । ‘ज्ञायमानतया यत्र विभावो भावपोषकृत् ।’ इति । शिष्टमुदाहरणसमये स्पष्टं भविष्यति । अनुभावं लक्षयति । **कार्येति** । ननु कार्यत्वं नाम नियतोत्तरकालभावित्वं । तच्चानुभावस्य किं रसापेक्षया उत स्थाय्यपेक्षया । नाद्यः । विभावैरनुभावैश्चेति करणतृतीयया तस्य पूर्वभावित्वप्रतीतेः । नियतपूर्ववर्तित्वलक्षणकारणविशेषत्वात् करणस्य । न चात्र तृतीयायाः कर्त्राद्यर्थान्तरं संभाव्यते । एवं चानुभावे सति रसो रसे सत्यनुभाव इत्यन्योन्याश्रयप्रसङ्गः स्यादिति । अत एव न द्वितीयः । न हि भावुकमनोऽवस्थायिनः स्थायिनः पूर्वभाविनां *कामिनीकटाक्षभ्रूविक्षेपादीनां तत्कार्यत्वमिति । अतः स्थायित्वयोग्यस्य लौकिकस्य रत्यादेः कार्यभूतो योऽयं कटाक्षादिरभिनयादिद्वारा भावुकमनःप्रतिबिम्बितः सहृदयहृदयस्थितं रत्यादिभावमनुभावयति सोऽनुभाव इत्युच्यत इत्यर्थः । तदुक्तम् । ‘भ्रूविक्षेपकटाक्षादिविकारो हृदयस्थितम् । भावं व्यनक्ति यः सोऽयमनुभाव इतीरितः ॥’ इति । अथ सात्त्विकानामपि कार्यभूतानां कटाक्षादिवत् भावसंसूचनात्मकत्वेनानुभावत्वे सिद्धेऽपि तेषां ब्राह्मणपरिव्राजकन्यायेन पृथगुपादानेऽसाधारणकारणमाह । **परगतेति** । अभिनयादिमुखेनान्यगतसुखदुःखादिभावनायामन्तःकरणस्यात्यन्तानुकूलत्वं सत्त्वमित्यर्थः । प्रत्ययार्थमाह । **तत इति** । सत्त्वेन नि-

---

* कामिनीकटाक्षभुजाक्षेपादीनां इति पाठान्तरम् ।

स्तम्भः प्रलयरोमाञ्चौ स्वेदो वैवर्ण्यवेपथू ।
अश्रु वैस्वर्यमित्यष्टौ सात्त्विकाः परिकीर्तिताः ॥

वृत्ता भावाः सात्त्विका इत्यर्थः । अनेनैवंविधेनैवान्तःकरणेन कटाक्षादयो भाव्यन्त इति तेषामनुभावतैव न सात्त्विकत्वमिति भावः । तदुक्तं भावप्रकाशे 'परस्य सुखदुःखादेरनुभावेन चेतसः । अत्यन्तेनानुकूल्येन येन तद्भावभावनम् ॥ तत् सत्त्वं तेन निर्वृत्ताः सात्त्विका इत्युदीरिताः । अनुभावत्वसामान्ये सत्यप्येषां पृथक्तया ॥ लक्षणं सत्त्वजत्वाद्धि ते च स्तम्भादयः स्मृताः ॥' इति । अत्र तद्भावभावनं नाम तन्मयत्वेनावस्थानम् । तदुक्तम् । 'रामाद्याश्रितदुःखादेरनुभूतेस्तदात्मना। सामाजिकस्य मनसो भावस्तद्भावभावनम् ॥' इति । एवं च विभावादिदर्शनजन्या अनुरागनिर्वेदादिमनोवृत्तयो विभावादितन्मयीभवनरूपेण सत्त्वशब्दाभिधेयेन सामाजिकमनसोऽत्यन्तानुकूल्यजन्येनासाधारणकारणेनावस्थान्तरमापन्नाः स्तम्भादयो भावाः सात्त्विकभावा भवन्ति । ते च स्वकार्यभूतैरत एव सात्त्विकपदप्रतिपाद्यैर्बाह्यैर्जडैर्भौतिकैः शारीरैः स्तम्भादिभिरनुभावैः सूच्यन्ते । तथा च रतिनिर्वेदादिभावा एव सूचिता भवन्तीति फलितम् । तदुक्तमाचार्यहेमचन्द्रेण। 'बाह्यास्तु स्तम्भादयः शरीरधर्मा अनुभावास्ते चान्तरालिकान् भावान् गमयन्तः परमार्थतो रतिनिर्वेदादिगमका इति स्थितम्' इति । एवं च स्थायिसंचारिसङ्घ एव जीवस्य मनोमयावस्थां प्राप्य कार्यकारणरूपेण द्विविधं बाह्यमाभ्यन्तरं च सात्त्विकगुणं संपादयतीति रहस्यम् । केचिदयं मनोमयवर्ती रत्यादिगण; पञ्चभूतात्मकान्नमयक्षोभकतया मनोमयतादात्म्यापन्नं सीदत्यस्मिन् मनोमय इति व्युत्पत्त्या सत्त्वगुणोत्कर्षात् साधुत्वाच्च सत्त्वशब्दाभिधेयं प्राणमयं प्रविष्टः सात्त्विकत्वमनुभवति । तच्च प्राणस्य भूभागानुग्रहे स्तम्भः । जलभागानुग्रहे बाष्पः। तीव्रतेजोऽनुग्रहे स्वेदः। वैपरीत्ये वैवर्ण्यम्। आकाशानुग्रहे प्रलयः। अनिलानुग्रहस्य मन्दमध्यमोत्कृष्टतया त्रैविध्ये क्रमेण रोमाञ्चवेपथुवैस्वर्याणीति वदन्ति । केचित् भावान्तरनैरपेक्ष्येण रसापरोक्षीकरणत्वलक्षणो बलविशेषः सत्त्वं तज्जन्याः सात्त्विका इत्याहुः । अन्ये पुनरन्नमयप्राधान्येनाभिव्यक्तत्वलक्षणसत्त्वजन्यत्वोपाधेः कटाक्षादिसाधारण्येऽपि पङ्कजादिवद्योगरूढत्वेन स्तम्भादय एव सात्त्विका इत्याहुः । केचित्तु कणादशास्त्रप्रसिद्ध्या द्रव्यादित्रयवाचकार्थशब्दवदलंकारशास्त्रप्रसिद्ध्या स्तम्भादिष्वेव सात्त्विकव्यवहार इति वर्णयन्ति । एवं प्राचामालंकारिकाणामनेकधा पारिप्लवं वर्तते । तद्यथा तथा वास्तु न तत्रास्माकमाग्रहः । किं तु स्तम्भादीनामनुभावान्तर्भावेऽपि केनचिद्विशेषेण पार्थक्यमित्येतदेवास्माभिरपेक्ष्यत इति । विशेषान्तराणि नरहरिसूरिविरचिते रसनिरूपणे द्रष्टव्यानि । विस्तरभीरुभिरस्माभिरुपरम्यते । 'विशेषादाभिमुख्येन चरन्तो व्यभिचारिणः' इत्युक्तदिशा व्यभिचारिशब्दव्यु-

अथ व्यभिचारिभावाः ।

निर्वेदग्लानिशङ्काख्यास्तथासूयामदश्रमाः ।
आलस्यं चैव दैन्यं च चिन्ता मोहः स्मृतिर्धृतिः ॥
व्रीडा चपलता हर्ष आवेगो जडता तथा ।
गर्वो विषाद औत्सुक्यं निद्रापस्मार एव च ॥
सुप्तिर्विबोधोऽमर्षश्चाप्यवहित्थमथोग्रता ।
मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च ॥
त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः ।
त्रयस्त्रिंशदमी भावा रसस्य सहकारिणः ॥

तथा चोक्तं काव्यप्रकाशे ।

'कारणान्यथ कार्याणि सहकारीणि यानि च ।
रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः ॥
विभावाश्चानुभावाश्च कथ्यन्ते व्यभिचारिणः ॥' इति ।

तपत्त्यैव निर्वेदादीनां सामान्यलक्षणं सिद्धमिति मत्वा तेषां केवलं सामान्यतो विशेषतश्चोद्देशमाह । **अथेति । रसस्य सहकारिण इति** । कल्लोलाः सागरस्येव रत्यादेर्लौकिकस्य परिपोषकतया सहकारिणः सन्तो नाट्यादौ व्यभिचारिण इत्युच्यन्त इत्यर्थः । तदुक्तम् । 'मज्जन्तश्च निमज्जन्तः कल्लोलास्ते यथार्णवे । तस्योत्कर्षं वितन्वन्ति यान्ति तद्रूपतामपि ॥ तथा स्थायिनि निर्मग्ना ह्युन्मग्ना व्यभिचारिणः । पुष्णन्ति स्थायिनं स्वांश्च तत्र यान्ति रसात्मताम् ॥' इति । उक्तेऽर्थेऽभियुक्तसंवादमाह । **कारणानीति** । स्थायिनः स्थायित्वयोग्यस्येत्यर्थः । अनुभावा उभयेऽपि गृह्यन्ते । ननु चेष्टालक्षणोद्दीपनविभावानां भावहावादीनां शृङ्गारकार्यतयानुभावत्वं प्रतीयते । कटाक्षभ्रूविक्षेपादीनामनुभावानामनुरागजनकत्वेन संभवत्येव विभावत्वम् । उक्तानामुभयेषां कल्लोलायमानतया रसपरिपोषणात् संचारितापि, समस्तसंचारिणामपि चिन्तादीनामनुरागकार्यतयानुभावत्वं, तद्दर्शनश्रवणाभ्यामनुरागातिशयजननाद्विभावत्वं चानुभूयते । तदुक्तं भावप्रकाशे । 'विभावोऽप्यनुभावः स्यादनुभावोऽपि भाववत् । तौ पुनश्चारिणौ स्यातां ते च तौ स्युः परस्परम् ॥' इति । अत्र परस्परशब्देन संचारिणामेव मिथोऽनुभावत्वं चेत्यादि द्रष्टव्यम् । अतः कथं पूर्वोक्ता विभावादिव्यवस्थेति चेत् सत्यम् । कस्याश्चिदनुरागव्यक्तेर्यानि कार्यकारणसहकारीणि तानि तां प्रति तथैव न किंचिदपि साङ्कर्यमस्ति । व्यक्त्यन्तरापेक्षया तस्या एवाकारभेदापेक्षया वान्यथाभावे को विरोधः । यथैकस्य पुत्रापेक्षया पितृत्वं पित्रपेक्षया पुत्रत्वं च

लोके कार्यकारणसहकारिशब्दवाच्या नायिकानायककटाक्षभ्रूविक्षेपनिर्वेदादयः काव्यनाट्ययोस्तु विभावानुभावव्यभिचारिशब्दव्यपदेश्या भवन्ति । शृङ्गारवीररौद्राद्भुतानां लोकोत्तरनायकाश्रयत्वेन परिपोषातिशयः। अत एव शृङ्गारस्य म्लेच्छादिविषयत्वे त्वाभासत्वम् । तथा चोक्तम् ।

व्यवतिष्ठते । अतो विभावादीनामपि प्रतियोगिभेदादिभिः कल्पिताकारान्तराणां साङ्कर्यशङ्कानवकाशाद्विभावादिरूपता नियतैवेति सिद्धम् । एवं च विभावादिसामग्रीसंकोचे सति रसाभासत्वमित्यनुसंधेयम् । ननून्मर्यादं प्रवृत्तेनाङ्गरसेन बाधितः प्रधानरसो रसाभासः । तदुक्तं रसार्णवे । 'अङ्गेनाङ्गी रसः स्वेच्छावृत्तिवर्धितसंपदा । अमात्येनाविनीतेन स्वामीवाभासतां व्रजेत् ॥' इति । अङ्गरसस्य तृतीयांशानुप्रवेशो मर्यादोल्लङ्घनम् । तदुक्तं भावप्रकाशे । 'भागद्वयं प्रविष्टस्य प्रधानस्यैकभागतः । रसानां दृश्यते यत्र तत्स्यादाभासलक्षणम् ॥' इति । तत्र हास्यादिभूयिष्ठाः शृङ्गारादय आभासीभवन्ति । अत्रैतौ संग्रहश्लोकौ । 'हास्यो जुगुप्सा शृङ्गारहास्यौ शोकभयानकौ । भयानको रौद्रवीरौ तथा शृङ्गारविस्मयौ ॥ बीभत्सकरुणौ रौद्रशृङ्गारौ च यथाक्रमम् । शृङ्गारादीन् संप्रविश्य रसाभासान् वितन्वते ॥' इति । यद्यप्येवं नवानामपि रसानामाभासत्वं संभवति तथापि क्वचिद्विशेषमभिव्यक्तुमारभते । **शृङ्गारेति** । शान्तस्याप्युपलक्षणमेतत् । **लोकोत्तरनायकाश्रयत्वेनेति** । धीरोदात्तादिनायकोत्तमविषयत्वेनेत्यर्थः । अत एवोक्तं लोचने । 'धर्मयुद्धवीरप्रधानो धीरोदात्तः । वीररौद्रप्रधानो धीरोद्धतः । वीरशृङ्गारप्रधानो धीरललितः । दानधर्मवीरशान्तप्रधानो धीरशान्त इति चत्वारो नायकाः' इति । अत्र वीररससमानयोगक्षेमत्वादद्भुतोपादानम् । यदाह मुनिः । 'वीरस्य चैव यत् कर्म सोऽद्भुतः परिकीर्तितः' इति । विदग्धजनैकविषयो रसपरिपोषविशेष इति भावः । विपक्षे विरोधमाह । **अत एवेति** । इदमत्रानुसंधेयम् । यत्र विभावादिपरिपूर्तिस्तत्र मुख्यो रसः । तदुक्तं लोचने । 'रसस्तु स एव यो यत्र मुख्यतया विभावानुभावव्यभिचारिसंयोजनोचितस्थायिप्रतिपत्तिकस्य प्रतिपत्तुः स्थाय्यंशे चर्वणप्रयुक्त एवास्वादप्रकर्ष' इति उदाहृतं च तत्रैव । 'कृच्छ्रादूरुयुगं व्यतीत्य सुचिरं भ्रान्त्वा नितम्बस्थले मध्येऽस्यास्त्रिवलीतरङ्गविषमे निष्पन्दतामागता । मद्दृष्टिस्तृषितेव संप्रति शनैरारुह्य तुङ्गौ स्तनौ साकाङ्क्षं मुहुरीक्षते जललवप्रस्यन्दिनी लोचने ॥' इति । अत्र हि नायिकाकारानुवर्ण्यमानस्यात्मप्रतिकृतिपवित्रितचित्रफलकावलोकनात् वत्सराजस्य परस्परास्थाबन्धरूपो रतिस्थायिभावो विभावानुभावसंचारिसंयोजनावशेन चर्वणारूढ इति । एवं च यत्र विभावादिपरिपूर्त्यभावस्तत्रारोपितो रसः । म्लेच्छादौ तथा-

'एकत्रैवानुरागश्चेत्तिर्यङ्म्लेच्छगतोऽपि वा।
योषितो बहुसक्तिश्चेद्रसाभासस्त्रिधा मतः॥' इति

व्यभिचारिभावानामुदयप्रशाम्यदवस्थया, परस्परविरुद्धरसाश्रितयोर्भावयोः स्पर्धया, संबन्धेनान्योन्योपमर्दकतया, बहूनां समावेशेन च चातुर्विध्यम्। तथा चोक्तं दशरूपके

'भावस्य शान्तिरुदयः संधिः शबलता तथा।' इति।

रत्यादिस्थायिभावलक्षणोदहरणानि।

अथ यथाक्रमं स्थायिभावानां स्वरूपमुदाहरणं च।

तत्र संभोगविषय इच्छाविशेषो रतिः।

भूतत्वाद्रसाभासत्वमिति भावः। उक्तार्थे संमतिमाह। **एकत्रेति**। अत्र एवेत्यवधारणेनान्यत्रानुरागात्यन्ताभावः सूच्यते। यथा रावणे सीतायाः। तेन स्त्रीपुंसयोरेकत्रानुरागे जातेऽन्यत्रानुरागप्रागभावे च विभावादिसंपूर्तिसंभावनया नैव रसाभासत्वमिति भावः। अन्यथा प्रथमजातानुरागे वत्सराजे जातानुरागाया रत्नावल्याः पूर्वानुरागस्याभासत्वप्रसङ्गात्। म्लेच्छास्तिरश्चामनाघ्रातवैदग्ध्यगन्धानामननुभूतविभावादिभावानामभिवदनव्यापारमात्रविलक्षणाः सहोदराः। अतस्तेषां द्वयानामपि समानयोगक्षेमत्वात् सहोपादानम्। अत एव शृङ्गाराभासस्य त्रैविध्योक्तिरपि। बहुसक्तिरनेकत्रानुरागः। अत्रापि मुखान्तरेण समानुरागफलाभावात् विभावाद्यपरिपूर्तिरिति भावः। पुंसोऽप्यनेकनायिकानुरागे रसाभासत्वमिति केचित्। तर्हि तन्मते दक्षिणनायकानुरागस्य सर्वसंप्रतिपन्नरसभावस्याभासत्वप्रसङ्ग इति चेन्मैवम्। तस्याप्येकस्यामेव गाढानुरागत्वात्। अन्यत्र तु क्वचिन्मध्यत्वं क्वचिन्मन्दत्वमिति निश्चितम्। 'तुल्योऽनेकत्र दक्षिणः' इति लक्षणम्। पुनरनेकासु नायिकास्वनुवृत्तिमात्रपरत्वेन तुल्यत्वपरमिति द्रष्टव्यम्। अत्र पक्षद्वयेऽपि क्रमेण समानुरागाभावादविवेकादनेकानुरागाच्च रतेरारोपितत्वेन हास्यास्पदत्वात्तन्निबन्धनस्त्रिविधोऽयमाभास इति विवेकः। नन्वारोपितरसाभावात् तिर्यगादिषु कथं चमत्कार इति चेत् शुक्तिकारजतं गृहीत्वा प्रमोदमानं पृच्छ। पश्चात्कालीनबाधस्तु प्रपञ्चसत्यत्वाभिमानसमयसांसारिकव्यवहारस्येव तादात्मिकचमत्कारस्य न विरोधीति रसाभासोऽप्युपादेय एवेत्यलं प्रपञ्चेन। विभावादिमध्ये व्यभिचारिभावानामुदयाद्युपाधिचतुष्टयजन्यचमत्कारविशेषनिबन्धनं चातुर्विध्यमाह। **व्यभिचारीति**। **अन्योन्योपमर्दकतयेति**। स्वस्वबाध्यानां बाधकत्वेनेत्यर्थो वक्ष्यमाणोदाहरणानुसारेण कल्पनीयः। रसाभासादीनामुदाहरणमुत्तरत्र भविष्यति। अथ स्थायिभावेषूद्देशक्रमानुसारेण रतिं लक्षयति। **तत्रेति**। यूनो-

यथा

श्रृङ्गारैकरसः स्मरोऽस्तु जगदानन्दैकनिष्यन्दभू-
रिन्दुस्तिष्ठतु विभ्रमैकवसतिर्जागर्तु पुष्पाकरः ।
सन्त्वन्येऽपि गुणप्रसादितदिशः किं तैरशेषोन्नतो
जातः काकतिवल्लभो मम पतिः कामस्य कामोत्सवः ॥

विकृतिदर्शनादिजन्यो मनोविकारो हासः ।

रन्योन्यानन्दजनकं दर्शनालिङ्गनादिकं कर्म संभोगः । तदुक्तं भावप्रकाशे । 'कामोपचारः संभोगः कामः स्त्रीपुंसयोः सुखम् । सुखमानन्दसंभेदः परस्परविमर्दतः ॥ उपचारस्तदानन्दकारकं कर्म कथ्यते ॥' इति । तद्विषय इच्छाविशेषः स्पृहाद्यपरपर्यायः प्रमोदात्मा मनोवृत्तिविशेषो रतिरित्यर्थः। तदुक्तम् । 'सम्पन्नैश्वर्यसुखयोरशेषगुणयुक्तयोः । नवयौवनयोः श्लाघ्यप्रकृत्योः श्रेष्ठरूपयोः ॥ नारीपुरुषयोस्तुल्या परस्परविभाविका । स्पृहाह्वया चित्तवृत्ती रतिरित्यभिधीयते ॥' इति । स्पृहालक्षणमपि तत्रैवोक्तम् । 'आत्मोपभोगकरणं स्पृशन्ती प्रियवर्त्मना । या जहातीतरान् भोगान् सा स्पृहेत्यभिधीयते ॥' इति । उदाहरति । **शृङ्गारेति** । जगतामानन्दस्यानन्दहेतोरेकस्याद्वितीयस्य निष्यन्दस्य मृष्टांशस्य भूः स्थानं गुणैराभिरूप्यादिभिः प्रसादिताः प्रसन्नीकृताः दृशो लोकदृष्टयो यैस्ते तथोक्ताः । गुणप्रसाधितदिश इति पाठे गुणालंकृतदिशो दिगन्तविश्रान्तगुणा इत्यर्थः । अन्ये गन्धर्वगीर्वाणादयः । तैरेकैकगुणाश्रयैः । किं न किमपि साध्यमित्यर्थः । अशेषोन्नतः सर्वाधिकः । अत्र कामस्यापि कामोत्सवः काकतिवल्लभो मम प्रेयानभूदिति वागारम्भेण स्वानुरक्तप्रियलाभजनितहर्षानुभावेन कस्याश्चिन्नायिकाया आलम्बनविभावभूताया प्रमोदात्मा रतिरभिव्यज्यते। इयं च निसर्गादिनिमित्तभेदात् सप्तविधा । तत्र मदनेन्दुवसन्तादिवैराग्येण प्रियविषयप्रेम्णा चेयमभिमानमूलेति वेदितव्यम् । इदमेव मम प्रियं नान्यदिति प्रत्यय एवाभिमान इत्याहुः । भेदान्तरोदाहरणप्रपञ्चस्तु रसार्णवे द्रष्टव्यः । हासं लक्षयति । **विकृतीति** । आत्मनः परस्य वा ये वेषभाषाकारविकारविरुद्धालंकारास्पष्टभाषणकुब्जत्वादयः तद्दर्शनश्रवणजन्यो मनोविकारो हासः । 'स्वनहसोर्वा' इति विकल्पात् घञ् प्रत्ययः । अयमेव बाष्पाद्यनुभावो निद्रालस्यादिसहकृतश्चर्व्यमाणो हासे साधुरिति व्युत्पत्त्या हास्यो भवति । स चोत्तमादिषु त्रिष्वेकैकयुगलक्रमेण षड्विधः । तदुक्तम् । 'विकृताकृतिवाग्वेषैरात्मनो वा परस्य वा। हासः स्यात् परिपोषेऽस्य हास्यस्त्रिप्रकृतिः स्मृतः ॥' इति । 'स्मितमिह विकसन्नयनं किंचिल्लक्ष्यद्विजं हसितम् । मधुरस्वनं विहसितं साङ्गशिरःकम्पमुद्धसितम्॥ अपहसितं सास्राक्षं विक्षिप्ताङ्गं भवत्यतिहसितम् । द्वे द्वे हसिते चैषां ज्येष्ठे मध्येऽधमे क्रमशः ॥' इति । उत्तमस्य स्वकीयपरकीयविकारदर्शनात् क्रमेण स्मितह-

यथा

बिभ्राणान् कबरीर्धृताञ्जनदृशः कृत्वा कुचौ कृत्रिमौ
स्त्रीवेषान्निशि काकतीन्द्रनगरे प्रच्छन्नरूपान् नृपान् ।
दृष्ट्वा क्षौममपास्य वक्षसि कुचावाकृष्य नीवीस्पृशो
ही ही कष्टमिति त्यजन्ति विपणिश्रेणीषु धूर्ता विटाः ॥

इष्टजनवियोगादिनात्मनि दुःखातिभूमिः शोकः ।

यथा

धातर्निष्करुणोऽसि शिक्षयसि किं वन्यां शरीरस्थितिं
तत्तादृग्विभवा गृहाः क नु गताः स्थानं मरुः कल्पितम् ।
हा नाथाः पतिताः प्रतापनृपतेः क्रोधार्चिषीति द्विष-
द्योषाणां तदनूपमश्रुभिरहो जातं स्थलं मारवम् ॥

शत्रुकृतापचारेण मनःप्रज्वलनं क्रोधः ।

यथा

सिते । मध्यमस्य विहसितोद्धसिते । अधमस्यापहसितातिहसिते इति । तत्राध-माश्रयमन्यदीयवेषविकारजन्यं हासमुदाहरति । **बिभ्राणानिति** । कबरीः स्त्रीजनोचितान् केशपाशान् । 'जानपद—' इत्यादिना ङीष् । अत्र बन्दिग्राहं गृहीतानत एव पलायनपरतया स्त्रीवेषधारिणो वैरिभूपतीन् नीवीप्रदेशादिस्पर्शनेन पुमांस इति जानतां धूर्तविटानामालम्बनविभावानां परुषस्वनस्य हासस्य हीहीत्यनुकरणम् । शोकं लक्षयति । **इष्टेति** । आदिग्रहणादनिष्टप्राप्तिर्गृह्यते । दुःखातिभूमिः दुःखप्रकर्षः । आद्यं शोकमुदाहरति । **धातरिति** । निष्करुणो नृशंसः । वन्यां फलमूलादिरूपाम् । तत्तादृग्विभवा नानाविधभोगोपकरणपरिपूर्णा इत्यर्थः । **स्थानं मरुरिति** । पिपासायां यत्रोदकमपि दुर्लभमिति भावः । महारण्ये वा भर्तृभिः सह मृगमिथुनादिवद्यथाकथंचिद्वर्तामह इति विचारितेऽपि कथं वा कियान् वा नो दैवदुर्विपाकः । ते भर्तारोऽपि तत्क्रोधवह्नौ शलभतामलभन्तेति परिदेवितं हेतिशब्देन सूचयन् आह । **हा नाथा इति** । अनूपं जलप्रायम् । अत्र शत्रुस्त्रीणामालम्बनविभावानां भर्तृवियोगराज्यभ्रंशादिजनिता दुःखातिभूमिः दैवोपालम्भसहितेन रोदनेन सूच्यते । अत्रोर्वीविलुण्ठनोरस्ताडनादयोऽनुभावाः । दैन्यमोहचिन्ताविषादादयो व्यभिचारिणश्च विशेषणोपात्ताः करुणतामापादयन्ति । क्रोधं लक्षयति । **शत्रुकृतेति** । शत्रुग्रहणं भृत्यादेरुपलक्षणार्थम् । तत्कृतेनापचारेण वधावज्ञादिना प्रज्वलिता मनोवृत्तिः क्रोध इत्यर्थः । स च त्रिविधः क्रोधः कोपो रोषश्चेति । तदुक्तं भावप्रकाशे । 'क्रोधः कोपश्च

रे रे सेवण कस्तवायमनिदंपूर्वोऽद्य गर्वो महा-
नुत्तीर्णा किल येन गौतमनदी प्राप्तोऽसि मृत्योर्मुखम् ।
एषा काकतिवीररुद्र इति किं नाश्रावि सप्ताक्षरी
प्रक्षुभ्यत्प्रतिपक्षपार्थिवमहाभूतग्रहोच्चाटनी ॥

लोकोत्तरेषु कार्येषु स्थेयान् प्रयत्न उत्साहः ।

यथा

क्षुब्धेष्वब्धिषु संभ्रमात् त्रिभुवनग्रासेच्छया सर्वतः
सन्नद्धेष्वपि पर्वतेषु परितो गण्डोपलान् वर्षितुम् ।
शक्ता एव वयं निवारणविधौ क्षुद्रक्षमाभृज्जये
श्लाघा नः कियतीति काकतिविभोर्गर्जन्ति सैन्ये भटाः ॥

रोषश्चेत्येष भेदस्त्रिधा मतः ।' इति । तत्र वधादिपर्यन्तः क्रूरजनाश्रयः क्रोधः । अभ्यर्थनावधिर्वीरजनाश्रयः कोपः । स्त्रीपुंसयोरन्योन्यविषयः प्रत्यायनपर्यन्तो रोषः । तत्रावज्ञामूलं क्रूरालम्बनं क्रोधमुदाहरति । **रे रे इति** । 'वाक्यादेः—' इत्यादिना कोपे द्विरुक्तिः । अयं पूर्वो यस्यासाविदंपूर्वः । स न भवतीत्यनिदंपूर्वः नूतन इत्यर्थः । अन्यधिक्कारेणात्मोत्कर्षो गर्वः । कुतोऽयं ते महानिदानीमभूतपूर्वो गर्वः प्रादुरभूदित्यर्थः । येन गर्वेण गौतमनद्युत्तीर्णेत्यवज्ञाकथनम् । किलेत्यलीके । तेन वार्तामात्रमेतदिति भावः । तथापि तस्येदंकर्मणः फलमित्याह । **प्राप्त इति** । अवज्ञानिमित्तमाशङ्कते । **एषेति** । अन्यथा भूतग्रहादिकल्पानां वैरिभूपतीनां कल्पान्तकालरुद्रस्यास्मत्स्वामिनः काकतिवीररुद्रस्य नाममात्रमहामन्त्रं निशम्यैव कान्दिशीकचरः कथमद्यैवमुद्युङ्क्ते भवानिति भावः । क्रोधोऽयं विपक्षदर्शनादिविभावः कण्ठगर्जनदन्तघट्टनाद्यनुभावो गर्वामर्षादिव्यभिचारी चर्व्यमाणः सन् रौद्रो भवति । उत्साहं लक्षयति । **लोकेति** । स्थेयानतिस्थिरः । विवक्षितकार्यविषयमौत्सुक्यमेवात्र स्थैर्यमिति भावः । 'अहमेवंविध इत्येवंप्राणत्वेनाभिमानात्मक उत्साहः' इति लोचनकारः । शारदातनयस्तु कार्यमात्रमङ्गीचकार । तदुक्तम् । 'उत्साहः सर्वकृत्येषु सत्वरा मानसी क्रिया । सहजाहार्यभेदेन स द्विधा परिकीर्तितः ॥' इति । उदाहरति । **क्षुब्धेष्विति** । त्रिभुवनग्रासेच्छया कल्पान्तवदिति भावः । क्षुब्धेषु क्षुभितेष्वित्यर्थः । अत्र यद्यपि 'क्षुब्धस्वान्त—' इत्यादिना निपातनान्मन्थमात्रवाची क्षुब्धशब्दः । तथापि क्षुभितार्थत्वं कथंचित्सादृश्यात् कल्पनीयम् । समुद्राणां मन्थयोगवत् कालवैषम्येऽपि क्षोभसंभवात् । अत एवाह वृत्तिकारः । 'कथं क्षुब्धः समुद्रः क्षुब्धा नदीत्येवमादावुपमानाद् भविष्यति' इति ।

रौद्रसंदर्शनादिभिरनर्थाशङ्कनं भयम् ।

यथा

दूरादाकर्ण्य त्रिश्वप्रसृमरमहसो वीररुद्रस्य जैत्र-
प्रस्थानारम्भभेरीनिनदमरिनृपाः पूर्णकर्णज्वरार्ताः ।
आरुह्याद्रीन् विशन्तो गहनमतिमहत् कण्टकाकृष्टकेशा-
स्त्रायध्वं मुञ्चतेति प्रतिनृपतिधिया पादपान् प्रार्थयन्ते ॥

अर्थानां दोषसंदर्शनादिभिर्गर्हणा जुगुप्सा ।

गण्डोपलान् गण्डशैलान् स्थूलोपलानित्यर्थः । अत्र वैरिभूपालविजयविषयः सहजोत्साहः समुद्रसंक्षोभपर्वतसंनाहनिवारणे वयमेव शक्ता इति वागारम्भेण व्यज्यते । अत्रात्मश्लाघान्यधिक्कारादिसंभवाद्धीरोद्धतोऽयं नायकः । तस्य वीररसेऽपि प्राधान्येनानुप्रवेशसंभवात् । तदुक्तं लोचने । 'वीररौद्रप्रधानो धीरोद्धतः' इति । अयमेव प्रतापविनयादिभिर्विभावितः करुणायुद्धादिभिरनुभावितो गर्वहर्षादिभिर्भावितो वीररसो भवति । स च त्रिविधः । यथाह मुनिः । 'दानवीरं युद्धवीरं धर्मवीरं तथैव च । रसवीरमपि प्राह ब्रह्मा त्रिविधसंमतम् ॥' इति । धर्मवीरस्थाने दयावीरमुक्त्वा त्रैविध्यमाह धनिकः । तत्र दानवीरो बलिजामदग्न्यादिः । युद्धवीरो रामादिः । धर्मवीरो युधिष्ठिरादिः । दयावीरो जीमूतवाहनादिः तत्र प्रस्वेदरक्ताक्षत्वाद्यनुभावराहित्ये युद्धवीरः तत्साहित्ये रौद्र इति विवेकः । भयं लक्षयति । **रौद्रेति** । आदिग्रहणाद्रौद्रशब्दश्रवणादयो गृह्यन्ते । तज्जन्यमनर्थाशङ्कनमनश्चाञ्चल्यरूपं भयमित्यर्थः । एतच्च स्त्रीनीचप्रभृतीनां स्वाभाविकमुत्तमानां कृतकमित्याहुर्हेमचन्द्रशारदातनयादयः । सिंहभूपालस्तु सर्वत्र कृतकमेवेति प्रत्यवदत् । अनेकविधमित्यन्ये । तत्र रौद्रश्रवणजन्यं भयमुदाहरति । **दूरादिति** । विश्वप्रसृमरमहसो विश्वव्यापिप्रतापस्य । सरतेः 'सृघस्यदः' इत्यादिना क्मरच्प्रत्ययः । कर्णज्वरार्ताः कर्णव्याधिपीडिताः । बधिरीकृतकर्णा इत्यर्थः । तत्राप्यतिमहत् दुष्प्रवेशं गहनमरण्यं विशन्तः खदिरादिकण्टकाकृष्टकेशाः सन्तः व्याकुलान्तःकरणाः प्रतिपक्षबुद्ध्या पादपान् त्रायध्वमित्यादिभिर्दीनोक्तिभिः प्रार्थयन्ते । अत्र वैरिभूपालसमवेतो भयस्थायिभावो व्यज्यते । अयं च स्वोचितसामग्रीको भयानको भवति । तदुक्तम् । 'विकृतस्वरसत्त्वादेर्भयभावो भयानकः । सर्वाङ्गवेपथुस्वेदशोषवैवर्ण्यलक्षणः ॥ दैन्यसंभ्रमसंमोहत्रासादिस्तत्सहोदरः ॥' इति । जुगुप्सां लक्षयति । **अर्थानामिति** । रुधिरोद्वान्ताद्यहृद्यपदार्थश्रवणदर्शनादिजन्यो मनःसङ्कोचो जुगुप्सेत्यर्थः । अयमेव नासापिधाननिष्ठीवनाद्यनुभावो भयापस्मारादिसहकारी बीभत्सो भवति । स च विभावादिभेदात् क्षोभ उद्वेगश्चेति द्विधा । तदुक्तं भावप्रकाशे । 'क्षोभात्मा रुधिरान्त्रादि-

यथा

विष्वङ्मस्तिष्कपङ्के महति निपतितोच्छूनमातङ्गदेह-
श्रेणीलब्धप्रचाराः प्रवहदुरुवसामज्जरक्तप्रवाहाः ।
राशीभूतास्थिकूटस्थपुटितनिकटा निस्सरद्विस्रगन्धाः
कुर्वन्त्यायोधनोर्व्यो भयमवनिभृतां वीररुद्रेण सृष्टाः ॥

अपूर्वार्थसंदर्शनाच्चित्तविस्तारो विस्मयः ।

यथा

औन्नत्यं महदन्यदेव महितः कोऽप्येष गम्भीरिमा
काप्यन्या सरणिः प्रतापयशसोरन्यैव बाह्वोः प्रथा ।
सर्वं नूतनमेव रुद्रनृपतेर्जाने न तन्निर्मितौ
सामग्री चतुराननेन कियती कीदृक्क्रमा कल्पिता ॥

शमो वैराग्यादिना निर्विकारचित्तत्वम् ।

यथा

दर्शनस्पर्शनादिजः । उद्वेगात्मा क्रमिच्छर्दिपूतिविष्ठादिजो भवेत् ॥' इति । वैराग्याद्युवतिगर्हासिद्धस्तृतीयो वीभत्स इत्याह धनिकः । तत्र क्षोभणं बीभत्समुदाहरति । **विष्वगिति** । महति विष्वङ्मस्तिष्कपङ्के सार्वत्रिकमेदः-कर्दमे पतिताः गन्तुमशक्त्या प्रहारैश्चेति भावः । तथा मृतत्वादुच्छूना विवृद्धाश्च तेषां मातङ्गानां देहश्रेणीषु लब्धः प्रचारो गोमायुप्रभृतीनां यासु तास्तथोक्ताः प्रवहन्तः प्रकर्षेण स्रवन्तः उरवोऽधिकाः वसादीनां वपादीनां प्रवाहाः स्रोतांसि यासु तास्तथोक्ताः । राशीभूतैरस्थिकूटैः कीकससमूहैः स्थपुटिता विकटीकृताः निकटाः प्रान्तदेशा यासु तास्तथोक्ताः । निःसरद्विस्रगन्धाः उद्भवदामगन्धाः । वीररुद्रेण सृष्टा आयोधनोर्व्यो युद्धभूमयः सर्वेषां भयं कुर्वन्ति । विस्मयं लक्षयति । **अपूर्वेति** । लोकसीमातिवृत्तः पदार्थोऽपूर्वार्थः । तद्दर्शनादिजन्यो मनोविस्तारो विस्मय इत्यर्थः । अयमेवाकस्मिकमनोरथलाभालौकिकवस्तुदर्शनादिविभावो नयनविस्तारसाधुवादाद्यनुभावो हर्षावेगादिसहकृतोऽद्भुतः । उदाहरति । **औन्नत्यमिति** । व्याख्यातचरमेतत् काव्यप्रकरणे संख्या-२१ । अत्र किमन्यशब्दाभ्यामलौकिकत्वेन प्रतीयमानौन्नत्यादिविलोकनविभावो विस्मयः प्रतीयते । शमं लक्षयति । **शम इति** । अत्रादिशब्देनेश्वरानुग्रहसत्सङ्गमादिकं गृह्यते । विकारा विषयाभिलाषादयः । तद्रहितचित्तत्वं वैराग्यादिजन्यस्तृष्णाक्षयाद्यपरपर्यायो निर्वेदाख्यो मनोविकारः शम इत्यर्थः । अयमेव यमनियमाद्यनुभावो धृतिनिर्वेदादिव्यभि-

किं लब्धं चतुराननेन महतीमायुःप्रथां गच्छता
लब्ध्वा संपदमप्यनन्यसुगमामिन्द्रेण किं वा कृतम् ।

चारी चर्व्यमाणः शान्तो भवति । उदाहरति । **किमिति** । महतीमायुःप्रथां चतुर्युगसहस्रमेकं दिनमित्यादिक्रमेण संवत्सरशतरूपामनन्यसुगमामसाधारणामित्यर्थः । अस्तान्तरुपप्लवा निरस्तकामक्रोधादयः । बाह्यं वातातपादिजन्यमपीत्यर्थः । उपप्लवं पीडाम् । अतिदीर्घमायुरत्युच्छ्रितमैश्वर्यं चेत्युभयमाशास्यं सर्वेषाम् । तत्सम्पादकेषु परमावधितया प्रसिद्धौ पितामहपुरुहूतावपि तृणाय मन्यमानानां वैराग्यातिभूमिलक्षणः शमः प्रतीयते । ननु 'अष्टौ नाट्ये रसाः स्मृताः' इति नियमान्नवमः शान्तरसो न संभवतीति चेत् तर्हि त एवं प्रष्टव्याः। किं मुनिना शान्तस्थायिन एवानिरूपणात् तदभाव उत तत्सामग्रीवैधुर्यादाहोस्विदश्लाघ्यत्वादथवान्तर्भावाद्वा पुरुषार्थाभावात् । नाद्यः । निर्वेद एव शान्तस्य स्थायिभाव इति मुनिनाङ्गीकृतत्वात् । तच्चानेकरससाधारणस्य व्यभिचारिणः सतोऽप्यमङ्गळप्रायत्वेऽपि सजातीयाग्रगण्यत्वं प्राधान्येन कंचिद्रसविशेषं प्रत्यसाधारणं स्थायित्वं बोधयितुमिति प्रतिपादनात् । तदुक्तं काव्यप्रकाशे । 'निर्वेदस्यामङ्गळप्रायस्य प्रथममनुपादेयत्वेऽपि उपादानं व्यभिचारित्वेऽपि स्थायित्वाभिधानार्थम् । तेन निर्वेदस्थायिभावः शान्तोऽपि नवमोऽस्ति रसः' इति । उक्तं च ध्वन्याचार्यैः । 'तृष्णाक्षयसुखस्य यः परिपोषस्तल्लक्षणो रसः प्रतीयत एव' इति । एतद्व्याख्यानव्याजेन लोचनेऽप्युक्तम् । 'तृष्णानां विषयाभिलाषाणां सिद्धो यः क्षयः सर्वतो निवृत्तिरूपो निर्वेदः स एव सुखं तस्य स्थायिभूतस्य यः परिपोषस्तस्य चर्व्यमाणताकृतः स एव लक्षणं यस्य स शान्तो रसः प्रतीयत एव' इति । न च निर्वेदस्तृष्णाक्षयात्मा शमपर्यायो न सुखरूप इति शङ्कनीयम् । वैयासिकानामविद्यानिवृत्तिवदस्यापि सुखरूपत्वसंभवात् । तदुक्तम् । 'यच्च कामसुखं लोके यच्च दिव्यम् महत् सुखम् । तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम् ॥' इति । न द्वितीयः । वैराग्यादिसामग्र्याः सुलभत्वात् । तथाहि वैराग्यपरमेश्वरानुग्रहप्राचीनकुशलपरिपाकसत्पुरुषसेवावेदान्तविचारादयो विभावाः । यमनियमादयोऽनुभावाः । राज्यधुरोद्वहनादयोऽपि शान्तस्य जनकादेरनुभावा इत्युक्तं लोचने । मतिस्मृतिचिन्ताधृतिवितर्कादयो व्यभिचारिण इति । न तृतीयः । रागद्वेषकलुषितान्तःकरणानामचर्वणीयत्वेनाश्लाघ्यत्वेऽपि वीतरागाणां तदभावात् । यदि कतिपयाश्लाघ्यत्वमात्रेण रसत्वात् प्रच्यवेत तर्हि वीतरागाणामश्लाघ्य इति शृङ्गारोऽपि प्रच्यवताम् । न चतुर्थः । न तावच्छृङ्गारादावन्तर्भावः संभवति । अप्रसक्तत्वात् । ननु दानाद्युपाधिना त्रिविधो वीरः । तदुक्तं मुनिना । 'दानवीरं युद्धवीरं धर्मवीरं तथैव च । रसं वीरमपि प्राह ब्रह्मा त्रिविधसंमतम् ॥' इति । अयं च धर्मप्रधानो वीर

15

इत्यस्तान्तरुपप्लवाः सुकृतिनो नो जानते बाह्यम-
प्यद्योपप्लवमन्ध्रनाथतिलके विश्वंभरां बिभ्रति ॥

अथ शृङ्गारस्यालम्बनविभावो यथा

लावण्यैकखनिर्विधातृरचनाशिल्पप्रतिज्ञावधिः
शृङ्गारप्रतिभूर्विलासविपणिः कन्दर्पघण्टापथः ।
नारीणामधिदेवता च तरुणी सेयं किमन्यैर्गुणै-
रस्या मन्मथमन्मथः प्रियतमः श्रीवीररुद्रो नृपः ॥

उद्दीपनविभावो यथा

एवेति तत्रैवान्तर्भावः शान्तस्य संभावित इति चेन्न । उत्साहस्याहमेवंविध इत्येवंप्राणत्वेनाभिमानमयो वीरः। सर्वाहंकारप्रशमैकरूपः शान्तः । एवमनयोरत्यन्तवैजात्यात् । तर्हि दयावीरेऽन्तर्भाव इति चेन्न । तस्याप्येवंविधत्वे शान्तस्यैव नामान्तरकरणमनेवंविधत्वे वीरप्रभेद एवेति । एवमप्यन्तर्भावाङ्गीकारे सर्वत्रैकरसस्य प्रसङ्गः । नापि पञ्चमः । चतुर्थपुरुषार्थस्य मुक्तेरेतदेकसाध्यत्वात् । तदुक्तं भावप्रकाशे । 'सर्वप्रकारैः संपूर्णकामः संतुष्टमानसः । प्राप्नोति मुक्तिं चरमे शान्तेनैव रसेन सः ॥' इति । लोचने चोक्तम् । 'मोक्षफलत्वेन चायं परमपुरुषार्थनिष्ठत्वात् सर्वरसेभ्यः प्रधानतमः स चायं शान्तरसः' इति । तस्मान्नवैव रसा इति सिद्धम् । वत्सलादिरसान्तराणामन्तर्भावादिकमन्यतो द्रष्टव्यम् । विभावानुभावादीनां प्रतिरसमसाधारणतया यथारसमुदाहर्तुमुचितत्वादादौ शृङ्गारमुदाहरिष्यमाणस्तदालम्बनमुदाहरति। **लावण्येति**। 'मुक्ताफलेषु छायायास्तरलत्वमिवान्तरा । प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते ॥' इत्युक्तलक्षणः कान्तिविशेषो लावण्यम् । तस्यैकखनिः । कदाचिदपि तन्न क्षीयत इति भावः । रचनाशिल्पमङ्गोपाङ्गसौष्ठवनिर्माणं तद्विषयप्रतिज्ञाया अवधिः । इतः परं विधाता प्रतिज्ञातुमपि न शक्नोति किमुत विधातुमिति भावः । शृङ्गारप्रतिभूः । 'स्वामिभृत्याधमर्णानां व्यवस्थापरिकल्पने । अन्यो यः क्रियते शिष्टः प्रतिभूः स निगद्यते ॥' इति सोमेश्वरोक्तलक्षणः । यथा प्रतिभूरधमर्णाद्धनमुद्धरति तथेयमपि वैराग्याच्छृङ्गारमिति भावः । विलासानां विपणिः पण्यवीथिका विलासापेक्षायामत्रैव संपाद्या इति भावः । कन्दर्पस्य घण्टापथो विस्रम्भविहारभूमिरित्यर्थः । सेयं प्रसिद्धा । तरुणी युवतिः । नारीणामधिदेवता च सर्वगुणाश्रयत्वेनोपास्यत्वादिति भावः । यदाहुः । 'गुणाः पूजास्थानम्' इति । गुणसामग्रीफलस्य प्रेयसो लाभात् किं गुणान्तरकथनेनेत्याह । **किमन्यैरिति** । अत्र लावण्यादीनामालम्बनगुणानामुद्दीपनविभावत्वेऽप्यालम्बनोपस्कारार्थमेवोपादानान्न तत्प्राधा-

उरोमात्रोत्सेधं भवदपि विलासैरभिनवै-
मृगाक्ष्यास्तारुण्यं त्रिभुवनमिदं व्याकुलयति ।
स्तनाभोगस्फीतं यदि किल भवेत् का खलु कथा
भवित्री किं वान्यद्विजितमखिलं पुष्पधनुषा ॥

अनुभावो यथा

स्मरस्मेरान् मन्दस्मितमधुरसौरभ्यसुभगान्
मनाग्व्रीडाजाड्यान् प्रणयरसकल्लोलभरितान् ।
कृतानेकस्कन्धान्मनसिजसहस्राणि सृजतः
कटाक्षान् वामाक्षी किरति परितो रुद्रनृपतिम् ॥

॥ सात्विकानां स्वरूपोदाहरणानि ॥

अथ सात्त्विकानां स्वरूपमुदाहरणं च ।

स्तम्भः स्यान्निष्क्रियाङ्गत्वं रागभीत्यादिसंभवम् ।

यथा

*काअइपुरंठिआओ पेक्खंतीओ णरेंदकंदप्पं ।
मअणसरुक्किण्णाओ विअ ट्ठिआ णिच्चलंगीओ ॥

प्रलयः सुखदुःखाद्यैर्गाढमिन्द्रियमूर्च्छनम् ।

* काकतिपुरस्त्रियः पश्यन्त्यो नरेन्द्रकन्दर्पम् ।
मदनशरोत्कीर्णा इव स्थिता निश्चलाङ्गयः ॥

न्यम् । उद्दीपनविभावमुदाहरति । **उर इति** । उरोमात्रे उत्सेध उच्छूनता यस्मिन् वयसि स्तनालवालस्थले किंचिदुन्नतमुर इति प्रतीतिर्जायते तदित्यर्थः । स्तनयोराभोगो विस्तारः । स्फीतं समृद्धम् । 'स्फायः स्फी निष्ठायाम्' इति स्फीभावः । उदयदेव यौवनं जगन्मोहनं जायते । उदितं परिपूर्णं वा किमु वक्तव्यमिति भावः । अनुभावमुदाहरति । **स्मरेति** । व्याख्यातमेतत् प्रसङ्गेन काव्यप्रकरणे । एवं रसान्तरसंबन्धिनो विभावानुभावा यथायोगं स्वस्वरसप्रकरणे द्रष्टव्याः । सात्विकानां सामान्यलक्षणप्रस्तावे बाह्याभ्यन्तरभेदेन द्वैविध्यमुक्तम् । तत्र बाह्यानां स्तम्भादीनां स्वरूपोदाहरणे वक्तुं प्रतिजानीते । **अथेति** । वक्ति । **स्तम्भ इति** । विषादविस्मयादिजन्यो जाड्यनिष्कम्पत्वाद्यनुभावो विष्टब्धचेतनतया चेष्टाविघातः स्तम्भ इत्यर्थः । रागसंभवं स्तम्भमुदाहरति । **काअईति** । अत्र पश्यन्त्यो निश्चलाङ्गय इत्यनेन सत्यपि चैतन्ये निश्चेष्टत्वकथनात् स्तम्भ इति भावः । प्रलयं लक्षयति । **प्रलय इति** । सुखमदनिद्राप्रहारा-

यथा

*जिअमअणरूवसारो सहि एसो वीररुद्दणिवचंदो ।
जं दट्ठूण णिमज्जइ मुच्छाअं इंदिअग्गामो ॥

सुखाद्यतिशयाज्जाता रोमाञ्चो रोमविक्रिया ।
रागरोषभयादिभ्यो वेपथुर्गात्रकम्पनम् ॥

द्वयोरुदाहरणं यथा

†दइआलिंगणणिब्भरकंपा अ बहू विओअजिण्णंगी ।
उग्गिरइ अंतरट्ठिदमअणसरे पुलअचम्मेण ॥

वपुर्जलोद्गमः स्वेदो रतिघर्मश्रमादिभिः ।

यथा

श्रृण्वन्ती प्रियसंदेशं प्रेयसः काकतीशितुः ।
स्मरराज्याभिषिक्तेव स्विन्नाङ्गी वामलोचना ॥

विषादमदरोषादेर्वर्णान्यत्वं विवर्णता ।

---

* जितमदनरूपसारः सखि एष वीररुद्रनृपचन्द्रः ।
यं दृष्ट्वा निमज्जति मूर्च्छायामिन्द्रियग्रामः ॥
† दयितालिङ्गननिर्भरकम्पा च वधूर्वियोगजीर्णाङ्गी ।
उद्गिरत्यन्तरस्थितमदनशरान् पुलकच्छद्मना ॥

दिजन्यं दुःखाभिषङ्गाद्यनुभावं निश्चेतनतया नष्टचेष्टत्वं प्रलय इत्यर्थः । तदुक्तम् । 'वाक्कायमनसां प्रायः प्रलयो नष्टचेष्टता ।' इति । सुखमूलं प्रलयमुदाहरति । **जिएति** । सर्वाणीन्द्रियाणि स्वस्वव्यापारेभ्य उपरतानीत्यर्थः । अत एव निश्चेतनतया नष्टचेष्टत्वमिति भावः । रोमाञ्चकम्पयोरुदाहरणलाघवार्थं युगपल्लक्षणमाह । **सुखेत्यादि** । सुखोत्साहभयविस्मयादिजन्यो गात्रसंस्पर्शनोल्लसनाद्यनुभावो रोमोद्गमो रोमाञ्च इत्यर्थः । भयज्वरजरादिजन्यः स्फुरणाद्यनुभावो गात्रकम्पो वेपथुरित्यर्थः । सुखजन्ययो रोमाञ्चकम्पयोरुदाहरणमाह । **दइएति** । दयितालिङ्गननिर्भरकम्पा च वधूर्वियोगजीर्णाङ्गी । अत एव । उद्गिरत्यन्तरस्थितमदनशरान् पुलकच्छद्मना ॥ सरे इत्यत्र 'शस्येत्' इत्येत्वम् । स्वेदं लक्षयति । **वपुरिति** । निदाघश्रमहर्षव्यायामलज्जाभयक्रोधादिजन्यो वातेच्छाव्यजनग्रहणाद्यनुभावो वपुर्जलोद्गमः स्वेद इत्यर्थः । हर्षजन्यं स्वेदमुदाहरति । **शृण्वन्तीति** । प्रियसंदेशं स्वकुशलप्रेषणम् । वैवर्ण्यं लक्षयति । **विषादेति** । कोपातपशीतभयादिजन्यं कार्श्यसौन्दर्यविप्लवाद्यनुभावं भिन्नवर्णत्वं वैवर्ण्यमित्यर्थः । विरहजन्यविषादमूलं

यथा

*णरणाह चंदधवले तुज्झ गुणे साहु सम्मरंतीए ।
अंगाइ पांडुराइं एह्णिं जाआइ सामाए ॥

अश्रु नेत्रोद्भवं वारि दुःखरोषप्रहर्षजम् ।

यथा

वीररुद्रनृपाद्भीतं पाण्ड्यं मग्नं पयोनिधौ ।
अन्वेष्टुमिव तद्योषिदश्रुधारापगायते ॥

मतं गद्गदभाषित्वं वैस्वर्यं प्रमदादिजम् ।

यथा

†विअणम्मि पिएण समं खामक्खामाक्खरं भणंतीए ।
एक्को मुणइ अणंगो अथ्थं वहुआए भणिआणं ॥

॥ व्यभिचारिभावानां स्वरूपोदाहरणे ॥

अथ व्यभिचारिणां निर्वेदादीनां स्वरूपमुदाहरणं च ।

यथा

दुःखेर्ष्यातत्त्वबोधादेर्निर्वेदो निष्फलत्वधीः ।

---

* नरनाथ चन्द्रधवलान् तव गुणान् साधु संस्मरन्त्याः ।
अङ्गानि पाण्डुराणि इदानीं जातानि श्यामायाः ॥

† विजने प्रियेण समं क्षामक्षामाक्षरं भणन्त्याः ।
एको जानात्यनङ्गोऽर्थं वध्वा भणितानाम् ॥

वैवर्ण्यमुदाहरति । **णरणाहेति** । एह्णिं इदानीम् । श्यामाया युवतेः श्यामवर्णायाश्च । अश्रूदाहरति । **अश्रिवति** । क्रोधहर्षभयजृम्भादिजन्यं नेत्रमार्जनाद्यनुभावं नेत्रजलमश्रिवत्यर्थः । दुःखमूलमश्रूदाहरति । **वीरेति** । वैस्वर्यं लक्षयति । **मतमिति** । हर्षशोकभयज्वरादिजन्यं स्वरवर्णस्खालित्याद्यनुभावं गद्गदभाषित्वं वैस्वर्यमित्यर्थः । हर्षमूलं वैस्वर्यमुदाहरति । **विअणम्मीति** । विजने सुरतसमये इत्यर्थः । प्रियेण समं क्षामक्षामाक्षरं भणन्त्याः सुखपारवश्यादिति भावः । एको जानात्यनङ्गोऽर्थं वध्वा भणितानाम् । त्रायस्ववं मे प्राणा अलमलं मा मेत्यादीनां दैन्यप्रेमालमर्थादिसमर्थानां वचनानामित्यर्थः । मुणइ इत्यत्र जानातेर्मुणादेशः । अत्र गद्गदवाक्यानां कामोद्दीपकत्वमतिमात्रमभूदिति परमो भावः ॥ संचारिणां स्वरूपोदाहरणे क्रमेणाह । **अथेत्यादिना** । निर्वेदं लक्षयति । **दुःखेति** । दुःखादिजनिता निष्फलत्वबुद्धिर्निर्वेद इत्यर्थः । अयं च विभावानु-

तत्र चिन्ताश्रुनिश्वासदीनताः संभवन्ति च ॥

यथा

*सहि कप्पूरेण किअं किं कथ्थूरीए मलअजो ठाउ ।
गुणसिसिरं जससुरहिं आणेहि †प्पआवरुद्दं अ ॥

ग्लानिर्बलस्यापचयो वैवर्ण्यारतिकारणम् ।

यथा

‡तेल्लोक्कं वहइ मही तं धरइ भुओ पआवरुद्दस्स ।
तं हिअएण धरंती साहसिई दुब्बलंगिम्हि ॥

अथ शङ्का ।

अनिष्टाभ्यागमोत्प्रेक्षा शङ्का रोषादिकारणम् ।

यथा

---

* सखि कर्पूरेण कृतं किं कस्तूर्या मलयजस्तिष्ठतु ।
गुणशिशिरं यशःसुरभिमानय प्रतापरुद्रं च ॥

‡ त्रैलोक्यं वहति मही तां धरति भुजः प्रतापरुद्रस्य ।
तं हृदयेन धरन्ती साहसिकी दुर्बलाङ्ग्यस्मि ॥

भावरसाङ्गत्वेन स्वातन्त्र्येण वहुधा संभवति । अतः तत्संग्रहार्थमादिशब्दः । अस्यानुभावानाह । **तत्रेति** । चशब्दाद्वैवर्ण्यादयो गृह्यन्ते । संचारिणामपि क्वचिदनुभावत्वं संभवतीत्युक्तम् । तत्र प्रियवियोगजन्यदुःखमूलं निर्वेदमुदाहरति । **सहीति** । **प्रतापरुद्रं चेति** । चशब्दोऽवधारणे । कर्पूराद्यातिरिच्यमानशैत्यसौरभ्ययोस्तत्रैव सुलभत्वादिति भावः । उदाहरणान्तराण्यन्यतो द्रष्टव्यानीत्युपेक्ष्य ग्लानिं लक्षयति । **ग्लानिरिति** । क्षुत्पिपासानिधुवनादिप्रयासजनितो बलापचयो ग्लानिरित्यर्थः । वैवर्ण्यारतिग्रहणं क्षामाङ्गवचनक्रियाद्युपलक्षणम् । सुरतश्रान्तायाः प्रियगौरवोद्वहनप्रयासापादनमुत्कर्षन्त्याः कस्याश्चिद्दौर्बल्यमुदाहरति । **तेल्लोक्कमिति** । त्रयो लोकास्त्रैलोक्यं विश्वमित्यर्थः । चातुर्वर्ण्यादित्वाद् ष्यञ्प्रत्ययः । हृदयेन वक्षःस्थलेन साहसिकी स्वयं तन्वङ्गीति विदित्वापि प्रवृत्तत्वादिति भावः । सहसा वलेनाविमृश्य वर्तत इत्यस्मिन्नर्थे ‘ओजःसहोऽम्भसा वर्तत’ इति ठगन्तात् साहसिकशब्दात् कलोपे स्त्रियां नित्य ईकारप्रत्यये प्राप्ते साहसिकीति रूपं गौरादौ तथाविधानात् । ‘पुंसो जातेर्जव’ इति विकल्पस्तु अप्राप्तनीलादिशब्दविषय इति साहसिकेत्याकारान्तपाठ उपेक्षणीयः । शङ्कां लक्षयति । **अनिष्टेति** । परक्रौर्यादात्मदुर्नयाद्वानर्थप्राप्तेरभ्यूहनं शङ्केत्यर्थः । आ-

---

† ‘पआवरुद्दणिवचंदं’-प्रतापरुद्रनृपचन्द्रम् इति पाठान्तरम् ।

*ण मुणदु अण्णोत्ति मए हिअए परिचओ पिअस्स किदो ।
किं पअडंम्हि जणाणं सव्वंग्गिणेहिं पुलएहिं ॥

अथासूया ।

परोत्कर्षासहिष्णुत्वमसूया परिकीर्तिता ।

यथा

†अहिआईए गुणेहिं रूपेण अ मज्झ किं मही अहिआ ।
जं तं पआवरुद्दो बहुमण्णइ भाअहेअं तं ॥

अथ मदः ।

मदिरादिकृतो मोहहर्षव्यतिकरो मदः ।

यथा

‡भणइ अ असंगअत्थं हसइ अमंदं अ राअभरिअच्छि ।
पिअचिंतामइराए परवसा उवह सामंगी ॥

---

* न जानात्वन्य इति मया हृदये परिचयः प्रियस्य कृतः ।
किं प्रकटास्मि जनानां सर्वाङ्गीणैः पुलकैः ॥

† अभिजात्या गुणै रूपेण च मत्तः किं मही अधिका ।
यत्तां प्रतापरुद्रो बहुमन्यते भागधेयं तत् ॥

‡ भणति चासंगतार्थं हसत्यमन्दं च रागभरिताक्षी ।
प्रियचिन्तामदिरया परवशा पश्यत श्यामाङ्गी ॥

दिग्रहणाद्वैवर्ण्यवैस्वर्यदिगवलोकनादयो गृह्यन्ते । उदाहरति । **ण मुणद्विति ।** मुग्धानां गूढानुरागस्य प्राकट्यमेवानर्थ इति भावः । असूयां लक्षयति । **परेति ।** गर्वदौर्जन्यमन्युजन्यं परोत्कर्षासहिष्णुत्वमसूयेत्यर्थः । निन्दावज्ञाभ्रुकुट्यादयोऽनुभावाः । उदाहरति । **अहीति ।** अभिजातिः कुलम् । गुणाः दाक्षिण्यादयः । यत्र चतुर्विधाभरणराहित्येऽपि तत्साहित्येनेवाभासनं तद्रूपम् । 'आविध्यारोप्यविक्षेप्यवन्धनीयैरभूषितम् । यद्भूषितमिवाभाति तद्रूपमिति कथ्यते ॥' इति लक्षणात् । अधिका किं न भवतीत्यर्थः । तथापि बहुमाने भागधेयमेव निमित्तमित्याह । **यदिति ।** मदं लक्षयति । **मदिरेति ।** मोहो वैचित्त्यम् । हर्षः प्रसादः । मदिरादिजन्यो हर्षमोहसंकरो मद इत्यर्थः । अत्र वागङ्गस्खालित्यहसितरुदितादयो यथायोगमुत्तमादिष्वनुभावाः । 'संमोहानन्दसंभेदो मदो मद्योपयोगजः । अमुना चोत्तमः शेते मध्यो हसति गायति॥ अधमप्रकृतिश्चापि परुषं वक्ति रोदिति ।' इति साहित्यदर्पणे । उदाहरति। **भणईति ।**

अथ श्रमः ।

श्रमः खेदोऽध्वरत्यादेर्जातः स्वेदातिभूमिकृत् ।

यथा

*आअच्छइ एव्व पिए कीस करेंती गआगआआसं ।
तम्मसि सेदजलेहिं सुंदरि लुलिअंगराआसि ॥

अथालस्यम् ।

मन्दोद्यमत्वमालस्यं कर्तव्येषु प्रकीर्त्यते ।

यथा

आस्तां मृगाक्ष्या गृहकृत्यवार्ता स्वाङ्गोपचारेष्वपि यत्नमान्द्यम् ।
कर्तव्यमग्रे दयितस्य यत् स्यान्नूनं बलात्कारयति स्मरस्तत् ॥

अथ दैन्यम् ।

सत्त्वत्यागादनौद्धत्यं दैन्यं कार्पण्यसंभवम् ।

यथा

---

* आगच्छत्येव प्रिये कस्मात्कुर्वती गतागतायासं ।
ताम्यसि स्वेदजलैः सुन्दरि लुलिताङ्गरागासि ॥

श्रमं लक्षयति । **श्रम इति** । अध्वसुरतादिजन्यः खेदः श्रम इत्यर्थः । स्वेद उपमर्दनादेरुपलक्षकः । उदाहरति । **आअच्छईति** । आलस्यं लक्षयति । **मन्देति** । गर्वश्रमादिना प्रयत्नमान्द्यमालस्यमित्यर्थः । अत्र जृम्भोपवेशनादयोऽनुभावाः । उदाहरति । **आस्तामिति** । गृहकृत्यवार्ता धूपवासनावितानसंविधानादिप्रसङ्गः स्वाङ्गोपचारेषु मृगमदानुलेपनमाल्यधारणमकरिकारचनादिषु यत्नमान्द्यं प्रयत्नशैथिल्यमुपचारकरणं पुनरतिदूरमिति भावः । अग्रे प्रियागमनसमये यत् कर्तव्यं प्रत्युद्गमनरभसाश्लेषप्रियभाषणादिकं तत् स्मरो बलात् बलमाश्रित्य कारयति । ल्यब्लोपे पञ्चमी । अत्र मन्दयत्न इति पाठे विधेयस्य मान्द्यस्य समासे गुणभूतत्वादविमृष्टविधेयांशं नाम दोषः स्यात् । नन्वेकं संधित्सतोऽपरं प्रच्यवत इति न्यायेनाविमृष्टविधेयांशं परिहरतोऽनुशासनविरोधः स्यात् । 'पूरणगुण—' इत्यादिना गुणेन षष्ठीसमासप्रतिषेधात् इति चेन्मैवं मंस्थाः । संज्ञाप्रमाणत्वात् तद्यत्नगौरवं प्रसज्येत चन्दनगन्ध इत्यादिसूत्रभाष्यकारादिमहापुरुषप्रयोगदर्शनात् तत्स्थगुणेषु प्रतिषेधाभावात् पूरणगुणेति प्रतिषेधस्य पटस्य शुक्ल इत्याद्यतत्स्थगुणविषयत्वादिति । प्रपञ्चितं चैतदस्मदुपाध्यायैर्घण्टापथे 'न च न स्वीकृतमर्थगौरवम्' इत्येतद्व्याख्यानावसरे । दैन्यं लक्षयति । **सत्त्व इति** । सत्त्वत्यागो दौर्गत्यादेरुपलक्षकः । तेन सत्त्वत्यागदौर्गत्यादिजन्यं मनसोऽनौद्धत्यं दैन्यमित्यर्थः ।

*आणेदुं णरणाहं गदो क्खु सही जणो विलंबेइ ।
मम्मह णमामि चंदं सिक्खअ चिरेहि ईसित्ति ॥

अथ चिन्ता ।

इष्टानभिगमात् ध्यानं चिन्ता शून्यत्वतापकृत् ।

यथा

†सण्णिहिअं वि गुरुअणं ण अ पेख्खइ पुच्छिआ वि णालवइ।
एसा वि मग्गइ गइं हिअअस्स पिआणुबंधस्स ॥

अथ मोहः ।

मोहस्तु मूर्च्छनं भीतिदुःखावेशानुचिन्तनैः ।

यथा

कथमपि गमयित्वा वासरं दीर्घदीर्घं
विरचितनववेषा प्रेषयित्वाथ दूतीः ।
चिरयति हृदयेशे प्रांशुभिश्चन्द्रपादै-
रभिहतसकलाङ्गी मूर्च्छिता कोमलाङ्गी ॥

---

* आनेतुं नरनाथं गतः खलु सखीजनो विलम्बते ।
मन्मथ नमामि चन्द्रं शिक्षय चिरय ईषदिति ।

† सन्निहितमपि गुरुजनं न च प्रेक्षते पृष्टापि नालपति ।
एषापि मार्गति गतिं हृदयस्य प्रियानुबन्धस्य ॥

कार्पण्यवचनं देहवचनमालिन्याद्यनुभावानामुपलक्षणम् । उदाहरति । **आणेदुमिति** । चिन्तां लक्षयति । **इष्टेति** । अपेक्षितानवाप्तिमूलं ध्यानं चिन्तेत्यर्थः । शून्यतानिःश्वासतापादयोऽनुभावाः । उदाहरति । **सण्णिहिअमिति** । अत्र प्रथमार्धेन शून्यत्वं द्वितीयार्धेन प्रियानवाप्तिमूलं ध्यानं चोच्यते । मोहं लक्षयति । **मोह इति** । भीत्यादिभिर्वैचित्त्यं मोह इत्यर्थः । तत्राज्ञानभ्रमोत्पातघूर्णनादर्शनादयोऽनुभावाः ‡ । उदाहरति । **कथमिति** । दीर्घदीर्घं प्रियागमनार्थं कदा वा गभस्तिमानस्तमीयादिति प्रतीक्षणेनातिदीर्घमित्यर्थः । 'प्रकारे गुणवचनस्य' इति द्विर्भावः । वासरं कथमपि क्षणगणनया कथंचित् प्रयत्नगौरवेणेत्यर्थः । 'ज्ञातहेतुविवक्षायामप्यादि कथमव्ययम् । कथमादि तथाप्यन्तं यत्नगौरववाढयोः ॥' इत्यभिधानात् । गमयित्वा यापयित्वा । विरचितनववेषा

---

‡ 'मोहो विचित्तता भीतिदुःखावेगानुचिन्तनैः । घूर्णनागात्रपतनभ्रमणादर्शनादिकृत् ॥' इति साहित्यदर्पणे ।

अथ स्मृतिः ।

पूर्वानुभूतविषयं ज्ञानं स्मृतिरुदाहृता ।

यथा

प्रतापरुद्रस्य भुजे वसन्त्या क्षोण्या तपः कीदृशमार्जितं स्यात् ।
स्पृष्टं सकृद्येन मदीयमङ्गं प्राप्नोति विष्वक् सुखवज्रलेपम् ॥

अथ धृतिः ।

धृतिश्चित्तस्य नैस्स्पृह्यं ज्ञानाभीष्टागमादिभिः ।

यथा

वीररुद्रनृपतौ हृदय त्वद्वल्लभे त्रिभुवनैकधुरीणे ।
साधु साधु कृतकृत्यमसि त्वं मन्यसे जगदशेषमसारम् ॥

अथ व्रीडा ।

चेतःसंकोचनं व्रीडानङ्गरागस्तवादिभिः ।

यथा

विहितप्रियागमनसमयोचितश्शृङ्गारा सती । अथशब्दो विलम्बाभावसूचनार्थः । दूतीः पुङ्खानुपुङ्खतया प्रेषयित्वा हृदयेशे प्राणनाथे चिरयति विलम्बमाने सति कोमलाङ्गी अत एव प्रांशुभिरायतैश्चन्द्रपादैरिन्दुकिरणैः कशाकल्पैरभिहतसकलाङ्गी मूर्छिता । अनाथाः पादैरभिहन्यमाना मूर्च्छन्तीति ध्वन्यते । स्मृतिं लक्षयति । **पूर्वेति** । सदृशादृष्टचिन्ताद्यैः संस्कारोद्बोधे सति पूर्वानुभूतार्थविषयज्ञानं स्मृतिरित्यर्थः । अत्र भ्रून्नमनशिरःकम्पादयोऽनुभावाः । स्पर्शसुखस्मरणमुदाहरति । **प्रतापेति** । निविडसुधालेपो वज्रलेपः । अत्र कस्यचिन्मदङ्गस्य कादाचित्कः प्रियकरस्पर्शः सर्वाङ्गीणमविच्छिन्नं च सुखं जनयति । वीररुद्रभुजे नित्यनिवासाया भूमेः किमु वक्तव्यमिति भावः । धृतिं लक्षयति । **धृतिरिति** । आदिग्रहणात् शक्त्यादयो गृह्यन्ते । ज्ञानादिभिर्निःस्पृहत्वं धृतिरित्यर्थः* । एतैरेव संतोषो धृतिरित्यन्ये । अव्यग्रभावादयोऽनुभावाः । उदाहरति । **वीरेति** । हे हृदय त्रयाणां भुवनानां समाहारस्त्रिभुवनम् । पात्रादित्वान्न स्त्रीत्वम् । धुरं वहतीति धुरीणः । 'खः सर्वधुरात्' इत्यत्र योगविभागात् खप्रत्ययः । साधुसाध्वित्याभीक्ष्ण्ये द्विर्भावः । अत्राभीष्टागमात् धृतिः । व्रीडां लक्षयति । **चेत इति** । अनङ्गनिमित्तो रागोऽनङ्गरागः । स्तवः स्तोत्रम् । आदिग्रहणादाचारभ्रंशादयः । चेतःसंकोचनं धाष्टर्याभावः । मदनाभिलाषादिर्मनःसंकोचो व्रीडेत्यर्थः । अत्रान्तर्धानवैवर्ण्याधोमुखत्वादयोऽनुभावाः । उदा-

---

* ज्ञानाभीष्टागमाद्यैस्तु संपूर्णस्पृहता धृतिः ।
साहित्यवचनोल्लाससहासप्रतिभादिकृत् ॥

तथा समालोकनकौतुकानां मनोरथैरन्ध्रपुराङ्गनानाम् ।
विलोकिते रुद्रनृपे भवन्ति पर्यस्तपक्ष्माणि विलोचनानि ॥

अथ चपलता ।

चापलं त्वनवस्थानं रागद्वेषादिसंभवम् ।

यथा

दृष्ट्वा रुद्रनरेन्द्रं तरलतराक्षी विलासमृदुहासा ।
कलयति मौक्तिकहारं स्पृशति च कर्णोत्पलं बाला ॥

अथ हर्षः ।

प्रसत्तिरुत्सवादिभ्यो हर्षः स्वेदाश्रुकम्पकृत् ।

यथा

यत् पूर्वं सरसीषु पद्ममुकुलव्याजात् तपः सञ्चितं
वक्षोजौ युवयोस्तदद्य फलितं जातौ कृतार्थौ युवाम् ।
दत्ता काकतिवल्लभेन भवतोरेषा स्ववक्षःस्थली-
कस्तूरीद्विगुणीभवत्परिमला कल्हारमाला यतः ॥

अथावेगः ।

इष्टानिष्टागमाज्जात आवेगश्चित्तसंभ्रमः ।

हरति । **तथेति** । अव्यासङ्गेनानिमिषेण च तृष्णानुगुणं दृष्ट्वा जन्मनो जीवितस्य नयनानां च साफल्यं संपादयाम इत्यादयोऽभिलाषा मनोरथाः । तैर्हेतुभिस्तथाभूतं गाढमालोकनकौतुकं दर्शनोत्कण्ठा यासां तासामान्ध्रपुराङ्गनानां विलोचनानि रुद्रनृपे विलोकिते सति पर्यस्तपक्ष्माणि सनिमेषाणि भवन्ति दृष्टिमपसारयन्तीत्यर्थः। अत्र कृपावलोकनानन्तरमेवानुरागोदयाल्लज्जाभूदिति भावः । चापलं लक्षयति । **चापलमिति** । रागद्वेषमात्सर्यादिमूलमनवस्थानं चापलमित्यर्थः । अत्रानुभावाः भर्त्सनपारुष्यस्वच्छन्दाचरणादयः । अत्र रागमूलं चापलमुदाहरति । **दृष्ट्वेति** । बाला रुद्रनरेन्द्रं दृष्ट्वा तरलतराक्षी अतिलोलदृष्टिरित्यर्थः। विलासमृदुहासा विलासप्रधानमन्दस्मिता च । भवतीति शेषः । अत्र तरलदर्शनादिचेष्टाचतुष्टयमध्ये क्षणमप्येकत्र मनसोऽनवस्थानाच्चापलम् । हर्षं लक्षयति । **प्रसत्तिरिति** । प्रियागमनपुत्रजननाद्युत्सवादिजनितो मनःप्रसादो हर्ष इत्यर्थः । स्वेदादयोऽनुभावाः । उदाहरति । **यदिति** । अत्र काचित् कामिनी कुचौ संबोध्य तयोः प्रियदत्तस्वयंधृतकल्हारमालालाभजन्यधन्यत्वकथनव्याजेन स्वकीयं हर्षमाविष्करोति । आवेगं लक्षयति । **इष्टेति** । प्रियादेरिष्टस्य राजवि-

यथा

निस्साणध्वनिमाकलय्य सहसा हेलाविहारोद्यतं
द्रष्टुं काकतिवीररुद्रनृपतिं प्रत्यग्रकौतूहलाः ।
अर्धालम्बितमण्डनाः प्रतिपदं व्यत्यस्तभूषा जवा-
दारोहन्ति सुवर्णसौधवलभीश्रृङ्गाणि पौरस्त्रियः ॥

अथ जडता ।

जाड्यमप्रतिपत्तिः स्यादिष्टानिष्टागमोद्भवा ॥

यथा

समायाते नाथे प्रमनसि गृहान् रुद्रनृपतौ
वपुःसौन्दर्यश्रीविजितमदनोदारयशसि ।
वधूरन्तस्तोषव्यतिकरवशान्नोपचरितुं
पुरस्तादालीनां न चलति तथा नो विरमति ॥

अथ गर्वः ।

अन्यधिक्करणादात्मोत्कर्षो गर्वो बलादिजः ।

यथा

ड्वरातवर्षादेरनिष्टस्य चागमात् जातश्चित्तसंभ्रम आवेग इत्यर्थः । अत्र हर्षशोकत्वरास्तम्भादयोऽनुभावाः । उदाहरति । **निस्साणेति** । अर्धालम्बितमण्डनाः एकस्मिन्नेव लोचनेऽञ्जनमेकस्मिन्नेव चरणे लाक्षाविलेपनमित्यादिक्रमेणेति भावः । प्रतिपदं प्रतिस्थानम् । व्यत्यस्तभूषा वैपरीत्येनामुक्ताभरणाः कण्ठादौ काञ्च्यादिकं कटितटादौ हारादिकं च धारयन्त्य इत्यर्थः । जाड्यं लक्षयति । **जाड्यमिति** । इष्टानिष्टागमोद्भूतमितिकर्तव्यतामूढत्वं जाड्यमित्यर्थः । अत्रानिमेषनयननिरीक्षणतूष्णींभावादयोऽनुभावाः । उदाहरति । **समायात इति** । सखीसमक्षनिमित्तलज्जाभरेणाच्छादितानुभावो हर्षोऽन्तस्तोषः तस्य व्यतिकरः संबन्धः । अत्र नोपचरितुमित्यत्र नञो न चलति नो विरमतीत्युभयत्राप्यनुषङ्गः। तेनोभयत्र नञ्द्वयेन लज्जासंभावितस्य चलननिषेधस्योत्कण्ठासंभावितस्य विरमणनिषेधस्य च निवृत्तिः सूच्यते । यथाह वामनः । 'संभाव्यनिषेधनिवर्तने द्वौ प्रतिषेधौ' इति । अत्रोत्कण्ठाप्रतापाभ्यां प्रियोपचारं प्रति प्रवृत्तिनिवृत्त्योरुभयत आकर्षणान्नायिकायाः सर्वव्यापारप्रतिबन्धिनी सेयमुभयतः पाशा रज्जुरभूदिति भावः । गर्वं लक्षयति । **अन्येति** । बलैश्वर्याभिजनलावण्यादिजन्योऽन्यधिक्कारावज्ञानसविलासाङ्गवीक्षणाद्यनुभाव आत्मोत्कर्षाभिमानो गर्व इत्यर्थः । बलमूलं

को वा शस्त्रग्रहणसमयो मादृशामीदृशानां
कीदृग्वैरं प्रतिधरणिभृत्खेटकीटेष्वमीषु ।
इत्यावेशप्रतिभयभुजाटोपदुर्वारगर्वाः
संक्रीडन्ते रणभुवि भटाः काकतीन्द्रस्य जेतुः ॥

अथ विषादः ।

विषादश्चेतसो भङ्ग उपायाभावचिन्तनैः ।

यथा

*पेसेमि मणेत्ति मुहा तं मं मोत्तूण वल्लहे लग्गं ।
मं उज्झिअ णो गच्छइ मअणो सहि किं णु कादव्वं ॥

अथौत्सुक्यम् ।

कालाक्षमत्वमौत्सुक्यं मनस्तापत्वरादिकृत् ।

यथा

†अंधवुरभामिणिजणो अंगाइ पसाहिऊण तुरमाणो ।
रुद्दणरेंदागमणे विलंबिअं सहइ किच्छेण ॥

---

*प्रेषयामि मन इति मुधा तन्मां मुक्त्वा वल्लभे लग्नम् ।
मामुज्झित्वा नो गच्छति मदनः सखि किं नु कर्तव्यम् ॥
†अन्ध्रपुरभामिनीजनोऽङ्गानि प्रसाध्य त्वरमाणः ।
रुद्रनरेन्द्रागमने विलम्बितं सहते कृच्छ्रेण ॥

गर्वमुदाहरति । **क इति** । मादृशामतिसूर्यप्रतापानामिति भावः । शस्त्रग्रहणसमयः को वा लक्ष्याभावादायुधग्रहणावसरो नास्तीति भावः । ये पुनः पुरो वर्तन्ते प्रतिभटमानिनस्तेषु खद्योतकल्पेषु वैरवर्णनमपि लज्जावहमेवेत्याह । **कीदृगिति** । आवेश आग्रहः । संक्रीडन्ते नैव प्रयासमनुभवन्तीति भावः । 'क्रीडोऽनुसंपरिभ्यश्च' इति तङ् । विषादं लक्षयति । **विषाद इति** । प्रारब्धकार्यभङ्गापराधपरिज्ञानविघ्नविपदादिभवः सत्त्वसंक्षयो विषाद इत्यर्थः । अयं चोपायान्वेषणवैमनस्यमुखशोषाद्यनुभावतारतम्यादुत्तमाद्याश्रयत्वेन त्रिविध इत्याहुः । तत्रोत्तमाश्रयं विषादमुदाहरति । **पेसेमीति** । मन इति । नपुंसकत्वेनेदमन्यत्र रिरंसारहितमिति मत्वेति भावः । अत एवोक्तं पूर्वैः । 'नपुंसकमिति ज्ञात्वा तां प्रति प्रेषितं मनः । तत्तु तत्रैव रमते हताः पाणिनिना वयम् ॥' इति । अत्र किं कर्तव्यमित्युपायगवेषणगोचरवागारम्भसूचितया चिन्तया विषादो व्यज्यते । औत्सुक्यं लक्षयति । **कालेति** । इष्टविरहरम्यवस्तुदिदृक्षादिजन्यं मनस्तापत्वरानिःश्वासनिद्राद्यनुभावं कालाक्षमत्वमौत्सुक्यमित्यर्थः । उदाहरति । **अंधेति** ।

अथ निद्रा ।

निद्रा चित्तनिमीलनम् ।

यथा

*सिविणे दिट्ठं दइअं वहुआ आलिंगिदुं किदोज्झोआ।
उवह दरमीलिअच्छी गअणम्मि करे पसारेइ ॥

अथापस्मारः ।

आवेशो मोहदुःखाद्यैरपस्मारोऽङ्गतापकृत् ।

यथा

दृष्ट्वा स्वप्ने कुपितवदनं काकतीयक्षितीन्द्रं
हा हा रक्षेत्यसकलगिरः संभ्रमोत्थानभाजः ।
धावन्त्यन्तर्वणभुवि लुठन्त्याह्वयन्त्यात्मबन्धू-
नाराद्भूतानपि रिपुगणा व्यस्तनामग्रहेण ॥

अथ सुप्तिः ।

सुप्तिर्निद्रासमुद्रेकः ।

---

*स्वप्ने दृष्टं दयितं वधूरालिङ्गितुं कृतोद्योगा ।
पश्यत दरमीलिताक्षी गगने करौ प्रसारयति ॥

भामयत्यवश्यं कुप्यतीति भासिनी । भाम क्रोध इत्यस्माद्धातोश्चौरादिकादावश्यको णिनिः । यद्वा स्त्रीणां ललितकोपो भाम इति भोजराजः । तद्वती भामिनी । अत्र कृच्छ्रशब्दसूचितैश्चिन्तानवस्थानगात्रगौरवशय्याभिलाषाद्यनुभावैः प्रियदिदृक्षाविषयमौत्सुक्यं व्यज्यते । निद्रां लक्षयति । **निद्रेति** । चित्तस्य निमीलनं बाह्येन्द्रियसंबन्धविरहः । चिन्तानैश्चिन्त्यव्यायामादिजन्यं जृम्भाङ्गभङ्गनेत्रनिमीलनाद्यनुभावं चित्तनिमीलनं निद्रेत्यर्थः । उदाहरति । **सिविण इति** । अत्रालीकप्रियालिङ्गनोद्योगादनवरतचिन्ताप्रतीतेस्तन्मूलेयं निद्रेति भावः। अत एवाहुः प्रशस्तपथवादाः । 'यमर्थमादृतश्चिन्तयन् स्वपिति सैव चिन्तासन्ततिः प्रत्यक्षाकारा संजायते' इति । अपस्मारं लक्षयति । **आवेश इति** । अशुचित्वधातुवैषम्यभूतावेशादिजन्यो भूपातभ्रमणभुजास्फोटविकटोक्तिलालाफेनाद्यनुभाव आवेशोऽपस्मार इत्यर्थः । उदाहरति । **दृष्ट्वेति** । कुपितवदनं भ्रूकुट्यादिना भयंकरमुखमित्यर्थः । अन्तर्वणभुवि वनमध्य इत्यर्थः । 'प्रनिरन्तर—' इत्यादिना णत्वम् । आराद्भूतान् समीपस्थानपि । अत्र शत्रूणां भयकार्यमोहमूलोऽपस्मारो दैन्यधावनप्रभृतिभिरनुभावैर्व्यज्यते । सुप्तिं लक्षयति । **सुप्तिरिति**।

यथा

विश्वैकरक्षाजुषि काकतीन्द्रे निश्चिन्ततां प्राप्तवतो मुरारेः ।
तत्कीर्तिचन्द्रातपवर्धितोऽपि दुग्धाम्बुधिर्नैव भिनत्ति निद्राम् ॥

अथ विबोधः ।

विबोधश्चेतनावाप्तिर्जृम्भाक्षिपरिमार्गकृत् ।

यथा

प्रतापरुद्रे नृपमौलिरत्ने विश्वंभरां रक्षति शिक्षितारौ ।
विजृम्भमाणाः परितः प्रजानां भाग्यश्रियस्तत्क्षणमुन्मिषन्ति ॥

अथामर्षः ।

अमर्षः सापराधेषु चेतःप्रज्वलनं मतम् ।

यथा

अरे भूपाश्चापान् नमयत शिरांस्युन्नमयत
प्रवृत्ताः स्वस्त्रीणामहमहमिका वीरवरणे ।
त्वरन्ते नः खड्गाः प्रतिदलनकेल्यामिति भटा
रणाग्रे गर्जन्ति प्रकटितरुषो रुद्रनृपतेः ॥

अथावहित्था ।

निश्वासोच्छ्वासनिश्चलत्वनेत्रनिमीलनाद्यनुभावो निद्रासमुद्रेकः सुप्तिरित्यर्थः । उदाहरति । **विश्वेति** । काकतीन्द्रे विश्वैकरक्षाजुषि त्रिभुवनैकत्राणपरायणे सति । जुषेः क्विप् । निश्चिन्ततां प्राप्तवतः अवतीर्णभारत्वादिति भावः । अत एव मुरारेः पयोधिवृद्धावपि निद्राभङ्गाभावात् सुषुप्तिरित्याह । **तदिति** । विबोधं लक्षयति । **विबोध इति** । शब्दस्पर्शाहारपरिणामादिजन्या भुजोत्क्षेपाङ्गुलिस्फोटजृम्भणाक्षिविमर्दनाद्यनुभावा चेतनावाप्तिर्विनिद्रत्वं विबोध इत्यर्थः । उदाहरति । **प्रतापेति** । विजृम्भमाणाः विवर्धमानाः जृम्भां कुर्वाणाश्च । उन्मिषन्ति उद्भवन्ति नेत्राण्युन्मीलयन्ति च । अत्रेत्थमर्थद्वयस्याभेदाध्यवसायादारोपितचेतनधर्माणां भाग्यसंपदामुन्निद्रत्वप्रतीतेर्विबोध इति भावः । अमर्षं लक्षयति । **अमर्ष इति** । अधिक्षेपावमानादिना सापराधेषु मनःप्रज्वलनमभिनिविष्टत्वं प्रतिचिकीर्षेति यावत् । एवंविधेऽमर्षे स्वेदशिरःकम्पचिन्तोपायान्वेषणोत्साहतर्जनादयोऽनुभावा द्रष्टव्याः । उदाहरति । **अरे इति** । स्वस्त्रीणामप्सरसामन्योन्यं श्रेष्ठाहमित्यभिमानोऽहमहमिका । 'अहमहमिका तु सा स्यात् परस्परं यो भवत्यहंकारः ।' इत्यमरः । अहमिति विभक्तिप्रतिरूपकमव्ययं निपातितम् । तस्य वीप्सायां द्विरुक्तिः । संज्ञायां कन् प्रत्ययः । प्रतिदलनकेल्यां खण्डनक्रीडायाम् ।

हर्षाद्याकारसंगुप्तिरवहित्थेति कथ्यते ।

यथा

*गोठ्ठीए महिलाणं सोऊण पआवरुद्दचरिआइ ।
आलिहइ ओणअमुही मुद्धा चलणेण महिपट्ठं ॥

अथोग्रता।

दृष्टेऽपराधे चण्डत्वमुग्रता तर्जनादिकृत् ।

यथा

प्रियमानीय मानिन्या विरहार्तिर्निवार्यताम् ।
यदेतस्याः कटाक्षोल्कापातैरिन्दुर्मषीकृतः ॥

अथ मतिः।

तत्त्वमार्गानुसंधानादर्थनिर्धारणं मतिः ।

यथा

†को संसओ महिअले चंदो एव्व वीररुद्दणरणाहो ।
जस्स करप्पस्सादो अंगाइ मिअंकरण्णंति ॥

---

*गोष्ठ्यां महिलानां श्रुत्वा प्रतापरुद्रचरितानि ।
आलिखत्यवनतमुखी मुग्धा चरणेन महीपृष्ठम् ॥

†कः संशयो महीतले चन्द्र एव वीररुद्रनरनाथः ।
यस्य करस्पर्शादङ्गानि मृगाङ्करत्नन्ति ॥

अवहित्थां लक्षयति । **हर्षेति** । भयव्रीडाकौटिल्यादिभिर्हर्षादिकार्याकारगोपनमवहित्थेत्यर्थः । अत्र शून्यस्मितान्यथाकथनमिथ्याधैर्यकथाभङ्गादयोऽनुभावा ऊह्याः । उदाहरति । **गोठ्ठीए इति** । अत्र काचन सुन्दरी प्रसङ्गादात्मानुरागप्रधानानि प्रियचरितानि श्रुत्वा प्रहर्षन्ती लज्जया मुखविकासादिसंगोपनार्थमधोमुखी महीमालिखतीत्यवहित्थेति भावः । **महिपट्ठमिति** । 'पृष्ठेऽनुत्तरपदे' इति नियमेनेत्वाभावात् 'ऋतोऽत्' इत्यत्वम् । 'दिहौ मिथस्स' इति महीकारस्य ह्रस्वः । उग्रतां लक्षयति । **दृष्ट इति** । अपराधे पुत्रमित्रकलत्रादिद्रोहरूपे दृष्टे सति तर्जनोद्वेजनताडनबन्धनाद्यनुभावं चण्डत्वं क्रौर्यमुग्रतेत्यर्थः । कस्याश्चिद्विरहिण्याः सखी प्रियं प्रति दूतिकां प्रेषयति । **प्रियमिति** । अत्र संतापजननेन सापराधस्येन्दोः कटाक्षज्वालाभिर्मषीकरणोद्योगादुग्रतेति भावः । मतिं लक्षयति । **तत्त्वेति** । नानाविधशास्त्रचिन्तोहापोहादिभ्योऽर्थनिश्चयो मतिरित्यर्थः । अत्र शिष्योपदेशसंशयच्छेदविदग्धव्यवहारमनःसंतोषादयोऽनुभावाः द्रष्टव्याः । उदाहरति । **को संसअ इति** । अत्र प्रियकरसंस्पर्शेऽङ्गानामिन्दु-

अथ व्याधिः ।

मनस्तापाद्यभिभवाज्ज्वरादिर्व्याधिरिष्यते ।

यथा

प्रतापरुद्रस्य दिशां जिगीषोः प्रत्यर्थिनारीजनदेहजन्मा ।
स्मरज्वरोष्मा हिमवत्प्रदेशान् स्मर्तव्यनीहारकथान् करोति ॥

अथोन्मादः ।

उन्मादस्तुल्यवर्तित्वं चेतनाचेतनेष्वपि ।

यथा

प्रतापरुद्रस्य जयप्रयाणभेरीध्वनौ मूर्च्छति दिङ्मुखेषु ।
त्रासाकुला भ्रान्तिमुपेत्य वृक्षान् पृच्छन्ति मार्गं रिपुभूमिपालाः ॥

अथ मरणम् ।

मरणं मरणार्थस्तु प्रयत्नः परिकीर्तितः ।

यथा

*पिअविरहं असहंती वहुआ णिअजीविअं उवेक्खंती ।
सेव्वइ जोह्णं दक्खिणपवणस्स तणुं समप्पेइ ॥

---

*प्रियविरहमसहमाना वधूर्निजजीवितमुपेक्षमाणा ।
सेवते ज्योत्स्नां दक्षिणपवनस्य तनुं समर्पयति ॥

किरणसंस्पर्शे चन्द्रकान्तानामिव द्रवीभावादयं चन्द्र एवेत्यध्यवसायान्मतिः । मनस्तापदोषवैषम्याद्यभिभवजन्मा शीतोष्णज्वरादिश्शीतालुतोष्णालुताद्यनुभावो व्याधिरित्यर्थः । विरहजन्यं तापज्वरमुदाहरति । **प्रतापेति** । दिशामिति शेषे षष्ठी । 'न लोक—' इत्यादिना कारकषष्ठ्याः प्रतिषेधात् । अत्रोष्णालुतया हिमवत्प्रदेशवासिनोऽपि शत्रुस्त्रीजनस्य हिमापेक्षेति महीयानयं तापज्वर इति भावः । उन्मादं लक्षयति । **उन्माद इति** । भयसंनिपातेष्टवियोगधननाशादिभिश्चित्तविभ्रान्तिरुन्माद इत्यर्थः । अत्रानिमित्तस्मितासंबन्धप्रलापनिर्हेतुकधावनोपवेशनोत्थानरोदनादयोऽनुभावा भवन्ति । भयमूलमुन्मादमुदाहरति । **प्रतापेति** । स्पष्टमेतत् । मरणं लक्षयति । **मरणमिति** । व्याध्यभिघाताभ्यां देहान्मनसोऽपायो हिक्काश्वासाद्यनुभावो मरणमित्यर्थः । धनिकहेमचन्द्राद्यनुसारेण साक्षात्तदुदाहरणस्यामङ्गलत्वात् तदुद्योगोऽत्र विवक्षित इत्याह । **मरणार्थ इति** । शारदातनयस्तु मरणेऽभिनयो नास्तीत्येतत् काव्ये न पठ्यत इत्याह । उदाहरति । **पिएति** । भस्मीकरणबुद्धयेति

साक्षान्मरणस्यामङ्गळत्वान्नोदाहरणत्वमुचितम् ।

अथ त्रासः ।

आकस्मिकभयाच्चित्तक्षोभस्त्रासः प्रकीर्त्यते ।

यथा

*पणअकुविआचिरेण वि वहुआ सोऊण घणघणत्थणिअं ।
दइअं सरहसवलिआ आलिंगइ वेवमाणंगी ॥

अथ वितर्कः ।

संदेहात् कल्पनानन्त्यं वितर्कः परिकीर्तितः ।

यथा

गुणैस्तत्रासक्तं मम हृदयमन्यन्न गणितं
सखीभिर्नालोचि क्षितिपतिरसौ दुर्लभ इति ।
उपायः को वा स्यात्तदभिगमने मुह्यति मनः
कियान् कोऽयं कीदृक् कियदवधिरन्तर्व्यतिकरः ॥

*प्रणयकुपिताचिरेणापि वधूः श्रुत्वा घनघनस्तनितम् ।
दयितं सरभसवलिता आलिङ्गति वेपमानाङ्गी ॥

भावः । त्रासं लक्षयति । **आकस्मिक इति** । अकस्मादेवाकस्मिकम् । विनयादित्वात् स्वार्थे ठक्प्रत्ययः । तकारान्तत्वात् 'इसुसुक्तान्तात् कः' इति कादेशः । अव्ययत्वाट्टिलोपः । तस्मात् भयात् भयहेतोरित्यर्थः । विद्युद्गर्जितभूकम्पादिजन्यः कम्पगात्रसंकोचरोमाञ्चमोहाद्यनुभावश्चेतश्चमत्कारस्त्रास इत्यर्थः । गर्जितमूलं त्रासमुदाहरति । **पणएति** । वितर्कं लक्षयति । **सन्देहादिति** । उपलक्षणं चैतत् । तेन संदेहविमर्शादिजन्योऽनेकधासंभावनात्मा भ्रूक्षेपशिरःकम्पाद्यनुभावो वितर्क इत्यर्थः । उदाहरति । **गुणैरिति** । गुणैर्महाकुलीनतादिभिः । तत्र क्षितिपतौ । अन्यद्दौर्लभ्यादिकं न गणितं मदीयहृदयस्य कामान्धत्वादिति भावः । **सखीभिरिति** । विवेकवतीभिरपीति भावः । ननु किं गतोदकसेतुवन्धेन इतः परं वा प्रियप्राप्तावुपायं चिन्तयाम इत्युक्ते सोऽपि न प्रतीयत इत्याह । **उपाय इति** । तत्र हेतुमाह । **मुह्यति मन इति** । मोहापगमानन्तरमुपायश्चिन्त्यतामित्याशङ्क्य इयत्तयेदृक्तयेदन्तया वा दुरवगमत्वेन दुश्चिकित्सस्य मोहमहाव्याधेरानन्तर्यमपि दुर्लभमेवेत्याशयेनाह । **कियानिति** । गच्छता कालेन स्वयमेव मोहशान्तेः किं तया चिन्तयेत्याशङ्क्य कालावधिरपि दुरवबोध एवेत्याह । **कियदवधिरिति** । व्य-

तत्र सात्त्विकानां व्यभिचारिणां चानेकरससाधारणत्वान्न विशेषमपेक्ष्योदाहरणं कृतम् । तथा हि शृङ्गारे सर्वेषामनुप्रवेशः संभवति । हास्ये ग्लानिश्रमचपलत्वहर्षावहित्थानां संभवः । करुणे मदधृतिव्रीडाहर्षगर्वौत्सुक्योग्रताभिर्विनान्ये संभवन्ति । रौद्रे ग्लानिशङ्कालस्यदैन्यचिन्ताव्रीडावेगजडताविषादसुप्तिनिद्रापस्मारावहित्थाव्याध्युन्मादश्रमत्रासाः न संभवन्ति । वीरे रौद्रान्निर्वेदोऽधिकः । भयानकेऽसूयामदधृतिव्रीडाहर्षगर्वनिद्रासुप्त्यमर्षावहित्थोग्रतामतिभिर्विनान्ये संभवन्ति । बीभत्सेऽद्भुते च चिन्तात्रासादयो यथासंभवमूह्याः । शान्ते निर्वेदधृती संभवतः ।

अथ शृङ्गारचेष्टा निरूप्यन्ते ।

भावो हावश्च हेला च माधुर्यं धैर्यमित्यपि ।
लीला विलासो विच्छित्तिर्विभ्रमः किलिकिञ्चितम् ॥
मोट्टायितं कुट्टमितं बिब्बोको ललितं तथा ।
कुतूहलं च चकितं विहृतं हास इत्यपि ॥
एवं शृङ्गारचेष्टाः स्युरष्टादशविधा मताः ॥

तत्रासां स्वरूपमुदाहरणं च ।

भावः ।

रसाभिज्ञानयोग्यत्वं भाव इत्यभिधीयते ।

तिकरो व्यसनं विपत्तिर्मोह इति यावत् । एवमत्र संदेहेन कल्पनानन्त्याद्वितर्क इति भावः । ननु विभावादिवत् सात्त्विकसंचारिणामपि तत्तद्रसप्रस्ताव एव किमिति नोदाहरणं कृतमत आह । **तत्रेति** । व्यभिचारिणामनेकरससाधारणत्वमुपपादयति । **तथाहीत्यादिना** । भावादयश्चित्तारम्भाः । लीलादयो गात्रारम्भाः । उभयेऽप्यनुभावाः । तदुक्तम् । 'अनुभावश्चतुर्धा स्यान्मनोवाक्कायबुद्धिभिः ।' इति । एतेषां योषिदालम्बनचेष्टारूपाणां यौवनजन्यानामुद्दीपनविभावत्वमपि प्राचामाचार्याणां संमतम् । अतः संकीर्णस्वरूपाणामेतेषां प्रकरणनियमाभावेनायमेव स्वरूपनिरूपणावसर इत्यभिप्रायेणाह । **अथेति** । परिगणनादेवाष्टादशविधत्वे जातेऽपि कण्ठोक्तिर्मतान्तरेष्वेतेषामुच्चावचत्वमस्तीति सूचयितुम् । तत्प्रपञ्चस्तु भोजराजीयादिग्रन्थेषु द्रष्टव्यः । तत्र भावं लक्षयति । **रसेति** । बाल्ययौवनसंधावुत्पन्नशृङ्गारविषयः प्रथमोऽन्तः-

यथा

*रुद्दणरेंदस्स गुणे गाअइ बालत्तणम्मि विस्सद्धं ।
लज्जइ दरखुलइओ जुवइजणो जोव्वणे गाउं ॥

अथ हावः ।

ईषद्दृष्टविकारः स्याद्भावो हावः प्रकीर्त्यते ।

यथा

अत्रैवेषत्पुलकित इति ।

अथ हेला ।

सुव्यक्तविक्रियो भावो हेलेति प्रतिपाद्यते ।

यथा

†मा होदु कस्स वि फ्फुड इइ मुध्धे कुणसि वल्लहं हिअए ।
घोसिज्जइ तुह भाओ सव्वंगीणेहि पुलएहिं ॥

अथ माधुर्यम् ।

अभूषणेऽपि रम्यत्वं माधुर्यमिति कथ्यते ।

यथा

जितत्रैलोक्यलावण्या प्रकृत्या हरिणेक्षणा ।
किं तु भूषयितुं धत्ते भूषणानीति मे मतिः ॥

---

*रुद्रनरेन्द्रस्य गुणान् गायति बालत्वे विस्रब्धम् ।
लज्जते दरपुलकितो युवतिजनो यौवने गातुम् ॥
†मा भवतु कस्यापि स्फुटमिति मुग्धे करोषि वल्लभं हृदये ।
घोष्यते तव भावः सर्वाङ्गीणैः पुलकैः ॥

करणविकारो भाव इत्यर्थः । तदुक्तम् 'चित्तस्य विकृतिः सत्त्वं विकृते कारणे सति । ततोऽल्पा विकृतिर्भावो बीजस्यादिविकारवत् ॥' इति । उदाहरति । **रुद्देति** । अत्र यद्यपि ईषदर्थे दरशब्दोऽव्ययमिति त्रिविक्रमः तथापीषत्तमत्वमत्र विवक्षितम् । तेन दरपुलकितो दुर्लक्षपुलक इत्यर्थः । हावं लक्षयति । **ईषदिति** । दरशब्दस्य मुख्यार्थविवक्षायामिदमेवात्रोदाहरणमित्याह । **अत्रैवेषदिति** । हेलां लक्षयति । **सुव्यक्तेति** । उदाहरति । **मेति** । माधुर्यं लक्षयति । **अभूषण इति** । अत एवोक्तं दशरूपके । 'सर्वास्वप्यवस्थास्वनुल्बणत्वं माधुर्यम्' इति । उदाहरति । **जितेति** । प्रकृत्या स्वभावेनैव

अथ धैर्यम् ।

शीलाद्यलङ्घनं नाम धैर्यमित्यभिधीयते ।

यथा

*कुलवहुअणं ण जुज्जइ मज्जाआलंघनं खु विसमे वि ।
रुद्दणरिंदगुणा उण हिअअहराः किं णु कादव्वं ॥

अथ लीला ।

प्रियानुकरणं लीला वाग्भिर्गत्याथ चेष्टितैः ।

यथा

†पेच्छह सहिओ एसा लच्छी रण्णो पआवरुद्दस्स ।
चरिआइ अणुकुणंती रण्णीसु पइव्वआ जाआ ॥

अथ विलासः ।

तात्कालिको विकारः स्याद्विलासो दयितेक्षणे ।

यथा

सहेलं पश्यन्त्याः प्रकृतिसुभगं रुद्रनृपतिं
तदात्वप्रत्युद्यद्विविधललिताटोपमधुरम् ।

---

*कुलवधूनां न युज्यते मर्यादालङ्घनं खलु विषमेऽपि ।
रुद्रनरेन्द्रगुणाः पुनर्हृदयहराः किं नु कर्तव्यम् ॥
†प्रेक्षध्वं सख्य एषा लक्ष्मी राज्ञः प्रतापरुद्रस्य ।
चरितान्यनुकुर्वन्ती राज्ञीषु पतिव्रता जाता ॥

न तु प्रयत्नेनेति भावः । जितं त्रैलोक्यं येन तत् तथाभूतं लावण्यं पूर्वोक्तः कान्तिविशेषो यस्याः सा तथोक्ता । अत्र स्वाभाविकसौन्दर्यस्य प्रसाधनविधिनिःस्पृहत्वान्माधुर्यमिति भावः । धैर्यं लक्षयति । **शीलेति** । उदाहरति । **कुलेति** । विषमे विपद्यपि । लीलां लक्षयति । **प्रियेति** । उदाहरति । **पेच्छहेति** । अत्र लक्ष्मीर्नाम काचिन्नायिका प्रियचरितानुकरणाल्लीलावती जातेत्यर्थः । तस्याः पातिव्रत्ये हेतुत्वमुक्तं सर्वज्ञसोमेश्वरेण । ‘भुक्ते तु भुङ्क्ते या पत्यौ दुःखिते दुःखिता यदि । मुदिते मुदितात्यर्थं प्रोषिते मलिनाम्बरा ॥ सुप्ते पश्चात्तु या शेते पूर्वमेव प्रबुध्यते । नान्यं कामयते चित्ते सा विज्ञेया पतिव्रता ॥’ इति । राज्यलक्ष्मीरपि दानभोगादावत्यन्तमनुकूला राज्ञि निश्चलाभूदिति व्यज्यते । विलासं लक्षयति । **तात्कालिक इति** । विकारो नेत्रभ्रूवक्त्रकर्मणां विशेष इत्यर्थः । उदाहरति । **सहेलमिति** । व्याख्यातमेतन्नायकप्रकरणे (५९) प्रौढोदाहरणप्रस्तावे । विच्छि-

रसप्रादुर्भावाद्युगपदुदयत्सात्त्विकमहो
मृगाक्ष्यास्तारुण्ये कुसुमशरशिल्पं विजयते ॥

अथ विच्छित्तिः ।

विच्छित्तिरतिरम्यत्वं स्वल्पैरपि विभूषणैः ।

यथा

*कस्स किए केण किअं काअइपुरइद्धिआण सौंदज्जं ।
साहारणभूसाए जं सहि तेल्लोक्करमणिज्जं ॥

अथ विभ्रमः ।

विभ्रमस्त्वरया काले भूषास्थानविपर्ययः ।

यथा

†सोऊण सहीमुहादो दिवसो विरतोत्ति संभमेण वहू ।
हत्थेसु णूवुराइ चरणेसु कुणइ वलआइं ॥

अथ किलिकिञ्चितम् ।

रोषाश्रुहर्षभीत्यादेः संकरः किलिकिञ्चितम् ।

यथा

---

*कस्य कृते केन कृतं काकतिपुरस्त्रीणां सौन्दर्यम् ।
साधारणभूषया यत्सखि त्रैलोक्यरमणीयम् ॥
†श्रुत्वा सखीमुखाद्दिवसो विरत इति संभ्रमेण वधूः ।
हस्तयोर्नूपुरे चरणयोः करोति वलयानि ॥

त्तिं लक्षयति । **विच्छित्तिरिति** । उदाहरति । **कस्सेति** । साधारणभूषया स्रक्चन्दनताम्बूलादिनापि केन कृतमित्यनेन सौन्दर्यस्य विधातृशिल्पवैलक्षण्यं प्रतीयते । कस्य कृत इत्यनेन भोक्ता तदनुरूपो नोपलभ्यत इति । विभ्रमं लक्षयति । **विभ्रम इति** । काले प्रियसमागमादिसमये । त्वरया मदनावेशादिसंभ्रमेणेत्यर्थः । भूषाणां हाराङ्गदादीनां स्थानविपर्ययः स्थानव्यत्यास इत्यर्थः । उदाहरति । **सोऊणेति** । श्रुत्वा सखीमुखाद्दिवसो विरत इति प्रियासक्तचित्ततया स्वयं दिवसावसानमपि न जानातीति भावः । ततः संभ्रमेण वधूर्हस्तयोर्नूपुरे चरणयोर्वलये च करोति । किलिकिञ्चितं लक्षयति । **रोषेति** । उदाहरति ।

*गेह्णइ काअइणाहे विअणंमि पडंचलं मिअच्छीए ।
वेवइ तणू वि णच्चइ भूउडी अवि गग्गआ वाआ ॥

अथ मोट्टायितम् ।

मोट्टायितं स्यादिष्टस्य कथादौ भावसूचनम् ।

यथा

†महुराइ रुद्दणरवइचरिआइ वहूए णं सुणंतीए ।
तणुगोवणेण पअडो जह भाओ ण तह पुलएहिं ॥

अथ कुट्टमितम् ।

संमर्देऽपि सुखाधिक्यं रतौ कुट्टमितं मतम् ।

यथा

निर्मर्यादमनोभवोत्सवकथाविस्रम्भकर्णेजपै-
रङ्गैर्विस्मितमानसां प्रियसखीमालोक्य जातत्रपा ।
वैयात्यं निजमात्मवल्लभकृतां रागान्धतां जानती
सद्यो नम्रमुखेन्दुरिन्दुवदना क्षोणीं लिखन्ती स्थिता ॥

---

*गृह्णाति काकतिनाथे विजने पटाञ्चलं मृगाक्ष्याः ।
वेपते तनुरपि नृत्यति भ्रूकुट्यपि गद्गदा वाचः ॥
†मधुराणि रुद्रनरपतिचरितानि वध्वा ननु शृण्वन्त्याः ।
तनुगोपनेन प्रकटो यथा भावो न तथा पुलकैः ॥

गेह्णइति । अत्र भयादिविकाराणां कम्पादीनां मेलनात् किलिकिञ्चितम् । मोट्टायितं लक्षयति । **मोट्टायितमिति** । प्रियगुणकथनादौ स्वाभिलाषप्रकटनं मोट्टायितमित्यर्थः । उदाहरति । **महुराइति** । पुलकानां प्रियगुणस्तुतिजनित-मान्मथभावसूचकत्वं भावप्रकाशे । 'गुणान् गणयति स्वैरं वीक्षते भावमन्थरम् । रोमाञ्चो गद्गदपदा वाक् स्वेदश्च कपोलयोः ॥ विस्रम्भकथनं दूत्या तत्समागम-चिन्तनम् । एवंगुणस्तुतिभवा भावा मन्मथसूचकाः ॥' इति । कुट्टमितं लक्ष-यति । **संमर्द इति** । केशाधरादिग्रहे सत्यपि बहिःकोपजनकेऽन्तःसान्द्रानन्दत्वं कुट्टमितमित्यर्थः । उदाहरति । **निर्मर्यादेति** । निर्मर्यादो निर्दयप्रवृत्तो मनो-भवोत्सवः केशाधरग्रहादिकामक्रीडैव कथा वादस्तस्य विस्रम्भकर्णेजपैरुच्छृङ्खलत्व-सूचकैर्नखदन्तपदादिद्वारेति भावः । 'स्तम्बकर्णयो रमिजपोः' इत्यच्प्रत्यये 'तत्पुरुषे कृति बहुलम्' इति सप्तम्या अलुक् । वैयात्यं धाष्टर्यम् । आत्म-वल्लभकृतां तत्संबन्धिनीमित्यर्थः । करोत्यर्थस्य धात्वर्थसामान्यत्वात् विशेषपर्य-

अथ बिब्बोकः ।

मनाक् प्रियकथालापे बिब्बोकोऽनादरक्रिया ।

यथा

लक्ष्मीः सद्मनि निर्भरं विहरतां क्षोणी भुजालम्बन-
क्रीडां नैव जहातु किं च सततं वाणी मुखे तिष्ठतु ।
ज्ञातं रुद्रनरेश्वरस्य बहुभिर्विज्ञातपूर्वैः प्रिय-
व्याहारैः कृतमेव दूति मदनश्वापाय संनह्यतु ॥

अथ ललितम् ।

सुकुमारोऽङ्गविन्यासो ललितं परिकीर्त्यते ।

यथा

पदन्यासक्रीडारणितमणिमञ्जीररशनं
सहेलं व्यावल्गत्करवलयनिक्वाणसुभगम् ।
स्मितज्योत्स्नावीचीतरलंवचनं रुद्रनृपतेः
पुरन्ध्रीणामासीदनुरहसि सेवाविलसितम् ॥

अथ कुतूहलम् ।

वसानम् । रागान्धतां विशृङ्खलविहारहेतुभूतामिति भावः । अत्र लिखन्तीति वर्तमानापदेशेन तत्कारणभूताया लज्जाया अविरामः सूच्यते । अत्राभूतपूर्वसंभोगचिह्नसाक्षात्कारेण विस्मयमानां प्रियसखीं प्रेक्ष्याधुना मन्दाक्षमन्थरत्वेनाज्ञातचरकेशाधरादिग्रहदुःखतया तादात्म्यसुखातिभूमिसूचनात् कुट्टमितमिति भावः । बिब्बोकं लक्षयति । **मनागिति** । उपलक्षणमेतत् । तेन गर्वाभिमानादिना दयितेऽप्यनादरकरणं बिब्बोक इत्यर्थः । उदाहरति । **लक्ष्मीरिति** । अयि सखि त्वय्यविरतकोपायां लक्ष्म्यादिनायिकासु नानाविधविहारैः प्रेयसीपदं लभमानासु तव पुनर्नावकाशो लभ्यते । प्रियो हि प्रियाणि कथयतीत्येवं प्रियप्रेषितया दूत्यां कथिते मानग्रन्थिग्रथितहृदयतया मरणेऽपि कृतसंकल्पाया अनादृतप्रियकथाया नायिकाया वचनमेतत् । अत एवायं बिब्बोकः इति भावः । ललितं लक्षयति । **सुकुमारेति** । उदाहरति । **पदेति** । अनुगतं रहोऽनुरहसमिति प्रादिसमासः । अनुगतं रहोऽस्मिन्निति बहुव्रीहिर्वेति पदमञ्जरीकारः । 'अन्ववतप्ताद्रहसः' इति समासान्तोऽच् प्रत्ययः । अत्रान्ध्रनायकपुरन्ध्रीणामेकान्तसेवायां मणिमञ्जीरादिशिञ्जितमञ्जुलस्य करचरणविन्यासस्य क्रीडासहेलपदाभ्यामालापानां मन्दहासमधुरत्वकथनेन च सौकुमार्यप्रतिपादनाल्ललितमिति भावः । कुतूहलं लक्षयति ।

कुतूहलं रम्यदृष्टौ चापलं परिकीर्त्यते ।

यथा

वीररुद्रमधिरूढसिन्धुरं द्रष्टुमन्ध्रनगरीपुरन्ध्रयः ।
कुर्वते रचितसंक्रमत्वरास्तुङ्गसद्मशिखराधिरोहणम् ॥

अथ चकितम् ।

चकितं भयसंभ्रमः ।

यथा

अविज्ञातायातं स्वमकथितमाल्यापि हसितुं
हठादुत्पश्यन्त्याश्चकितचकितोदञ्चितदृशः ।
विलासानुद्वेलानुदितमदनान् वीक्ष्य सुतनो-
स्तथैव प्रत्येतुं पुनरवनिपालः स्पृहयति ॥

अथ विहृतम् ।

विहृतं प्राप्तकालस्य वाक्यस्याकथनं ह्रिया ।

यथा

प्रतापरुद्रस्य भुजान्तरस्थां कल्हारमालाममुना स्पृशेति ।
स्तनद्वये पत्रलिपिं लिखन्तीं सखीं वधूः पश्यति साभिमानम् ॥

कुतूहलमिति। उदाहरति। **वीरेति**। अधिरूढसिन्धुरमारूढगजम्। रचितसंक्रमत्वराः कृतगतिवेगाःउत्सृष्टलीलागतयः इत्यर्थः। तुङ्गसद्मशिखराधिरोहणं हर्म्याग्रारोहणं कुतूहलात् कुर्वते। चकितं लक्षयति। **चकितमिति**। उदाहरति। **अविज्ञातेति**। पश्चाद्भागे पादन्यासमान्द्येन अविज्ञातं प्रियानवगतमायातं स्वस्यागमनं यस्य तं तथोक्तम्। हसितुं परिहसितुं परिहासार्थमित्यर्थः। आल्या सख्याप्यकथितं स्वमात्मानं हठाद्यदृच्छया उत्पश्यन्त्याः। आसीनैस्तिष्ठन्त ऊर्ध्वमवलोक्यन्त इति भावः। अत एव चकितचकिताश्चकितप्रकारा लज्जोत्कण्ठाभ्यामसकृदावृत्तनिमीलनोन्मीलना इत्यर्थः। तथा उदञ्चिता ऊर्ध्वप्रसारितापाङ्गाश्च दृशो यस्यास्तथोक्तायाः। तल्लक्षणं भावप्रकाशे। 'मीलनोन्मीलनावृत्तिर्यत्र तच्चकितं विदुः। अपाङ्गयोरूर्ध्वभागावलोकनमुदञ्चितम्॥' इति। विलासान् 'तात्कालिको विकारः स्याद्विलासो दयितेक्षणे' इत्युक्तलक्षणान् वीक्ष्य तथैवालिङ्गनादिसत्कारमननुभूयैवेत्यर्थः। पुनः प्रत्येतुं गत्वा पुनरागन्तुमित्यर्थः। सर्वोऽपि मदनमहोत्सवश्चकितसुखस्य षोडशीमपि कलां नार्हतीति भावः। विहृतं लक्षयति। **विहृतमिति**। प्राप्तकालस्यावसरोचितस्येत्यर्थः। उदाहरति। **प्रतापेति**। भुजान्तर-

अथ हसितम् ।

आकस्मिकं तु हसितं यौवनादिविकारजम् ।

यथा

*जह जह हसइ मिअच्छी जोव्वणलच्छीए सिक्खिआ महुरं ।
तह तह कुसुमेसुसरा विअसंति पिअस्स आसा अ ॥

॥ अथ मन्मथावस्था द्वादश निरूप्यन्ते ॥

अथ शृङ्गारस्याङ्कुरितत्वपल्लवितत्वकुसुमितत्वफलितत्वहेतवो द्वादशावस्था निरूप्यन्ते ।

चक्षुःप्रीतिर्मनःसङ्गः संकल्पोऽथ प्रलापिता ।
जागरः कार्श्यमरतिर्लज्जात्यागोऽथ संज्वरः ॥
उन्मादो मूर्च्छनं चैव मरणं चरमं विदुः ।
अवस्था द्वादश मताः कामशास्त्रानुसारतः ॥

केचित्तु दशावस्था इति कथयन्ति ।

आसां स्वरूपमुदाहरणं च ।

---

*यथा यथा हसति मृगाक्षी यौवनलक्ष्म्या शिक्षिता मधुरं ।
तथा तथा कुसुमेषुशरा विकसन्ति प्रियस्य आशा च ॥

स्थितां वक्षःस्थिताम् । अमुना स्तनद्वयेन । स्पृश आलिङ्गेत्यर्थः । इतीत्थमाशिषमुक्त्वेति शेषः । साभिमानं सखीवचनस्येष्टत्वात् सकृत्रिमकोपमित्यर्थः । पश्यति न पुनः किमपि ब्रूते लज्जयेति भावः । हसितं लक्षयति । **आकस्मिकमिति** । यौवनादिविकारजं न तु हास्यवद् वेषभाषादिविकारजमित्यर्थः । अत एवाकस्मिकमहेतुकम् । व्याख्यातमेतत् । उदाहरति । **जहेति** । अत्र यौवनजन्येन मदनोद्दीपकेन मृगाक्षीहसितेन प्रियमनोरथः पृथुलीभवतीति भावः । इत्थं रससामग्रीं निरूप्य शृङ्गारास्पदक्रमनिमित्तभूता द्वादशावस्था निरूपयति । **अथेत्यादिना** । **शृङ्गारस्येति** । सामर्थ्यादयोगाख्यविप्रलम्भशृङ्गारस्येत्यर्थः । कामशास्त्रानुसारत इत्यनेन अलंकारशास्त्रे संख्यासंज्ञादौ विशेषोऽस्तीति सूच्यते । अत एवोक्तं भावप्रकाशे 'दशधा मन्मथावस्था भवेद् द्वादशधापि वा । इच्छोत्कण्ठाभिलाषाश्च चिन्ता स्मृतिगुणस्तुती ॥ उद्वेगोऽथ प्रलापः स्यादुन्मादो व्याधिरेव च । जाड्यं मरणमित्याद्ये द्वे कैश्चिद्वर्जिते बुधैः ॥' इति । अन्ये तु 'दृङ्मनःसङ्गसंकल्पा जागरः कृशतारतिः । ह्रीत्यागोन्मादमूर्च्छान्ता इत्यनङ्गदशा दश ॥' इत्याहुः । तदेतदाह । **केचिदिति** । आसां क्रमेण लक्षणोदाहरणे दर्शयति ।

आदराद्दर्शनं चक्षुःप्रीतिरित्यभिधीयते ।

यथा

*सहि एसो रुद्दणिओ णअणाणअतक्किओस्सओ जाओ ।
मअणो व मुत्तिमंतो चंदो विअ मुक्कलंछणो पुण्णो ॥

अथ मनःसङ्गः ।

मनःसङ्गः प्रियतमे नित्यं चित्तस्य विश्रमः ।

यथा

†सइ मह मणो विलग्गइ रुद्दणरेन्दम्मि कीस कुविआओ ।
तेणाहं वि विमुक्का सहिओ तुह्मेसु का वत्ता ॥

अथ संकल्पः ।

संकल्पो नाथविषयो मनोरथ उदाहृतः ।

यथा

‡दरहसिअगब्भिणाइं सिणेहसिणिध्धाइ राअभरिआइ ।
रुद्दणिवविलोइआइं काहे णु मम्मि णिवदंति ॥

---

*सखि एष रुद्रनृपो नयनयोरतर्कितोत्सवो जातः ।
मदन इव मूर्तिमान् चन्द्र इव मुक्तलाञ्छनः पूर्णः ॥
†सदा मम मनो विलगति रुद्रनरेन्द्रे कस्मात् कुपिताः ।
तेनाहमपि विमुक्ता सख्यो युष्मासु का वार्ता ॥
‡दरहसितगर्भितानि स्नेहस्निग्धानि रागभरितानि ।
रुद्रनृपविलोकितानि कदा नु मयि निपतन्ति ॥

आदरादित्यादिना । तत्र प्रत्यक्षचित्रस्वप्नादौ सादरं प्रियदर्शनं चक्षुःप्रीतिरित्यर्थः । उदाहरति । **सहीति** । अत्र राज्ञो नेत्रोत्सवत्वादिप्रतिपादनेन तद्दर्शनेऽत्यादरः प्रतीयते । मनःसङ्गं लक्षयति । **मन इति** । सर्वदा प्रियविश्रान्तचित्तत्वं मनःसङ्ग इत्यर्थः । उदाहरति । **सईति** । सइ सदा । 'इत्सदादिषु' इति सूत्रेणात्राकारस्येकारादेशः । कस्मात् कुपिता यूयमिति शेषः । तेनाहमपि विमुक्ता संनिहितापीति भावः । सख्यो युष्मासु का वार्ता व्यवहितास्विति भावः । तस्मान्न मे युष्मदुपालम्भभाजनत्वमिति भावः । संकल्पं लक्षयति । **संकल्प इति** । उदाहरति । **दरेति** । दरहसितं मन्दस्मितं तद्गर्भितानि संभोगौत्सुक्यसूचकानीत्यर्थः । 'कटाक्षैर्हासगर्भैस्तु संभोगौत्सुक्यभावना' इति वचनात् । स्नेहस्निग्धानि रागभरितानि । स्नेहो नामा-

अथ प्रलापः ।

प्रलापः प्रियसंश्लिष्टगुणालाप उदाहृतः ।

यथा

*तह णिउणो तह महुरो तह सुहओ तह अ सोम्मसब्भाओ।
एक्को रुद्दणिवो विअ इदि गोट्ठी पोढमहिलाणं ॥

अथ जागरः ।

जागरस्तु विनिद्रत्वम् ।

यथा

†गमिअं कहकह वि दिणं चंदादवदूसहा णिसा दीहा ।
मअणो वि पुंखिअसरो णिद्दा वि णिवो वि णोवेइ ॥

अथ कार्श्यम् ।

---

*तथा निपुणस्तथा मधुरस्तथा सुभगस्तथा च सौम्यस्वभावः ।
एको रुद्रनृप एवेति गोष्ठी प्रौढमहिलानाम् ॥
†गमितं कथं कथमपि दिनं चन्द्रातपदुःसहा निशा दीर्घा ।
मदनोऽपि पुङ्खितशरो निद्रापि नृपोऽपि नोपैति ॥

द्रान्तःकरणत्वम् । तदुक्तम् । 'मनसो यद्द्रवीभावो विषयेषु ममत्वतः । भयशङ्कावसानात्मा स एव स्नेह उच्यते ॥' इति । तत्प्रकर्षो रागः । तदुक्तम् । 'दुःखमप्यधिकं चित्ते सुखत्वेनैव रज्यते । येन स्नेहप्रकर्षेण स राग इति कथ्यते ॥' इति । रुद्रनृपविलोकितानि कदा मयि निपतन्ति । प्रलापं लक्षयति । **प्रलाप इति** । प्रियगुणस्तुतिः प्रलाप इत्यर्थः । उदाहरति । **तहेति** । तथा निपुणो विदग्धः कृत्यवस्तुषु चतुर इत्यर्थः । तथा मधुरः प्रियदर्शनः प्रियंवदो वा । तथा सुभगो गम्भीरगुणो नायकविशेषः । तल्लक्षणं वक्ष्यामः । तथा सौम्यस्वभावः सुशील एको रुद्रनृप एवेति गोष्ठी प्रौढमहिलानाम् । सर्वत्र तथाशब्दः पूर्वानुभवपरः । अत्र निपुणत्वादिगुणयोगात् प्रतापरुद्र एवास्माकमभिगम्य इति प्रौढाङ्गनाः प्रसङ्गं कुर्वन्तीति भावः । अत एवोक्तं भावप्रकाशे । 'महोदयो महाभाग्यः कृतज्ञो रूपवान् युवा । मानी सुशीलः सुभगो विदग्धो वंशसंभवः ॥ अहर्निद्रो मधुरवागभिगम्यो भवेत् स्त्रिया ॥' इति । रुद्दणिवो विअ रुद्रनृप एव। विअवेअ अवधारणे इत्यवधारणार्थे विअ वेअ इत्येतौ शब्दौ निपातितौ । जागरं लक्षयति । **जागर इति** । उदाहरति । **गमिअमिति** । गमितं कथंकथमपि दिनम् प्रियागमनप्रतीक्षणादिभिरिति भावः । चन्द्रातपदुःसहा निशा अत एव दीर्घा । निद्रापि नोपैति । स्वप्नसमागमस्यापि परिपन्थी जागरहतको जागर्तीति

कार्श्यमङ्गस्य तानवम् ।

यथा

चन्द्रास्ये कथमङ्गुलीयकमिदं केयूरितं ते सखि
प्रेम्णां प्रेयसि वैभवैः स खलु को भूमेः सपत्नी यतः ।
ज्ञातं मानिनि काकतीयनृपतौ सक्तासि सत्यं शुभे
श्यामाङ्गीं स खलु स्थिरां रमयते त्वां तां च शैलस्तनीम् ।

अथारतिः ।

अन्यत्राप्रीतिररतिः ।

यथा

*दूसेइ चंदसिट्ठिं णिंदइ मलआणिलस्स माहप्पं ।
ऊसवपरंमुही सा सुहअ तुमं किं णु मंतेसि ॥

अथ व्रीडात्यागः । यथा

---

*दूषयति चन्द्रसृष्टिं निन्दति मलयानिलस्य माहात्म्यम् ।
उत्सवपराङ्मुखी सा सुभग त्वं किं नु मन्त्रयसे ॥

भावः । कार्श्यमाह । **कार्श्यमिति** । उदाहरति । **चन्द्रास्य इति** । **अङ्गुलीयकमिति** । 'जिह्वामूलाङ्गुलेश्छः' इति छप्रत्यये स्वार्थिकः कन्प्रत्ययः । केयूरितमङ्गदीकृतमित्यर्थः । नायिकाह । **सखीति** । प्रेम्णां प्रेमादीनां प्रियविषयरत्यवस्थाविशेषाणामित्यर्थः । तदुक्तम् । 'प्रेमा मानः प्रणयः स्नेहो रागोऽनुरागश्च । अङ्कुरपल्लवकलिकाकोरकफलभोगभागयं क्रमशः ॥' इति । 'सप्तमी शौण्डैः' इतिवदाद्यर्थलाभः । सखी प्रेमविषयं पृच्छति । **स खलु कः इति** । नायिकोत्तरमाह । **भूमेरिति** । **यत इति** । सार्वविभक्तिकस्तसिः । येनाहं भूमेः सपत्नी भवेयं स इत्यर्थः । सखी नायिकाभिप्रायमुद्घाटयति । **ज्ञातमिति** । नायिकाङ्गीकरोति । **आलीति** । भूकल्पायास्तवापि सर्वथा तद्भ्देवोपभोगो भविष्यति किमेतेन कार्श्येनेति सखी नायिकामुपलालयति । **शुभ इति** । श्यामाङ्गीं यौवनयुक्ताङ्गीमन्यत्र कृष्णाङ्गीम् । शैलस्तनीं शैलसदृशस्तनीमन्यत्र स्तनायमानशैलामित्यर्थः । अरतिं लक्षयति । **अन्यत्रेति** । प्रियव्यतिरिक्तविषयवैराग्यमरतिरित्यर्थः । उदाहरति । **दूसेइ इति** । **सुभग त्वमिति** । सुभगो नाम नायकविशेषः । तदुक्तम् । 'सपत्नीनखदन्तादिचिह्नं यत्र न दृश्यते । विस्मार्यमाणमानेर्ष्यः सुभगः सोऽभिधीयते ॥' इति । अत एवात्र विषयान्तराद्वैराग्यलिङ्गाभावेन प्रेमास्पदत्वं द्रष्टव्यम् । लज्जात्याग-

*लंघिअमहिलासमअं तह भणिअं मअणदुव्विणीदाए ।
जह सोऊण गुरुअणो ओसरइ विलज्जिओ दूरं ॥

अथ ज्वरः ।

तापाधिक्यं ज्वरो मतः ।

यथा

†मोहसिसिरोवआरा वहुआ विरहज्जरेण गुरुएण ।
दाणिं रुद्दणरेसर कांखइ तुह दंसणामअअं ॥

उन्मादमरणयोः प्रागेवोदाहरणं दर्शितम् ।

अथ मूर्च्छा ।

मूर्च्छा त्वाभ्यन्तरी वृत्तिर्बाह्येन्द्रियनिमीलनात् ।

यथा

‡चिंतंतीए णरेन्दं दट्ठुं हिअअट्ठितं मिअच्छीए ।
करणाइ बाहिराइं विसंति अब्भंतरं वि सुण्णाए ॥

---

*लङ्घितमहिलासमयं तथा भणितं मदनदुर्विनीतया ।
यथा श्रुत्वा गुरुजनोऽपसरति विलज्जितो दूरम् ॥
†मोघशिशिरोपचारा वधूर्विरहज्वरेण गुरुणा ।
इदानीं रुद्रनरेश्वर काङ्क्षति तव दर्शनामृतम् ॥
‡चिन्तयन्त्या नरेन्द्रं द्रष्टुं हृदयस्थितं मृगाक्ष्याः ।
करणानि बाह्यानि विशन्ति अभ्यन्तरमपि शून्यायाः ॥

मुदाहरति । **लङ्घिएति** । लङ्घितमहिलासमयं सुरतव्यतिरिक्तकाले लज्जाशीसमयः । किं विलम्ब्यते चुम्बनादिकमिहेदानीमेव कर्तव्यमित्यादिकं तथाशब्दार्थः । ज्वरं लक्षयति । **तापेति** । उदाहरति । **मोहेति** । अवस्थाद्वयं व्यभिचारिप्रस्ताव एवोदाहृतमित्याह । **उन्मादेति** । स्थायिभावसहकारित्वेनोपाधिना संचारित्वम् । रसास्वादनिमित्तत्वेनोपाधिना अवस्थात्वं चेति विवेकः । मूर्च्छा लक्षयति । **मूर्च्छेति** । बाह्येन्द्रियाणां चक्षुरादीनां निमीलनं स्वस्वविषयग्रहणाभावः । अत एवाभ्यन्तरे अवृत्तिः शून्यान्तःकरणत्वमित्यर्थः । उदाहरति । **चिन्तन्तीए इति** । शून्यायाश्चिन्तया शून्यान्तःकरणाया इत्यर्थः । अत्र मूर्च्छायां मोहाख्यसंचारिसमानयोगक्षेमत्वेनोन्मादादिवदुदाहरणातिदेशार्हत्वेऽपि पृथगुदाहरणं चमत्कारविशेषद्योतनायेति द्रष्टव्यम् । अथ रसविशेषानु-

अथ शृङ्गारः । स द्विविधः । संभोगो विप्रलम्भश्चेति । 'संयुक्तयोस्तु संभोगो विप्रलम्भो वियुक्तयोः' इति शृङ्गारतिलके । संभोगस्य परस्परावलोकनसंभाषणालिङ्गनचुम्बनाद्यनेकव्यापारमयत्वेनानन्त्यादेकविधत्वेन गणना कृता । यथा

रहःप्रत्यासन्ने हृदयदयिते रुद्रनृपतौ
निवृत्ता मानाज्ञा विरलमपि लज्जाविलसितम् ।
किमन्यत्ते गोप्यं बहिरबहिरानन्दमसृणः
स्मरावेशः कोऽपि प्रियसखि नृपेणैकयति माम् ॥

विप्रलम्भः पुनरभिलाषेर्ष्याविरहप्रवासहेतुकत्वेन चतुर्विधः ।

अभिलाषो नाम संभोगात् प्रागनुरागः ।

यथा

अन्योन्यभाषणमनङ्गविलासगोष्ठी
शय्या च सार्धमपदानि मनोरथानाम् ।

दितोद्देशक्रमानुसारेण विभागपूर्वकं लक्षणोदाहरणाभ्यां दर्शयति । **अथेत्यादिना** । तत्र संभोगस्यावान्तरविभागाभावे हेतुमाह । **सम्भोगस्येति** । उदाहरति । **रह इति** । रहःप्रत्यासन्ने विजनमुपगते हृदयदायिते प्राणवल्लभे मानः कोपविशेषः । 'स्त्रीणामीर्ष्याकृतः कोपो मानोऽन्यासङ्गिनि प्रिये' इति लक्षणात् । तस्याज्ञा तत्परवशत्वमित्यर्थः । लज्जाविलसितमपि विरलं निवृत्तमित्यर्थः । सुरतसमये स्त्रीणां प्रागल्भ्यभूषणत्वादिति भावः । अत्र विस्रम्भविहारविरोधिनोर्लज्जामानयोर्निवृत्तिकथनादुन्मर्यादो विमर्दः संवृत्त इति सूच्यते । तत्फलमाह । **किमिति** । अवक्तव्यं ते नास्तीत्यर्थः । बहिरबहिरानन्दमसृणः विगलितवेद्यान्तरत्वेनापरिच्छिन्नानन्दमय इत्यर्थः । अत एवालौकिकोऽयं स्मरावेशो दुर्निश्चयस्वरूप इत्याह । **कोऽपीति** । किं बहुना । तदानीमावयोः सामरस्यं समजनीत्याह । **नृपेणेति** । एकां करोति एकयति । एकशब्दात् 'तत्करोति' इति ण्यन्तात् 'वर्तमानसामीप्ये वर्तमानवद्वा' इति वर्तमानप्रत्ययः । अत्र हृदयदयितपदोदितेनालम्बनविभावेन रहःशब्दसूचितैरुद्दीपनविभावैर्माननिवृत्तिव्यङ्ग्यैर्हर्षादिव्यभिचारिभिरनुक्तिसिद्धैः स्तम्भादिभिरनुभावैश्च परिपोषं प्राप्तः रत्याख्यः स्थायिभावः शृङ्गारतामङ्गीचकारेति वेदितव्यम् । विप्रलम्भं विभजते । **विप्रलम्भ इति** । तत्राद्यं लक्षयति । **अभिलाष इति** । अयोगपूर्वानुरागाद्यपरपर्यायो विप्रलम्भविशेषोऽभिलाष इत्यर्थः । उदाहरति । **अन्योन्येति** । अन्योन्यभाषणमिष्टालापरूपं ततोऽनङ्गविलासगोष्ठी नर्मकथाप्रसङ्ग इत्यर्थः । सार्धं शय्या सह

प्रेमानुविद्धमुदयद्बहुलानुरागं
लभ्येत रुद्रनृपतेरवलोकितं वा ॥

ईर्ष्या नाम नायकस्यान्यासक्तभावात् चित्तविक्रिया ।

तया विप्रलम्भो यथा

लक्ष्मीरस्य विलोचनाब्जवसतिः सेर्ष्या त्वदालोकने
वक्त्रस्था च सरस्वती न सहते साकं त्वया भाषणम् ।
लीलाकर्षणविघ्नकृत् त्वयि मही बाहुस्थिता काकति-
क्षोणीन्द्रे न हि कैतवानि सुभगे मानेन किं ताम्यसि ॥

विरहो नाम लब्धसंयोगयोर्नायकयोः केनचित् कारणेन पुनः समागमकालातिक्षेपः ।

शयनञ्चेत्यर्थः । 'संज्ञायां समजनि—' इत्यादिना क्यप् प्रत्ययः । अत्र यद्यपि शेरतेऽत्रेति अधिकरणव्युत्पत्त्या शय्याशब्दः खट्वापरो न शयनपरस्तथापि भृत्यादिशब्दवदत्रापि भावानुवृत्त्या भावार्थत्वमभिमेने कविरित्यनुसंधेयम् । मनोरथानामपदान्यस्थानानि अविषया इत्यर्थः । मनोरथविषयमाह । **प्रेमेति** । 'स प्रेमा यन्मिथो यूनोर्निरूढं भावबन्धनम् ।' इत्युक्तलक्षणेन प्रेम्णानुविद्धं युक्तं तथा उदयन्नुद्दीप्यमानो बहुलानुरागो यत्र तत् तथोक्तम् । 'रागोऽनुवृत्तो विच्छिन्नमनुराग उदाहृतः' इति । रतेरेवावस्थाविशेषाः प्रेमादय इत्युक्तं रसार्णवे 'अङ्कुरपल्लवकलिकाप्रसूनफलभोगभागयं क्रमशः । प्रेमा मानः स्नेहः प्रणयो रागोऽनुरागश्च ॥' इत्युक्तेः । एतादृशमवलोकितं वा लभ्येत । प्रार्थनायां लिङ् । ईर्ष्याविप्रलम्भं लक्षयति । **नायकस्येति** । स्वप्रियस्यान्यासक्तभावान्नायिकान्तरासक्तत्वाद्दर्शनश्रवणानुमानैरुपलब्धादिति शेषः । अन्यथेर्ष्यानुदयादिति भावः । चित्तविक्रिया ईर्ष्या मानरूपेत्यर्थः । अत एवोक्तं दशरूपके । 'स्त्रीणामीर्ष्याकृतः कोपो मानोऽन्यासङ्गिनि प्रिये । श्रुते वानुमिते दृष्टे ईर्ष्याकोपः स उच्यते ॥' इति । अत एवायमीर्ष्याविप्रलम्भः स्त्रीणामेव न पुरुषाणामिति द्रष्टव्यम् । तदुक्तं हेमचन्द्रेण । 'ईर्ष्या मानः स्त्रीणामेव' इति । उदाहरति । **लक्ष्मीरिति** । अत्र नेत्राननबाहुवासिन्यः श्रीवाणीधरण्यो यथाक्रमं त्वदालोकनसंभाषणलीलाकर्षणानि प्रतिबध्नन्ति । काकतिनाथोऽयं पुनर्न तथा कितवस्तस्मान्न तत्र मानः कार्य इत्यर्थः । कैतवाभावोऽत्र नायकविशेषवाचिना सुभगशब्देन सूच्यते । तल्लक्षणमुक्तं भावप्रकाशे । 'सपत्नीनखदन्तादिचिह्नं यस्य न दृश्यते । विस्मार्यमाणमानेर्ष्यः सुभगः सोऽभिधीयते ॥' इति । अत एव भारविणाप्युक्तम् । 'कः प्रिये सुभगमानिनि मानः' इति । विरहविप्रलम्भं लक्षयति । **विरह इति** । नायकयोः स्त्रीपुंसयोः । **केनचित् कारणेनेति** ।

5855

यथा

अङ्गेषु जीर्णेषु विभूषणानां व्यत्यासमार्गोऽपि मुहूर्तशोभी ।
सख्यस्तदास्तां परिकर्मरीतिरानीयतां रुद्रनृपः किमन्यत् ॥

यूनोर्देशान्तरवृत्तित्वं प्रवासः ।

तेन विप्रलम्भो यथा

सेव्योऽस्तु रुद्रनृपतिर्निखिलैर्नृपालै-
रभ्युत्सवेषु सुलभा न हि वल्लभा नः ।
इत्थं कलिङ्गसुदृशां विरहार्तितापा-
दङ्गानि यान्ति तनुतां दिवसा युगन्ति ॥

रसाभासो यथा

प्रासादगर्भवलभीषु कपोतपाल्यां
पारावतीं रमणचुम्बितचञ्चुकोटिम् ।
आविर्भवत्सुरतकूजितरक्तकण्ठी-
मालोक्य काकतिविभुः स्मितमातनोति ॥

अविद्यमान एवान्यासङ्ग इति भावः । नायकयोर्निर्निमित्तो विप्रयोगः प्रणयमानापरपर्यायो विरहविप्रलम्भ इत्यर्थः । तदुक्तं रसमञ्जर्याम् । 'परस्परमाज्ञोल्लङ्घनं प्रणयमानः' इति । अयं पुनर्द्वयोरपि भवति । तत्र स्त्रीविरहमुदाहरति । **अङ्गेष्विति** । व्यत्यासमार्गः अङ्गुलीयकादीनां कटकादिस्थानेषु धारणादिति भावः । मुहूर्तशोभी अनन्तरमतिकार्श्यसंभवेन तत्रापि तेषामनवस्थानादिति भावः । परिकर्मरीतिः प्रसाधनप्रकारः । **किमन्यदिति** । कार्यान्तरस्य वृथा विलम्बनहेतुत्वादिति भावः । एवं पुंविरहेऽप्युदाहार्यम् । प्रवासविप्रलम्भं लक्षयति । **यूनोरिति** । उदाहरति । **सेव्य इति** । निखिलेतरभूपालवत् वीररुद्रं स्वप्रिया अपि सेवन्तां नाम । अकिंचनैरप्यादरणीयेषूत्सवदिवसेष्वपि ते नो दुर्लभा अभूवन्निति दूयामहे इत्यर्थः । इत्थमनुलपन्तीनामिति शेषः । दिवसा युगन्ति युगकल्पा भवन्तीत्यर्थः । युगप्रातिपदिकाच्चारक्विबन्ताद्वर्तमाने लट् । रात्रयस्तु दुरतिवाहा एवेति भावः । त्रिधा रसाभास इत्युक्तं । तत्र तिर्यग्गतमुदाहरति । **प्रासादेति** । वलभीषु गोपानसीषु । कपोतपाल्यां विटङ्के च रमणचुम्बितचञ्चुकोटिमत एवाविर्भवत्सुरतकूजितामयलोद्यन्मणितां रक्तकण्ठीं मधुरस्वनाम् । अत्र तिरश्चोः पारावतयोः कलाकौशलाभावेन तदीयशृङ्गारस्य विभावादिपरिपूर्त्यभावादाभासत्वं द्रष्टव्यम् । रस एवायं नाभास इति केचित् । तदुक्तं विद्याधरेण । 'विभावादिसंभवो हि रसं प्रति प्रयोजको न विभावादिज्ञानं । ततश्च

5855

भावोदयो यथा

मुग्धे कस्तव वर्तते हृदि मनोजन्मैव नान्यः शपे
सख्यै तस्य किमत्र कार्यमपरं किं जन्मसद्मादरात् ।
कोऽन्यस्तत्प्रतिबिम्ब एव निपुणे जानासि कामाधिकः
प्रेयान्रुद्रनृपस्तवेति कथिता नम्राननाभूद्वधूः ॥

अत्र लज्जाया उदयः ।

भावशमो यथा

लक्ष्मीस्त्वं पुरुषोत्तमस्तव पतिः श्रीवीररुद्रो नृपः
सृष्टयामम्बुजविष्टरस्य सदृशोर्योगश्चिरात् संभृतः ।
तस्मात् कृत्रिममप्यसाम्प्रतमिदं वां वैमनस्यं मना-
गित्यालिं प्रणतां विलोक्य विकसद्वक्त्राम्बुजा मानिनी ॥

अत्र कोपस्य प्रशमः ।

भावसन्धिर्यथा

प्रतापरुद्रस्य दिगन्तजैत्रयात्राप्रभूतैः पटहप्रणादैः ।
प्रियानुलापैश्च तथा भटानां रोमाञ्चवर्मावृतमङ्गमासीत् ॥

तिरश्चामप्यस्त्येव रसः' इति ।: भेदान्तराणामुदाहरणमन्यतोऽवगन्तव्यम् । भावोदयमुदाहरति । **मुग्ध इति** । मुग्धे सुन्दरीति संबोध्य सखी पृच्छति । अथ नायिकोत्तरमाह । **मनोजन्मेति** । शपथविशेषेण सखीमत्र प्रत्याययति । **शप इति** । 'शप उपालम्भने' इत्यात्मनेपदम् । 'वाचा शरीरस्पर्शनमुपालम्भः' इति वृत्तिकारः । 'श्लाघह्नुङ्स्था—' इत्यादिना सख्या इति संप्रदानत्वाच्चतुर्थी । पुनः सख्याह । **तस्येति** । अत्र मनसि । तस्य मनोभुवः । नायिका प्रतिवक्ति । **अपरमिति** । जन्मभूमिस्नेहादन्यत् किमपि नास्तीत्यर्थः । कामस्तावदास्तां द्वितीयः कः इति सखी पृच्छति । **कोऽन्य इति** । तत्प्रतिबिम्बादन्यः कोऽपि नास्तीत्युत्तरमाह । **तदिति** । पुनः सख्याह । **निपुण इति** । जानासि प्रतारण-प्रकारमिति शेषः । नम्रानना लज्जयेति भावः । भावशान्तिमुदाहरति । **लक्ष्मीरिति** । अम्बुजविष्टरस्य कमलासनस्य । सदृशोः समानयोः । तस्माद्वां युवयो-र्वैमनस्यं मनागल्पं कृत्रिमं बाह्यमपीत्यर्थः । असाम्प्रतमयुक्तम् । यतो 'न पुन-रेति गतं चतुरं वयः' इति भावः । इत्युक्त्वेति शेषः । प्रणतामालिं सखीं विलोक्य विकसद्वक्त्राम्बुजा भ्रुकुटिवैवर्ण्यादिकोपानुभावापगमादित्यर्थः । कोपः शान्त इति भावः । भावसन्धिमुदाहरति । **प्रतापेति** । प्रियाणां प्रेयसीनामनु-

अत्र वीरशृङ्गारकृतयोर्हर्षयोः संधिः ।

भावशबलता यथा

निन्दन्त्वद्य कुलस्त्रियः प्रियतमो लभ्यः सुखं केन वा
भाग्येनानुमतं न किं गुरुजनैः का वा सखी प्रेष्यते ।
किं लोकस्य भवेत् प्रसिद्धमचिरात् स्वच्छन्दमङ्कं कदा-
रोक्ष्यामि स्थिरता कदा हृदि भवेद्यातव्य एव प्रियः ॥

अत्रौत्सुक्यादीनां शबलता ।

लापैरनुरागतरङ्गितैस्तत्कालोचितवचनाम्रेडितैश्च । अत्र परस्परविरुद्धवीरशृङ्गाराश्रितयोर्हर्षयोः स्पर्धया सम्बन्धकथनात् भावसंधिरेव चर्वणास्पदमित्यर्थः । तदेतदाह । **अत्रेति** । भावशबलतामुदाहरति । **निन्दन्त्विति** । प्राप्तकाले लोट् । अद्य आत्मोपसरणावसर इत्यर्थः । अनेन कार्यकारणमूला लज्जा व्यज्यते **प्रियतम इति** । अत्र प्रियसौलभ्ये किं वा भाग्यं निमित्तमित्यूहकथनात् विमर्शमूलो वितर्कः । **अनुमतमिति** । अत्र किमर्थं वा गुरुजनानुमतिर्नाभूदिति कार्पण्योक्त्या दैन्यं ध्वन्यते । प्रियानयनार्थं **का वा सखी प्रेष्यत इति** । सहायान्वेषणेनानुभावेन प्रारब्धकार्यानिर्वहणमूलो विषादो व्यज्यते । **किमिति** । **प्रसिद्धमिति** । स्वदुर्विनीतत्ववैभवमिति शेषः । अतस्तन्मूलानर्थोत्प्रेक्षालक्षणा शङ्कयमिति भावः । **अचिरादिति** । स्वः स्वकीयश्छन्दोऽभिप्रायो यस्मिन् कर्मणि तत् स्वच्छन्दं स्वेच्छयेत्यर्थः । अङ्कं प्रियस्येति शेषः । अत्र कालाक्षमत्वलक्षणमौत्सुक्यं प्रतीयते । **स्थिरतेति** । अत्र हृदयस्थैर्याकाङ्क्षया नैस्स्पृह्यलक्षणा धृतिरवधार्यते । यातव्योऽभिसरणीय एव प्रिय इत्यनेनं तत्त्वनिर्धारणात्मिका मतिरिति । अत्र लज्जादीनामष्टानामपि भावानामन्योन्योपमर्दकतया समावेशात् भावशबलतेत्यर्थः । अत्र लज्जा वितर्केण बाध्यते दैन्यं विषादेन शङ्का औत्सुक्येन धृतिर्मत्येत्येवमन्योन्यबाध्यबाधकभावेन द्वन्द्वशो भवन्ती भावशबलतां ततो गत्वा मतेरेव प्राधान्यमादधाना परमास्वादस्थानमित्यर्थः । तदेतदभिसंधायाह । **अत्रेति** । अत्रानादेरप्यौत्सुक्यस्यादित्वेनोपादानमन्येषामौत्सुक्यजीवितत्वसूचनार्थमित्यनुसंधेयम् । अत्र लज्जादीनामभिसरणविरोधित्वाद्बाध्यत्वम् । वितर्कादीनां तु तदभावात् बाधकत्वमिति विवेकः । ननु 'प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्' इति न्यायेन लज्जादीनां बाध्यानामनुपादानमेव श्रेय इति न शङ्कनीयम् । विरोधिनामपि रसादीनामाधिकारिकरसदार्ढ्यार्थमङ्गत्वेनोपनिबन्धनवदत्रापि तदुपादानस्य न्याय्यत्वात् । तदुक्तं ध्वन्याचार्यैः । 'विवक्षिते रसे लब्धप्रतिष्ठे तु विरोधिनाम् । बाध्यानामङ्गभावं वा प्राप्तानामुक्तिरच्छला ॥' इति । अत्रोक्तभावोदयादीनां राजानुगतविवाहप्रवृत्त-

अथ रससंकरस्योदाहरणम् ।

तत्र श्रृङ्गारकरुणयोः संकरो यथा

आसन्नेऽपि महोत्सवे कथमितस्त्यक्त्वा प्रवासं व्रजे-
धिग् धिक् साहसमावयोर्विघटनं को वा विधिः काङ्क्षति।
इत्थं स्वप्ननिवारितप्रियतमप्रस्थानबुद्धिस्ततो
बुद्ध्वा मूर्च्छति काकतीयनृपते त्वद्वैरिनारीजनः ॥

अथ रौद्रबीभत्सयोः संकरो यथा ।

पीत्वा मांसोपदंशं द्विरदगळगलद्रक्तमैरेयधारां
मत्तो मस्तिष्कलग्नैर्दलितनृपवपुःकीकसैः स्पष्टदंष्ट्रः ।
बिभ्रद्रौद्रान्त्रमालां जनितजनभयो भैरवाकारघोरः
संग्रामोर्व्याः कलिङ्गैर्बलिविधिमकरोद्वीररुद्रस्य खड्गः ॥

एवमन्यदपि यथासंभवमुदाहार्यम् ।

भृत्यवत् कदाचिदङ्गित्वमप्यङ्गीक्रियते । तदुक्तं काव्यप्रकाशे । 'मुख्ये रसेऽपि तेऽङ्गित्वं प्राप्नुवन्ति कदाचन' इति । भावमेलनप्रसङ्गाद्रसमेलनमप्युदाहर्तुं प्रतिजानीते । **अथेति** । तत्र श्रृङ्गारसंकीर्णं करुणमुदाहरति । **आसन्न इति** । व्याख्यातमेतत् काव्यप्रकरणे (पृ० ४५) मध्यमकैशिक्युदाहरणे । बीभत्ससंकीर्णं रौद्रमुदाहरति । **पीत्वेति** । व्याख्यातमिदमपि नाटके तृतीयेऽङ्के (पृ० १२८) । अत्रोदाहरणद्वये द्वयोः करुणरौद्रयोर्विश्रान्तिधामत्वेन चर्वणायां प्रथमभावित्वात् प्राधान्येनाङ्गित्वम् । शृङ्गारबीभत्सयोस्तदुपस्कारकत्वेनाङ्गत्वमिति विवेकः । अत एवोक्तं भावप्रकाशे । 'रसाः कार्यवशात् सर्वे मिलन्त्येव परस्परम् । प्रथमं यो रसः ख्यातः स प्रधानो भविष्यति ॥' इति । नन्वयमङ्गभूतो रसः परिपोषमप्राप्तः प्राप्तो वा । नाद्यः । रसत्वव्याघातात् । न द्वितीयः । उपस्कार्यत्वेनाङ्गत्वभङ्गात् । तस्मादयुक्ता रससंकरवाचोयुक्तिरिति चेन्मैवम् । परिपोषलाभेऽपि कस्यचित् कदाचिदुपस्कारत्वेनाङ्गत्वाङ्गीकारात् । तदुक्तमभिनवगुप्ताचार्यैः । 'संभूतान्यपि रसान्तराणि स्वविभावादिसामग्र्यां स्वावस्थायां यद्यपि लब्धपरिपोषाणि चमत्कारगोचरतां प्रतिपद्यन्ते तथापि स चमत्कारस्तावत्येव परितुष्यन् न विश्राम्यति किं तु चमत्कारान्तरमनुधावति' इति । अङ्गाङ्गिभावे सर्वत्रेयमेव भङ्ग्यङ्गीकरणीया । तदुक्तमाचार्यैः । 'गुणः कृतात्मसंस्कारः प्रधानमनुषज्यते । प्रधानस्योपकारे हि तथा भूयसि वर्तते ॥' इति । तच्चाङ्गत्वं स्वाभाविकं रूपकादिवलादारोपितं चेत्यादिविशेषास्त्वन्यतो द्रष्टव्या इत्याशयेनाह । **एवमिति** । अयं च रसो लौकिकालौकिकभेदेन द्विविधः । तत्राद्यः

अत्र रसो नायकाश्रय एव । यदि परं निपुणनटचेष्टया तथाविध-काव्यश्रवणबलेन च सामाजिकैः साक्षात् भाव्यते तदा परगतस्यापि रसस्य सम्यग्भावनया परत्र निरतिशयानन्दजननमविरुद्धम् । अथवा मालत्यादिशब्देभ्यो योषिन्मात्रप्रतीतौ रावणादिशब्देभ्यः शत्रुमात्रप्र-तीतौ च स्मृत्यारूढेन तत्तद्योषिद्विशेषेणानुकार्येण सामाजिकाश्रयत्व-

---

कदलीरसालादिफलास्वादजन्यानन्दसदृशः कार्यश्च । इतरो ब्रह्मानन्दसब्रह्मचारी नित्यश्च । तत्राद्यस्याश्रयमाह । **अत्रेति** । रसो लौकिको नायकोऽनुकार्यो रामा-दिराश्रयो यस्य स तथोक्तः । एवकारः आश्रयान्तरव्यवच्छेदार्थः । यद्येवं सा-माजिकानां पौनःपुन्येनाभिनयावेक्षणकाव्यश्रवणकौतुकमुन्मत्तचेष्टितं स्यात् । अत आह । **यदि परमिति** । 'शिल्पविन्नायकादीनां तादात्म्यापत्तिभावुकः । चतुर्धाभिनयाभिज्ञो नटो भावादिभेदवित् ॥' इत्युक्तलक्षणस्य निपुणस्य नटस्य चेष्टयाभिनयेन तथाविधस्य गुणालंकारपरिष्कृतरसोल्लसितशब्दार्थसंघटनात्मकस्य काव्यस्य श्रवणबलेन । समाजः सभा तत्र समवेताः सामाजिकाः रामादितन्म-यीभवनयोग्यमनस्काः । भावुकप्रेक्षकाद्यपरपर्यायाः सहृदया इत्यर्थः । संपूर्वादजेः समूहवाचिना घञन्तात् 'समवायान् समवैति' इति ठक्प्रत्ययः । तैर्यदि परं साक्षाद् भाव्यते केवलं स्वसंबन्धित्वेनानुसंधीयते चेदित्यर्थः । तर्हि पुत्राद्यानन्द-दर्शने पित्रादिवदत्राप्यानन्द उदेतीति भावः । अत एवोक्तं भावप्रकाशे । 'यस्तुष्टौ तुष्टिमाप्नोति शोके शोकमुपैति च । क्रोधे क्रुद्धो भये भीरुः स श्रेष्ठः प्रेक्षकः स्मृतः ॥' इति । न केवलं तत्र तावन्मात्रं किं तु विशेषोऽप्यस्तीत्याह । **परगतस्येति** । भावनाविशेषादानन्दविशेषो युक्त एवेति भावः । अथालौकिकरसस्याश्रयमाह । **अथवेति । मालत्यादिशब्देभ्य इति** । अभिनयवेलायां नटादिसमुच्चारितेभ्यो विशिष्टकाव्यगतेभ्य इत्यर्थः । योषिन्मात्रप्रतीतौ न तु मालत्यादिविशेषोल्लेखे-नेत्यर्थः । एवमन्यत्रापि द्रष्टव्यम् । **स्मृत्यारूढेनेति** । सामान्यप्रतीतौ विशेष-स्मरणमनयोरविनाभावमूलमित्यनुसंधेयम् । ननु सामाजिकानां श्रूयमाणमालत्या-दिविशेषपरिहारेण स्वाभिलषितनायिकास्मरणे किं प्रमाणमिति न शङ्कनीयम् । काव्यादौ विशेषाणामविवक्षितत्वात् । न हि महाकविभिर्वाल्मीकिप्रमुखैरिव ध्यानदृष्ट्या रामादीनामवस्थाः प्रातिस्विका निरूप्यन्ते । किं तु रामादिकमाश्रय-तया परिकल्प्य स्वप्रतिभाप्रभावलब्धाः सर्वसाधारणा इति । तदुक्तं षट्सहस्री-कारेण । 'एभ्यश्च सामान्यगुणयोगेन रसा निष्पद्यन्ते' इति । तर्हि तैरपि विशे-षमात्रं विहाय सामान्यमेव किमिति नोपादीयत इति न वाच्यम् । विशेषोपा-दानेनैव श्रोतृणामास्वादसंभवात् । तदुक्तम् । 'क्रीडतां मृण्मयैर्यद्वत् बालानां द्विरदादिभिः । स्वेच्छा हि स्वदते तद्वच्छ्रोतृणामर्जुनादिभिः ॥' इति । **योषि-द्विशेषेणेति** । नायकनयनान्तावलोकननिर्वेदादीनामप्युपलक्षणम् । योषिन्मा-

मपि न विरुद्धम् । नटस्यानुकरणमात्रपरतया नैव रसाश्रययोग्यता । तस्य भावुकत्वाभ्युपगमेऽपि सामाजिकत्वमेव । अनुभावादीनां प्रकाशनं तु शिक्षाभ्यासपाटवेनैव घटते । रसादीनां परस्परविरोधेऽपि कविप्रौढोक्तिसमाश्रयणेनैकत्र समावेशो न विरुद्धः । विरोधक्रमः शृङ्गारतिलके कथितः ।

त्रेण रसनिष्पत्तेरभावात् । ननु भवन्तु नाम स्मृताः स्त्रीपुंसादयः कथं तै रसनिष्पत्तिः कथं वा रसस्य सामाजिकाश्रयत्वमिति चेदिदमत्रानुसंधेयम् । सामाजिकास्तावत् पूर्वं लौकिकनायकानुरागाद्यनुमानेन संस्कृतहृदयाः काव्यादिशब्दमहिम्ना रामादीन् सामान्यात्मना स्वसंबन्धित्वेन भावयन्ति । ते च भाविता भावुकमनोऽङ्गणे वर्तमानवदवभासन्ते । तदुक्तं भर्तृहरिणा । 'शब्दोपहितरूपांस्तान् बुद्धेर्विषयतां गतान् । प्रत्यक्षमिव कंसादीन् साधनत्वेन मन्यते ॥' इति । कंसादीनां प्रत्यक्षरूपमिव शब्दोपहितरूपमप्यर्थक्रियाकारीत्यर्थः । न च सीतारामादीनां स्वस्त्रीपुंसतया भावनादनौचित्यम् । तेषां जनकदशरथतनयत्वादिविशेषपरित्यागेन स्त्रीपुंसमात्रानुवादित्वादित्युक्तत्वात् । ते च स्त्रीपुंसादयो लौकिका एव । काव्याभिनयमुखेन विभावादिपदाभिधानराज्याभिषिक्तभावुकैर्भाव्यमानाः सन्तो मुद्रामुद्रितन्यायेन तदन्तःकरणप्रतिबिम्बिताः सामाजिकनिष्ठा भवन्ति । रत्यादयोऽपि लौकिका एवैवंविधाः सन्तः स्थायिभावसाम्राज्यमूर्धाभिषिक्ता भवन्ति । तेऽमी विभावादयः सर्वेऽपि चित्रतुरगन्यायेन सम्यङ्मिथ्यासंशयसादृश्यप्रतीतिविलक्षणचर्वणादिशब्दवाच्यालौकिकशब्दप्रतीतिविषयत्वादलौकिका एव । तन्निष्पाद्यत्वेनालौकिकस्य रसस्य सामाजिकान्तःकरणप्रतिबिम्बितस्थायिपरिणामत्वात् सामाजिकाश्रयत्वम् । अस्मिन्नर्थे वृद्धसंवादः प्रकरणान्ते वक्ष्यते । तदेतदभिसंधायाह । **सामाजिकाश्रयत्वमपि न विरुद्धमिति** । अपिशब्दः पूर्वोक्तलौकिकपक्षं समुच्चिनोति । न पुनरलौकिकस्यैवाश्रयान्तरमसंभावितत्वात् । आश्रयान्तरमाशङ्कमानस्तावदेवं प्रष्टव्यः । आश्रयः किमनुकार्योऽनुकर्ता वा । नाद्यः । अतीतत्वात् । न द्वितीयः इत्याह । **नटस्येति** । अनुकरणमात्रपरतयाभिनयाभिनिविष्टचित्तत्वेन । ननु कदाचिद्रामादितादात्म्यानुसंधानात् सामाजिकत्वमनुभवतो नटस्यानन्दपराधीनस्य कथमभिनयप्रकाशनमत आह । **अनुभावादीनामिति** । ननु तत्र तत्र रसान्तरसमावेशो न कथं प्रकृतरसभङ्गहेतुरत आह । **रसानामिति** । अपिशब्दादविरोधे किमु वक्तव्यमिति भावः । **प्रौढोक्तिसमाश्रयणेनेति**। रसानां मिथोविरोधोऽस्तु मा वा। कस्यचिदङ्गित्वाङ्गीकारेणेतरेषां परिपोषाभावान्नास्ति विरोध इति कविसमयाश्रयणादित्यर्थः । तदुक्तं ध्वन्याचार्यैः । 'अविरोधी विरोधी वा रसोऽङ्गिनि रसान्तरे । परिपोषं न नेतव्यस्तदा स्यादविरोधिता ॥' इति । न केवलमविरोधः प्रत्युत तथाविधे विषये

‘शृङ्गारबीभत्सरसौ तथा वीरभयानकौ ।
रौद्राद्भुतौ तथा हास्यकरुणौ वैरिणौ मिथः ॥’

रसाद्रसोत्पत्तिरपि मता । तथा चोक्तं शृङ्गारतिलके ।

‘हास्यो भवति शृङ्गारात् करुणो रौद्रकर्मणः ।
अद्भुतश्च तथा वीराद्बीभत्साच्च भयानकः ॥’

व्यभिचारिभावानां तत्तद्रसानुगुण्यमेवं प्रतिपादितं शृङ्गारतिलके । तथा हि

‘शङ्कासूया भयं ग्लानिर्व्याधिश्चिन्ता स्मृतिर्धृतिः ।
औत्सुक्यविस्मयावेगा व्रीडोन्मादौ मदस्तथा ॥
विषादो जडता निद्रावहित्था चापलं मृतिः ।
इति भावाः प्रयोक्तव्याः शृङ्गारे व्यभिचारिणः ॥
श्रमश्चपलता निद्रा स्वप्नो ग्लानिस्तथैव च ।
शङ्कासूयावहित्था च हास्ये भावा भवन्त्यमी ॥
संत्रासो मरणं दैन्यं ग्लानिश्चैव भयानके ।
अपस्मारो विषादश्च भयं रोगो मृतिर्मदः ॥
उत्साहश्चेति विज्ञेया भावा बीभत्ससंभवाः ।
आवेगो जडता मोहो हर्षणं विस्मयः स्मृतिः ॥
इति भावा निबद्धव्या रसज्ञैरद्भुते रसे ।
दैन्यं चिन्ता तथा ग्लानिर्निर्वेदो जडता स्मृतिः ॥
व्याधिश्च करुणे वाच्या भावा भावविशारदैः ।
हर्षोऽसूया तथा गर्व उत्साहो मद एव च ॥
चापल्यमुग्रता चैव रौद्रे भावाः प्रकीर्तिताः ।

सहृदयानां प्रह्लादातिशय एवेत्यपि तत्रैवोक्तम् । एकत्र प्रबन्धे वा वाक्ये वा रसविरोधक्रमं संमतिव्याजेनाह । **शृङ्गारेति** । प्रसंगाच्छृङ्गारादिभ्यो हास्यादीनामुत्पत्तिमाह । **रसादिति** । अत्र बाह्यार्थसंबन्धस्य यथायोगं सत्त्वरजस्तमोऽहंकारसहितस्य मनसो विकारविशेषाः शृङ्गारादयः । एतेभ्य एव सत्त्वरजस्तमोऽहंकारेषु यथायोगमावापोद्धारसहितेभ्यो हास्यादय उत्पद्यन्त इति नारदादयः । वासुकिनोक्तो विशेषो भावप्रकाशे द्रष्टव्यः । अथ व्यभिचारिभावामां व्यवस्थामाह । **व्यभिचारिभावानामित्यादिना** । अथ रसवदाद्यलंकारविचारमार-

अमर्षः प्रतिबोधश्च वितर्कोऽथ मतिर्धृतिः ॥
क्रोधोऽसूयाथ संमोह आवेगश्चोपहर्षणम् ।
गर्वो मदस्तथोग्रत्वं भावा वीरे भवन्त्यमी ॥
रसः सर्वोऽपि संपूर्णस्तिरोधत्ते रसान्तरम् ॥' इति ।

भारतीयोक्तप्रक्रियया यद्यप्येक एव रसस्तथापि महाकविप्रसिद्धया रससंकरः स्वीक्रियते ।

तत्र रसादेरप्राधान्ये रसवदाद्यलंकारा भवन्ति । अन्याङ्गत्वेन रसनिबन्धने रसवदलंकारः। भावनिबन्धने प्रेयोऽलंकारः । रसाभासभावाभासनिबन्धने ऊर्जस्विदलंकारः। भावशान्तिनिबन्धने समाहितालंकारः । तथा भावोदयादयोऽपि ।

एतदलंकारसर्वस्वे प्रपञ्चेनोक्तम् । 'रसभावतदाभासतत्प्रशमननिबन्धने रसवत्प्रेयऊर्जस्विसमाहितानि । भावोदयभावशान्तिभावसंधिभावशबलताश्च पृथगलंकाराः' इति । एतेषामुदाहरणमलंकारप्रकरणे भविष्यति ।

गुणालंकारश्रीकृतपरिकरो भावविभवः
स्फुरत्प्रादुर्भावः क्रमगलितवेद्यान्तरमतिः ।

भते । **रस इति** । वाक्यार्थत्वेन प्रधानभूत इत्यर्थः । संपूर्णः स्वस्वविभावादिसामग्रीपरिपुष्टः । रसान्तरमङ्गभूतम् । **महाकविप्रसिद्ध्येति** । अङ्गभूतस्य विश्रान्तिविषयत्वाभावेन रसत्वाभावेऽपि महाकविभी रसत्वेन व्यवहारादित्यर्थः। वस्तुतस्तु तदानीमलंकारत्वमेव रसादीनामपीति भावः । तदेव विविनक्ति । **तत्रेत्यादिना** । अत्र रसवदलंकारस्योदाहरणं यथा । 'अयं स रशनोत्कर्षी पीनस्तनविमर्दनः । नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः ॥' रणभुवि पतितं भूरिश्रवसो भुजं दृष्ट्वा तत्प्रेयसीनामयं विलापः । अत्राधिकारिकस्य करुणस्याङ्गभूतः शृङ्गारोऽलंकारतामापद्यते । एवमन्यदप्युदाहार्यम् । अथ प्रतिपत्तिसौकर्यार्थं रसस्वरूपं श्लोकत्रयेण संगृह्णाति । **गुणेति** । गुणालंकारग्रहणं वृत्तिरीत्यादीनामप्युपलक्षणार्थम् । तेषां श्रिया संपत्त्या कृतपरिकरो विशिष्टकाव्यप्रतिपादितविभावाद्यभिव्यक्त इत्यर्थः । अत एव स्फुरन्नुत्पद्यमानः प्रादुर्भावो रसोन्मुखत्वं यस्य स तथोक्तः । भावविभवो रत्यादिस्थायिभाववर्गः। प्रथमं तावत् काव्याभिनयाभिनिविष्टस्य सामाजिकस्य रसप्रादुर्भावसमये नटे रामादिप्रतीतिदार्ढ्यमुत्पद्यते । ततः सामाजिकानुकार्यहृदययोरभेदप्रतीतिः ।

सुखं वा दुःखं वा निबिडयतु यूनोः सहृदये
त्वमन्दानन्दात्मा परिणमति पूर्णो रसभरः ॥

ततः सामाजिकहृदयं नृत्तगीतादिनानाविधनाट्यधर्मेषु निमज्जति । ततो वेद्यान्तरमतिर्विगलति । तदानीमलौकिको रसो योगिवेद्यब्रह्मानन्दसदृशः स्वयमेव चर्वणास्पदं भवति । यदाहुः । 'पाठ्यादथ ध्रुवागानात् ततः संपूरिते रसे । तदास्वादभरैकाग्रो हृष्यत्यन्तर्मुखः क्षणम् ॥ ततो निर्विषयस्यास्य स्वरूपावस्थितो निजः । व्यज्यते ह्लादनिष्यन्दो येन तुष्यान्ति योगिनः ॥' इति । तदेतत् सर्वं मनसि निधायाह । **क्रमगलितवेद्यान्तरमतिरिति** । इयांस्तु विशेषः । ब्रह्मानन्दानुभवे वेद्यान्तरं किमपि न स्फुरति । रसास्वादे तु विभावादिव्यतिरिक्तवेद्यान्तरनिरास इति । तर्हि विभावादिप्रतीतावखण्डानन्दानुभवः कथमिति चेत् सत्यम् । 'द्राक्षामधूकखर्जूरकाश्मर्यैः सह रूषकैः । तुल्यांशैः कल्पितं पूतं शीतं कर्पूरवासितम् ॥ पानकं पञ्चसाराख्यं दाहतृष्णानिवर्तकम् ॥' इत्युक्तलक्षणनानारसकदम्बस्वरूपपानकरसन्यायेनेति ब्रूमः । नन्वानन्दमूले शृङ्गारादावस्तु नाम सुखास्वादः । शोकमूले पुनः करुणे कथमेतदित्याशङ्क्यानुकार्यविषयेयमास्वादवैचित्री न सामाजिकविषयेत्याह । **सुखं वेति** । अत्रास्य सूत्रस्य शाटकं वयेति न्यायेन भाविनीं वृत्तिमाश्रित्य लौकिको रत्यादिभावः श्लेषभङ्ग्या भावविभवशब्देनोच्यते । अयं यूनोः स्त्रीपुंसयोः सुखं लौकिकं शृङ्गारादौ दुःखं करुणे निबिडयतु दृढं करोतु । येषां काव्यानुशीलनाभ्यासवशात् विशदीभूते मनोमुकुरे वर्णनीयतन्मयीभवनयोग्यता अत एव हृदयसंवादभाजः सहृदया इत्युक्तलक्षणे सहृदये तु पूर्णः पूर्वोक्तरीत्या विभावादिसमुल्लासितः सन्नित्यर्थः । रसभरः पूर्णस्य भारत्वं युक्तमेवेति भावः । अमन्दानन्दात्मा ब्रह्मानन्द इव निरतिशयसुखस्वरूपः परिणमति । ननु यद्ययमानन्दात्मकः कथं तर्हि भावुकानां करुणात्मककाव्यश्रवणे तथाविधाश्रुधाराविर्भाव इति चेन्नैष दोषः । संभोगसमये स्त्रीणामधरदंशनादौ कृत्रिमदुःखानुभावसीत्कारवदत्राप्युपपत्तेः । सुखेऽपि दुःखवदुपचारः कुट्टमितमिति तल्लक्षणात् । यद्यप्यस्यापि सहजदुःखात्मकत्वं स्यान्न कोऽपि सामाजिकस्तत्र प्रवर्तेत । ततश्च करुणैकरसानां रामायणादीनामुच्छेदप्रसङ्गः स्यात् । तस्माद्रसान्तरवत् करुणस्यापि आनन्दात्मकत्वमेवेति निरवद्यम् । ननु रसास्वादे विशेषाभावात् कथं नवधा विभाग इति चेत् सत्यम् । यथैकस्य ब्रह्मानन्दस्य चन्द्रकान्तसोपानपङ्क्तिप्रतिबिम्बितचन्द्रबिम्बवदुपाधिभेदादनेकधा कल्पनं तद्वदत्रापि व्यञ्जकविभावादिभेदाद्वस्तुतः एकस्यापि नानात्वमिति वेदितव्यम् । अथैवंविधो रसः काव्यादौ केन कारणेन प्रतीयत इत्याकाङ्क्षायामाह ।

रसो वाक्यार्थः सन् विलसति पदार्थाः पुनरमी
विभावाद्या यस्मिन् किल दधति विश्रान्तिमुचिताम् ।
अतो भावा एव क्रमसमुदितान्योन्यविभवा
रसीभावं बिभ्रत्यथ च पटतां तन्तव इव ॥

रस इति । वाक्यार्थ इति । कविसंरम्भविश्रान्ते रसस्यैव प्रधानत्वादिति भावः । तदुक्तम् । 'कवेर्विवक्षया यत्र प्राधान्यं परिकल्प्यते । भवेत् स एव वाक्यार्थ इति निर्णीयते बुधैः ॥' इति । न चास्य पदार्थसंसर्गादिरूपवाक्यार्थवन्मतभेदेन वाच्यत्वं लक्ष्यत्वं वा संभवति । अभिधालक्षणयोरत्रानवकाशात् । तात्पर्यविशेषस्तु व्यञ्जनान्तर्भूत एवेति प्रतिपादितं काव्यप्रकरणे । अतोऽयं वाक्यार्थो व्यङ्ग्य एवेति वेदितव्यम् । अमी रसव्यञ्जका विभावाद्याः पुनः पदार्थाः । यद्यपि विभावादीनां स्वस्ववाक्यापेक्षया वाक्यार्थत्वं तदुक्तम्—'स्थायी वा सात्त्विको वापि संचारी वा क्वचित् क्वचित् । भावो वाक्यार्थतामेति तत्तद्भावविशेषतः ॥' इत्यादिना तथापि रसं प्रत्यवान्तरव्यापारत्वात् पदार्थव्यवहारः । एवं च पदार्थस्थानीयभावादिप्रतीत्युत्तरकालीनस्फुरणतया रसो वाक्यार्थस्थानीय इति निष्कर्षः । रसं प्रति विभावादीनामवान्तरव्यापारत्वं निर्वहति । **यस्मिन्निति** । उचितां विश्रान्तिं दधति कारकज्ञापकभाववैलक्षण्येन व्यञ्जनध्वननचर्वणचमत्कारादिशब्दवाच्यरसगोचरज्ञानविशेषोपयोगित्वं भजन्त इत्यर्थः । अत एवोक्तं लोचने । 'विभावादिरत्र न ज्ञापको नापि कारकः । अपि तु चर्वणोपयोगी' इति । अत एवालौकिकत्वमस्येति भावः । एतच्चाघटितघटनसूचकेन किलशब्देन द्योत्यते । **अत इति** । विभावादिविश्रान्तेरित्यर्थः । भावाः स्थायिभावा एव क्रमेणाङ्कुरितकन्दलितपल्लवितत्वादिरूपेण समुदितोऽन्योन्यविभवः स्वस्वपरिपोषो येषां ते क्रमसमुदितान्योन्यविभवाः । यद्यप्यन्योन्यशब्दः कर्मव्यतीहारे द्विर्भावितस्तथाप्यौचित्यादुक्तार्थे योजनीयः । अथ च विभावादिसंनिधानान्तरमेवेत्यर्थः । चोऽवधारणे । अनेन व्यङ्ग्यव्यञ्जकयो रसविभावाद्योरस्त्येव क्रमः । किं तु शतपत्रपत्रशतव्यतिभेदवदाशुभावित्वान्न संलक्ष्यत इति सूचितं भवति । रसीभावं बिभ्रति पूर्वं वासनामात्रावस्थायिनः स्थायिनो विभावादिमहिम्ना रसात्मना परिणमन्ति रसादिशब्दप्रतिपाद्यत्वं च भजन्त इत्यर्थः । तत्र दृष्टान्तमाह । **पटतां तन्तव इति** । तदुक्तम् । 'यथा हि तन्तवो वेमतुर्यादिक्रिययान्विताः । पटात्मना परिणता पटवाच्या भवन्ति ते ॥ तथैव स्थायिनो भावा विभावादिभिरन्विताः । रसात्मना परिणता रसवाच्या भवन्ति ते ॥' इति । अथ निर्वेदादीनां रसपोषकाणामवस्थानक्रममभिदधानः प्रतिपत्तिदार्ढ्यार्थं पूर्वोक्तमेव

भावे स्थायिनि वर्धमानविभवे रत्यादिके सिन्धुवत्
कल्लोला इव संभवन्ति विलयं चायान्ति भावा मुहुः ।
निर्वेदाद्युपभोगभावितनिजास्वादातिरेको रसो
लोके स्यादनुकार्य एव कथितो नाट्ये तु सामाजिके ॥

इति श्रीविद्यानाथकृतौ प्रतापरुद्रयशोभूषणेऽलंकारशास्त्रे
रसप्रकरणं समाप्तम् ।

रसस्याश्रयं स्मारयति । **भाव इति** । वर्धमानविभवे विभावादिभिरिति भावः । यथार्णवे कल्लोला उत्पद्यन्ते विलीयन्ते च तद्वद्रत्यादिस्थायिभावे निर्वेदादयो निमज्जन्त्युन्मज्जन्ति चेति भावः । तदुक्तम् । 'मज्जन्तश्च निमज्जन्तः कल्लोलास्ते यथार्णवे । तस्योत्कर्षं वितन्वन्ति यान्ति तद्रूपतामपि ॥ तथा स्थायिनि निर्मग्ना ह्युन्मग्ना व्यभिचारिणः । पुष्णन्ति स्थायिनः स्वांश्च तन्नयन्ति रसात्मताम् ॥' इति । ततः किमत आह । **निर्वेदेति** । निर्वेदादीनामुपभोगेन चर्वणया भावित उत्पादितः निजः स्वगोचर इत्यर्थः । स्वस्मादभिन्नस्यापि स्वरूपस्य स्वेनैव विषयीकरणसंभवात् । यदाहुः । 'आत्मानमात्मन्यवलोकयन्तम्' इति । तथाभूतः स्वादातिरेकोऽलौकिकचमत्कारात्मा यस्य स तथोक्तः सन् रसोऽखण्डानन्दात्मको भवति । अयं च लोके स्यात् लौकिकश्चेदित्यर्थः । अनुकार्ये रामादावेव नान्यत्र । नाट्ये तु अलौकिकश्चेदित्यर्थः । **सामाजिके कथित इति** । अत्र रसो नायकाश्रय एवेत्यत्रेति शेषः । अत एवोक्तं लोचने । 'स च न व्यतिरिक्तमाधारमपेक्षते । किं त्वनुकार्याभिन्नाभिमते नर्तके आस्वादयिता सामाजिकः । तेन नाट्य एव रसा नानुकार्यादिषु' इति । उक्तं च शारदातनयेन । 'व्यापारेण च काव्यस्य तदीयाभिनयेन च । रसात्मत्वं नीयमानः स्थायी स्वाद्यत्वमेष्यति ॥ सामाजिकादिरेवास्य रसस्याश्रय उच्यते । रसस्य वर्तमानत्वात् नानुकार्यस्य संभवः ॥ अनुकार्यस्य रामादेः कालातिक्रमदर्शनात् । नातिक्रान्तानुकार्यस्य रसोद्भावनया कविः ॥ बध्नाति काव्यं यत् तस्माद्रसः सामाजिकाश्रयः ॥' इति । केचिदेतत् सामाजिकाश्रयत्वमारोपितं न तु मुख्यमित्याहुः । तदुक्तं महोपाध्यायनरहरिसूरिणा । 'एवं सामाजिकसमवेततां रसस्याङ्गीकृत्यालौकिकता वर्णिता । परमार्थतः पुनः परिपूर्णाखण्डैकरसानन्दरूपपरमेश्वरपर्यायस्यास्य रसस्याधिकरणचिन्ता कुतो वा । न सत्यानन्तानन्दात्मके ब्रह्मण्यपि पदमासादयेदिति विचारचतुरैरनादिकविभिरनाधारो रसः सामाजिकैः परं चर्व्यते विभावादिभिः परं व्यज्यते । योगिगम्यत्वमात्रेणेश्वरस्य योगिमनोनिवाससंवादवत् सामाजिकाधिकरणत्वारोपोऽपि सह्यते' इत्यादिभिर्युक्तिभिः प्रतिपादितम् । अन-

धिकरणत्वमेव सिद्धान्तः । अत एवायं ब्रह्मानन्द एव । इयांस्तु विशेषः । ब्रह्मानन्दो योगगम्यः । अयं तु विभावाद्यनुसंधानगम्य इति । इदमपि तेनैवोक्तम् । 'सर्वत्रैकैवानन्दव्यक्तिर्लौकिकं सुखमिति व्यवह्रियते । अलौकिकविभावाद्यभिव्यक्त्या कविसमयमात्रप्रसिद्ध्यनुसारादलौकिको रस इति कथ्यते । नानाविधविमलकर्मनिर्मलान्तःकरणेषु शमदमादिसाधनसंपन्नेषु श्रवणमनननिदिध्यासनपरेषु परमयोगिषु निर्विकल्पकसमाध्यभिव्यक्त्या ब्रह्मेति परमात्मेतीश्वर इति शब्द्यत' इति । उक्तं च स्वात्मयोगप्रदीपे ।

'या स्थायिभावरतिरेव निमित्तभेदा-
च्छृङ्गारमुख्यनवनाट्यरसीभवन्ती ।
सामाजिकान् सहृदयान्नटनायकादी-
नानन्दयेत् सहजपूर्णरसोऽस्मि सोऽहम् ॥'

इति संक्षेपः ।

इति पदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलचलमल्लिनाथ-
सूरिसूनुना विश्वजनीनविद्यस्य विद्वन्मणेः पेद्दयार्यस्यानुजेन
कुमारस्वामिसोमपीथिना विरचिते प्रतापरुद्रीयव्याख्याने
रत्नापणाख्याने रसनिरूपणं नाम
चतुर्थं प्रकरणम् ॥

अथ दोषप्रकरणम् ।

अथ काव्यजीवितभूतरसनिरूपणानन्तरं तदुपस्कारहेतूनां गुणानां सम्यग्विवेकाय दोषा निरूप्यन्ते । तत्र दोषसामान्यलक्षणम् ।

दोषः काव्यापकर्षस्य हेतुः शब्दार्थगोचरः ।

शब्दार्थमयत्वात् काव्यस्य तदपकर्षहेतूनामपि दोषाणां शब्दगतत्वेनार्थगतत्वेन च द्वैविध्यम् । शब्दगतानामपि पदवाक्यगतत्वेन च द्वैविध्यम् । तत्र पदगतदोषाः कथ्यन्ते ।

अप्रयुक्तमपुष्टार्थमसमर्थं निरर्थकम् ।
नेयार्थं च्युतसंस्कारं संदिग्धं चाप्रयोजकम् ॥
क्लिष्टं गूढार्थकं ग्राम्यमन्यार्थं चाप्रतीतिकम् ।
अविमृष्टविधेयांशं विरुद्धमतिकृत् तथा ॥
अश्लीलं परुषं चेति दोषाः सप्तदश स्मृताः ।

एषां स्वरूपं निरूप्यते ।

यदप्रयुक्तं कविभिरप्रयुक्तं तदुच्यते ।
प्रकृतानुपयुक्तार्थमपुष्टार्थं तदुच्यते ॥
योगमात्रप्रसिद्धं यदसमर्थं तदुच्यते ।
पादपूरणमात्रं यत्तन्निरर्थकमुच्यते ॥

रसनिरूपणानन्तरं तदुपस्कारहेतुभूतगुणालंकारनिरूपणे प्रसक्तेऽपि तदुल्लङ्घ्य मध्ये दोषनिरूपणं संगमयन् प्रतिजानीते । **अथेति** । गुणानामित्यलंकाराणामप्युपलक्षणम् । **सम्यगिति** । अन्यथा विवेकमात्रस्य प्ररूढत्वाभावादिति भावः । तत्र दोषसामान्यलक्षणमाह । **दोष इति** । रसापकर्षद्वारा काव्यापकर्षहेतुर्दोष इत्यर्थः । अत एवोक्तं काव्यप्रकाशे । 'मुख्यार्थनिहतिर्दोषः'—इत्यादिना । शब्दार्थगोचर इत्येतद्विभागपरम् । अत्र रसादिप्रतीतेर्विभावाद्यर्थमूलत्वात् विभावादेश्च वाक्याधीनत्वात् वाक्यानां च पदारब्धत्वात् प्रथमभावितया तेषां तद्दोषनिरूपणं प्रतिजानीते । **तत्र पदगतदोषा इति** । यथोद्देशमेतेषां लक्षणमाह । **यदप्रयुक्तमित्यादिना** । अभिधानादावाम्नातमपि कविभिरनादृतमप्रयुक्तमित्यर्थः । योगमात्रप्रसिद्धं शास्त्रमात्रप्रसिद्धमित्यर्थः ।

स्वसंकेतप्रसिद्धार्थं नेयार्थं परिकीर्त्यते ।
शब्दशास्त्रविरुद्धं यच्च्युतसंस्कारमुच्यते ॥
संदिग्धं तन्मतं यत् स्यात् संदिग्धार्थप्रतीतिकृत् ।
तदप्रयोजकं यत् स्यादविशेषविधायकम् ॥
क्लिष्टं तदर्थावगतिर्दूरदूरा यतो भवेत् ।
प्रयुक्तमप्रसिद्धार्थे गूढार्थं परिकीर्त्यते ॥
पामरव्यवहारैकप्रसिद्धं ग्राम्यमुच्यते ।
यद्रूढिप्रच्युतं नाम तदन्यार्थमुदाहृतम् ॥
शास्त्रमात्रप्रसिद्धं यदप्रतीतिकमुच्यते ।
अविमृष्टविधेयांशं गुणीभूतविधेयकम् ॥
विपरीतार्थधीर्यस्माद्विरुद्धमतिकृन्मतम् ।
अश्लीलं यदमाङ्गल्यजुगुप्साव्रीडधीकरम् ॥
परुषं नाम तद्यत् स्याद्विहितं परुषाक्षरैः ।

अत्र वनवृत्तीनां शत्रुस्त्रीणां वचनेषु दोषा उदाह्रियन्ते । अप्रयुक्तं यथा

विमुखा दैवताः सर्वे ते नो दुश्च्यवनादयः ।
अरण्यगृहमेधिन्यो यैर्वयं हन्त कल्पिताः ॥

मात्रशब्देन वाचकशक्तिविरहः प्रतिपाद्यते । **स्वसंकेतप्रसिद्धार्थमिति** । संकेतमात्राधीनार्थमित्यर्थः । च्युतः संस्कारो व्याकरणकृतो यस्मात् तत् च्युतसंस्कारम् । विशेषविधायकं न भवतीत्यविशेषविधायकम् । दूरदूरा अतिदूरा व्यवहितेत्यर्थः । **प्रयुक्तमिति** । यदुभयार्थं सदप्रसिद्धार्थे प्रयुक्तं तद्गूढार्थमित्यर्थः । एतदेव निहतार्थमिति केचित् । रूढेः प्रसिद्धेः प्रच्युतं रूढिप्रच्युतम् । अन्यार्थमवाचकमित्यपरे । अविमृष्टः प्राधान्येनानिर्दिष्टो विधेयांशो यत्र तदविमृष्टविधेयांशम् । तदेवाह । **गुणीभूतविधेयकमिति** । शिष्टं स्पष्टं । यथायोगमुदाहरति । **विमुखा इति** । **दैवता इति** । 'वृन्दारका दैवतानि पुंसि वा देवता' इत्यमरः । दुःसहः च्यवनो मुनिरस्येति दुश्च्यवनः इन्द्रः । गृहेण पत्न्या गृहैर्वा मेधन्ते संगच्छन्त इति गृहमेधिनः गृहस्थाः तत्पत्न्यो गृहमेधिन्यः । 'गृहं पत्न्यां गृहेऽपि च' 'दारेष्वपि गृहाः 'जाया च गृहिणी गृहाः' इति विश्वामरहलायुधाः । मेधृ संगमे, चेत्यस्माद्धातोर्णिनिप्रत्ययः । अत्र दैवतदुश्च्यवनशब्दयोर्यथाक्रमं लिङ्गानुशासनशब्दानुशासनाम्नातयोरपि कवीनामनादरात् दुष्टत्वमित्याह ।

अत्र दैवता इति पुंलिङ्गप्रयोगः दुश्च्यवन इति चेन्द्रपरत्वेन कविभिर्न प्रयुक्तः । अपुष्टार्थं यथा

व्यर्थाष्टार्धार्धबाहूनाममीषामीदृशां दशाम् ।
कथं सहामहे धिग्धिक् कठिनं हन्त जीवितम् ॥

अत्र व्यर्थबाहुद्वयानामिति विवक्षितेऽष्टार्धार्धबाहूनामित्यनुपयुक्तम् । एतदेवाविमृष्टविधेयांशस्योदाहरणम् । बाहुद्वयस्य वैयर्थ्ये विधेये तस्योपसर्जनत्वं प्रतीयते । असमर्थं यथा

विहाय वसुधामेनां चतुरम्बुधरावृताम् ।
क नु गन्तव्यमस्माकमरण्येऽप्यसुखा स्थितिः ॥

अत्र जलधिपरत्वेनाम्बुधरपदमसमर्थम् । अनर्थकनेयार्थच्युतसंस्कारसंदिग्धानि यथा

विहाय च गृहांस्तान् वै व्यत्यस्तनवव्रृत्तयः ।
कदा भविष्यते वासः कटकेषु महीभृताम् ॥

अत्र वै इति निरर्थकम् । व्यत्यस्तनवशब्देन वनप्रतीतिः स्वसं-

अत्रेति । एकैकोदाहरणविवक्षायां पददोषद्वयमेतत् । समुदायविवक्षायां तु वाक्यदोषोऽयम् । विरोधिनो दुश्च्यवनादिदैवता इत्युक्ते समासदोषः । अप्रयुक्तादीनां त्रैविध्यस्यापि काव्यप्रकाशकारादिभिरङ्गीकृतत्वादिति द्रष्टव्यम् । एवमुत्तरत्रापि यथासंभवमूहनीयम् । **व्यर्थेति** । अष्टार्धार्धं द्वयं तद्विशिष्टा बाहवस्तथोक्ता इति मध्यमपदलोपी समासः । जीवितमिति धिक्शब्दयोगे द्वितीया । तस्य 'नित्यवीप्सयोः' इत्याभीक्ष्ण्ये द्विर्भावः । प्रकृतानुपयुक्ततां दर्शयति । **अत्रेति** । उदाहरणलाघवमाह । **एतदेवेति** । व्यर्थबाहुद्वयानामितीदमेवेत्यर्थः । अत्र दुर्दशाप्रस्तावे बाहूद्देशेन विधेयस्य वैयर्थ्यस्यान्यपदार्थप्रधानबहुव्रीहिवर्तिपदार्थत्वेन गुणीभावादविमृष्टविधेयांशाख्यो दोष इत्यर्थः । **विहायेति** । अत्राम्बुधरशब्दस्य समुद्रे शास्त्रप्रसिद्धिरेव न तु वाचकशक्तिः । अतोऽसमर्थत्वमित्याह । **अत्रेति** । लाघवार्थमनर्थकादिचतुष्टयमेकेन श्लोकेनोदाहरति । **विहाय चेति** । अत्र वैशब्दयोग्यस्य कस्यचिदप्यर्थस्यान्वयाभावात् पादपूरणमात्रप्रयोजकत्वेन निरर्थको वैशब्द इत्याह । **अत्र वै इतीति** । अत्र वाक्यसन्धेर्वैकल्पिकत्वादायादेशाभावः । यमकेषु निरर्थकं न दोष इत्युक्तं हेमचन्द्रेण । व्यत्यस्तनवेत्यत्र वर्णव्यत्यासेन वनप्रतीतिर्लक्षणयेति वक्तव्यम् । तस्यां च कुशलादिवन्न रूढिर्निमित्तम् । नापि

केतमात्रायत्तेति नेयार्थकम् । भविष्यते इति भवतेरात्मनेपदित्वं शब्दशास्त्रविरुद्धमिति च्युतसंस्कारम् । महीभृतां कटकेषु वास इत्यनेन राज्ञां नगरेषु वास उत पर्वतानां नितम्बेष्विति संदेहात् संदिग्धम् । अप्रयोजकक्लिष्टे यथा

हन्त वर्तामहे वज्रघट्टनात् प्राक् चलात्मसु ।
नभस्वदशनारातिध्वजाग्रजविरोधिषु ॥

अत्र नभस्वदशनाः सर्पास्तेषामरातिर्गरुडः स एव ध्वजो यस्येति विष्णुस्तस्याग्रज इन्द्रस्तस्य विरोधिषु पर्वतेष्वित्यर्थप्रतीतेरतिदूरत्वात् क्लिष्टम् । पर्वतेषु वर्तनं दुःखावहमिति प्रकृते वज्रघट्टनात् प्राक् चलात्मस्विति पर्वतविशेषणस्यानुपयुक्तत्वादप्रयोजकम् । गूढार्थग्राम्यार्थान्यार्थानि यथा

शोणिताब्जदृशः कामं श्यामगल्लकटिस्थलाः ।
विदग्धहृदयाः शोकवह्निना राजकन्यकाः ॥

अत्र शोणितशब्दस्य रुधिरे प्रसिद्धस्य पाटलवर्णपरत्वेन प्रयोगाद्गूढार्थम् । गल्लकटिशब्दौ कपोलजघनपरत्वेन ग्राम्यप्रयुक्तौ । विदग्धहृदया इति विशेषणं दग्धहृदयस्यावाचकत्वादन्यार्थम् । अप्रतीतिकं यथा

मनूपदेशाः क्व गताः कुलाचार्यैरुदीरिताः ।

गङ्गायां घोष इत्यादिवत् प्रयोजनं किं तु स्वसंकेतमात्रमतस्तत्राशक्तेयं लक्षणोपेक्षणीया । 'निरूढा लक्षणाः काश्चित् सामर्थ्यादभिधानवत् । क्रियन्ते सांप्रतं काश्चित् काश्चिन्नैव त्वशक्तितः ॥' इत्याचार्यैस्तस्या निषिद्धत्वात् । अतो नेयार्थमेतदित्याशयेनाह । **व्यत्यस्तनवशब्देन वनप्रतीतिः स्वसंकेतमात्रायत्तेति** । प्राप्त्यर्थस्यैव भवतेरात्मनेपदित्वं न सत्तार्थस्येति वैयाकरणाः । अतोऽस्य च्युतसंस्कारत्वमित्याह । **भविष्यत इति** । संदिग्धमभिनीय दर्शयति । **महीभृतामिति** । अत्र भृञः पालनधारणार्थत्वानुशासनम् । 'कटकं वलये सानौ राजधानीनितम्बयोः' इत्यभिधानं च संदेहबीजमिति भावः । **हन्तेति** । व्युत्क्रमेण लक्षणं योजयति । **अत्रेत्यादिना** । **शोणितेति** । ग्राम्यप्रयुक्तौ पामरव्यवहारमात्रप्रसिद्धावित्यर्थः । विपूर्वस्य दग्धशब्दस्य निपुणार्थत्वाद्दाहं प्रत्यवाचकत्वादन्यार्थमित्याह । **विदग्धेति** । अप्रतीतिकमुदाहरति । **मनूपदेशा इति** । यथा लोकमात्रप्रसिद्धं ग्राम्यं तथा

अत्र मनुशब्दो मन्त्रपरत्वेन मन्त्रशास्त्रमात्रप्रसिद्ध इत्यप्रतीतिकम् । विरुद्धमतिकृद्यथा

अम्बिकारमणस्याङ्घ्रिसेवा व्यर्था कथं भवेत् ।
राज्ञामकार्यमित्राणां विनाशं समुपेयुषाम् ॥

अत्राम्बिकारमणशब्दान्मातृसंभोगकारिणः प्रतीतिः । अकार्यमित्रशब्दादकार्येषु मित्राणीति प्रतीतिः । वियोगदुःखपरतया प्रयुक्ताद्विनाशशब्दान्नाशप्रतीतिरिति विरुद्धमतिकृत् । अमङ्गलव्रीडाजुगुप्साप्रतीतिकरं त्रिविधमश्लीलं यथा

अभिप्रेतपदावासः कदा नः संभविष्यति ।
नीचं साधनमेतेषां परोत्सर्गैकजीविनाम् ॥

अत्राभिप्रेतपदावासशब्दात् प्रेतलोकपदावासप्रतीतेरमङ्गलत्वम् । नीचं साधनमित्यनेन तुच्छमेहनप्रतीतेर्व्रीडाकरत्वम् । परोत्सर्गैकजीविनामित्यत्रोत्सर्गशब्दादधोवायुप्रतीतेर्जुगुप्साकरत्वम् । परुषं यथा

कुतः कान्तारवृत्तीनां कार्तार्थ्यार्थित्वमस्ति नः ।

अत्र कार्तार्थ्यार्थित्वमिति परुषवर्णारब्धत्वम् । अथ वाक्यदोषाः ।

शब्दहीनं क्रमभ्रष्टं विसंधि पुनरुक्तिमत् ।
व्याकीर्णं वाक्यसंकीर्णमपूर्णं वाक्यगर्भितम् ॥
द्वे भिन्नलिङ्गवचने द्वे च न्यूनाधिकोपमे ।
भग्नच्छन्दो यतिभ्रष्टमशरीरमरीतिकम् ॥
विसर्गलुप्तमस्थानसमासं वाच्यवर्जितम् ।

शास्त्रमात्रप्रसिद्धमप्रतीतिकमित्यर्थः । कुलाचार्यैरित्यनेन संप्रदायशुद्धिः सूच्यते । **अम्बिकारमणस्येति** । विनाशं वियोगदुःखमित्यर्थः । लक्ष्ये लक्षणं योजयति । **अत्रेत्यादिना** । कार्यं प्रयोजनं विना मित्राणि निरुपाधिकबन्धव इति विवक्षितेऽकार्येष्वनुचितकर्मसु मित्राणीति विरुद्धबुद्ध्युत्पादनात् विरुद्धमतिकृदित्याह । **अकार्येति** । **अभिप्रेतेति** । अभिप्रेतपदमिष्टस्थानम् । एतेषां स्वभर्तॄणाम् । नीचसाधनमल्पसैन्यम् । सहायसंपत्तिर्नास्तीत्यर्थः । 'साधनं निर्वृतौ मेढ्रे सैन्ये सिद्धौषधे गतौ' इति विश्वः । परोत्सर्गः परकर्तृकत्यागः । 'उत्सर्गो वर्जने त्यागे' इति विश्वः । त्रिविधमश्लीलं योजयति । **अभिप्रेतेत्यादिना** । **कुत इति** । कार्तार्थ्यार्थित्वं धन्यताभिलाषित्वम् । परुषैः करुणरसाननुगुणत्वेन

समाप्तपुनरात्तं च तथा संबन्धवर्जितम् ॥
पतत्प्रकर्षमाधिकपदं प्रक्रमभङ्गवत् ।
चतुर्विंशतिरुच्यन्ते दोषा वाक्यसमाश्रिताः ॥

एषां स्वरूपमुदाहरणं च ।

शब्दशास्त्रहतं वाक्यं शब्दहीनं प्रकीर्त्यते ।

यथा शत्रुवाक्येषु

न संशृणुमहे हन्त हितमाप्तैर्निमन्त्रितम् ।
येन काकतिभूभर्तुः सेवां हित्वा हता वयम् ॥

अत्र हितं न संश्रृणुमहे इति पदद्वयप्रयोगे दोषाविष्काराद्वाक्यमेवा दुष्टमिति न पददोषशङ्का । संपूर्वस्य श्रृणोतेरात्मनेपदित्वे कर्मणोऽनुपादाननियमात् । अथ क्रमभ्रष्टम् ।

क्रमभ्रष्टं भवेदर्थः शब्दो वा यत्र न क्रमः ।

यथा

श्रुतिकटुभिर्वर्णैः सरेफद्वितीयसंयोगादिभिरारब्धमित्यर्थः । पददोषानन्तरं वाक्यदोषानुद्देशपूर्वकं लक्षणोदाहरणाभ्यां दर्शयति । **अथेत्यादिना** । **नेति** । आप्तैर्निमन्त्रितमुपदिष्टं हितं न संश्रृणुमहे न समश्रौष्मेति वर्तमानसामीप्ये वर्तमानप्रत्ययेन हिताश्रवणराज्यभ्रंशयोरविरामः सूच्यते । ननु च्युतसंस्कारस्यैव शब्दहीनमिति संज्ञान्तरं न पुनः पृथग्दोषः । वाक्यगतत्वेन पार्थक्यस्य काव्यप्रकाशकारेण पदद्वये युगपदसाधुत्वासंभवेन परिहृतत्वादिति चेत् सत्यम् । यद्यप्येकपदमेवासाधु तथापि तदसाधुत्वं पदान्तरसमन्वयसापेक्षमिति वाक्यदोष एवायं न पददोषः । तर्हि कदा भविष्यते वास इत्यत्रापि पदान्तरसंनिधानादेव दोषत्वावगमाद्वाक्यदोषत्वमेव केवलं भविष्यतेशब्दस्य लटः शत्रादेशे चतुर्थ्येकवचने सत्यसाधुत्वासंभवादिति चेत् सत्यम् । वाक्यस्यैवात्र प्रयोगयोग्यत्वादावश्यकपदान्तरसन्निधाने यत्र वाक्यमात्रनिर्वाहस्तत्र पददोषः । यत्र पदान्तरविशेषसहकृतस्यैवासाधुत्वं यथा प्रकृते तत्र वाक्यदोषः । अन्यथा पददोषस्यैवाभावप्रसङ्गादिति तदेतत् सर्वं मनसि निधायाह । **अत्र हितमित्यादि** । **आत्मनेपदित्व इति** । 'समो गम्यृच्छि' इत्यादिनेति शेषः । **कर्मणोऽनुपादाननियमादिति** । अकर्मकाधिकारादिति शेषः । न च कर्माकाङ्क्षस्य श्रृणोतेः कथमकर्मकत्वमिति वाच्यम् । अविवक्षितकर्मकस्यैवात्राकर्मकत्वात् । तदुक्तम् । 'धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात् । प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया ॥' इति । **क्रमभ्रष्टमिति** । तत्रार्थक्रमभ्रष्टमुदाहरति ।

प्रभवे काकतीन्द्राय तुरगान् करिणोऽथवा ।
उपायनमकुर्वाणा वयं दैवेन वञ्चिताः ॥

अत्र करिणो यद्वा तुरगानिति वक्तव्ये व्युत्क्रमेणोक्तम् । तुरगापेक्षया करिणामुत्कृष्टत्वात् । अथवा करिण इत्यर्थक्रमभङ्गः । शब्दक्रमभङ्गो यथा

का नाम गणनास्मासु काकतीयस्य भूपतेः ।
यशःप्रतापयोर्मग्नौ सूर्याचन्द्रमसावपि ॥

अत्र यशःप्रतापयोश्चन्द्रसूर्यौ मग्नाविति शब्दक्रमे उचिते तथा नोक्तम् । यशःप्रतापयोः सूर्याचन्द्रमसौ मग्नाविति समुदायद्वयान्वये यथायोगमर्थान्वये सिद्धे नार्थक्रमविरोधः । अपि तु शब्दप्रयोग एव क्रमभङ्गः । अथ विसन्धि ।

प्रभव इति । लक्ष्ये लक्षणं योजयति । **अत्रेति** । दुर्लभत्वात् करिणां सुलभत्वाच्च तुरगाणामिति । ननु यवाग्वाग्निहोत्रं जुहोति यवागूं पचतीत्यत्र पाठक्रमानुपपत्तावर्थक्रमो यथ स्वीकृतस्तद्वदत्रापि यथायोगमन्वयोऽङ्गीक्रियतामिति चेत् सत्यम् । अपौरुषेये वेदवाक्ये यथा तथा वास्तु पुंवाक्ये तु श्रवणानन्तरमेव प्रयोक्तुस्तारतम्यानभिज्ञत्वप्रतीतेरन्वयविलम्बासहिष्णुत्वात् दुष्टत्वमेवेत्यनवद्यम् । शाब्दं क्रमभङ्गमुदाहरति । **का नामेति** । **सूर्याचन्द्रमसाविति** । 'देवताद्वन्द्वे च' इत्यानङादेशः । तत्र लोकवेदयोरिति प्रसिद्धसाहचर्याणामेव देवतावाचिनां द्वन्द्वस्य विवक्षितत्वान्न चन्द्रसूर्यावित्यत्रानङादेशः । व्युत्क्रममभिव्यक्तुमुचितक्रमानुक्तिमभिनीय दर्शयति । **अत्रेति** । आद्यभेदसाङ्कर्यं परिहरति । **यश इति** । यशःप्रतापयोरित्येकः समुदायः । सूर्याचन्द्रमसावित्यपरः । तदेतत् समुदायद्वयमुद्भूतावयवभेदम् । अन्यथा द्विवचनानुपपत्तेः । तस्यान्वये सतीति शेषः । **यथायोग्यमर्थान्वये नार्थक्रमविरोध इति** । अभिधानक्रमेणाभिधेयक्रमौचित्येऽपि कविसमयसिद्धोपमानोपमेयभावानुसारेण वर्तिपदार्थानां कीर्तिप्रभृतीनां व्युत्क्रमेणापि संबन्धेऽनन्तरोदाहरणवत् बाधकाभावात् नार्थक्रमभङ्ग इत्यर्थः । कुत्र तर्हि क्रमभङ्ग इत्याकाङ्क्षायामाह । **अपि तु शब्दप्रयोग एवेति** । यथासंख्यन्यायोल्लङ्घनादिति भावः । ननु द्वन्द्वसमासे वर्तिपदानि प्रत्येकं स्वसहचरितपदार्थान्तराण्यपि युगपदभिदधतीति वार्तिककारमतम् । तदुक्तम् । 'युगपदधिकरणवचने द्वन्द्वः' इति । तन्मते यशःशब्देनापि युगपद्यशःप्रतापावभिधीयेते प्रतापशब्देनापि । एवं सूर्याचन्द्रमसावित्यत्रापि द्रष्टव्यम् । तथा च मिथोऽन्वये शाब्दोऽपि क्रमभङ्गो न संभवतीति चेन्नैष दोषः । सर्वदा केवलप-

विसंहितो विरूपो वा यस्य संधिर्विसंधि तत् ॥

यथा

शौर्याणि ईदृशान्यासन् पृथ्वैश्वर्यं क्व वा गतम् ॥

अत्र शौर्याणि ईदृशानीति विसन्धि । पृथ्वैश्वर्यमिति संधिवैरूप्यम् । अथ पुनरुक्तिमत् ।

शब्दार्थपौनरुक्त्ये तु तद्वाक्यं पुनरुक्तिमत् ।

यथा

जीर्णकाननसंकीर्णे विन्ध्ये काननवृत्तयः ॥

अत्र काननसंकीर्णे काननवृत्तय इति पुनरुक्तिमत् । अथ व्याकीर्णम् ।

व्याकीर्णं तद्विभक्तीनां व्याकीर्णे च मिथोऽन्वये ।

यथा

सुखार्थिनो महीपाला वर्तध्वं काकतीशितुः ।
आज्ञामुरसि बिभ्राणाः शिरसि क्रोडमुद्रिकाम् ॥

अत्र क्रोडमुद्रिकामुरसि शिरस्याज्ञां बिभ्राणा इति संबन्धः । अथ वाक्यसंकीर्णम् ।

वाक्यान्तरपदैः कीर्णं वाक्यसंकीर्णमुच्यते ।

दानामेकैकार्थवाचकत्वाद्वर्तिपदानामपि मतभेदेन तथाभावात् प्रायेण सर्वेषामप्येवमेव व्युत्पत्तिः । अत्राप्यलौकिकानेकार्थवाचकत्वनिबन्धनमक्रमं बाधित्वा क्रमस्यैव जागरूकत्वात् । यदाह पदमञ्जरीकारः । 'पाघ्राध्मेत्यादौ युगपदधिकरणवचनतया द्वन्द्वेऽपि क्रमस्य प्रतीतेः स एव नियामकः' इति । **विसंहित इति** । विगता संहिता वर्णानां परस्परसंनिकर्षो यत्र सः विसंहितः विश्लिष्ट इत्यर्थः । विरूपः कर्णकठोर इत्यर्थः । शौर्याणि ईदृशानि इत्यत्र सवर्णदीर्घाभावात् विश्लेषः । न चात्र व्याकरणविरोधः वाक्यसंधेर्वैवक्षिकत्वात् । तदुक्तम् । 'संहितैकपदे नित्या नित्या धातूपसर्गयोः । नित्या समासे वाक्ये तु सा विवक्षामपेक्षते ॥' इति । पुनरुक्तमाह । **शब्दार्थपौनरुक्त्ये इति** । शब्दमात्रपौनरुक्त्ये त्वलंकारत्वमर्थमात्रपौनरुक्त्ये दोषत्वं वक्ष्यति । **व्याकीर्णमिति** । विभक्तीनां विभक्त्यन्तानां पदानामित्यर्थः । संकीर्णपदमेकं वाक्यं व्याकीर्णमित्यर्थः । **सुखार्थिन इति** । क्रोडमुद्रिकां काकतीयध्वजवराहमुद्राम् । हास्यरूपत्वात् तद्धारणस्येति भावः । तदुक्तम् । 'पद्यमङ्गुलिविच्छेद उरोविन्य-

यथा

मानेन महतास्माभिर्वने वक्त्रेण तिष्ठताम् ।
विन्ध्यस्य जीवितं तन्नो जातमद्य तृणं कृतम् ॥

अत्र महता मानेन यत्तृणं वक्त्रेण कृतं तदद्य विन्ध्यस्य वने तिष्ठतां नो जीवितं जातमिति वाक्यद्वयपदानामन्योन्यसंकीर्णता । अथापूर्णम् ।

अपूर्णं तद्भवेद्यत्र न संपूर्णः क्रियान्वयः ।

यथा

शैलेष्वस्माकमावासो वन्यैः सोच्छ्वसिता वयम् ।
मृगैर्बन्धुमतश्चास्मान् पश्यन् धाता प्रमोदताम् ॥

अत्र शैलवासान् वन्यवृत्तीन् मृगबान्धवान् पश्यन्निति विवक्षितसंबन्धो न संपूर्णः । अथ वाक्यगर्भितम् ।

तद्वाक्यगर्भितं यस्य मध्ये वाक्यान्तरं भवेत् ।

यथा

ज्ञात्वाप्यन्ध्रपुरीन्द्रस्य क्रोधाग्निमतिदुःसहम् ।
यद्वा न लङ्घ्यते दैवं तस्मिन्निपतिता वयम् ॥

अत्रातिदुःसहं क्रोधाग्निं ज्ञात्वापि तस्मिन्निपतिता वयमिति वाक्यमध्ये यद्वा न लङ्घ्यते दैवमिति वाक्यान्तरमनुप्रविष्टमिति वाक्यगर्भितत्वम् । अथ भिन्नलिङ्गवचने ।

यत्रोपमा भवेद्भिन्नवचना भिन्नलिङ्गका ।

स्तमक्षरम् । तन्नामकरणं चेति दास्यमेतच्चतुष्टयम् ॥' इति । **मानेनेति** । अत्र वाक्यद्वयपदानां मिथः संकीर्णत्वाद्वाक्यसंकीर्णमित्याह । **अत्रेति** । **शैलेष्विति** । वन्यैः कन्दमूलफलादिभिः । सोच्छ्वसिताः सप्राणाः । अत्र बन्धुमतश्चेति चशब्देनास्मदर्थविशेषणतया शैलवासवन्यवृत्ती समुच्चीयेते । तत्र दर्शनक्रियाया अस्मदर्थद्वारा बन्धुमत इत्यनेनैव संबन्धो न शैलवासवन्यवृत्तिभ्यामिति क्रियान्वयापरिपूरणादपूर्णमित्याशयेनाह । **अत्रेति** । **तदिति** । वाक्येन वाक्यान्तरेण गर्भितं संजातगर्भं वाक्यं वाक्यगर्भितमित्यर्थः । उदाहरणं स्पष्टम् । नन्वत्र वाक्यार्थस्यापि वाक्यान्तरगर्भितत्वेनोभयदोषत्वसंभवेऽपि वाक्यार्थप्रतीतावन्तरङ्गत्वेन प्राधान्याद्वाक्यदोषप्रायपाठ इत्यनुसंधेयम् । एवमन्यत्रापि यथासंभवमूह्यम् । भिन्नलिङ्गभिन्नवचनयोर्लक्षणोदाहरणे दर्शयति । **यत्रेत्यादिना** ।

तद्भिन्नवचनं भिन्नलिङ्गं चाहुर्मनीषिणः ॥

द्वयोरुदाहरणं यथा

समुद्रा इव गम्भीरं मनो यादवभूभुजः ।
गिरिणेवान्ध्रनृपतिध्वजिन्या कलुषीकृतम् ॥

अत्र समुद्रा इव गम्भीरमिति भिन्नवचनम् । गिरिणेव ध्वजिन्येति भिन्नलिङ्गम् । अथाधिकन्यूनोपमे ।

यत्रोपमानमधिकं न्यूनं वा स्याद्विशेषणैः ।
तत्राधिकोपमं पूर्वं न्यूनोपममतः परम् ॥

द्वयोः यथाक्रममुदाहरणम् ।

क्षामक्षाममुखाः कान्ताः कानने मालवेशितुः ।
ग्रीष्मे नद्य इव म्लानपद्मोत्पलबिसाविलाः ॥

अत्र क्षामक्षाममुखानां कान्तानामुपमानभूतासु नदीषु म्लानपद्मत्वमात्र वक्तव्यम् । म्लानोत्पलबिसाविला इत्याधिकम् । न्यूनोपमं यथा

हाराङ्गरागसुभगा नगरेषु यथा वयम् ।
तथैव निर्झराकीर्णा विभान्ति धरणीभृतः ॥

अत्र हारस्थाने निर्झरा उक्ताः । अङ्गरागस्थाने किमपि नोक्तमिति न्यूनोपमत्वम् । अथ भग्नच्छन्दोयतिभ्रष्टे ।

छन्दोभग्नं वचो यत्र तद्भग्नच्छन्द उच्यते ।
यत्र स्थाने यतिभ्रंशस्तद्यतिभ्रष्टमुच्यते ॥

समुद्रा इव गम्भीरं मन इत्यत्रोपमानोपमेययोर्भिन्नलिङ्गत्वेऽपि मुखं चन्द्र इवेतिवत् सहृदयानामुद्वेगाभावात् भिन्नवचनस्यैवेदमुदाहरणम् । अत एवोक्तं दण्ड्याचार्येण । 'न भिन्नलिङ्गवचने न च न्यूनाधिके तथा । उपमादूषणायालं यत्रोद्वेगो न धीमताम् ॥' इति । तदेतन्मनसि निधायाह । **अत्र समुद्रा इव गम्भीरमिति भिन्नवचनमिति । यत्रेति ।** अत्रोपमाशब्दः करणव्युत्पत्त्योपमानवाची । तेनाधिकविशेषणोपमानमधिकोपमं न्यूनविशेषणोपमानं न्यूनोपमम् । तेन साधारणधर्माधिक्येऽधिकोपमं तन्न्यूनत्वे न्यूनोपममिति फलितम् । उभयोदाहरणं सुगमम् । **छन्दोभग्नमिति ।** भग्नं छन्दो वृत्तं यत्र तच्छन्दोभग्नम् । यतिविच्छेद इति च्छान्दसाः । भ्रष्टा यतिर्यत्र तद्यतिभ्रष्टम् । उभयत्र 'वाहिता-

यथा

विन्ध्यारण्यकृतकुटुम्बरक्षणस्य किं भद्रं भवति जनस्य मादृशस्य ॥

अत्र विन्ध्यारण्येति तृतीयवर्णे यतिभङ्गः । पादान्तवर्णस्य गुरुत्वाभावाच्छन्दोभङ्गः । अथाशरीरम् ।

क्रियापदेन रहितमशरीरं प्रकीर्त्यते ।

यथा

हन्त निष्करुणो धाता क्रीडितो मणिकुट्टिमे ।
कानने कण्टकाकीर्णे स्थितान् पाण्ड्यशिशूनिमान् ॥

अत्र क्रियापदं न विहितम् । एतदेवानन्वयाख्यं दूषणम् । अथारीतिकम् ।

रसाननुगुणा रीतिर्यत्रारीति तदुच्यते ।

अखर्वगर्वदुर्वारदोर्गलनिरर्गलाः ।
हा बन्धुवर्गाः सर्वेऽपि कृतान्तातिथयः कृताः ॥

अत्र करुणेऽनुचितो वर्णाडम्बरः । अथ विसर्गलुप्तम् ।

ओत्वं लोपो विसर्गस्यासकृल्लुप्तविसर्गकम् ।

यत्र विसर्गो बहुधौत्वं लोपं वा प्राप्नोति तद्विसर्गलुप्तम् । यथा

ग्न्यादिषु' इति परनिपातः। **विन्ध्यारण्येति। तृतीयवर्णे यतिभङ्ग इति।** प्रहर्षिणीवृत्ते तृतीयदशमवर्णयोर्विच्छेदो विहितः । तदुक्तं वृत्तरत्नाकरे । 'म्नौ जौ गस्त्रिदशयतिः प्रहर्षणीयम् ।' इति । तत्र तृतीयवर्णे तदभावाद्यतिभ्रष्टं पादान्तवर्णस्य गुरुत्वाभावाच्छन्दोभङ्गश्च । ननु क्वचिदवसानेऽपि लघ्वन्त्यमिति वचने पादान्त्यलघोर्विकल्पेन गुरुत्वविधानादत्रापि गुरुत्वाङ्गीकारे न च्छन्दोभङ्ग इति चेत् सत्यम् । यत्रेन्द्रवज्रोपेन्द्रवज्रादौ पादान्तवर्णस्य लाक्षणिकगुरुत्वेऽपि श्राव्यत्वभङ्गाभावस्तत्र मा भूच्छन्दोभङ्गः । प्रहर्षणीवैतालीयवसन्ततिलकादौ तु वैपरीत्यादस्यैव दोष इति प्राचीनाः । **क्रियापदेनेति** । हन्तेत्यनुकम्पायाम् । **पाण्ड्यशिशूनिति।** दर्शनक्रियापेक्षया कर्मणि द्वितीया। अत्र दर्शनकियानुपादानात्। आख्यातं साव्ययकारकविशेषणं वाक्यमिति वाक्यलक्षणाभावेन वाक्यत्वस्यैवाभावादशरीरं नाम दोष इत्याशयेनाह । **अत्रेति** । क्रियापदराहित्येनान्वयाभावाच्चानन्वय इत्यस्यैव नामान्तरं मतान्तरेणेत्याह । **एतदेवेति** । **अरीतिकमिति** । विरुद्धरीतिकमित्यर्थः । **अखर्वेति** । अत्र वर्णपारुष्यदीर्घसमासादिनिबन्धनाया गौडरीतेः करुणानुचिताया निबन्धनादरीतिकं नाम दोष इत्याशयेनाह । **अत्रेति** । **विसर्गलुप्तमिति**। लुप्तविसर्गमित्यर्थः । **ओत्व-**

व्यर्थो मनोरथो यातो जातो वासो ध्रुवो मरौ ।
म्लाना दीना हता जीर्णा वनान्तेष्वीदृशा वयम् ॥

अथास्थानसमासम् ।

अपदस्थसमासं तत् समासो यत्र नोचितः ।

यथा

कुतो वैमुख्यमस्मासु ब्रह्मणः परुषात्मनः ।
इत्युदग्रतरभ्राम्यद्भ्रुकुटीकुटिलानना: ॥

अत्र वेधसे क्रुध्यतां नृपाणामुक्तौ न समासः । किं तु कविवचने समास इत्यपदस्थसमासः । अथ वाच्यवर्जितम् ।

नोक्तं स्याद्यत्र वक्तव्यं तदाहुर्वाच्यवर्जितम् ।

यथा

दुर्दशां प्रतिपन्नानामस्माकं जीवितं मतम् ॥

अत्र दुर्दशां प्रतिपन्नानामपीत्यपिशब्दो वक्तव्यो नोक्तः । अथ समाप्तपुनरात्तकं पतत्प्रकर्षं च ।

समाप्य पुनरादाने समाप्तपुनरात्तकम् ।
पतत्प्रकर्षं तत्प्राहुः प्रकर्षो यत्र विश्लथः ॥

द्वयोरुदाहरणम् ।

मिति । म्लाना इत्यादौ परम्परया विसर्जनीयस्थानिकस्य यकारस्य 'लोपो व्योर्वलि' इति लोपविधानात् लुप्तविसर्गत्वम् । व्यर्थो मनोरथ इत्यादौ यद्यपि विसर्जनीयस्य सत्वादिसंधिकार्यवशात् गुणे सत्योत्वमेव न लोपः तथापि विसर्गादर्शनाल्लुप्तविसर्गव्यवहार इति द्रष्टव्यम् । यदाहुराचार्याः । 'अदर्शनं लोपः' इति । **अपदस्थसमासमिति** । अस्थानस्थसमासमित्यर्थः । **कुत इति** । परुषात्मनः कठिनहृदयस्य वेधसे क्रुध्यतामिति 'क्रुधद्रुह—' इत्यादिना संप्रदानत्वाच्चतुर्थी । **समास इति** । क्रोधव्यञ्जक इति शेषः । **किं त्विति** । कवेः समासव्यङ्ग्यस्य क्रोधस्याभावादिति भावः । **दुर्दशामिति** । अत्र जीवितस्य हेयत्वं विवक्षितं तच्च दुर्दशां प्रतिपन्नानामपीत्यपिशब्दप्रयोग एव लभ्यते । नान्यथा । अतस्तदभावाद्वाच्यवर्जिताख्योऽयं दोष इत्याह । **अत्रेति** । **समाप्येति** । समाप्तस्य वाक्यस्य विशेषणद्वारा पुनरुपादाने समाप्तपुनरात्तम् ।

धावन्मृगेषु संभ्राम्यत्करिपूद्यत्तरक्षुषु ।
विन्ध्यारण्येषु तिष्ठामः क्षुभ्यद्भल्लूकपङ्क्तिषु ॥

अत्र विन्ध्यारण्येषु तिष्ठामः इति समाप्य क्षुभ्यद्भल्लूकपङ्क्तिष्विति पुनरादानात् समाप्तपुनरात्तकम् । अथ भ्राम्यत्करिपूद्यत्तरक्षुषु धावन्मृगेष्विति वक्तव्ये न तथोक्तमिति पतत्प्रकर्षता । अथ संबन्धवर्जितम् ।

संबन्धवर्जितं तत् स्याद्यत्रेष्टेनान्वयो हतः ।

यथा

भद्रासनानि दृषदः छत्राणि च महीरुहः ।
दुर्दशाराज्यमूर्धाभिषिक्ताः पुनरहो वयम् ॥

अत्र राज्ये भद्रासनानि दृषद इत्यादिसंबन्धो नोक्तः । अथाधिकपदम् ।

यत्राधिकपदोक्तिः स्यात् तत्राधिकपदं मतम् ।

यथा

विमुक्ता वल्लभैरेता वनान्ते घूर्जरस्त्रियः ।
सुधांशुमण्डलाकाररूपक्रसविपाण्डुराः ॥

अत्र सुधांशुमण्डलाकार इत्येतावता परिपूर्णे मण्डलाकारविपाण्डुरत्वे रूपक्रम इत्यधिकम् । अथ भग्नप्रक्रमम् ।

प्रक्रान्तनियमत्यागे भग्नक्रममिहोच्यते ।

यथा

तदत्र योजयति । **अत्रेति** । पतत्प्रकर्षमपि योजयति । **अथेति** । तरक्षवो मृगादनाः । तदपेक्षया करिणां प्रकृष्टत्वात् पूर्वमुपादानम् । मृगाणां पुनरपकृष्टत्वात् पश्चादेवोचितं तथापि मृगाणामादावुपादाने प्रकर्षभ्रंशात् पतत्प्रकर्षमिति भावः । **संबन्धेति** । संबन्धेनेष्टयोगेन वर्जितं संबन्धवर्जितम् । एतदेव केचिदभवन्मतयोगमाहुः । **भद्रासनानीति** । अत्र दुर्दशाराज्यशब्दः समासे गुणीभूत इति न तदर्थो भद्रासनादिभिः संबध्यत इत्याह । **अत्र राज्य इति । विमुक्ता इति** । अत्राधिकमंशं विविनक्ति । **अत्रेति** । 'व्याधैः सहोषितं विन्ध्ये हन्त वल्कलधारिभिः' इत्यत्रास्माभिरिति पदस्य न्यूनत्वान्न्यूनपदं नाम

गुहा गृहाणि शबरा बान्धवा विन्ध्यभूः पुरी ।
सरितो दीर्घिकाः कष्टमाक्रीडाः काननानि नः ॥

अत्र बहुवचनतया प्रथमं प्रक्रम्य विन्ध्यभूः पुरीत्येकवचनोक्तेः प्रक्रमभ्रष्टम् । अथार्थदोषाः ।

अपार्थं व्यर्थमेकार्थं ससंशयमपक्रमम् ।
भिन्नं चैवातिमात्रं च परुषं विरसं तथा ॥
हीनाधिकोपमे स्यातामसदृक्षोपमं तथा ।
अप्रसिद्धोपमं हेतुशून्यं च निरलंकृति ॥
अश्लीलं च विरुद्धं च तथा सहचरच्युतम् ।
एवमष्टादश प्रोक्ता दोषा अर्थसमाश्रयाः ॥

एषां स्वरूपमुदाहरणं च ।

समुदायार्थशून्यं यदपार्थं तत् प्रकीर्त्यते ।

यथा

कुतः शुष्यदपा नद्यः का वार्ता चोलमण्डले ।
फणाः सहस्रं शेषस्य भारः कति कुलाचलाः ॥

अत्र न कश्चिद्वाक्यार्थः प्रतीयते । अथ व्यर्थम् ।

यत् प्रयोजनशून्यं स्यात्तद् व्यर्थं परिकीर्त्यते ।

यथा

निर्मलं कुलमुद्वेलं शौर्यं वः प्रथितं यशः ।
किमित्यन्ध्रपतेः पादपीठं पाण्ड्यैर्न सेव्यते ॥

अत्र निर्मलं कुलमित्यादिप्रशंसा सेवा कर्तव्येत्युपदेशे नोपयुज्यते । अथैकार्थम् ।

उक्ताभिन्नार्थकं यत् स्यादेकार्थं तन्निगद्यते ।

दोषो द्रष्टव्यः । वहुवचनप्रक्रमभङ्गमुदाहरति । **गुहा इति** । अथार्थदोषाणामुद्देशपूर्वकं लक्षणोदाहरणे दर्शयति । **अथेत्यादिना** । समुदायार्थशून्यं वाक्यार्थशून्यम् । **कुत इति** । शुष्यदपाः शुष्यज्जलाः । 'ऋक्पूर्—' इत्यादिना समासान्तोऽप्रत्ययः । अत्र दशदाडिमादिवाक्यवदर्थशून्यत्वादपार्थत्वम् । **निर्मलमिति** । अत्र राजसेवाविधावैश्वर्यादिलोभवत् कुलादिप्रशंसाया निष्प्रयोजकत्वाद् व्यर्थमेतदित्याह । **अत्रेति** । **उक्ताभिन्नार्थकमिति** । पुनरुक्तार्थः । करि-

यथा

विशीर्णं शतधा चेतो मूर्च्छितान् वीक्ष्य बालकान् ।
शिशून् निश्चेतनान् दृष्ट्वा खण्डितं शतशो मनः ॥

अत्र पूर्वोत्तरार्धयोरभिन्नार्थत्वम् । अथ ससंशयम् ।

वाक्यार्थसंशयो यत्र तत् ससंशयमिष्यते ।

यथा

करिकुम्भौ स्तनावद्य जयतां क्षामतां गतौ ।
लता वपुःश्रियः स्त्रीणां हसन्तु म्लानतां गताः ॥

अत्र करिकुम्भयोः स्तनयोश्च लतानां वपुःश्रियां च कर्तृकर्मत्वसंशयः । अथापक्रमम् ।

यत्र पूर्वापरीभावविहतिस्तदपक्रमम् ।

यथा

हन्त व्यादाय वक्त्राणि निद्रान्त्यन्तर्वणं स्त्रियः ।
तृणैस्तत्पतितैरस्मान् शिक्षयन्त्यस्तथाक्रमम् ॥

अत्र निद्रोत्तरकालीनमुखव्यादानस्य पूर्वकालत्वमुक्तमित्यपक्रमत्वम् । अथ भिन्नम् ।

संबन्धवर्जितं यत् स्यात् तद्भिन्नं परिकीर्त्यते ।

यथा

नूनं फालेषु लाटानां न धात्रा लिखिता लिपिः ।
यदस्माकं कुटुम्बानि विषीदन्ति मरुस्थले ॥

कुम्भाविति । अनर्घराघवे 'विजयेतां रामलक्ष्मणौ कुम्भकर्णमेघनादौ' इत्यत्र वैरिवाक्ये कर्तृकर्मसंदेहेऽपि न दोषः। नायकाभ्युदयसूचकतया तत्रैव कविसंरम्भविश्रान्तेः । हन्तेति विषादे। व्यादाय विवृत्य। वनेष्वन्तर्वणम् । विभक्त्यर्थेऽव्ययीभावः । 'प्रनिरन्तर्—' इत्यादिना णत्वम् । तत्पतितैर्वक्त्रपतितैः । **शिक्षयन्त्यस्तथाक्रममिति** । तृणं ग्रसित्वा भवन्तोऽपि जीवन्त्वित्यस्माननुपदिशन्त्य इवेत्यर्थः । अत्र निद्रावक्त्रव्यादानयोर्लोके प्रसिद्धं पौर्वापर्यं विहतमितीदमपक्रममित्याह। **अत्रेति**। **पूर्वकालत्वमुक्तमिति**। 'समानकर्तृकयोः पूर्वकाले' इति विहितेन क्त्वाप्रत्ययेनेति शेषः । ननु वक्त्रं व्यादाय स्वपितीत्यत्र व्यादानस्य पूर्वकालत्वाभावात् क्त्वाप्रत्ययानुपपत्तिरिति चोदयित्वा अनन्तरभाविस्वप्नापे-

अत्र मरुस्थलनित्रासविषादस्य फालस्थलगतालिप्यभावस्य च न संबन्धः । अथातिमात्रम् ।

यत् सर्वलोकातीतं तदतिमात्रं प्रकीर्त्यते ।

यथा

मा भूदेकार्णवं विश्वमिति संकोचिताश्रुभिः ।
अरण्ये लाटनारीभिरसंख्या निम्नगाः कृताः ॥

अत्राश्रुभिर्जगदेकार्णवमित्यत्युक्तिः । अथ परुषम् ।

अतिक्रूरार्थसहितं परुषं परिकीर्त्यते ।

यथा

दावानलेन्धनं सद्यः क्रियन्तामर्भका इमे ।

अत्र फलानि याचमानान् शिशूनुद्दिश्यातिपरुषोक्तिः । अथ विरसम् ।

अप्रस्तुतरसं यत् तद्विरसं परिकीर्त्यते ।

यथा

चन्द्राननाः कटाक्षैर्नः पश्यतामृतवर्षिभिः ॥
शोचित्वालमिति क्लिष्टाः किरातैश्चोलसुभ्रुवः ॥

अत्र पुरुषवियोगखिन्नानां स्त्रीणां वनचरैः संभोगप्रार्थनं विरसम् ।

क्षया पूर्वकालत्वसंभवात् नानुपपत्तिरिति परिहृतं महाभाष्ये । तथैव व्याख्यातं कैयटेन । यद्यपि स्वप्रक्षणानां व्यादानात् पूर्वकालता तथापि तद्व्यादानानन्तरभाविस्वप्नक्रियापेक्षं व्यादानस्य पूर्वकाल्त्वमस्तीति । अतः कथमत्र पौर्वापर्यविहतिरिति चेत् सत्यम् । व्यादानात् पूर्वकालीनस्वप्नक्रियापेक्षया पौर्वापर्यविघातादस्त्येवापक्रमदोषोऽत्रेति हृदयम् । भिन्नलक्षणं संबन्धवर्जनं दर्शयति । **अत्र मरुस्थलेति** । प्रतीयमानस्तु हेतुहेतुमद्भावो न वास्तव इति भावः । **मा भूदिति** । एकार्णवभियाश्रुसंकोचेऽपि असंख्या नद्यः प्रवृत्ता इत्यतिमात्रालौकिकार्थप्रतिपादनादत्युक्तिरेवायं दोषो नातिशयोक्तिरलंकार इति भावः । परुषमुदाहरति । **दावानलेति** । इमे फलानि याचमाना इत्यर्थः । **चन्द्रानना इति** । शोचित्वालं न शोचितव्यमित्यर्थः । 'अलंखल्वोः—' इत्यादिना क्त्वाप्रत्ययः । इत्युक्त्वा क्लिष्टाः क्लेशिताः । क्लिश्नातेः 'उदितो वा' इति विकल्पात् 'यस्य विभाषा' इति निषेधः । 'क्लिशः क्त्वानिष्ठयोः' इति विकल्पादिडभावः । **संभोगप्रार्थनं विरसमिति** । अनौचित्यप्रवृत्तत्वादिति भावः ।

अथ हीनोपमम् ।

हीनं यत्रोपमानं स्यात् तद्धि हीनोपमं मतम् ।

यथा

शुनकैरिव सारङ्गा भवद्भिर्निहता द्विषः ।
क्व गतं पौरुषं तद्वः काननैकनिवासिनाम् ॥

अत्र शुनकैरिव भवद्भिरिति हीनोपमम् । अथाधिकोपमम् ।

यत्रोपमानमधिकं तद् भवेदधिकोपमम् ।

यथा

अमी पारेसरस्तीरं बका निश्चलमूर्तयः ।
महर्षय इवास्माभिरद्य सोपद्रवाः कृताः ॥

अत्र बका महर्षय इवेत्यधिकोपमम् । अथासदृक्षोपमम् ।

यदतुल्योपमानं तद् भवेदसदृशोपमम् ।

यथा

एष विन्ध्याचलः सान्द्रकुञ्जोच्चलितनिर्झरः ।
फालेक्षणस्फुरद्वह्निशिखाटोप इवेश्वरः ॥

अत्र कुञ्जोच्चलितनिर्झरस्य विन्ध्याचलस्य फालेक्षणस्फुरद्वह्नेरीश्वरस्य च मिथो न सादृश्यम् । अथाप्रसिद्धोपमम् ।

तदुक्तं ध्वन्याचार्यैः । 'अनौचित्यादृते नान्यद्रसभङ्गस्य कारणम् ।' इति । **हीनमिति** । जात्या प्रमाणेन वेति शेषः । एवमधिकमित्यत्रापि द्रष्टव्यम् । अत एव पूर्वोक्ताभ्यां न्यूनाधिकोपमाभ्यामनयोर्भेदः । जातिहीनमुदाहरति । **शुनकैरिति** । प्रमाणहीनोदाहरणं तु स्फुलिङ्ग इव भानुमानित्यादौ द्रष्टव्यम् । जात्यधिकमुदाहरति । **अमी इति** । पारे सरस्तीरस्य पारेसरस्तीरम् । 'पारेमध्ये षष्ठ्या वा' इत्यव्ययीभावः । प्रमाणाधिकोदाहरणं तु पातालमिव नाभिस्त इत्यादौ द्रष्टव्यम् । अत्र सर्वत्र साधर्म्येण चमत्काराय विवक्षितार्थस्य शुनकादिभिः प्रतिपत्तिपरिक्षोभणेन कदर्थीकरणादनौचित्येन दोषत्वमिति भावः । अत एवोक्तं काव्यप्रकाशे । 'उपमानस्य जातिप्रमाणकृतं न्यूनत्वमधिकता वा तादृश्यनुचितार्थत्वं दोषः' इति । **यदिति** । न ह्यत्र विन्ध्यविरूपाक्षयोस्तद्धर्मयोश्च वह्निनिर्झरयोः सादृश्यप्रसिद्धिरस्ति । न च धर्मिणोर्धर्मद्वारा सादृश्यं धर्मयोश्च धर्मिद्वारेति वाच्यम् । इतरेतराश्रयत्वप्रसङ्गात् । यथाह । 'बध्नामि काव्यशशिनं विततार्थरश्मिम्' इत्यत्र वामनः 'तदेवमितरेतराश्रयदोषो दुरुत्तरः'

अप्रसिद्धोपमानं यदप्रसिद्धोपमं मतम् ।

यथा

बाष्पाम्बुक्लिन्ननेत्राणि मुखान्यङ्ग मृगीदृशाम् ।
हिमदूषितपत्राणि कुमुदानीव निर्मुदाम् ॥

अत्र मुखानां कुमुदान्युपमानतया कविलोके न प्रसिद्धानि । अथ हेतुशून्यम् ।

हेतोर्विनार्थकथनं हेतुशून्यं प्रचक्षते ।

यथा

मुधानुधावनं जातं मार्गेऽस्मिन् मौक्तिकाङ्किते ।
अन्वेष्टुमन्यतो यामि पदवीयं न सुभ्रुवः ॥

अत्र सुभ्रुवः पदवीयं न भवतीत्यत्र हेतुर्नोक्तः । अथ निरलंकृतिः ।

अलंकारेण रहितं निरलंकारमुच्यते ।

यथा

आघ्राय सुरभेर्योनिमुन्मुखैर्दीर्घमेहनैः ।
महोक्षैर्लम्बमानाण्डैर्विष्वग्व्याकुलितं वनम् ॥

अत्र न कश्चिदलंकारः । श्लाघ्यविशेषणाभावात् न स्वभावोक्तिः । अथाश्लीलम् ।

अश्लीलार्थस्य कथनमश्लीलं परिकीर्त्यते ।

इति । तदेतत् सर्वं मनसि निधायाह । **अत्र कुञ्ज इति** । **हेतोर्विनेति** । हेतुना विनेत्यर्थः । 'पृथग्विना' इत्यादिना पञ्चमी । **मौक्तिकाङ्कित इति** । कण्ठीरवाकृष्टकरिकुम्भादिगलितमौक्तिकाङ्कित इत्यर्थः । **मुधानुधावनमिति** । प्रियालंकारमौक्तिकाङ्कित इति भ्रान्त्येति भावः । **पदवीयं न भवतीति** । अत्रेति शेषः । **हेतुर्नोक्त इति** । 'अभ्युन्नता पुरस्तादवगाढा जघनगौरवात् पश्चात्' इत्याद्युक्तलक्षणपदपङ्क्त्यभावादिरूपो हेतुर्नोक्त इत्यर्थः । **आघ्रायेति** । महोक्षैः पुङ्गवैः । 'अचतुर' इत्यादिना निपातनात् साधुः । विच्छित्तिविशेषाभावादिति भावः । वर्ण्यमानवस्तुस्वभावस्तु ग्राम्यधर्मतया सहृदयश्लाघानधिरोहान्न स्वभावोक्तिबीजम् । तदुक्तं चक्रवर्तिना । 'स्वभावोक्तिर्बुधोन्नेयवस्तुस्वाभाव्यवर्णनम् ।' इति । तदेतदाह । **श्लाघ्यविशेषणाभावान्न स्वभावोक्तिरिति** । **अश्लीलार्थस्येति** । अश्लीलार्थस्यामङ्गळजुगुप्साव्रीडबुद्धिजनक-

अस्यापि पूर्वमेवोदाहरणम् । अथ विरुद्धम् ।

विरुद्धं देशकालादिविरुद्धं बहुधोच्यते ।

यथा

दिश्युत्तरस्यां नेदीयानुद्वेलो लवणार्णवः ।
मरुदेशेऽपि गङ्गा नः पिपासां शामयिष्यति ॥

अत्र दिश्युत्तरस्यां लवणार्णव इति दिग्विरोधः । मरौ गङ्गेति देशविरोधः ।

अरण्यमहिषोदग्रविषाणोदरजन्मनाम् ।
महत्यर्घेऽपि मुक्तानां स्त्रियो मुक्ताविभूषणाः ॥

अत्र महिषविषाणेभ्यो मुक्तानां जन्मेति लोकविरोधः । एवं विरुद्धान्तरमप्युदाहार्यम् । अथ सहचरभ्रष्टम् ।

मतं सहचरभ्रष्टमतुल्यानां निबन्धने ।

यथा

शान्त्या श्रुतं ह्रिया नारी मन्मथेन रतोत्सवः ।
श्रुतेन धिषणा वन्यवृत्त्या जीवन्ति शाबराः ॥

स्येत्यर्थः । तत्र व्रीडबुद्धिजनकस्य अश्लीलस्य पूर्वमेवोदाहरणमित्याह । **अस्यापीति** । अत्र पर्यायैरप्यस्यार्थस्य सुवचत्वात् पदविनिमयासहिष्णोः पददोषादश्लीलादमुष्य भेदः । इतरभेदद्वयस्योदाहरणं स्वयमूहनीयम् । **विरुद्धमिति** । देशकालादीत्यादिशब्देन विद्यास्वभावादयो गृह्यन्ते । नेदीयानन्तिकतमः । अन्यथोत्तरदेशेऽपि लक्षयोजनव्यवहिते लवणोदस्य संभवेन विरोधाभावादिति भावः । **शामयिष्यतीति** । चुरादिणिच्युपधावृद्धिः । शमयिष्यतीति पाठे चन्द्रमते मितां ह्रस्वः । मरुदेश इति देशविरोधः । **अरण्येति** । अर्घे मूल्ये महत्यपि मुक्तामयानि विभूषणानि यासां ता मुक्ताविभूषणाः । गुञ्जाविभूषणा इति पाठान्तरम् । अत्र 'करीक्षुजीमूतवराहशङ्खमत्स्याहिशुक्त्युद्भववेणुजानि । मुक्ताफलानि प्रथितानि लोके तेषां तु शुक्त्युद्भवमेव भूरि ॥' इति वचनात् गजादीनामेव मुक्ताकरत्वं प्रसिद्धं । नान्येषाम् । तस्मान्महिषविषाणानां मुक्ताकरत्वं लोकविरुद्धमित्याह । **अत्रेति** । विरुद्धान्तरं विद्याविरुद्धादिकम् । यथा । 'सदा स्नात्वा निशीथिन्यां सकलं वासरं बुधः । नानाविधानि शास्त्राणि व्याचष्टे च शृणोति च ॥' अत्र रात्रौ स्नानं धर्मशास्त्रविरुद्धम् । एवमन्यदप्युदाहार्यम् । **शान्त्येति** । श्रुतधिषणाभ्यां शान्तिश्रुतालङ्कृतत्वेन सर्वेषामत्यन्तोपादेयतया

अत्र श्रुतधिषणाभ्यां नारीरतोत्सवयोरपकृष्टत्वात् सहचरभ्रष्टम् । एवं दोषान्तराणि यथासंभवमूह्यानि । रसभावादीनां स्वशब्दवाच्यता दुष्टैव ॥

इति श्रीविद्यानाथकृतौ प्रतापरुद्रयशोभूषणेऽलंकारशास्त्रे दोषप्रकरणं समाप्तम् ।

सर्वोत्कृष्टाभ्यामित्यर्थः । नारीरतोत्सवयोर्लज्जामन्मथसमवेतयोः कतिपयोपादेयतयापकृष्टत्वादित्यर्थः । वन्यवृत्त्या जीवन्ति शात्रवा इत्येतत्तु सर्वापकृष्टत्वात् सर्वेभ्यः सहचरेभ्यो भ्रष्टमिति द्रष्टव्यम् । **रसेति** । भावाः संचारिभावाः । आदिग्रहणात् स्थायिभावा गृह्यन्ते। तेषां स्वशब्दवाच्यता रसशृङ्गारादिसामान्यशब्दाभिधेयता । **दुष्टैवेति** । रसप्रतीतेर्विभावादिप्रयोगान्वयव्यतिरेकानुविधानाद्रसादिशब्दप्रयोगेऽपि तदप्रतीतेश्च नित्यव्यङ्ग्यस्य रसादेर्वाच्यत्वं दुष्टमेवेति भावः । तदुक्तं काव्यप्रकाशे रसदोषप्रकरणे । 'व्यभिचारिरसस्थायिभावानां शब्दवाच्यता ।' इति । अत्रावाङ्मनसगोचरस्यापि ब्रह्मानन्दस्योपाधिवशात् यथातथादिपदवाच्यत्वं न दोषः । एवं ब्रह्मानन्दसब्रह्मचारिणो रसस्यापि विभावाद्यनुसंधानानन्तरभाविनश्चर्व्यमाणस्य वाच्यत्वानुपपत्तावपि सहकारिवैकल्येऽपि परोक्षतया प्रतीयमानस्य रसस्य शृङ्गारादिशब्दवाच्यत्वे न कोऽपि दोष इति द्रष्टव्यम् ।

इति पदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलचलमल्लिनाथसूरिसूनुना विश्वजनीनविद्यस्य विद्वन्मणेः पेद्दयार्यस्यानुजेन कुमारस्वामिसोमपीथिना विरचिते प्रतापरुद्रीयव्याख्याने रत्नापणाख्याने दोषनिरूपणं नाम पञ्चमं प्रकरणम् ॥

॥ अथ गुणप्रकरणम् ॥

अथ गुणा निरूप्यन्ते ।

श्लेषः प्रसादः समता माधुर्यं सुकुमारता ।
अर्थव्यक्तिरुदारत्वं तथा कान्तिरुदात्तता ॥
ओजः सुशब्दता प्रेयानौर्जित्यमथ विस्तरः ।
समाधिः सौक्ष्म्यगाम्भीर्ये संक्षेपो भाविकं तथा ॥
संमितत्वं तथा प्रौढी रीतिरुक्तिर्गतिस्तथा ॥

एषां मध्ये केषांचिद् दोषपरिहारकत्वेन गुणत्वम् । केषांचित् स्वत एवोत्कर्षहेतुत्वाद् गुणत्वम् । तत्र ये स्वत एव चारुत्वातिशयहेतवस्ते परमुत्कृष्टाः । दुष्टत्वपरिहारहेतूनां गुणत्वं न सर्वसंमतम् । ये तु दोषाभावतया गुणत्वमिच्छन्ति तेषामेव सौकुमार्यादयो गुणत्वेन संमताः । श्रुतिकटुरूपदोषनिराकरणाय सौकुमार्यं संमतम् । ग्राम्यदोषनिराकरणाय कान्तिः स्वीकृता । अपुष्टार्थनिराकरणायार्थव्यक्तिर्मता । न्यूनाधिकपदनिराकरणाय संमितत्वं मतम् । अनुचितार्थनिराकरणार्थमुदात्तता स्वीकृता । विसंधिनिराकरणाय और्जित्यं मतम् । पतत्प्रकर्षनिराकरणाय रीतिरिष्टा । क्लिष्टपरिहाराय प्रसादो मतः । अश्लीलपरिहारार्थमुक्तिः स्वीकृता । च्युतसंस्कारपरिहारार्थं सौशब्द्यमिष्टम् । प्रक्रमभङ्गनिराकरणाय समता मता । परुषदोषनिवृत्त्यर्थं प्रेयान् मतः । एवं यथासंभवं केषांचिद्दोषपरिहारकत्वेन गुणत्वम् । एषां गुणानां स्वरूपमुदाहरणं च ।

इत्थं यथासंभवं दोषान् निरूप्य तत्प्रतिभटभूतगुणनिरूपणं प्रतिजानीते । **अथेति** । तत्र गुणास्त्रय इति भामहादयः । दशेति वामनादयः । चतुर्विंशतिरिति भोजराजः । तत्र भोजराजमतेनोद्देशमाह । **श्लेष इत्यादि** । **एषां मध्ये केषांचिद्दोषपरिहारकत्वेन गुणत्वमिति** । तथापि केषांचिन्मते उत्कर्षहेतुत्वात् काव्योत्कर्षहेतुत्वादिति भावः। को दोषः केन गुणेन परिह्रियते इत्याकाङ्क्षायामाह । **श्रुतिकटुरूपेत्यादिना** । **एषां गुणानामिति** । संघटनाश्रयत्वे सति चारुताहेतवो गुणा इति वक्ष्यमाणसामान्यलक्षणानामिति भावः ।

मिथः संश्लिष्टपदता श्लेष इत्याभिधीयते ।

बहूनां पदानामेकपदवदवभासमानत्वं श्लिष्टत्वम् । यथा

श्रीमत्काकतिवीररुद्रमखिलक्ष्मापालमौलिस्फुरन्-
माणिक्यद्युतिरञ्जिताङ्घ्रिमखिलप्रख्यातशौर्योदयम् ।
विश्वत्राणविनिद्रमक्षयगुणज्योत्स्नावितानावृत-
व्योमागारमनल्पवैभवममुं स्तोतुं वयं नेश्महे ॥

अत्र पाठसमये पदानामेकवदवभासमानत्वात् श्लेषः ।

अथ प्रसादः ।

प्रसिद्धार्थपदत्वं यत् स प्रसादो निगद्यते ।

यथा

प्रतापरुद्रदेवोऽयं भाति लक्ष्मीपतिः स्वयम् ।
येनास्य लोचने फुल्लपुण्डरीकमनोहरे ॥

अत्र झटित्यर्थसमर्पकपदत्वात् प्रसादः । अथ समता ।

अवैषम्येण भणनं समता सा निगद्यते ।

यथा

वदान्यतरुमञ्जरीसुरभयः श्रवःपारणं
गुणा विदधते सतां जगति वीररुद्रप्रभोः ।
सुधामधुरिमाधरीकरणचातुरीचुञ्चवो
वियच्चरतरङ्गिणीविहरदूर्मिमर्मस्पृशः ॥

अत्र पादचतुष्टयेऽपि तुल्यवद्भणनात् समत्वम् । अथ माधुर्यम् ।

मिथ इति । संश्लिष्टानि मसृणानि पदानि यस्य तस्य भावस्तत्ता । निष्कर्षमाह । **बहूनामिति** । तदुक्तं वामनेन । 'यत्रैकपदवत् भान्ति पदानि सुबहून्यपि । अनालक्षितसन्धीनि स श्लेषः परमो गुणः ॥' इति । उदाहरति । **श्रीमदिति** । **अक्षयगुणज्योत्स्नेति** । लौकिकचन्द्रिकाव्यतिरेकः । वितानमुल्लोचः । प्रसादमुदाहरति । **प्रतापेति** । **झटित्यर्थसमर्पकपदत्वादिति** । व्यवहितार्थप्रत्यायकक्लिष्टविपर्ययोक्तिः । वदान्यतरवः कल्पवृक्षाः । तन्मञ्जर्य इव सुरभयो मनोहराः । श्रवःपारणं श्रोत्रसन्तर्पणम् । सुधामधुरिमाधरीकरणचातुरीचुञ्चवः अमृतमाधुर्यन्यक्करणचातुर्यवित्ताः । वियच्चरतराङ्गिणीविहरदूर्मिमर्मस्पृशः मन्दाकिनीकल्लोलकल्पा इत्यर्थः । **पादचतुष्टयेऽपि तुल्यवद्भणनादिति** । अनेन प्र-

या पृथक्पदता वाक्ये तन्माधुर्यं प्रकीर्त्यते ।

यथा

यशःश्रियः काकतिभूपतेर्दिशां नितम्बबिम्बेषु दुकूलरीतयः ।
उरोजयोर्मौक्तिकहारविभ्रमाः शिरस्सु जातीकुसुमस्रगुज्ज्वलाः ॥

अत्र वाक्ये पाठसमयेऽपि पृथक्पदत्वप्रतीतेर्माधुर्यम् । अथ सुकुमारत्वम् ।

सुकुमाराक्षरप्रायं सौकुमार्यं तदुच्यते ।

सुकुमारत्वं नाम सानुस्वारकोमलवर्णबन्धत्वम् । यथा

अमन्दानन्दनिष्यन्दसुन्दरीवदनेन्दुभिः ।
नगरे काकतीन्द्रस्य दिवाप्याभाति चन्द्रिका ॥

अथार्थव्यक्तिः ।

यत्तु संपूर्णवाक्यत्वमर्थव्यक्तिं वदन्ति ताम् ।

यथा

भाग्यं मध्यमलोकनिघ्नमधुना येनास्य संरक्षिता
जातः खेलति वीररुद्रनृपतिर्निःसीमशौर्योदयः ।
यद्वा त्रीण्यपि विष्टपानि दधते धन्यत्वमंशो हरे-
र्यत् साक्षादवतीर्य काकतिकुले स्वैरं समुज्जृम्भते ॥

अत्रार्थप्रतिपादने वाक्यस्य निराकाङ्क्षतया परिपूर्णत्वादर्थव्यक्तिः ।

अथ कान्तिः ।

क्रमभङ्गः परिहृतः । **यशःश्रिय इति** । दिशामित्यनेन स्त्रीप्रतीतिस्तासामधोमध्योर्ध्वदेशे नितम्बस्तनशिरोऽध्यवसायो युज्यते । **उरोजयोरिति** । 'स्तनादीनां द्वित्वविशिष्टा जातिः प्रायेण' इति वामनवचनात् द्विवचनोपपत्तिः । अत्र माधुर्ये पृथक्पदत्वं दीर्घसमासाभाव इति वामनः । **सुकुमारेति** । सौकुमार्यमपरुषत्वमित्यर्थः । **अर्थव्यक्तिरिति** । तद्धेतौ तत्त्वोपचारः । तदुक्तम् । 'यत्रार्थव्यक्तिहेतुत्वं सोऽर्थव्यक्तिः स्मृतो गुणः ।' इति । **भाग्यमिति** । मध्यमलोकनिघ्नं मध्यमलोकाधीनम् । यद्वा त्रिविक्रमावतारस्य काकतिविभाः किमनेन संकोचेनेत्याह । **यद्वेति** । निराकाङ्क्षतया परिपूर्णत्वादित्यनेन क्रियापदराहित्यात् साकाङ्क्षत्वेनापरिपूर्णानामशरीरादीनां दोषाणां प्रत्युदाहरणत्वं दर्शितम् । न चापुष्टार्थनिराकरणायार्थव्यक्तिरिति पूर्वोक्तविरोधः । परिपोषाभावलक्षणयोगेन तेषामप्यपुष्टार्थत्वात् प्रकृतानुपयुक्तार्थत्वलक्षणापुष्टार्थस्य तु निरा-

अत्युज्ज्वलत्वं बन्धस्य काव्ये कान्तिरितीष्यते ।

यथा

जेतुः काकतिवीररुद्रनृपतेर्जैत्रप्रयाणोत्थिते
क्षोणीरेणुभरे नभस्यतिभृशं भूविभ्रमं बिभ्रति ।
जाता मर्त्यनदी विशङ्कटतटी दीर्घा वियद्दीर्घिका
गाढं गूढतमा च गौतमनदी पातालगङ्गायते ॥

अथौदार्यम् ।

विकटाक्षरबन्धत्वमार्यैरौदार्यमिष्यते ।

यथा

जग्ध्वा भूयांसि मांसान्यहमहमिकया बद्धगार्ध्यान् सपीत्या-
मस्रस्योच्चैस्तरास्थ्युत्कषणभवकटत्काररौद्राग्रदंष्ट्रान् ।
संबिभ्राणाः क्षपाटान् द्विपगलितवसानिर्झरान्तर्नदीष्णान्
कुर्वन्त्यायोधनोर्व्यो भयमवनिभृतामन्ध्रसैन्येन सृष्टाः ॥

काङ्क्षत्वेन परिपूर्णस्य प्रक्रतवैपरीत्याभावान्नास्ति प्रत्युदाहरणत्वमिति द्रष्टव्यम् । **अत्युज्ज्वलत्वमिति** । यदभावे चिरन्तनचित्रच्छायेव प्रबन्धच्छाया भवति तदौज्ज्वल्यं सैव कान्तिरित्यर्थः । तदुक्तम् । 'औज्ज्वल्यं कान्तिरित्याहुर्गुणं गुणविपश्चितः । पुराणचित्रस्थानीयं तेन वन्ध्यं कवेर्वचः ॥' इति । **जेतुरिति**। काव्यप्रकरणे(पृ-४८)व्याख्यातम्।औदार्यं नाम विकटाक्षरबन्धत्वं तच्च नर्तनबुद्ध्युत्पादकपदविन्यासः । तदुक्तम् । 'विकटत्वं च बन्धस्य कथयन्ति ह्युदारताम् । वैचित्र्यं न प्रपद्यन्ते यया शून्याः पदक्रमाः ॥ पश्चादिव गतिर्वाचः पुरस्तादिव वस्तुनः ॥' इति । **जग्ध्वेति** । अन्योन्यं प्रति श्रेष्ठोऽहमित्यभिमानोऽहमहमिका। अहमिति विभक्तिप्रतिरूपकमव्ययं निपातितम् । तस्य वीप्सायां द्विरुक्तिः । संज्ञायां कन्प्रत्ययः । पृषोदरादिरिति सुभूतिचन्द्रः । गर्ध एव गार्ध्यम् । चातुर्वर्ण्यादित्वादौपम्यादिवत् स्वार्थे ष्यञ्प्रत्ययः । तद्बद्धं यैस्तान् बद्धगार्ध्यान् । समाना पीतिः सपीतिः । 'सहपानं सपीतिः स्त्री तुल्यपानम्' इत्यमरः । 'समानस्यच्छन्दसि' इत्यादिना समानशब्दस्य सभावः । छान्दसत्वेऽपि बाणादिप्रयोगमहिम्ना लोकेऽपि न विरोध इत्याह दशटीकासर्वस्वकारः । 'समानस्यच्छन्दसि' इत्यत्र समानस्येति योगविभागसामर्थ्यात् भाषायामपि सपक्षादिप्रयोगसिद्धिरित्याह वृत्तिकारः । पदमञ्जरीकारस्तु 'योगविभागाङ्गीकारे तस्य नित्यत्वात् समानजातीयशब्दप्रयोगो न स्यात् । अस्ति च प्रयोगः । तस्मात् सपक्षादिशब्देषु सदृशार्थस्य सहशब्दस्य पक्षादिभिरस्वपदविग्रहे बहु-

अथोदात्तता ।

श्लाघ्यैर्विशेषणैर्योगो यस्तु सा स्यादुदात्तता ।

यथा

बृंहमाणगजाकीर्णा ह्रेषमाणहयाकुला ।
संक्रीडत्स्यन्दना क्ष्वेडभटा रुद्रविभोश्चमूः ॥

अथौजः ।

ओजः समासभूयस्त्वम् ।

यथा

उद्दामद्विरदौघदानलहरीसौरभ्यलोभभ्रमद्-
भृङ्गश्रेणिनिबद्धझंकृतिकलावाचालितप्राङ्गणाः ।
निःसीमप्रथमानभूमविभवारम्भप्रियंभावुका
मोदन्ते भुवि वीररुद्रनृपतेर्विद्वद्गृहश्रेणयः ॥

अथ सुशब्दता ।

सुपां तिङां च व्युत्पत्तिः सौशब्द्यं परिकीर्त्यते ।

यथा

व्रीहौ सहशब्दस्य 'वोपसर्जनस्य' इति सभावः । 'भाष्यवार्तिकयोश्च योगविभागो नोपन्यस्तः' इत्यवोचत् । यदत्र युक्तं तद् ग्राह्यम् । अस्थ्युत्कषणमस्थिसंघर्षः । कटत्कारोऽनुकरणशब्दः । क्षपास्वटन्तीति क्षपाटाः नक्तंचराः भूतभेतालादयः । नद्यां स्नान्तीति नदीष्णाः कुशलाः । 'सुपि' इति योगविभागात् कप्रत्ययः । 'निनदीभ्यां स्नातेः कौशले' इति षत्वम् । **श्लाघ्यैरिति** । श्लाघ्यैरुचितैः बृंहणादीनां गजादीनामेवोचितत्वादिति भावः । वैपरीत्येऽनौचित्यमनेन परिहृतमित्यनुसंधेयम् । **बृंहमाणेति** । चानशन्तोऽयं न शानजन्तः। बृंहेः परस्मैपदित्वात् । क्ष्वेडभटेति पचाद्यजन्तपाठो न क्ष्वेडद्भटेति शत्रन्तपाठः । तस्यात्मनेपदित्वादित्यादिप्रपञ्चेन व्याख्यातं नाटकप्रकरणे द्वितीयेऽङ्के(पृ·१२०)।अनुचितार्थपरिहारकोऽयं गुणः। **उद्दामेति**। वाचालानि कृतानि वाचालितानि शब्दायमानानीत्यर्थः । भूमविभवो महिमातिशयः । प्रिया भवन्तीति प्रियंभावुकाः । 'कर्तरि भुवः खिष्णुच्खुकञौ' इति खुकञ्प्रत्ययः । अत्र वीररुद्रविदुषां गजान्तलक्ष्मीर्माहात्म्यं च प्रतिपाद्यते । **सुपां तिङां चेति** । सुबन्ततिङन्तविशेषाणामित्यर्थः । कूलमुद्वहन्तीति कूलमुद्वहाः कथा यैस्तैर्दिगन्तप्रसिद्धैरित्यर्थः । 'उदि कूले रुजिवहोः' इति खश्प्रत्ययः । अभ्रं कषन्तीत्यभ्रंकषाः । तैरुत्कृष्टैरित्यर्थः । 'सर्वकूलाभ्रकरीरेषु कषः' इति खश्प्रत्ययः । वैभवैरैश्वर्यैः । शोभना

आशामण्डलकूलमुद्वहकथैरभ्रङ्कषैर्वैभवै
रक्षन् सुप्रजसः प्रजास्त्रिभुवनक्षेमङ्करप्रक्रियः ।
दुष्टानां भुवि निग्रहन्तुमतुलैराढ्यंभविष्णुर्गुणै-
र्भूम्ना संचरतेऽद्य काकतिकुले रुद्रावतारो हरिः ॥

अथ प्रेयः ।

प्रेयः प्रियतराख्यानं चाटूक्तौ यद्विधीयते ।

यथा

दाक्षिण्यं त्वयि दक्षता त्वयि दया त्वय्युन्नतत्वं त्वयि
प्रागल्भ्यं त्वयि पौरुषं त्वयि कला संपत्त्वयि श्रीस्त्वयि ।
औदार्यं त्वयि धीरता त्वयि जगद्धौरेयता च त्वयि
श्रीमत्काकतिनाथ पालय भुवं वैरिञ्चकल्पान् शतम् ॥

अथौर्जित्यम् ।

और्जित्यं गाढबन्धत्वम् ।

यथा

क्षोणीरक्षणदक्षिणाः क्षतजगत्क्षोभा दुरीक्ष्यक्रमाः
क्षुद्रक्षत्रियपक्षशिक्षणविधौ प्रोत्क्षिप्तकौक्षेयकाः ।
उद्दामोद्यमनस्य रुद्रनृपतेर्दोर्दण्डयोश्चण्डयो-
र्गर्जद्दुर्जनगर्वपर्वतभिदा दम्भोलयः केलयः ॥

प्रजा यासां ताः सुप्रजसः । 'नित्यमसिच्प्रजामेधयोः' इत्यसिच्प्रत्ययः । प्रजा रक्षन्निति हेतौ शतृप्रत्ययः। रक्षणेन हेतुनेत्यर्थः। अत एव त्रिभुवनक्षेमंकर-प्रक्रियो विश्वजनीनव्यापार इत्यर्थः । 'क्षेमप्रियमद्रेऽण् च' इति खश्प्रत्ययः । गुणैः शौर्यादिभिः । आढ्यो भवतीत्याढ्यंभविष्णुः । 'कर्तरि भुवः' इति खिष्णु-च्प्रत्ययः । दुष्टानां निग्रहन्तुम् । 'जासिनिप्रहण' इत्यादिना कर्मणि षष्ठी । भूम्ना महिम्ना संचरते । 'समस्तृतीयायुक्तात्' इत्यात्मनेपदम् । इत्थमत्र सौ-शब्द्यं नाम गुणः । तस्य च्युतसंस्कारपरिहारार्थत्ववचनमयुक्तम । अनभिहित-गुणभावेनापशब्दाभावमात्रेण तत्परिहारसंभवात् । अत्र तु सकलसचेतश्चेतश्च-मत्कारकारिविशिष्टपदप्रयोगेण चारुताहेतुत्वसंभवादस्यैव स्वतन्त्रं गुणत्वमिति । **प्रेय इति** । चाटूक्तौ प्रियोक्तौ । दाक्षिण्यं सरलत्वम् । दक्षता क्षिप्रकारिता । धौरेयता धुरन्धरत्वम् । 'धुरो यड्ढकौ' इति ढक्प्रत्ययः । निष्ठुरोक्तिलक्षणपरु-षप्रातिपक्ष्यं प्रेयस इत्युक्तम् । **और्जित्यमिति । गाढबन्धत्वमिति** । विस-

अथ समाधिः ।

समाधिरन्यधर्माणां यदन्यत्राधिरोपणम् ।

यथा

पृच्छन्ती दुग्धसिन्धुं कुशलमनुसरन्त्यादराच्छङ्कराद्रिं
चाटूक्त्या मानयन्ती मुहुरमरनदीं चन्द्रमग्रे हसन्ती ।
वैधात्रीं यानहंसावलिमनुकृपया स्वागतं व्याहरन्ती
लोकेषु त्रिष्वमीषु प्रभवति महती वीररुद्रस्य कीर्तिः ॥

अथ विस्तरः ।

समर्थनप्रपञ्चोक्तिरुक्तस्यार्थस्य विस्तरः ।

यथा

लोकेषु त्रिषु काकतीश्वरगुणान् स्तोतुं मुहुर्वीक्षितुं
श्रोतुं बह्वभिनन्दितुं च फणिनामेकः क्षमो नायकः ।
यद्वक्त्राणि सहस्रमस्य कृतिनो यद् द्वे सहस्रे दृश-
स्ता एव श्रुतयः फणा दशशतान्यत्यद्भुतान्दोलने ॥

अथ संमितत्वम् ।

यावदर्थपदत्वं तु संमितत्वमुदाहृतम् ।

यथा

काकतीयनरेन्द्रस्य कीर्तिचन्दनचर्चनम् ।

न्धिवैलक्ष्येणेति भावः। क्षोणीरक्षणेत्यादिश्लोको व्याख्यातः काव्यप्रकरणे(पृ-५२) शब्दचित्रे । **पृच्छन्तीति** । अत्र कुशलप्रश्नादेश्चेतनधर्मस्याचेतनायां कीर्तावधिरोपणात् समाधिः । **समर्थनेति** । विस्तर इति समर्थनप्रपञ्चनस्य शब्दात्मकत्वेन ‘प्रथने वावशब्दे’ इति घञः प्रतिषेधे ‘ऋदोरप्’ इत्यप् प्रत्ययः । ‘स तु शब्दस्य विस्तरः’ इत्यमरः । **लोकेष्विति** । अभिनन्दितुमनुमोदितुम् । स्तोत्रादिषु फणिपतिसामर्थ्यं समर्थयते । **यदिति** । यस्मात् कारणादित्यर्थः । अत एवेदं न काव्यलिङ्गम् । हेतुवाचकविभक्त्यादेरश्रवण एव तस्योत्थानादिति । **यावदिति**। यावन्तोऽर्था यावदर्थमिति तद्धितान्तेन विग्रहः। तदुक्तं हरदत्तेन। ‘यावादित्यव्ययं चास्ति तद्धितान्तश्च विद्यते । अतो नित्यसमासेऽपि तद्धितान्तेन विग्रहः ॥’ इति । ‘यावदवधारणे’ इत्यव्ययीभावः । यावदर्थं पदानि यस्य तस्य भावस्तत्त्वम् । अभिधेयापेक्षया यत्रैकमपि पदं न न्यूनं नाप्यधिकं तत्संमितमित्यर्थः । **काकतीयेति** । गतमेतत् । ध्वनिमत्त्वमुदाहरणे योजयति ।

दिगङ्गना वितन्वन्ति वतंसीकृततद्गुणाः ॥

अथ गाम्भीर्यम् ।

ध्वनिमत्ता तु गाम्भीर्यम् ।

यथा

विषं कौक्षेयके गङ्गा कीर्तौ दिग्वसनं रिपौ ।
इन्दुर्मुखे च रुद्रस्य काकतीयस्य दृश्यते ॥

अत्र शङ्करस्य कण्ठे विषं मौलौ गङ्गा कटिस्थले दिग्वस्त्रं शिरासि चन्द्र इति ध्वन्यते । अथ संक्षेपः ।

संक्षिप्तार्थाभिधानं यत् तत् संक्षेपः प्रकीर्त्यते ।

यथा

वंशोऽस्ति काकतीयानां तत्रासन् बहवो नृपाः ।
तेषां भाग्यविवर्तोऽयं वीररुद्रो नरेश्वरः ॥

अत्रातिविस्तरकथनयोग्यार्थस्य संक्षेपोक्तेः संक्षेपः । अथ सौक्ष्म्यम् ।

अन्तः संजल्परूपत्वं शब्दानां सौक्ष्म्यमुच्यते ।

यथा

अध्यधःपरिसंश्लिष्टाः ष्ठाकृञ्भूधातवः सदा ।
वर्तन्ते काकतीयेन्द्रे कर्तर्यन्यत्र कर्मणि ॥

अत्राधितिष्ठत्यधःकरोति परिभवतीत्यन्तःसंजल्परूपत्वात् सौक्ष्म्यं

अत्र शङ्करस्येति । **वंश इति**। भाग्यविवर्तो भाग्यपरिपाकः । **अन्तारेति** समीचीनो जल्पः संजल्पः विवक्षितार्थः सोऽन्तःकृतो गर्भितो यत्र तद्रूपत्वमन्तःसञ्जल्परूपत्वं सौक्ष्म्यमित्यर्थः । अध्यधःपरिशब्दैः संश्लिष्टाः संवद्धाः प्राक्प्रयुक्ताध्यादिशब्दा इत्यर्थः । ष्ठा गतिनिवृत्तौ । डुकृञ् करणे । भू सत्तायामित्येते धातवो 'भूवादयो धातवः' इत्युक्तलक्षणाः शब्दविशेषाः ष्ठाकृञ्भूधातवः काकतीयेन्द्रे सदा कर्तरि वर्तन्ते । कर्तृवाचिन एव तिङादिप्रत्ययान् दधतीत्यर्थः । अन्यत्र कर्मणि कर्मवाचिनो यगादिप्रत्ययान् दधतीत्यर्थः । एतच्च न केवला प्रकृतिः प्रयोक्तव्येति नियमेन केवलधातोः प्रयोगाभावात् 'लः कर्मणि च भावे चाकर्मकेभ्यः' इति प्रत्ययानामेव कर्तृकर्माभिमर्शनदर्शनाच्चेति द्रष्टव्यम् । फलितमाह । **अत्राधिति. ष्ठतीत्यादि** ।

भवति । अथ प्रौढिः ।

प्रौढिरुक्तेः परीपाकः इति काव्यविदो विदुः ।

यथा

वीप्सा पद्मभवस्य चन्द्रमुकुटस्यावृत्तिराम्रेडितं
दैत्यारेः प्रतिबिम्बनं सुरगिरेरिन्दोः समुत्तेजनम् ।
कर्णादेः पुनरुद्भवः सुरतरोः सर्वस्वमाविष्क्रिया
स्वर्धेनोरिति तर्कयन्ति कवयः श्रीवीररुद्रप्रभुम् ॥

अथोक्तिः ।

विदग्धभणितिर्या स्यादुक्तिं तां कवयो विदुः ।

यथा

*दिट्ठा कमलासत्ती रण्णो तुह सुहअचित्तचरिअस्स ।
भासन्तो वि तुमं तं कुवलअलच्छिं पसाहेसि ॥

अथ रीतिः ।

यथोपक्रमनिर्वाहो रीतिरित्यभिधीयते ।

यथा

षड् गुणान् सेवते राजा षड् रिपूनवमन्यते ।

---

*दृष्टा कमलासक्ती राज्ञस्तव सुभगचित्रचरितस्य ।
भास्वानपि त्वं तां कुवलयलक्ष्मीं प्रसाधयसि ॥

प्रौढिरिति । परीपाको वैचित्रीविशेषः । **वीप्सेति** । वीप्सा द्विर्भावः । निमित्तनैमित्तकयोरभेदोपचारात् । आम्रेडितं द्विस्त्रिरुक्तम् । प्रतिबिम्बनं प्रतिबिम्बः । समुत्तेजनं शाणोल्लीढत्वम् । सर्वत्र द्वितीयब्रह्मादिरूपत्वमित्यर्थः । अत्र वीररुद्रे विरिञ्चिवीप्साद्यारोपलक्षणवैचित्रीवशात् प्रौढिः । **दिट्ठेति** । कमलासक्तिरेकत्र कमलायामन्यत्र कमलेष्वासक्तिः । कुवलयलक्ष्मीं भूमण्डललक्ष्मीमन्यत्रोत्पलसंपदम् । अत्र राज्ञश्चन्द्रस्यापि कमलासक्तिः । भास्वतः सूर्यस्यापि कुवलयप्रसाधनमित्येवंरूपायां विदग्धभणितावश्लीलं परिह्रियते । षड् गुणान् सन्ध्यादीन् । 'सन्धिर्ना विग्रहो यानमासनं द्वैधमाश्रयः । षड्गुणाः' इत्यमरः । षड् रिपून् कामक्रोधादीन् । षड् दर्शनानि पाणिनीयप्रभृतीन्युक्तानि। षड् बलानि मौलादीनि । तदुक्तं मौलेश्वरेण । 'मौलं भृत्यं तथा मैत्रं स्रैणमाटविकं बलम् । आमित्रमपरं षष्ठं सप्तमं नोपलभ्यते ॥' इति। अत्र पादचतुष्टयेऽप्यादौ षट्पदोपादानाद्यथोपक्रमनिर्वाहेण पततप्रकर्षपरिहा-

21

षड् दर्शनान्युपादत्ते षड् बलानि च वीक्षते ॥

अथ भाविकम् ।

भावतो वाक्यवृत्तिर्या भाविकं तदुदाहृतम् ।

यथा

स्वामिंस्तात कुलोत्तंस वीररुद्र जगत्प्रभो ।
पुत्रिणां धुरमेषोऽहं पुत्रेणारोपितस्त्वया ॥

अत्र प्रेमरूपभाववशात् स्वामिंस्तातेति वाक्यवृत्तिः । अथ गतिः ।

गतिर्नाम सुरम्यत्वं स्वरारोहावरोहयोः ।

यथा

प्रकाश्ये त्रैलोक्ये सततमतुलैः काकतिविभो-
र्महोभिर्निःसीमैर्दिनकरकराटोपपटुभिः ।
तमः कृत्स्नं शोकज्वलदनलरोचिःपरिचयं
दधत्स्वप्युद्वेलत्यरिनृपमनस्स्वेव सततम् ॥

अत्र पूर्वार्धे दीर्घाक्षरप्रायत्वात् स्वरस्यारोहः । उत्तरार्धेऽवरोहः । एतेषां गुणानामर्थगतत्वमपि केचिदिच्छन्ति । प्राचामाचार्याणां मतेन संघटनाश्रयत्वमेव गुणानाम् । तदुक्तमलंकारसर्वस्वे । 'संघटनाधर्मत्वेन शब्दार्थधर्मत्वेन च गुणालंकाराणां व्यवस्थानम्' इति । अनयैव भङ्ग्या गुणालङ्काराणां निरूपितः स्वरूपभेदः । अन्यथा स्व-

---

रिणी रीतिर्द्रष्टव्या । **भावत इति** । भावः प्रेमात्रास्तीति भाविकम् । **स्वामिन्निति** । पुत्रं प्रति जनकस्योक्तिः । भाविकं योजयति । **अत्र प्रेमेति** । **गतिरिति** । स्वराणामारोहो दीर्घाक्षरप्रायत्वम् । अवरोहो वैपरीत्यम् । **प्रकाश्य इति** । निःसीमैरिति सूर्यादितेजोव्यतिरेकोक्तिः । वीररुद्रतेजासि विश्वव्यापिनि तमसो वैरिहृदयान्येवावकाश इत्याह । **तम इति** । तत्राग्निसन्निधानेऽपि तमसो न बाध इत्याह । **शोकेति** । दधत्स्वपीत्यपिशब्दो विरोधसूचकः । दुःखिता मुह्यन्तीति परिहारः । उद्वेलति विजृम्भते । अत्र पूर्वार्ध इत्यनेनोत्तरार्धे ह्रस्वाक्षरप्रायत्वादवरोह इति द्रष्टव्यम् । एतेषां गुणानां मतभेदेनार्थगतत्वलक्षणं विशेषमाह । **एतेषामिति** । तदुक्तं वामनेन । 'एत एवौजःप्रसादप्रभृतयोऽर्थगुणाः' इति । स्वमतमाह । **प्राचामिति** । **संघटनाश्रयत्वमेवेति** । बहूनां पदानामेकपदवदवभासमानत्वादिलक्षणे श्लेषादावर्थगतत्वस्य दुर्घटत्वादिति भावः । **अलङ्कारसर्वस्व इति** । उद्भटादिमतानुवादत्वेनेति भावः । **अनयैव भङ्ग्येति** । संघटनाशब्दार्थरूपाश्रयभेदेनैवेत्यर्थः । **अन्यथेति** । आश्रयभेदा-

रूपभेदस्य दुर्निरूपत्वात् । काव्यशोभाकरत्वमेव गुणालङ्कारस्वरूपत्वम् । तदुक्तं रुद्रभट्टेन ।

'यो हेतुः काव्यशोभायाः सोऽलंकारः प्रकीर्त्यते ।
गुणोऽपि तादृशो ज्ञेयो दोषः स्यात्तद्विपर्ययः ॥' इति

अतो गुणानां संघटनाश्रयत्वमेव युक्तम् ।

इति श्रीविद्यानाथकृतौ प्रतापरुद्रयशोभूषणेऽलंकारशास्त्रे
गुणप्रकरणं समाप्तम् ।

भाव इत्यर्थः । ननु कथमेतदुपपद्यते 'काव्यशोभायाः कर्तारो धर्मा गुणाः । तदतिशयहेतवस्त्वलंकाराः' इति वामनेन स्वरूपभेदस्योक्तत्वादिति चेत् नैतत् साधीयः । विकल्पासहत्वात् । इदं हि तद्दर्शनरहस्यम् । रीतिरात्मा काव्यस्य । रीतिश्च गुणविशिष्टपदरचना । सा वैदर्भ्यादिभेदेन त्रिविधा । तत्र सर्वगुणविशिष्टा वैदर्भी । कतिपयगुणविशिष्टे गौडीयापाञ्चाल्याविति । तत्र सर्वगुणानां मिलित्वा काव्यशोभाहेतुत्वे गौडपाञ्चालरीत्योरव्याप्तिः । कतिपयानां काव्यशोभाहेतुत्वे 'अद्रावत्र प्रज्वलत्यग्निरुच्चैः प्राज्यः प्रोद्यन्नुल्लसत्येष धूमः' इत्यादौ पर्वतोऽग्निमानित्यादिशुष्कशास्त्रानुकूल्येन काव्यत्वरहितेऽप्योजःश्लेषादिसंभवेनातिव्याप्तिः स्यात् । तस्मान्नास्ति गुणानां तन्मते काव्यशोभाकरत्वम् । न च तन्मूलमलङ्काराणां तदतिशयहेतुत्वमिति । स्वमतेऽभिमतसंमतिं च दर्शयति । **यो हेतुरिति** । उपसंहरति । **अत इति** । स्वरूपभेदाभावादित्यर्थः । **संघटनाश्रयत्वमेव युक्तमिति** । भेदकत्वेनेति भावः । एतच्चोद्भटादिमतमवलम्ब्य श्लेषादीनां माधुर्यादावनन्तर्भावमङ्गीकृत्योक्तम् । वस्तुतस्तु भामहादिमतेनान्तर्भावे श्लेषादिगुणानां रसधर्मत्वम् । अलङ्काराणां तु शब्दार्थधर्मत्वमिति विद्यत एव स्वरूपभेद इति रहस्यम् । अत एव स्वयमेवोक्तवान् काव्यप्रकरणे । 'हारादिवदलंकारास्तेऽनुप्रासोपमादयः । श्लेषादयो गुणास्तत्र शौर्यादय इव स्थिताः ॥ आत्मोत्कर्षावहा' इति ।

इति पदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलचलमाल्लिनाथ-
सूरिसूनुना विश्वजनीनविद्यस्य विद्वन्मणेः पेद्दयार्यस्यानुजेन
कुमारस्वामिसोमपीथिना विरचिते प्रतापरुद्रीयव्याख्याने
रत्नापणाख्याने गुणनिरूपणं नाम
षष्ठं प्रकरणम् ॥

अथ शब्दालङ्कारप्रकरणम् ।

अलंकारस्वरूपनिरूपणम् ।

अथ गुणनिरूपणानन्तरमलंकारा निरूप्यन्ते । अलंक्रियतेऽनेनेति चारुत्वहेतुरलंकारः । तथा चोक्तं काव्यप्रकाशे ।

'उपस्कुर्वन्ति तं सन्तं येऽङ्गद्वारेण संश्रिताः ।
हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः ॥' इति ।

यथा करचरणाद्यवयवगतैर्वलयनूपुरादिभिस्तत्तदलङ्कारतया प्रसिद्धैरवयव्येवालङ्क्रियते तथा शब्दार्थावयवगतैरनुप्रासोपमादिभिस्तत्तदलङ्कारतया प्रसिद्धैरवयवीभूतं काव्यमुपस्क्रियते । आश्रयाश्रयि-

---

परिशेषादलंकारनिरूपणं प्रतिजानीते । **अथेति** । अत्रैतेऽलंकाराश्छेकानुप्रासवृत्त्यनुप्रासौ । यमकं पुनरुक्तवदाभासो लाटोपलालितः प्रासः ॥ चित्रमथो उपमानन्वयोपमेयोपमा स्मरणम् । रूपकपरिणामौ द्वौ संदेहभ्रान्त्यपह्नवोल्लेखाः ॥ उत्प्रेक्षातिशयोक्ती तथा सहोक्तिर्विनोक्तिश्च । उक्तीः समासवक्रस्वभावकव्याजपूर्विका विद्यात् ॥ मीलनसमानतदतद्गुणा विरोधो विशेषश्च । अधिको विभावनाथो विशेषपूर्वोक्त्यसंगती स्याताम् ॥ विचित्रान्योन्यविषमाः समोऽथो तुल्ययोगिता । दीपकं प्रतिवस्तूपमा दृष्टान्तो निदर्शना ॥ व्यतिरेकः श्लेषपरिकराक्षेपा मृषास्तुतिः । अप्रस्तुतप्रशंसा च पर्यायोक्तं प्रतीपकम् ॥ अनुमानं काव्यलिङ्गं न्यासोऽर्थान्तरपूर्वकः । यथासंख्यार्थापतने परिसंख्योत्तरं तथा ॥ वार्थचार्थौ द्वौ समाधिर्भाविकं प्रत्यनीककम् । व्याघातपर्यायसूक्ष्मा उदात्तः परिवृत्तिका ॥ हेतुमालैकावली च मालादीपकसारकौ । संसृष्टिसंकरौ चेति पञ्चसप्ततिरीरिताः ॥ रसवत् प्रेय ऊर्जस्वी समाहितमथोदयः । भावस्य संधिः शावल्यं द्व्यशीतिरिति मे मताः ॥ एतेषामलंकारशब्दव्युत्पत्त्या तत्सामान्यलक्षणलाभं मत्वाह । **अलंक्रियतेऽनेनेति** । अनियमेन रस इति शेषः । 'अकर्तरि च कारके संज्ञायाम्' इति करणे घञ्प्रत्ययः । एतेनैतेषां गुणानामिव रसोपस्कारासंभवात् तेभ्यो वैलक्षण्यं सूच्यते। अस्मिन्नेवार्थे वृद्धसंवादमाह। **उपस्कुर्वन्तीति** । येऽङ्गद्वारेण शब्दार्थयोरुत्कर्षाधानद्वारेण तमङ्गिनं रसं सन्तं विद्यमानमुपस्कुर्वन्तीत्यनेन रसाभावे चित्रकाव्ये शब्दार्थवैचित्रीमात्रपर्यवसायित्वमलंकाराणामिति सूच्यते । तेऽलङ्काराः कण्ठादीनामुत्कर्षाधानद्वारेण हारादय इव संयोगवृत्त्या वर्तन्त इत्यर्थः । केवलमेव सति रसेऽनुप्रासोपमादिभिः स्वाश्रयभूताः शब्दार्था एवोपस्क्रियन्ते । किं तु तद्द्वारा तदवयवीभूतं काव्यमपीत्येतल्लौकिकदृष्टान्तेनाह । **यथेति** । **आश्रयाश्रयिभावेनेति** । संयोगमूलेनेति

भावेनालङ्कार्यालङ्कारभावो लोकवत् काव्येऽपि सम्मतः । चारुत्वहेतुत्वेऽपि गुणानामलङ्काराणां चाश्रयभेदाद्भेदव्यपदेशः । सङ्घटनाश्रया गुणाः शब्दार्थाश्रयास्त्वलङ्काराः ।

॥ अलङ्कारविभागः ॥

तत्र प्रथमं शब्दार्थोभयगतत्वेन त्रैविध्यमलङ्कारवर्गस्य । अर्थालङ्काराणां चातुर्विध्यम् । केचित् प्रतीयमानवस्तवः । केचित् प्रतीयमानौपम्याः । केचित् प्रतीयमानरसभावादयः । केचिदस्फुटप्रतीयमाना इति । समासोक्तिपर्यायोक्त्याक्षेपव्याजस्तुत्युपमेयोपमानन्वयातिशयोक्तिपरिकराप्रस्तुतप्रशंसानुक्तनिमित्तविशेषोक्तिषु प्रतीयमानं वस्तु काव्योपस्कारतामुपयाति । रूपकपरिणामसंदेहभ्रान्तिमदुल्लेखापह्नवोत्प्रेक्षास्मरणतुल्ययोगितादीपकप्रतिवस्तूपमादृष्टान्तसहोक्तिव्यतिरेकनिदर्शनाश्लेषेष्वौपम्यं गम्यते । रसवत्प्रेयऊर्जस्विसमाहितभावोदयभावसंधिभावशबलतासु रसभावादिर्व्यज्यते । उपमाविनोक्त्यर्थान्तरन्यासविरोधविभावनोक्तगुणनिमित्तविशेषोक्तिविषमसमचित्राधिकान्योन्यकारणमालैकावलीव्याघातमालादीपककाव्यलिङ्गानुमानसारयथासंख्यार्थापत्तिपर्यायपरिवृत्तिपरिसंख्याविकल्पसमुच्चयसमाधिप्रत्यनीकप्रतीपविशेषनिमीलनसामान्यासङ्गतितद्गुणातद्गुणव्याजोक्तिवक्रोक्तिस्वभावोक्तिभाविकोदात्तेषु सहृदयहृदयाह्लादि स्फुटं प्रतीयमानं नास्ति । **अत्रेत्थमलंकारकक्ष्याविभागः ॥**

शेषः । लोके मूलभूतः संयोगो मुख्यः । अत्र त्वनित्यत्वसाधर्म्यादौपचारिक इति भेदः । अथालङ्कारविभागं करिष्यमाणस्तदुपयोगितयोद्भटादिमतेनोक्तमेव गुणालङ्कारभेदमनुवदति । **चारुत्वहेतुत्वेऽपीति** । इत्थमलङ्कारस्वरूपं निरूप्य तद्विभागमाह । **तत्र प्रथममिति** । शब्दालङ्कारा अनुप्रासादयः । अर्थालङ्कारा उपमादयः । उभयालङ्कारा लाटानुप्रासोभयसंसृष्ट्यादयः । एतेषां तुल्येऽपि काव्यशोभाहेतुत्वे शब्दार्थोभयालङ्कारव्यवस्थायामाश्रयाश्रयिभाव एव प्रमाणमित्यलङ्कारसर्वस्वकारः । अन्वयव्यतिरेकाविति काव्यप्रकाशकारः । **रसभावादिर्व्यज्यत इति** । गुणीभूतव्यङ्ग्यत्वेन प्रतीयत इत्यर्थः । चतुर्धा विभक्तेष्वलङ्कारेष्ववान्तरविभागं प्रतिज्ञापूर्वकमाह । **अत्रेति** । इत्थं वक्ष्यमाणप्रकारेण । कक्ष्याविभागः साधर्म्यविरोधादिमूलत्वेनालंकाराणां वर्गशो विभाग इत्यर्थः ।

साधर्म्यं त्रिविधम् । भेदप्रधानमभेदप्रधानं भेदाभेदप्रधानं चेति । उपमानोपमेययोः स्वतो भिन्नत्वाच्छाब्दमेतन्न वास्तवम् ।
रूपकपरिणामसंदेहभ्रान्तिमदुल्लेखापह्नवानामभेदप्रधानसाधर्म्यनिबन्धनत्वम् । दीपकतुल्ययोगितानिदर्शनादृष्टान्तप्रतिवस्तूपमासहोक्तिप्रतीपव्यतिरेकाः भेदप्रधानसाधर्म्यनिबन्धनाः । उपमानन्वयोपमेयोपमास्मरणानां भेदाभेदसाधारणसाधर्म्यमूलता । उत्प्रेक्षातिशयोक्तौ अध्यवसायमूले । विभावनाविशेषोक्तिविषमाचित्रासङ्गत्यन्योन्यव्याघाततद्गुणभाविकाविशेषाणां विरोधमूलता । यथासंख्यपरिसंख्यार्थापत्तिविकल्पसमुच्चयानां वाक्यन्यायमूलता । परिवृत्तिप्रत्यनीकतद्गुणसमाधिसमस्वभावोक्त्युदात्तविनोक्तयो लोकव्यवहारमूलाः । काव्यलिङ्गानुमानार्थान्तरन्यासानां तर्कन्यायमूलता । कारणमालैकावलीमालादीपकसाराः शृङ्खलावैचित्र्यमूलाः । व्याजोक्तिवक्रोक्तिमीलनान्यपह्नवमूलानि । समासोक्तिपरिकरौ विशेषणवैचित्र्यमूलौ । **अथालङ्काराणां परस्परवैलक्षण्यं निरूप्यते ।**

आरोपगर्भत्वेऽप्यारोप्यमाणस्य प्रकृतोपयोगानुपयोगाभ्यां परिणामरूपकयोर्भेदः । आरोपविषयस्यारोप्यमाणरूपसंभवासंभवाभ्यामुल्लेखरूपकयोर्भेदः । आरोपविषयस्य संदेहभ्रान्त्यपह्नवैः सन्देहभ्रान्तिमदपह्नवानां परस्परं भेदः । साधर्म्यमूलत्वेऽपि तुल्ययोगितादीपकनिदर्शनाव्यतिरेकदृष्टान्तेभ्यः साधर्म्यस्य वाच्यत्वादुपमानन्वयोपमेयोपमा भिद्यन्ते । साधर्म्यस्य वाच्यत्वगम्यत्वाभ्यामुपमेयोपमाप्रतिवस्तूपमयोर्भेदः । वस्तुप्रतिवस्तुबिम्बप्रतिबिम्बभावाभ्यां प्रतिवस्तूपमादृष्टान्तयोर्भेदः । प्रस्तुताप्रस्तुतानां व्यस्तसमस्तत्वाभ्यां तुल्ययोगितादीपकयोर्भेदः । उपमानस्य प्रसिद्धत्वाप्रसिद्धत्वाभ्यामुपमोत्प्रेक्षयोर्भेदः । अर्थसाम्यशब्दसाम्याभ्यामुपमाश्लेषयोर्भेदः । उपमानोपमेययोर्भेदाभेदाभ्यामुपमानन्वययोर्भेदः । उपमानोपमेयभावस्य पर्या-

---

एतदभेदप्रधानत्वं शाब्दमारोपितं न वास्तवं न स्वाभाविकम् ; अथालंकाराणामत्यन्तविवेकार्थं मिथो वैधर्म्यमाह । **अथालङ्काराणां परस्परवैलक्षण्यं निरूप्यत इत्यादिना ।** शिष्टमन्यदुदाहरणप्रस्ताव एव स्पष्टीभविष्यतीति नेह

यौगपद्याभ्यामुपमेयोपमोपमयोर्भेदः । अप्रस्तुतस्य वाच्यत्वगम्यत्वाभ्यामप्रस्तुतप्रशंसासमासोक्त्योर्भेदः । वाच्यव्यङ्ग्ययोः प्रस्तुतत्वे पर्यायोक्तिः । वाच्यस्याप्रस्तुतत्वेऽप्रस्तुतप्रशंसा । व्याप्तिपक्षधर्मताद्यभावात् काव्यलिङ्गस्यानुमानाद्भेदः । साधारणगुणयोगाद् भेदानुपलब्धौ सामान्यम् । उत्कृष्टगुणयोगान्न्यूनगुणतिरोधाने मीलनम् । अन्यव्यवच्छेदे तात्पर्याभावादुदात्तालंकारस्य परिसंख्यातो भेदः । काकतालीयतया कार्यसाधने कारणान्तरोपनिपाते समाधिः । अहमहमिकया कार्यसाधने बहूनां कारणानामुद्यमे द्वितीयः समुच्चयः । निह्नवस्य वाच्यत्वगम्यत्वाभ्यामपह्नवव्याजस्तुत्योर्भेदः । अन्येषां भेदः स्पष्ट एव । यद्यपि व्याजोक्तिमीलनसामान्येषु कथंचित् सादृश्यमस्ति तथाप्यविवक्षितत्वान्न सादृश्यमूलेषु गणना ।

शब्दालंकारा निरूप्यन्ते ।

अथालंकारस्वरूपविभागानन्तरं शब्दार्थयोर्मध्ये शब्दस्यार्थं प्रत्यन्तरङ्गत्वात् प्रथमं शब्दालङ्कारा निरूप्यन्ते । छेकानुप्रासः ।

भवेदव्यवधानेन द्वयोर्व्यञ्जनयुग्मयोः ।
आवृत्तिर्यत्र स बुधैश्छेकानुप्रास इष्यते ॥

यत्राव्यवहितयोर्व्यञ्जनयुग्मयोर्द्वयोः पौनरुक्त्यं तत्र छेकानुप्रासः । यथा

विविच्यते । इत्थमलंकाराणां पीठिकां विधाय शब्दालंकारनिरूपणं प्रस्तौति । **अथेति** । तत्प्राथम्ये हेतुमाह । **शब्दस्येति** । अत्र शब्दप्रतीतिपूर्वकत्वादर्थप्रतीतेः शब्दस्य प्रतीतावन्तरङ्गत्वं तेन तस्य प्राधान्यात् प्राथम्यमिति भावः । प्रथमं तावच्छब्दार्थोभयगतत्वेन त्रिविधं पौनरुक्त्यम् । तत्राद्ये केवलस्वरपौनरुक्त्यस्य चारुताहेतुत्वाभावात् व्यञ्जनमात्रपौनरुक्त्यम् । स्वरव्यञ्जनसमुदायपौनरुक्त्यं च चारुताहेतुः । तत्राद्यमपि संख्यानियमे छेकानुप्रासः वैपरीत्ये वृत्त्यनुप्रास इति सर्वस्वकारः । तदनुसारेण छेकानुप्रासं लक्षयति । **भवेदिति** । रसाद्यनुगतः प्रकृष्टो न्यासोऽनुप्रासः । तदुक्तम् । 'प्रकृष्टो वर्णविन्यासो रसाद्यनुगतो हि यः । सोऽनुप्रासः स च छेकवृत्त्युपाधिगतो द्विधा ॥' इति । गृहचराः पक्षिमृगादयश्छेका इति केचित् । विदग्धा इति सर्वस्वकारादयः । तदुपलालितोऽनुप्रासः छेकानुप्रासः । द्वयोरित्यत्र वीप्सा द्रष्टव्या । तेन यत्र द्वयोर्व्य-

महीमहीनविभवे धत्ते क्षेमंकरे करे ।
राजन्यजन्यविजयी राजा राजद्गुणोदयः ॥

वृत्त्यनुप्रासः ।

एकद्विप्रभृतीनां तु व्यञ्जनानां यथा भवेत् ।
पुनरुक्तिरसौ नाम वृत्त्यनुप्रास इष्यते ॥

यथा

रे रे क्षुद्रमहीक्षितः क्षणमितः श्रीकाकतिक्ष्मापते-
वीक्षध्वं ध्वजिनीं दुरीक्ष्यसुभटां प्रोत्क्षिप्तकौक्षेयकैः ।
योत्स्यध्वे यदि लभ्यमक्षयपदं कान्तारपक्षो वृथा
क्ष्माभृत्कुक्षिचरत्तरक्षुनिकरात्तत्रात्मरक्षा कुतः ॥

यमकम्

यमकं पौनरुक्त्ये तु स्वरव्यञ्जनयुग्मयोः ।
छेकानुप्रासे वृत्यनुप्रासे च स्वरपौनरुक्त्यमानुषङ्गिकम् ।

ञ्जनयुग्मयोरव्यवधानेनावृत्तिः स छेकानुप्रास इत्यर्थः । उदाहरति । **महीमिति** । अहीनविभवे फणीन्द्रसदृश इत्यर्थः । करे बाहौ । राजन्याः क्षत्रियाः । ‘राजश्वशुराद्यत्’ इति यत्प्रत्ययः । जन्यं युद्धम् । अत्र पादचतुष्टयेऽपि व्यञ्जनयुग्मानामव्यवधानेनावृत्तेश्छेकानुप्रास इति द्रष्टव्यम् । संख्यानियमेन छेकानुप्रासमुक्त्वान्यथा वृत्त्यनुप्रासमाह । **एकेति** । प्रभृतिग्रहणात् त्रिचतुरादिसंग्रहः । अत्रैकस्य व्यञ्जनस्य सकृदावृत्तौ वैचित्र्याभावात् सामर्थ्यादसकृदावृत्तिर्लभ्यते । द्वयोस्तु सकृदेव । अन्यथा छेकानुप्रासः स्यात् । व्यवधाने त्वसकृदावृत्तावपि न विरोधः । त्र्यादीनां तु सकृदसकृद्वा व्यवधानेनाव्यवधानेन वावृत्तिर्द्रष्टव्या । वृत्तिशब्देन वैदर्भ्यादयो विवक्षिताः । तदुपलक्षितानुप्रासो वृत्त्यनुप्रासः । उदाहरति । **रे रे इति** । योत्स्यध्वे हनिष्यध्वे यदि । युध संप्रहारे इत्यस्माद्धातोः कर्मणि लट् । **लभ्यमक्षयपदमिति** । ‘द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ । परिव्राड् योगयुक्तश्च रणे चाभिमुखो हतः ॥’ इति स्मरणादिति भावः । कान्तारपक्षोऽरण्यनिवासपक्षः । तरक्षुनिकरात् मृगादनयूथात् दुर्मरणकारणादरण्यनिवासाच्छुभोदर्कं युद्धमरणमेव श्रेय इति भावः । अत्रासकृत्क्षकारावृत्त्या वृत्त्यनुप्रासः । एवमन्येऽपि भेदाः सूर्यशतकादौ द्रष्टव्याः । व्यञ्जनमात्रपौनरुक्त्याश्रयमलङ्कारद्वयमुक्त्वा स्वरव्यञ्जनसमुदायपौनरुक्त्याश्रयमलंकारमाह । **यमकमिति** । ननु महीमहीनविभव इत्यादौ छेकानुप्रासे ‘युधिष्ठिरं द्वैतवने वनेचरः’ इत्यादावेकदा सादृश्यलक्षणे वृत्त्यनुप्रासे च स्वरपौनरुक्त्यसंभवात् कथं तत्र

यमके तु स्वरयोः व्यञ्जनयुग्मयोः आवृत्तिः। तस्यादिमध्यान्तगतत्वेन बहवो भेदाः । अत्र दिङ्मात्रमुदाह्रियते ।

प्रतापः काकतीन्द्रस्य महामहिमतेजसः ।
श्रियं दधाति पद्मेष्टमहामहिमतेजसः ॥

पुनरुक्तवदाभासः ।

यत्रार्थः प्रमुखे किंचित् भासते पुनरुक्तवत् ।
पुनरुक्तवदाभासोऽलंकारः स सतां मतः ॥

यत्रार्थः पुनरुक्तवदाभासते अन्वयवेलायामन्यथा भवति स पुनरुक्तवदाभासोऽलङ्कारः । अर्थालङ्कारत्वेऽप्यस्य शब्दपौनरुक्त्याश्रितत्वाच्छब्दालङ्कारप्रस्तावे लक्षणं कृतम् । यथा

जिष्णुरिन्द्रः क्षितिभुजां श्रीपतिः पुरुषोत्तमः ।
भास्वान् सूर्यस्फुरत्तेजाः काकतीन्द्रो विराजते ॥

व्यञ्जनमात्रपौनरुक्त्यमित्याशङ्क्य परिहरति । **छेकानुप्रास इति** । अनुषङ्गादागतमानुषङ्गिकम् । अन्वाचयविशिष्टमभ्युच्चय इत्यर्थः । स्वरव्यञ्जनयुग्मयोरित्यत्र स्वरसहितव्यञ्जनेति मध्यमपदलोपी समासो विवक्षित इति व्याचष्टे । **यमके त्विति** । तच्च यम्यमानानां पादैकदेशानामादिमध्यान्तगतत्वेनानेकविधमित्याह । **तस्येति** । एतच्च श्लोकार्धपादयमकानामप्युपलक्षणम् । सर्वेऽप्येते भेदाश्चिरन्तनैरेव बहुधा प्रपञ्चिताः। गुरुत्वभीतत्वान्नेह प्रपञ्चयन्ते । तत्रैकमुदाहरति । **प्रताप इति** । महान् महिमा आधिक्यं यस्य तेजसो महामहिमतेजसः काकतीन्द्रस्य प्रतापः । पद्मेष्टमहां पद्मप्रियोत्सवाम् । अहिमतेजसः उष्णांशोः श्रियं दधाति । अत्र द्वितीयपादस्य चतुर्थे यमनात् संदष्टयमकं नाम यमकभेदः । तदुक्तमन्यत्र । अत्र यम्यमानयोरुभयोः सार्थकत्वं 'विहगाः कदम्बसुरभा विहगाः' इत्यत्रैकस्य सार्थकत्वमितरस्यानर्थकत्वम् । 'कलयन्त्यनुक्षणमनेकलयम् ' इत्यत्रोभयोरनर्थकत्वम् । एवं सर्वेष्वपि यमकेषु प्रकारत्रयं यथासंभवं द्रष्टव्यम् । शब्दपौनरुक्त्याश्रितानलंकारानभिधायार्थपौनरुक्त्यमूलमलंकारमाह । **यत्रेति** । यत्रालंकारेऽर्थः प्रमुखे प्रथमं पुनरुक्तवत् पुनरुक्तेन तुल्यमत एव किंचित् किमप्यनन्वितं भासते परमार्थतस्तु अन्यथा पर्यवस्यतीत्यर्थः । अर्थपौनरुक्त्यस्य प्ररूढदोषत्वात् तदेतन्निष्कृष्य व्याचष्टे । **यत्रार्थ इत्यादिना** । नन्वस्य शब्दालंकारप्रस्तावे का सङ्गतिरत आह । **अर्थेति** । अर्थपौनरुक्त्यादेवार्थाश्रितत्वादर्थालंकारत्वे सत्यपीत्यर्थः । **शब्दपौनरुक्त्याश्रितत्वादिति** । पर्यायशब्दाश्रितत्वादित्यर्थः । आम्रेडितशब्दवत् पर्यायशब्देष्वप्यर्थैकत्वसादृश्यादौपचारिकं शब्दपौनरुक्त्यं द्रष्टव्यम् । उदाहरति । **जिष्णुरिति** । जयशीलो

अथोभयपौनरुक्त्यालङ्कारः कथ्यते ।

लाटानुप्रासः ।

शब्दार्थयोः पौनरुक्त्यं यत्र तात्पर्यभेदवत् ।
स काव्यतात्पर्यविदां लाटानुप्रास इष्यते ॥

यत्र शब्दार्थयोस्तात्पर्यभेदमात्रं न स्वरूपभेदस्तत्र लाटानुप्रासः । यथा

गुणा गुणास्ते गण्यन्ते ये रुद्रनृपमाश्रिताः ।
नीतिर्नीतिरसौ तस्य लक्ष्मीर्लक्ष्मीश्च कथ्यते ॥

जिष्णुः । क्षितिभुजामिन्द्रो राजाग्रगीः। श्रीपतिः समृद्धः । पुरुषोत्तमः पुरुषश्रेष्ठः। भास्वान् दीप्तिमान् । सूर्य इव स्फुरत्तेजाः स्फुरत्प्रतापः । अत्र जिष्ण्वादीनामिन्द्रादिपर्यायप्रयोगेण प्रमुखे भासमानस्य पौनरुक्त्यस्योक्तप्रकारेणान्वयवेलायामन्यथा पर्यवसानात् पुनरुक्तवदाभास इति भावः । केचित् पुनरेवमाहुः । 'भाति सदानत्यागः स्थिरतायाम्' इत्यत्र सत्पुरुषप्रणामेन प्रकाशते स्थैर्ये पर्वतभूत इत्यस्यार्थस्य दानत्यागशब्दपरिवृत्तावसंभवाच्छब्दालंकारोऽप्ययम् । 'तनुवपुः' इत्यत्र कृशाङ्ग इत्यास्मिन्नर्थे तनुशब्दविपरिवृत्तौ नायमलंकार इति शब्दाश्रयत्वं। वपुःशब्दविपरिवृत्तौ नालंकारत्वहानिरित्यर्थाश्रयत्वम् । अत उभयालंकारोऽप्ययमिति । तदुक्तं काव्यप्रकाशे । 'पुनरुक्तवदाभासो विभिन्नाकारशब्दभाक् । एकार्थतैव शब्दस्य तथा शब्दार्थयोरयम् ॥' इति । शब्दार्थयोरेकैकपौनरुक्त्यमूलानलंकारानभिधायोभयपौनरुक्त्यमूलमलंकारं प्रतिज्ञापूर्वकमाह । **अथेत्यादिना** । शब्दार्थयोः पौनरुक्त्यं प्ररूढदोषः तद्व्यवच्छेदार्थं । **तात्पर्यभेदवदिति** । अनेन यमकव्यावर्तकशब्दार्थयोः स्वरूपभेदाभावः फलित इति व्याचष्टे । **यत्रेति** । लाटजनोपलालितोऽनुप्रासो लाटानुप्रासः । न तु लाटदेशजन्यः कश्चनोपकारः काव्यस्य इति गोपालः । उदाहरति । **गुणा इति** । असौ वीररुद्रसंबन्धिनी । अत्र द्वितीयगुणादिशब्दानामुत्कर्षलक्षणस्तात्पर्यभेदः । 'अत्राब्जपत्रनयने नयने निमील्य' इत्यादौ विभक्त्यादेरपौनरुक्त्येऽपि शब्दार्थपौनरुक्त्याल्लाटानुप्रासत्वम् । अत एवायं पदाश्रयः प्रातिपदिकाश्रयश्चेति द्वेधा लाटानुप्रास इति सर्वस्वकारः । उद्भटेनाप्युक्तम् । 'स्वरूपार्थाविशेषेऽपि पुनरुक्तिः फलान्तरात्। शब्दानां प्रकृतीनां वा लाटानुप्रास इष्यते॥' इति॥ ननु युद्धेऽर्जुनोऽर्जुन इवेत्यत्रैकस्यैवोपमानोपमेयत्वलक्षणे अनन्वयालंकारेऽपि शब्दार्थपौनरुक्त्यसंभवाल्लाटानुप्रासत्वमेव किं नेष्यते । सत्यम् । यद्यप्यनन्वयेऽर्थपौनरुक्त्यमात्रं लक्षणं तथापि निर्देशप्रतिनिर्देशयोरैकरूप्याभावे पर्यायप्रक्रमदोषप्रसङ्गादानुषङ्गिकं शब्दपौनरुक्त्यम् । अत्र तूभयपौनरुक्त्यमप्यावश्यकमेवेति विषयभेदान्न कोऽपि विरोधः । तदुक्तम् । 'अनन्वये च शब्दैक्यमौचित्यादानुषङ्गिकम् ।

चित्रालङ्कारः पद्मबन्धादिः ।

पद्माद्याकारहेतुत्वे वर्णानां चित्रमुच्यते ।

आदिग्रहणाच्चक्रबन्धादयः । तत्राष्टदलपद्मबन्धो यथा

याता यस्यासमग्रानतिमिह कनकास्थानसक्तासनाया
यानासक्तासनस्था सुखयतु कमलाभ्याससुज्ञानमाया ।
या मानज्ञा सुसभ्या क्षितिपतितिलकं ज्ञातिरक्ता सगेया
यागे सक्ता रतिज्ञा सुकृतिषु फलितग्रामसस्यायताया ॥

चक्रबन्धो यथा

अस्मिंस्तु लाटानुप्रासे साक्षादेव प्रयोजकम् ॥' इति । चित्रं लक्षयति । **पद्मेति।** न च श्रावणानां वर्णानां पद्माद्याकारहेतुत्वं न घटत इति वाच्यम् । वर्णशब्देन तत्स्मारकाणां लिप्यक्षराणामाक्षेपात् तेषां मुख्यवर्णाभेदेन लोकव्यवहारादस्य शब्दालंकारत्वम् । पद्मादिबन्धेषु कर्णिकादिस्थानविशेषेषु वर्णानां पौनरुक्त्यात् पौनरुक्त्यमूलालंकारानन्तर्यं च द्रष्टव्यम् । **यातेति** । कनकास्थाने सुवर्णमयसभामण्टपे सक्तं स्थितमासनं सिंहासनमयति प्राप्नोतीति कनकास्थानसक्तासनायाः । अयतेः कर्मण्यण्प्रत्ययः । यानेषु तुरगादिष्वासक्तान्यासनानि पल्ययनादीनि तत्र तिष्ठतीति यानासक्तासनस्था । राज्योपकरणेषु लक्ष्मीरस्तीत्यागमः। अभ्यासेन परिचयेनोपासनयेत्यर्थः । सुखेन ज्ञायते इति सुज्ञाना । 'कृत्यल्युटो बहुलम्' इति कर्मणि ल्युट् । माया स्वरूपवैचित्री यस्याः सा अभ्याससुज्ञानमाया । अनुपासकानां दुरवबोधस्वरूपेत्यर्थः । मानं पूजां जानातीति मानज्ञा । सभायां साधवः सभ्याः । 'सभाया यः' इति यप्रत्ययः । ते शोभना यस्याः सा सुसभ्या । सम्पन्नस्यैव सभ्याश्रयत्वादिति भावः । जानन्तीति ज्ञाः विवेकिनः । 'इगुपध' इत्यादिना कप्रत्ययः । तत्रातिरक्ता । गीयते इति गेयं गानं तेन सह वर्तत इति सगेया स्वनामाङ्कानेकगीतेत्यर्थः । यागे सक्ता संवद्धा । समृद्धस्यैव तत्राधिकारादिति भावः । रतिं स्वविषयाभिरतिं भक्तिं जानातीति रतिज्ञा । अत एव सुकृतिषु विषये फलितैर्ग्रामसस्यैः कार्यैरायतो महान् अयः शुभावहो विधिर्यस्याः सा तथोक्ता । स्वभक्तानां ग्रामादिसंपादनेन प्रकटितस्वानुग्रहेत्यर्थः । एवंविधा या लक्ष्मीर्यस्य विभोरासमग्रामतिसंपूर्णामानतिं वश्यत्वं याता सा कमला लक्ष्मीस्तं क्षितिपतितिलकं वीररुद्रमिहैव लोके जन्मनि वा सुखयतु सुखवन्तं करोतु । अयमष्टदलपद्मबन्धः । उद्धारस्तु । 'कर्णिकादि लिखेद्वर्णान् क्रमाद्दिक्षु विदिक्षु च । सकर्णिकां सप्तदिक्षु विदिक्षु तु विकर्णिकान् ॥ प्रवेशनिर्गमाभ्यां तु दिक्षु ते स्युश्चतुर्दश । व्यवधानेन तानाद्ये दलेऽन्यत्र त्वनन्तरान् ॥' इति । चक्रबन्धमुदाहरति ।

लक्ष्मीवीक्षितवैभवस्य जगतां नाथस्य भद्रश्रियो
दिक्ष्वारब्धनिजप्रतापजनितां भाक्कधुरां यच्छतः ।
नित्यं रुद्रजनाधिपस्य जयिनो भाति प्रकाशं स्थिरा
राजत्पालनमोदितात्मनि भुजे योग्याश्रितत्वाद्धरा ॥

अत्र चक्रबन्धे वैद्यनाथकृतिवीररुद्रयश इति प्रतीयते ।

नागबन्धो यथा

ओजस्ये रुद्रदेवे विभवति महिमत्याजितान्यप्रतापे
विद्यावर्येऽभिनेतर्युरुहरिचरितं विश्वविस्तारभाजि ।

लक्ष्मीति । कोशागारनियुक्तयेव लक्ष्म्या वीक्षितवैभवस्य विचारितैश्वर्यस्य । भद्रश्रियः कल्याणमूर्तेरित्यर्थः । आरब्धः संवर्धितः । भाक्कधुरां भास्करभावं निजप्रतापेन दिक्षु सूर्यकृत्यं कुर्वत इत्यर्थः । राजत्पालनेन सम्यक्संरक्षणेन मोदितात्मनि सर्वैरनुमोदितस्वरूपे भुजे । अत एव योग्याश्रितत्वात् प्रकाशं व्यक्तं स्थिरा निश्चितस्थैर्येत्यर्थः । धरा भूमिर्नित्यं भाति । उद्धारस्तु 'बद्धयते षडरं चक्रं प्रत्यरं तन्नवाक्षरम् । त्रयाणामपि पादानां दशमं कर्णिकाक्षरम् ॥ आदितः स्वस्वतुर्यैस्त्रियः पादाश्चतुर्थगः । वर्णाः षष्ठान्त्यमारभ्य संपतन्तेऽन्तिमाक्षरैः ॥ मध्ये द्वौ द्वौ विसंवादौ षडरेषु क्रमाद् भवेत् । चतुर्थैः सप्तमैर्वर्णैर्वर्णनं कविवर्णयोः ॥' इति । नागबन्धमुदाहरति । **ओजस्य इति** । ओजो बलं तत्र साधुरोजस्यः प्रबलः । यद्वाहर्वाचिनौजस्यशब्देनाहस्करो लक्ष्यते । तेन ओजस्ये सूर्यसदृशे इत्यर्थः । 'ओजसोऽहनि यत्खौ' इति यत्प्रत्ययस्य छान्दसत्वेऽपि दूत्याशिवतात्यादिवदस्य भाषायां प्रयोगो द्रष्टव्यः । महिमत्या जितोऽन्येषां प्रतापो येन तस्मिन् तथोक्ते । विद्याभिर्वेदवेदाङ्गादिभिर्वर्ये श्रेष्ठे उरवधिकं हरिचरितमभिनेतर्यनुकुर्वति विष्णुसदृश इत्यर्थः । 'न लोक' इत्यादिना षष्ठीप्रतिषेधः । विश्वविस्तारं भरणीयत्वेन भजतीति विश्वविस्तारभाक् । तस्मिन् विभवति विभौ सति अतिमलिनख्यातयो वैरिव्राताः शत्रुसंघा देहविद्धा रणे विद्धदेहाः सन्तो वन्यैर्जन्तुभिर्व्यालमृगैः सह क्षतिः क्षयः तद्वति । विविधे नानाविधदुःखभाजन इत्यर्थः । अवार्यनुदके अध्वनि मरुदेशे इत्यर्थः । 'आपः स्त्री भूम्नि वार्वारि' इत्यमरः । स्थानभाजः स्थितिं प्राप्ताः सन्तो वनं भजन्ते सेवन्ते । उद्धारस्तु । 'रेखाभ्यां चतुरश्राणि चतुष्कोष्ठानि कल्पयेत् । रेखाद्वयान्तराले स्याद्यथाकोष्ठे गृहाष्टकम् ॥ विदिक्षु कुण्डलीकुर्यात् तद्रेखाग्रैर्यथाक्रमम् । दिग्रेखाग्राणि बाह्यानि योजयेत् दिक्त्रये मिथः ॥ एकत्र तु फणापुच्छमेलनं कल्पयेत् तथा । अन्तराण्यक्षरीकुर्यात् संदंशाः स्युर्यथा मिथः ॥ वर्णावृत्तिस्थलान्यत्र कोष्ठकोणानि षोडश । सन्दंशानां चतुष्कं च कण्ठश्चेत्येकविंशतिः ॥

वैरिव्राता भजन्ते वनमतिमलिनख्यातयो देहविद्धा
वन्यैरध्वन्यवारि क्षतिमति विविधे जन्तुभिः स्थानभाजः ॥

इति श्रीविद्यानाथकृतौ प्रतापरुद्रयशोभूषणेऽलङ्कारशास्त्रे
शब्दालङ्कारप्रकरणं समाप्तम् ।

आवृत्तिर्युग्मवर्णानां नेतरेषामिह क्वचित् । अर्केशानदशब्रह्मवर्णाः पादचतुष्कगाः॥ आवर्तैरनैर्ऋतादिकुण्डलेष्वप्रदक्षिणम् । यथैवं स्यात् तथा वर्णान् फणातो विन्यसेत् क्रमात् ॥ त्रिंशदष्टाविंशतिश्च षड्विंशतिरनुक्रमात् । वेष्टनत्रितये वर्णाः समास्तु गलाक्षरे ॥ सर्वमेतन्निधायान्तः संगृहीतं महात्मभिः ॥ विदिक्स्थले कुण्डलितं स्वमङ्गं स्वेन त्रिरावेष्ट्य विभङ्गिभङ्गम् । क्षिप्त्वा गले पुच्छमहेः स्थितस्य पाठ्यः फणातः फणिबन्ध एषः ॥

इति पदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलचलमल्लिनाथ-
सूरिसूनुना विश्वजनीनविद्यस्य विद्वन्मणेः पेद्दयार्यस्यानुजेन
कुमारस्वामिसोमपीथिना विरचिते प्रतापरुद्रीयव्याख्याने
रत्नापणाख्याने शब्दालङ्कारनिरूपणं नाम
सप्तमं प्रकरणम् ॥

अथार्थालङ्काराः ।

तत्र प्रथममनेकालङ्कारबीजभूतत्वादुपमा निरूप्यते ।

स्वतः सिद्धेन भिन्नेन संमतेन च धर्मतः ।
साम्यमन्येन वर्ण्यस्य वाच्यं चेदेकदोपमा ॥

यत्र स्वतःसिद्धेन स्वतो भिन्नेन सहृदयसंमतेनाप्रकृतेन सह प्रकृतस्य धर्मतः सादृश्यमेकदा वाच्यं चेद् भवति तत्रोपमा । स्वतःसिद्धेनेत्यनेनोत्प्रेक्षाव्यावृत्तिः । उत्प्रेक्षायामप्रसिद्धस्याप्युपमानत्वसंभवात् । यथा

कीर्तिः काकतिवीररुद्रनृपतेः सिंहासनाध्यासिनः
प्राचां भूमिभुजां यशः पिदधती कोटीन्दुतुल्यद्युतिः ।
रक्षादक्षिणराजलाभजनिता मन्दप्रमोदोत्थिता
त्रैलोक्याट्टहसप्रभेव ककुभां प्रान्तेषु विद्योतते ॥

अत्र प्रभाशब्दो जातिवचनः त्रैलोक्याट्टहासप्रभायाः कविप्रौढोक्तिसिद्धत्वान्नोपमाशङ्कावकाशः । स्वतो भिन्नेनेत्यनेनानन्वयव्यावृत्तिः। अनन्वय एकस्यैवोपमानोपमेयत्वसंभवात् । तथा हि

सन्तु लोके सुवर्णाद्रिरत्नाकरसुधाकराः ।
तथापि वीररुद्रोऽयं वीररुद्र इव स्वयम् ॥

संमतेनेत्यनेन न्यूनोपमादिव्यावृत्तिः । यथा

शब्दालंकारनिरूपणानन्तरमवसरप्राप्तत्वादर्थालंकारनिरूपणं प्रतिजानीते । **अथेति**। प्रथममुपमानिरूपणे निमित्तमाह । **तत्रेति** । तत्रार्थालंकारेष्वित्यर्थः । **अनेकालंकारबीजभूतत्वादिति**। वाच्यौपम्यानामनन्वयादीनां गम्यौपम्यानां च रूपकादीनामन्येषां च सादृश्यमूलानां मीलनादीनां निदानभूतत्वादित्यर्थः । लक्षयति । **स्वत इति** । धर्मतो गुणक्रिययोरन्यतरेणेत्यर्थः । साम्यमित्यनेन कार्यकारणादिकयोरसंभवात् साधर्म्यादन्यवर्ण्यशब्दयोरुपमानोपमेयार्थत्वं द्रष्टव्यम् । अत्रानुषङ्गाध्याहारादिभिः शिष्टमंशं पूरयन् व्याचष्टे । **यत्रेति** । व्यावृत्त्यादिकं तु स्वयमेव व्यक्तीकरिष्यति । **न्यूनोपमादीति** । न्यूनविशेषणोपमानं न्यूनोपमम् । आदिग्रहणादधिकोपमादिसंग्रहः । सहृदयसंमतिं दर्शयति ।

उदन्वानिव गम्भीरः सुवर्णाद्रिरिवोन्नतः ।
दिग्गजेभ इव क्षोणीधौरेयः काकतीश्वरः ॥

अत्र समुद्रसुवर्णाद्रिदिग्गजानामुपमानत्वं योग्यमित्युपमैवेयम् । धर्मत इत्यनेन श्लेषालङ्कारवैलक्षण्यम् । श्लेषे शब्दसाम्यमात्रमभ्युपगतं न गुणक्रियासाम्यम् । तथाहि

नीराजयन्त्यन्ध्रपुरीरमण्यः प्रदीपजालैर्वरवीररुद्रम् ।
चन्द्रानना गोत्रपतिं रजन्यस्तारागणैर्मेरुमिव स्फुरद्भिः ॥

अत्र प्रतापरुद्रं पुरस्त्रियो नीराजयन्ति मेरुं रजन्य इवेति नोपमा । गोत्रपतिमिति विशेषणार्थस्य साम्याभावात् । गोत्रशब्देन राजपक्षे कुलप्रतीतिः मेरुपक्षे पर्वतप्रतीतिः । तथा चन्द्रानना इति स्त्रीपक्षे चन्द्र इव आननं यासामिति समासः रात्रिपक्षे चन्द्र एवाननं यासामिति शब्दमात्रसाम्येन नोपमाप्राप्तिः । किं तु श्लेष एव । अन्येन वर्ण्यस्य साम्यमित्यनेन प्रतीपालङ्कारो व्यावर्त्यते । तथा हि

लोकोऽयमविशेषज्ञः किं कुर्मः कस्य कथ्यते ।
यत् काकतिनरेन्द्रेण सुमेरुरुपमीयते ॥

अत्राप्रकृतस्य मेरोः प्रकृतेन राज्ञा सादृश्यमिति प्रतीपालङ्कारो नोपमा । एकदा साम्यमित्यनेन उपमेयोपमाव्यावृत्तिः उपमेयोपमायामुपमानोपमेययोरनेकदा साम्यप्रतिपादनम् ।

उदन्वानिति । 'उदन्वानुदधौ च' इति निपातनात् साधुः । धुरं वहतीति धौरेयो धुरन्धरः । 'धुरो यड्ढकौ' इति ढक्प्रत्ययः । क्षोण्या धौरेय इति शिवभागवतवत् समासः । **धर्मत इत्यनेन श्लेषालङ्कारवैलक्षण्यमिति** । शब्दसाम्यमूलत्वात् तस्येति भावः । व्यावर्त्यं श्लेषमूलमुदाहरति । **नीराजयन्तीति** । एवंविधस्थले शब्दसाम्येऽप्युपमैवेति काव्यप्रकाशकारः । तदुक्तम् । 'सकलकलं पुरमेतज्जातं संप्रति सुधांशुबिम्बमिव ।' इत्यादिशब्दमात्रसाम्येऽपि सा युक्तैवेति । अलंकारसर्वस्वकारः पुनरस्मिन्नेवोदाहरणे गुणक्रियासाम्यवच्छब्दसाम्यं नोपमाप्रयोजकमपि तूपमाप्रतिभोत्पत्तिहेतुः श्लेष एवावसेय इत्यवोचत् । विद्यानाथस्तु सर्वस्वकारसिद्धान्तश्रद्धालुतया श्लेष एवायं नोपमेत्याह । **अत्रेत्यादिना** । **अन्येन वर्ण्यस्येति** । उपमानेनोपमेयस्येत्यर्थः । **लोकोऽयमिति** । अत्रोपमानोपमेयभावस्य वैपरीत्यात् प्रतीपालंकार इत्याह । **अत्रेति** ।

धर्मोऽर्थ इव पूर्णश्रीरर्थो धर्म इव स्थितः ।
कामस्ताविव तौ काम इव रुद्रनरेश्वरे ॥

अत्र धर्मोऽर्थ इव अर्थो धर्म इवेत्यनेकदा इवशब्दद्वयेन धर्मार्थकामानां सादृश्यं प्रतिपाद्यत इत्युपमेयोपमा । वाच्यमित्यनेन प्रतीयमानौपम्यानां रूपकसंदेहभ्रान्तिमदुल्लेखापह्नवतुल्ययोगितादीपकप्रतिवस्तूपमादृष्टान्तसहोक्तिव्यतिरेकनिदर्शनानां वैलक्षण्यम् । तथा हि

प्रतापरुद्रनृपतेर्मण्डलाग्रविधुंतुदः ।
अखण्डविक्रमोद्दामो ग्रसते राजमण्डलम् ॥

अत्र मण्डलाग्रविधुंतुदयोः सामानाधिकरण्यान्यथानुपपत्त्या सादृश्यं लक्ष्यत इति नोपमा किं तु रूपकालङ्कारः ।

किमेष नवमो हरित्पतिरमन्दसंपत्पदं
किमेष दशमः प्रजापतिरपूर्वसर्गक्रमः ।
किमेष हरिरुर्वरोद्धरणचुञ्चुरेकादश-
श्चिरादिति विलोक्यते जगति काकतीन्द्रो जनैः ॥

अत्र काकतीश्वरस्य हरित्पतिप्रभृतीनां च परस्पराभेदप्रतीतेः सन्देहनिबन्धनान्यथानुपपत्त्या सादृश्यमाक्षिप्यते । ततः संदेहालाङ्कारः।

काकतीयविभोः कीर्तिविभवे व्याप्तरोदसि ।
दिवापि चन्द्रिकाबुद्ध्या चकोरा यान्ति निर्वृतिम् ॥

अत्र कीर्तिविभवे चन्द्रिकाबुद्धिः चन्द्रिकासादृश्यं विना न संभवतीति सादृश्याक्षेपात् भ्रान्तिमदलङ्कारः ।

लक्ष्मीनिवासगृहमित्यखिला नरेन्द्राः
शौर्यातिभूमिखनिरित्यरिवीरवर्गाः ।
विद्याविहारपदवीति च लब्धवर्णाः
श्रीकाकतीन्द्रनगरीमनिशं स्तुवन्ति ॥

धर्म इति । अत्रैकदा साम्यस्य प्रथमार्धमेव प्रत्युदाहरणम् । तावतैवोपमेयोपमायाश्चरितार्थत्वात् । द्वितीयं पुनरभ्युच्चयः । तदेवाभिप्रेत्योक्तं । **धर्मार्थकामानामिति** । वाच्यव्यवच्छेद्यतया साधर्म्यस्य गम्यत्वं केषुचिदलंकारेषु दर्शयति। **तथाहीत्यादिना** । उदाहरणश्लोका यथायोगं स्वस्वप्रकरणे एव व्याख्यास्य-

अत्र नगर्यां तत्तत्पदार्थतारोपः सादृश्यादृते न संभवतीति सादृश्यकल्पनादुल्लेखालंकारः ।

वीररुद्रस्य भूपालजयहोमं वितन्वतः ।
धूमराजिरियं भाति न चमूरेणुरुत्थिता ॥

अत्रोत्थितां चमूरेणुमवलोक्य धूमपङ्क्तिरित्यपह्नवेनारोपः सादृश्यमूल एवेति सादृश्याक्षेपादपह्नवः । एवं तुल्ययोगितादिष्वपि सादृश्यस्य गम्यत्वान्नोपमाशङ्का । अतः सर्वेभ्यः साधर्म्यमूलेभ्यो विलक्षणेयमुपमा ।

सा प्रथमं द्विधा । पूर्णा लुप्ता चेति । उपमानोपमेयसाधारणधर्मसादृश्यप्रतिपादकानां चतुर्णां प्रयोगे पूर्णा । एकस्य द्वयोस्त्रयाणां वा लोपे लुप्ता । पूर्णा द्विविधा । श्रौती आर्थी चेति । साक्षात्सादृश्यप्रतिपादकयथेवादिशब्दानां प्रयोगे श्रौती । धर्मिव्यवधानेन सादृश्यप्रतिपादकानां सदृशसंकाशनीकाशप्रतीकाशादिशब्दानां प्रयोगे

न्ते । उपमायाः स्वरूपमुक्त्वा विभागमाह । **सा प्रथममिति** । पूर्णामाह । **उपमानेति** । उपमीयते सदृशीक्रियते येनोत्कृष्टगुणेन तदुपमानं चन्द्रादि । उपमीयते यदपकृष्टगुणं तदुपमेयं मुखादि । साधारणो धर्मो गुणः क्रिया वा । सादृश्यप्रतिपादका यथेवादयः । चतुर्णामेतेषां कण्ठोक्तौ पूर्णेत्यर्थः । कतिपयलोपे लुप्तेत्याह । **एकस्येति** । लोपे शास्त्रीये स्वारसिके च । तत्राद्यां विभजते । **पूर्णेति** । श्रुत्या सादृश्यंप्रतिपादनात् श्रौती । अर्थतस्त्वार्थीत्यर्थः । श्रौतीं लक्षयति । **साक्षादिति** । आर्थीं लक्षयति । **धर्मिव्यवधानेनेति** । सदृशाभिधानद्वारेत्यर्थः । ननु यथेवादिशब्दानां सदृशादिशब्दवत् सादृश्यविशिष्टार्थपरत्वाभावात् केवलसादृश्यपरत्वं वक्तव्यम् । तथा सति मुखं चन्द्र इवेत्यत्र मुखं चन्द्रसादृश्यमित्यर्थः स्यात् । एवं च दशदाडिमादिवाक्यवदसम्बद्धमिदं भविष्यतीति चेत् सत्यम् । यथा राज्ञः पुरुष इत्यत्र गुणभूतराजविशेषणभूता षष्ठी अनुशासनबलादुभयनिष्ठसंबन्धमात्रमभिदधानापि तद्द्वारा प्रधानभूतं पुरुषमप्याक्षिपति । तदुक्तं हरिणा । 'द्विष्ठोऽप्यसौ परार्थत्वात् गुणेषु व्यतिरिच्यते । तत्राभिधीयमानः सन् प्रधानेऽप्युपयुज्यते ॥' इति । एवमुपमानविशेषणभूता यथेवादयः शब्दाः श्रुत्या सादृश्यं बोधयन्तोऽपि शक्तिस्वाभाव्यात् तात्पर्येण सादृश्यवति वर्तन्ते । एवं च यथेवादिशब्दानां श्रुत्या सादृश्यपरत्वात् तत्प्रयोगे श्रौती । सदृशादिशब्दानामर्थात् सादृश्यपरत्वात् तत्प्रयोगे त्वार्थीति

आर्थी । द्वे अपि वाक्यसमासतद्धितगतत्वेन त्रिविधे । एवं पूर्णोपमा षट्प्रकारा । लुप्तोपमा एकोनविंशतिभेदा । 'तेन तुल्यं क्रिया चेद्वतिः' इति सदृशार्थे विहितस्य वतेरुपादाने आर्थी । 'तत्र तस्येव' इतीवार्थे विहितस्य वतेरुपादाने श्रौती । अत एव सादृश्यार्थे विहितस्य वतेः प्रयोगे धर्मोपादान एवान्वयसौकर्यादनुक्तधर्मा तद्धितगा श्रौती लुप्ता नास्ति । कल्पबादिप्रयोगे त्वार्थ्येव । अथोदाहरणानि । वाक्यगा पूर्णा श्रौती यथा

उद्दामोद्यतविक्रमे कृतयुगे बाहौ ययातेर्यथा
त्रेतायां रघुनायकस्य महितख्यातौ भुजायां यथा ।
दोर्दण्डे च युधिष्ठिरस्य विलसच्छौर्ये यथा द्वापरे
विस्रब्धाद्य कलौ तथैव रमते क्षोण्यन्ध्रभर्तुर्भुजे ॥

समासगा पूर्णा श्रौती यथा

भास्वानिवोद्यन्नुदयाद्रिलम्बी भद्रासनस्थो वरवीररुद्रः ।
उत्पश्यतामन्ध्रपुरीजनानां नेत्राब्जजाड्यं शमयत्यशेषम् ॥

अत्र भास्वानिवेति इवेन सह नित्यसमासः॥तद्धितगा पूर्णा श्रौती यथा

कूर्मवच्छेषवद्गोत्रगिरिवद्दिङ्गहेभवत् ।
भुजे प्रतापरुद्रस्य धुरीणे भाति मेदिनी ॥

विवेकः । तयोः पुनः प्रत्येकं त्रैविध्यमाह । **द्वे इति** । **एकोनविंशतिभेदेति** । वक्ष्यमाणप्रकारेणेति शेषः । वतिप्रत्ययभेदादुपमाभेद इत्याह । **तेन तुल्यमित्यादिना** । तत्र श्रौत्या विशेषमाह । **अत एवेति** । अतोऽस्मादेवान्वयसौकर्यादिति संबन्धः । कूर्मवदित्यादिवक्ष्यमाणोदाहरणे मेदिनीभानरूपस्य समानधर्मस्योपादान एवान्वयसौकर्यादन्यथा तदभावाच्च तद्धितगतायां श्रौत्यां धर्मोपादानमावश्यकमिति भावः । **कल्पबादिप्रयोगे त्विति** । 'ईषदसमाप्तौ' इति विहितानां कल्पब्देश्यदेशीयर्प्रत्ययानां 'विभाषा सुपः' इति विहितस्य बहुच्प्रत्ययस्य च प्रयोग इत्यर्थः । **आर्थ्येवेति** । धर्मिण्यवधानेनैव सादृश्यप्रतिपादनादित्यर्थः । **उद्दामेति** । अत्र यथाशब्दप्रयोगादियं वाक्यगा श्रौती च । **भास्वानिवेति** । कथमियं समासगेत्याकाङ्क्षायामाह । **इवेन सह नित्यसमासः इति** । 'इवेन समासो विभक्त्यलोपश्च पूर्वपदप्रकृतिस्वरत्वं च' इति वार्तिकादिति शेषः । **कूर्मवदिति** । 'तत्र तस्येव' इति सप्तमीसमर्थादिवार्थे वतिप्रत्ययः । अत एवेयं तद्धितगा श्रौती ।

वाक्यगा पूर्णार्थी यथा

तैस्तैर्महीपालनसंविधानैस्तैस्तैः प्रजारञ्जनवैभवैश्च ।
विराजते संप्रति काकतीयलक्ष्मीपतिर्दाशरथेः समानः ॥

समासगा पूर्णार्थी यथा

तादृक्पालनसामर्थ्यसंपदा काकतीश्वरः ।
हरिदीश्वरसंकाशः शास्ति मध्यमविष्टपम् ॥

तद्धितगा पूर्णार्थी यथा

हेमाचलवदौन्नत्ये गाम्भीर्ये क्षीरसिन्धुवत् ।
प्रतापे भानुवद् भाति वीररुद्रनरेश्वरः ॥

एषूदाहरणेषूपमेयोपमानसाधारणधर्मसादृश्यप्रतिपादकानि चत्वारि निबद्धानीति पूर्णत्वम् ।

अथ लुप्तोपमाया उदाहरणानि ।

अनुक्तधर्मा वाक्यगा श्रौती लुप्ता यथा

यथा रुचां स्वामिनि चक्रवाक्यो यथा च नीहाररुचौ चकोर्यः ।
यथा प्रसूनस्तबके भ्रमर्यस्तथा प्रजाः काकतिवीररुद्रे ॥

अनुक्तधर्मा समासगा श्रौती लुप्ता यथा

धुरं वहतीति धुरीणे धुरन्धरे । 'खः सर्वधुरात्' इत्यत्र 'खः' इति योगविभागात्खप्रत्ययः । 'गाम्भीर्यगरिमा तस्य सत्यं गङ्गाभुजङ्गवत्' इति तस्येवेति वतेरुदाहरणम् । **तैस्तैरिति** । महीपालनसंविधानैर्वापीकूपतटाकादिनिर्माणैरित्यर्थः । प्रजारञ्जनवैभवैश्चोरादिनिवारणपूर्वकैः पालनविशेषैरित्यर्थः । अत्र दाशरथेः समान इति व्यासेन समानशब्दोपादानादार्थीयमुपमा वाक्यगता च ॥ **तादृगिति** । हरिदीश्वरेण दिक्पतिना सदृशो हरिदीश्वरसंकाश इति नित्यसमासः । 'स्युरुत्तरपदे त्वमी । निभसंकाशनीकाशप्रतीकाशोपमादयः ॥' इत्यमरकोशे निभादिशब्दानामुत्तरपदनियमात् । अत एव समासगतेयमार्थी । **हेमाचलवदिति** । औन्नत्यादौ मेर्वादितुल्यं भातीत्यर्थः । अत्र 'तेन तुल्यम्' इति विहितस्य वतेः प्रयोगादार्थीयं तद्धितगा । एषूदाहरणेषूपमानादिचतुरङ्गनिबन्धनात् पूर्णत्वमित्याह । **एष्विति** । अथ लुप्तोदाहरणेषु प्रथमं धर्मानुपादाने पश्चोदाहरणानि क्रमेणाह । **यथेत्यादि** । रुचां स्वामिनि सूर्ये । वीररुद्रे वर्तन्ते इति शेषः । अत्र प्रतापाह्लादसारस्यानां धर्माणामनुपादानम् ।

प्रतापरुद्रदेवस्य पादपीठीमनारतम् ।
आराधयन्ति भूपालाः प्रणता देवतामिव ॥

अनुक्तधर्मा वाक्यगा आर्थी लुप्ता यथा

काकतिक्ष्मापतेर्जैत्रप्रस्थानपटहध्वनिम् ।
तुल्यं दम्भोलिनिर्घोषैः शृण्वन्त्यरिमहीभृतः ॥

अनुक्तधर्मा समासगा आर्थी लुप्ता यथा

शश्वत्पुरीमेकशिलाभिधानां वस्वोकसारासदृशीमवेक्ष्य ।
नमन्ति भूपा भुवि काकतीयराज्यप्रतिष्ठां बहुमन्यमानाः ॥

अनुक्तधर्मा तद्धितगा आर्थी लुप्ता यथा

प्रतापरुद्रनृपतेर्जगन्महिततेजसः ।
कन्दर्पकल्पमाकार पश्यन्त्यन्ध्रपुरन्ध्रयः ॥

एषूदाहरणेषु धर्मस्यानुपादानम् । अनुक्तधर्मेवादिः कर्मक्यचा लुप्ता यथा

दुग्धार्णवीयत्यम्भोधीन् कैलासीयति भूधरान् ।
प्रतापरुद्रदेवस्य यशोवैशद्यवैभवम् ॥

अनुक्तधर्मेवादिराधारक्यचा लुप्ता यथा

प्रतापेति। अत्र पादपीठीदेवतयोः समानो धर्मः सम्पत्प्रदत्वमनुक्तम् । अनुक्तधर्मा तद्धितश्रौती लुप्ता नास्तीत्युक्तम् । **काकतीति** । दम्भोलिनिर्घोषैरशनिध्वनिभिस्तुल्यं तद्वत् भीषणमिति गम्यते । **शश्वदिति** । वस्वोकसारासदृशीमलकासमानां । वैभव इति नोक्तम् । **प्रतापरुद्रेति** । कन्दर्पकल्पं कन्दर्पसदृशम् । रूपसंपदेति शेषः । ईषदसमाप्तौ कल्पप्प्रत्ययः । इयमेकलोपे लुप्ता पञ्चविधा । अथ द्विलोपे लुप्तां क्रमेणोदाहरति । **दुग्धार्णवीयतीत्यादिना** । अत्र 'उपमानादाचारे' इति क्यच्प्रत्ययः । 'क्यचि च' इतीकारः । धावल्यमत्र साधर्म्यं गम्यते । अम्भोधीन् दुग्धार्णवानिवाचरतीत्यत्र वाक्ये प्रक्रान्तं कर्मद्वयम् । तत्रोपमानकर्मणोऽन्तर्भूतत्वात् तदपेक्षयासावकर्मको धातुः । तदुक्तम् । 'धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात् । प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया ॥' इति । कर्मान्तरापेक्षया तु सकर्मक एव । यथाह भगवान् भाष्यकारः । 'द्वे ह्यत्र कर्मणी उपमानकर्मोपमेयकर्म चेति । उपमानकर्मान्तर्भूत-

क्रीडाद्रीयति गोत्रशैलशिखरेष्वास्थानसद्मीयति
द्वीपेष्वब्धिषु दीर्घिकीयति हरित्स्वेकान्तगेहीयति ।
उद्यानीयति सीमपर्वततटारण्ये सुपर्वाचले
प्रासादीयति वीररुद्रनृपतेः स्फारः प्रतापोदयः ॥

अनुक्तधर्मेवादिः कर्मणमुला लुप्ता यथा

पश्यन्त्यात्मजदर्शमिन्दुममरस्रोतस्विनीं सत्सखी-
दर्शं क्षीरपयोनिधिं प्रियसुहृद्दर्शं गिरिं राजतम् ।
लीलादर्पणदर्शमन्यदमलं तारादि हारावली-
दर्शं खेलति वीररुद्रनृपतेः कीर्तिर्जगद्व्यापिनी ॥

अनुक्तधर्मेवादिः कर्तृणमुला लुप्ता यथा

नृपेषु शिक्षाविधिदण्डचारं कान्तासु पुष्पायुधधन्वचारम् ।
प्रजासु चालम्बनयष्टिचारं चरत्ययं रुद्रनरेन्द्रखड्गः ॥

अनुक्तधर्मेवादिः क्विपा लुप्ता यथा

सुधाप्रवाहति सतामसतां कालकूटति ।
वीररुद्रनरेन्द्रस्य गुणज्योत्स्नाविजृम्भितम् ॥

मुपमेयेन कर्मणा सकर्मको भवति' इति । एवमन्यत्रापि द्रष्टव्यम् । **क्रीडाद्रीयतीति** । आस्थानसद्म सभामण्टपः । दीर्घिकाः क्रीडासरांसि । सीमपर्वतो लोकालोकः । सुपर्वाचलो मेरुः । क्रीडापर्वतादिष्विव कुलपर्वतशिखरादिष्वाचरतीत्यत्र सुखसाधनत्वं साधर्म्यं गम्यते । 'अधिकरणाच्च' इति वचनात् क्यच्प्रत्ययः। क्रीडाद्रीयतीत्यत्र 'अकृत्सार्वधातुकयोः' इति दीर्घः । अन्यत्र यथायोगं टिलोपे 'क्यचि च' इतीकारः । **पश्यन्तीति** । आत्मजं पुत्रमिव दृष्ट्वा आत्मजदर्शम् । एवमुत्तरत्रापि द्रष्टव्यम् । 'उपमाने कर्मणि च' इति णमुल्प्रत्यये कषादित्वात् सर्वत्र पश्यन्तीत्यनुप्रयोगः । अत्रात्मजसख्यादीनामिन्दुमन्दाकिनीमुख्यानां चोपमानोपमेयभावे नैर्मल्यमेव साधर्म्यमूलमिति गम्यते । **नृपेष्विति** । शिक्षाविधेर्दण्डः शिक्षाविधिदण्डः इति तादर्थ्ये अश्वघासादिवत् षष्ठीसमासः । स इव चरित्वा तच्चारमिति 'उपमाने कर्मणि च' इति चकारात् कर्तरि णमुल् । कषादित्वाच्चरतेरनुप्रयोगः । अत्र भीषणोद्दीपनविश्रामभूमित्वानां क्रमेण समानधर्मत्वमुन्नेयम् । **सुधेति** । गुणज्योत्स्नाविजृम्भितं कर्तृ । सुधाप्रवाह इवाचरति सुधाप्रवाहति तद्वच्छ्लाघ्यमित्यर्थः । कालकूटमिवाचरति कालकूटति तद्वदसह्यमित्यर्थः । 'सर्वप्रातिपदिकेभ्यः क्विब्वाचारे' इत्येक इत्याचारे क्विप्प्रत्ययः ।

इति दशोदाहरणानि। एषूदाहरणेषु द्वयोरनुपादानम्। अम्भोधीन् दुग्धार्णवीयतीत्यत्र कर्मक्यचि दुग्धार्णवानिव करोतीति गोत्रशिखरेषु क्रीडाद्रीयतीत्याधारक्यचि क्रीडाद्रिष्विव वर्तत इति चन्द्रमात्मजदर्शं पश्यन्तीति कर्मणमुलि आत्मजमिव पश्यन्तीति शिक्षाविधिदण्डचारं चरतीति कर्तृणमुलि शिक्षाविधिदण्ड इव चरतीति इवशब्दोऽन्तर्गत इति तस्य लुप्तत्वम्। अनुक्तधर्मीवादिः कर्तृक्यचा लुप्ता यथा

ज्योत्स्नीयन्ति सुधीयन्ति चन्दनीयन्ति सर्वतः।
प्रतापरुद्रनृपतेः शुभ्राः कीर्तेर्महोर्मयः॥

अत्र कीर्तीनां स्वरूपमुपमेयम्। अनुक्तधर्मेवादिः कर्तृक्यङा लुप्ता यथा

अत्राचारस्य समानधर्मत्वं मन्यमानः काव्यप्रकाशकारस्तद्वाचकस्य क्विपः सर्वलोपादिवादिलोपाच्च द्विलोपः। क्यजादौ तु प्रत्ययश्रवणादेकलोप एवेत्याह। विद्यानाथस्तु कर्तरि क्यजादावस्तु नाम धर्मान्तरोद्भावना शक्तौ कथंचिदाचारः साधर्म्यम्। कर्मणि क्यजादौ तूपमानोपमेयगतो धावल्यादिरेव समानधर्मो नाचारमात्रं तस्यान्यधर्मत्वादिति मन्यमानः क्यजादावपि द्विलोप इत्याह। **एषूदाहरणेषु द्वयोरनुपादानमिति**। एतदेव विविनक्ति। **अम्भोधीनित्यादि**। **इवशब्दोऽन्तर्गत इति**। गम्यमानार्थ इत्यर्थः। एतद्यथोदाहरणमस्मदुद्घाटितधावल्यादिसाधारणधर्मस्याप्युपलक्षणम्। **तस्य लुप्तत्वमिति**। अप्रयुक्तत्वमित्यर्थः। यदाह कैयटः। 'गम्यमानार्थस्याप्रयोग एव लोपः' इति। क्विबन्तोदाहरणं तु सर्वसंप्रतिपन्नत्वान्न विवृतमिति द्रष्टव्यम्। क्वचित् त्रिलोपे लुप्तामाह। **अनुक्तेति**। धर्मः समानधर्मोऽस्यास्तीति धर्मि उपमेयं तच्चेवादिश्चानुक्तौ यत्रासावनुक्तधर्मीवादिः। अनुक्तोपमेयेवादिरित्यर्थः। धर्मलोपस्तु प्रसिद्धः। **कर्तृक्यचेति**। यत्र क्यच्प्रत्यये प्रकृतिभूतस्योपमानस्य कर्मणः कर्तैवोपमेयं तेनेत्यर्थो द्रष्टव्यः। केवलकर्तृक्यच्प्रत्ययस्यैवाभावात् तेन लुप्तामुदाहरति। **ज्योत्स्नीयन्तीति**। ज्योत्स्नामिवात्मानमाचरन्तीत्यत्रात्मन उपमेयस्येवादेः साधर्म्यस्य नैर्मल्यादेश्चानुपादानात् त्रिलोपे लुप्तेयमिति भावः। आचारसाधर्म्यवादिनां तु द्विलोप एव। तदुक्तं काव्यप्रकाशे। 'क्यचीवाद्युपमेयौ' इति। न च कीर्तिमहोर्मय इत्युपमेयोपादानम्। उपमानापेक्षया भिन्नविभक्तिकत्वात्। न चैतदनुसारेण ज्योत्स्नीयन्तीत्यत्र ज्योत्स्ना इवाचरन्तीति समानविभक्तिकत्वकल्पनमुपपद्यते। कर्तृक्यच्प्रत्ययस्यानुशासनविरुद्धत्वात्। न च शुभ्रा इति समानधर्मोपादानम्। तस्याकर्तृभूतकीर्तिविशेषणत्वेन तत्रैवोपक्षी-

शेषायते महीं वोढुं कल्पशाखायतेऽर्थिनाम् ।
प्रतापरुद्रदोर्दण्डः कालदण्डायते द्विषाम् ॥

अनुक्तोपमाना वाक्यगा लुप्ता यथा

वदान्यो नान्योऽस्ति त्रिजगति समो रुद्रनृपते-
र्गुणश्रेणीश्लाघापिहितहरिदीशानयशसः ।
समन्तादुद्भूतैर्द्विरदमदगन्धैः सुरभयः
क्रियन्ते यद्विद्वज्जनमणिगृहप्राङ्गणभुवः ॥

अनुक्तोपमाना समासगा लुप्ता यथा

वीररुद्रसमो राजा नास्ति नास्त्येव भूतले ।
यस्य धर्मानुबन्धेन कलिः कृतयुगीकृतः ॥

अनुक्तधर्मोपमाना वाक्यगा लुप्ता यथा

लोके काकतिवीररुद्रनृपतेरुद्दामभूमश्रियः
कीर्त्या कार्तिककौमुदीधवलया तुल्यं न किंचित् कचित् ।

णत्वादित्यलमतिप्रसङ्गेन । पुनरपि धर्मेवादिलोपे लुप्तामाह । **शेषायत इति** । शेष इवाचरति इति शेषायते । 'कर्तुः क्यङ् सलोपश्च' इति क्यङ्प्रत्यये ङित्वादादात्मनेपदम् । अत्रोपमानकर्तुरन्तर्भूतत्वादुपमेयकर्त्रा सकर्तृकत्वमिति भाष्यकारः । अत्र महीवहनलक्षणस्य साधर्म्यस्योपादानात् कल्पशाखायत इत्यादिकमेवोदाहरणम् । शेषायत इत्येतदेकलोपस्येति विवेकः । अत एव अस्य प्रकरणात् उत्कर्षः । अत एव कर्तृणमुलि क्विपि च समानधर्मस्योपादानानुपादानाभ्यां द्वैविध्यं द्रष्टव्यम् । पुरुषव्याघ्र इत्यत्र सामान्याप्रयोग एव सामानाधिकरण्यात् समासः संभवति । तदुक्तं हरिणा । 'व्याघ्रशब्दो यदा शौर्यात् पुरुषार्थेऽवतिष्ठते । तदाधिकरणाभेदात् समासस्यास्ति संभवः ॥ शूरशब्दप्रयोगे तु व्याघ्रशब्दो मृगे स्थितः । भिन्नेऽधिकरणे वृत्तेस्तत्र नैवास्ति संभवः ॥' इति । अतोऽत्र धर्मलोपादिवादेरभावाच्चानुक्तधर्मेवादिः समासगा लुप्तेत्येष भेदोऽत्रत्यपुस्तकेष्वभावादुन्नेयः । उपमानानुक्तौ वाक्यसमासगतत्वेनोदाहरणद्वयं क्रमेणाह । **वदान्य इति** । गतमेतत् । रुद्रनृपतेः समो वदान्य इत्युपमेयवाचकसमानधर्माणां प्रयोगः । उपमानं तु नोक्तम् । वीररुद्रसम इति समासेनोपमेयवाचकयोः प्रयोगः । रञ्जनाद्राजेति साधर्म्यकथनम् । पूर्ववद्धर्मोपमानानुक्तावुदाहरणद्वयमाह । **लोक इति** । कीर्त्या तुल्यं मधुरं वस्तु किमपि नास्तीत्यर्थः । अत एव साधर्म्योपमानयोरनुपादानम् । यन्माधुर्यविजृम्भितैः यस्याः कीर्तेः माधुर्यातिशयैरित्यनेन साधर्म्योपादानमिति

यन्माधुर्यविजृम्भितक्षतविषां ग्रीवां विलोक्याधुना
कण्ठालिङ्गनमीशितुर्वितनुते नीरन्ध्रमद्रेः सुता ॥

अनुक्तधर्मोपमाना समासगा लुप्ता यथा

प्रतापश्रीतुल्यं क्वचिदपि न भूतं न च भवत्
न भावि त्रैलोक्ये किमपि जयिनः काकतिविभोः ।
यथा लोकालोकक्षितिधरतटेष्वर्कदृषदः
प्रकाशन्ते नक्तंदिवमुदितरोचिःपरिचयाः ॥

पूर्वोदाहरणद्वये वदान्यो नान्योऽस्तीति राजेति शब्दाभ्यां वितरणशीलत्वं प्रजारञ्जकत्वसाधर्म्यमुक्तम् । अनन्तरोदाहरणद्वये धर्मस्याप्यनुपादानमिति भेदः । एषु चतुर्षूदाहरणेषु न प्रतीपालंकारशङ्का । उपमानस्याक्षेपाभावात् उपमेयस्याधिक्याविवक्षणाच्च । यत्रोपमेयस्याधिक्यविवक्षयोपमानत्वमुच्यते तत्रैव प्रतीपालङ्कारः । अनुक्तेवादिः समासगा लुप्ता यथा

असतामुष्णभानूष्णं सतां शीतांशुशीतलम् ।
प्रतापरुद्रदेवस्य चरितं विश्वमङ्गळम् ॥

अनुक्तधर्मेवाद्युपमाना समासगा लुप्ता यथा

काकतीन्द्रो रणे भाति भीमसेनपराक्रमः ।

न शङ्कनीयम्। तस्य वाक्यान्तरगतत्वात्। किं तु माधुर्यमेव साधर्म्यं विवक्षितं। न कौमुदीधवलत्वादिकमित्यनेन सूच्यते। **प्रतापेति**। लोकालोकक्षितिधरतटेषु पाश्चात्येष्वपीति भावः। अर्कदृषदः सूर्यकान्ताः। देशतः कालतश्च परिच्छेदातीतत्वात् प्रतापश्रीतुल्यं नास्तीत्यत्रोपमयवाचकयोरेवोपादानम्। एषूदाहरणेष्वाद्ययोरेकलोपमन्त्ययोश्च द्विलोपं विविनक्ति। **पूर्वेति**। अत्रोदाहरणचतुष्टये प्रतीपालङ्कारसाङ्कर्यं वारयति। **एष्विति**। 'आक्षेप उपमानस्य कैमर्थक्येन कथ्यते। यदोपमेयभावः स्यात् तत् प्रतीपमुदाहृतम् ॥' इति लक्षणानुसारेण द्विविधस्यापि प्रतीपस्येहानुप्रवेशाभावान्न तत्साङ्कर्यशङ्काकलङ्कावकाश इति भावः। **असतामिति**। उष्णभानुरिवोष्णमुष्णभानूष्णमित्यत्र वाचकमात्रलोपादेकलोपे लुप्ता समासगा। सर्वस्यापि शब्दस्य शब्दान्तरसंबन्धेन विशेषवाचित्वादुष्णादिशब्दानां तथात्वेन सामान्यवचनत्वाभावेऽपि भाष्योक्तरीत्या समासात् पूर्वं सामान्यवचनत्वेन 'उपमानानि सामान्यवचनैः' इति समासः। समासे त्रिलोपमुदाहरति। **काकतीन्द्र इति**। भीमसेनपराक्रम इव दुःसहः पराक्रमो

किं त्वदुःशासनाः सर्वे यस्य प्रत्यर्थिपार्थिवाः ॥

अत्र भीमसेनस्य पराक्रम इव पराक्रमः यस्य सः भीमसेनपराक्रम इति धर्मेवाद्युपमानलुप्ता । इति लुप्तोपमा दर्शिताः ।

अथ साधारणधर्मोपादाने द्वैविध्यम् । धर्मस्य सकृदुपमानोपमेयगतत्वेन निर्देशः । उभयगतत्वेन पृथगुपादानं च । पृथगुपादानं च वस्तुप्रतिवस्तुभावेन बिम्बप्रतिबिम्बभावेन च द्विविधम् । एकस्यार्थस्य शब्दद्वयेनाभिधानं वस्तुप्रतिवस्तुभावः । द्वयोरर्थयोर्द्विरुपादानं बिम्बप्रतिबिम्बभावः । सकृन्निर्देशो यथा

यस्यासौ भीमसेनपराक्रमः । अत्र विशेषमाह । °किं त्विति । दुःशासनो दुर्योधनानुजः तत्सहिता भीमसेनप्रत्यर्थिनः वीररुद्रवैरिणस्तु तद्रहिता इति प्रातीतिकोऽर्थः । दुष्करं शासनं स्वविषयं येषां ते दुःशासनाः दुःसाधाः । ते न भवन्तीत्यदुःशासनाः । सर्वेऽपि सुसाधा इत्यर्थः । त्रिलोपं दर्शयति । **अत्रेति** । **धर्मेवाद्युपमानलुप्तेति** । धर्मेवाद्योर्गम्यमानार्थत्वाल्लुप्तत्वम् । उपमानस्य तु वार्तिकादिति भावः । तथा हि 'सप्तम्युपमानपूर्वपदस्य बहुव्रीहिर्वाच्य उत्तरपदलोपश्च' इति वार्तिकम् । अस्यार्थः । सप्तम्यन्तं तावदास्ताम् । उपमानं पूर्वपदं यस्य समासस्य तस्य शब्दान्तरेण बहुव्रीहिः पूर्वसमासावयवस्योत्तरपदस्य च लोप इति । एतेनेदं फलितम् । अत्रोपमानशब्देन मुख्योपमानभूतस्य भीमसेनपराक्रमस्याश्रयो भीमसेनो लक्ष्यते । तत्पूर्वपदस्य भीमसेनपराक्रम इत्यस्य समासस्योपमेयवाचिना पराक्रमशब्देन बहुव्रीहिः । भीमसेनपराक्रम इव दुःसहः पराक्रमो यस्येति । ततः पूर्वसमासावयवस्योत्तरपदस्य मुख्योपमानपराक्रमशब्दस्य लोप इति । तेन धर्मेवाद्युपमानानां लोपात् त्रिलोपवतीसमासगा । अत्रायं संग्रहः । समासगेवादिलोपे स्यादेका वृत्तिवाक्यगे । द्वे लोप उपमानस्य वाक्यतद्धितवृत्तिगाः ॥ धर्मानुक्तौ पञ्च चैकलोपेऽष्टौ मिलिता भिदाः । कर्माधारक्यचा कर्मकर्त्रोश्च णमुला क्विपा ॥ क्यङा कर्तर्युपमितवृत्त्या चेवादिधर्मयोः । अनुक्तौ सप्त धर्मोपमानलोपे समासगा ॥ वाक्यगा च द्विधेत्येवं द्विलोपे नव कीर्तिताः । क्यचोपमानान्यलोपे स्यादेकान्या समासगा ॥ उपमेयान्यलोपे द्वे स्यातामेवं त्रिलोपगे । लुप्ताभेदा मिलित्वा स्युरेवमेकोनविंशतिः ॥ पूर्णाभिः सह षड्भिस्तु भेदाः स्युः पञ्चविंशतिः। द्वे श्रौत्यौ धर्मलोपेऽन्या आर्थ्यः सप्तदश स्मृताः॥ कुत्रचित् कर्तृणमुलि तथाचारक्विपि क्यङि । एकलोपे विलुप्ता स्याद्धर्मोपादानसंभवात् ॥ इति । समानधर्मोपादाने सर्वभेदसाधारणं विशेषणमाह । **अथेति** । द्वितीयं द्वेधा विभजति । **पृथगिति** । तत्राद्यं लक्षयति । **एकस्येति** । द्वितीयं लक्षयति । **द्वयोरिति** । द्वयोः सदृशयोरिति शेषः तेन धर्मापेक्षो वस्तुप्रतिवस्तुभावः।

नृपाः प्रणतमूर्द्धानः सेवन्ते काकतीश्वरम् ।
असाधूनां विनेतारं गुरुं शिष्या इवाभितः ॥

अत्र नरेश्वराणां शिष्याणां च प्रणतमूर्द्धान इति सकृदेव साधर्म्यमुक्तम् । तथा साधूनां विनेतारमिति राज्ञो गुरोश्च तुल्यधर्मत्वं सकृदेवोक्तम् । वस्तुप्रतिवस्तुभावेन द्विधा निर्देशो यथा

वंशोऽयं काकतीयानां वीररुद्रेण भूषितः ।
अन्ववायः ककुत्स्थानां रामेणेव परिष्कृतः ॥

अत्र भूषितपरिष्कृतशब्दाभ्यामेकार्थप्रतीतेर्वस्तुप्रतिवस्तुभावः । बिम्बप्रतिबिम्बभावो यथा

स्फुरच्छ्वेतातपत्रश्रीः काकतीयनरेश्वरः ।
हाटकाद्रिरिवाभाति शृङ्गसङ्गीन्दुमण्डलः ॥

अत्र श्वेतातपत्रचन्द्रमण्डलयोः सादृश्येन काकतीन्द्रसुवर्णाचलयोः सादृश्यमिति बिम्बप्रतिबिम्बभावः ।

अपरमपि द्वैविध्यमस्यालंकारस्य । समस्तवस्तुविषया एकदेशवर्तिनी चेति । यथाक्रमं द्वयोरुदाहरणम् ।

विभाति भूर्द्यौरिव काकतीन्द्रपुरी विराजत्यमरावतीव ।
पौराः प्रथन्ते त्रिदशा इवर्द्धिं धत्ते मरुत्वानिव वीररुद्रः ॥

एषा समस्तवस्तुविषया । एकदेशवर्तिनी यथा

धर्म्यपेक्षस्तु बिम्बप्रतिबिम्बभाव इति फलितम् । **नृपा इति** । अत्र समानधर्मस्य सकृन्निर्देशं योजयति । **अत्रेति** । **द्विधा निर्देश इति** । उपमानगतत्वेनोपमेयगतत्वेन चेति भावः । **वंश इति** । परिष्कृत इत्यत्र 'संपरिभ्यां करोतौ भूषणे' इति सुडागमे षत्वम् । अत्र संबन्धिभेदेन भूषितपरिष्कृतशब्दाभ्यां समानधर्मकथनाद्वस्तुप्रतिवस्तुभावः । **स्फुरदिति** । अत्र श्वेतातपत्रस्येन्दुमण्डलं प्रतिबिम्बतया निर्दिश्यते । काकतीन्द्रसुवर्णाचलयोः स्वरूपतः सादृश्याभावाद्विशेषणसादृश्यनिबन्धनं विशेष्यसादृश्यमिति वक्तव्यम् । स एव बिम्बप्रतिबिम्बभाव इत्याह । **अत्रेति** । प्रकारान्तरेण विभागमाह । **अपरमिति** । समस्तानि वस्तून्यवयव्यवयवाश्च विषया यस्याः समस्तवस्तुविषया । अवयवावयविनोरेकदेशे वर्तत इत्येकदेशवर्तिनी । आद्यामुदाहरति । **विभातीति** । मरुत्वानिन्द्रः । 'तसौ मत्वर्थे' इति भसंज्ञायां पदकार्यं न भवति । 'झय' इति मतोर्वत्वम् । इयमनेकेवोपमेति केचित् । इवशब्दान्तरप्रयोगे पौनरुक्त्यापत्तेरेकेनैवालमिति

द्विपैश्चरद्भिर्धरणीधरैर्वा तुरङ्गमश्रेणिभिरूर्मिभिर्वा ।
नानायुधैर्व्यालजलग्रहैर्वा बलं त्रिलिङ्गाधिपतेर्दुरापम् ॥

अत्र त्रिलिङ्गाधिपतेर्बलं समुद्र इवेत्यर्थात्प्रतीतेरेकदेशवर्तित्वम् । मालारूपेणाप्ययमलंकारो दृश्यते । यथा

कुन्दति कुमुदति हंसति हारति हरति क्षपाकरति ।
कैलासति च यशःश्रीवैशद्यं वीररुद्रस्य ॥

अत्रैकस्योपमेयस्यानेकोपमानदर्शनात् मालात्वम् । उपमायां भेदाभेदसाधारणस्य साधर्म्यस्य प्रयोजकत्वम् । एवं भेदान्तरं यथासंभवमुदाहार्यम् ।

अनन्वयालङ्कारः ।

एकस्यैवोपमानोपमेयत्वेऽनन्वयो मतः ।

यत्र द्वितीयसब्रह्मचारिनिवृत्त्यर्थमेकस्यैवोपमानोपमेयभावो निबध्यते असावनन्वयालङ्कारः । यथा

सन्तु लोके सुवर्णाद्रिरत्नाकरसुधाकराः ।
तथापि वीररुद्रोऽयं वीररुद्र इव स्वयम् ॥

उपमेयोपमालंकारः ।

पर्यायेण द्वयोस्तस्मिन्नुपमेयोपमा मता ।

विद्याधरः । द्वितीयामुदाहरति । **द्विपैरिति** । धरणीधरैर्मैनाकादिभिः । सर्वत्र वाशब्द इवार्थे । 'वा स्याद्विकल्पोपमयोरेवार्थेऽपि समुच्चये' इति विश्वः । त्रिलिङ्गाधिपतेरन्ध्रदेशाधीश्वरस्य । नाटके व्युत्पत्तिरुक्ता । एकस्यैवोपमेयस्य बहूपमानोपादाने मालोपमा । तामुदाहरति । **कुन्दतीति** । सर्वत्राचारे क्विप्प्रत्ययः । साधर्म्यं त्रिविधम् । भेदप्रधानमभेदप्रधानं भेदाभेदप्रधानं चेति । तत्राद्यं व्यतिरेकादौ । द्वितीयं रूपकादौ । तृतीयमत्रेत्याह । **उपमायामिति** । यदाह भगवान् भाष्यकारः । 'यत्र किंचित् सामान्यं कश्चिच्च विशेषस्तत्रोपमानोपमेये भवतः' इति । 'फणितिरिव मतिः मतिरिव चेष्टा चेष्टेव कीर्तिः—' इत्यादिरशनोपमादिकमन्यतो द्रष्टव्यमित्याह । **एवमिति** । भेदाभेदसाधारणसाधर्म्यमूलेषूपमानन्तरं प्रतीयमानवस्तुकयोरेकवाक्याश्रयमनन्वयं लक्षयति । **एकस्येति** । एकस्यैवोपमानोपमेयभावानन्वयादन्वर्थेयं संज्ञा । वाच्याभिप्रायेणोपमेयस्यैव द्वितीयसदृशनिवृत्तिलक्षणव्यङ्ग्याभिप्रायेणोपमानत्वमन्वेतीत्यभिप्रायेण व्याचष्टे । **यत्र द्वितीयेति** । उदाहरति । **सन्त्विति** । उपमानभावानर्हैः किं तैरिति भावः । अनन्वयवैलक्षण्येन वाक्यभेदाश्रयमुपमेयोपमालंकारं लक्षयति । **पर्यायेणेति** । पर्यायो

तस्मिन्नित्युपमानोपमेयत्वपरामर्शः । यथा

धर्मोऽर्थ इव पूर्णश्रीरर्थो धर्म इव स्थितः ।
कामस्ताविव तौ काम इव रुद्रनरेश्वरे ॥

स्मरणालंकारः ।

सदृशानुभवादन्यस्मृतिः स्मरणमुच्यते ।

यत्र सदृशस्य पदार्थस्यानुभवेन सदृशवस्त्वन्तरपरामर्शो जायते तत्र स्मरणालंकारः । यथा

राज्ञा प्रतापरुद्रेण पालितेयं वसुंधरा ।
हरिश्चन्द्रनलादीनां प्राचां स्मरति भूभुजाम् ॥

अत्र नलनहुषादितुल्यपालनप्रवीणतया प्रतापरुद्रं रक्षितारं प्राप्तवत्याः मेदिन्याः पूर्वराजस्मरणम् । भेदाभेदसाधारणसाधर्म्यनिबन्धनालंकाराः प्रदर्शिताः । संप्रत्यारोपगर्भालंकारप्रस्तावः । तत्रापि प्राधान्यात् प्रथमं रूपक निरूप्यते ।

रूपकालंकारः ।

आरोपविषयस्य स्यादतिरोहितरूपिणः ।

यौगपद्याभावः । द्वयोरुपमानोपमेययोः । तच्छब्दस्य प्रकृतानन्वयपरामर्शं वारयति । **तस्मिन्निति** । द्वयोरुपमानोपमेयभावविनिमये सत्युपमेयोपमालंकार इत्यर्थः । उपमेयेनोपमा उपमेयोपमेत्यन्वर्थत्वम् । **धर्म इति** । अत्र वाक्यभेदेन द्वयोरेवोपमानोपमेयभावात् तृतीयसब्रह्मचारिनिवृत्तिलक्षणं वस्तु प्रतीयते । अत्र पूर्णश्रीरिति धर्मस्य साधारण्यं । स च वस्तुप्रतिवस्तुनिर्देशेनापि दृश्यते । सच्छायाम्भोजवदनाः सच्छायवदनाम्बुजाः । वाप्योऽङ्गना इवाभान्ति यत्र वाप्य इवाङ्गनाः । इति । भेदाभेदप्रधानेषु परिशेषात् स्मरणं लक्षयति । **सदृशेति** । व्याचष्टे । **यत्रेति** । अन्यशब्दार्थमाह । **सदृशवस्त्वन्तरेति** । 'सदृशादृष्टचिन्ताद्याः स्मृतिबीजस्य बोधकाः' इति न्यायेन सदृशानुभवात् पूर्वानुभवजनितसंस्कारोद्बोधे सति सदृशवस्त्वन्तरस्मृतिः स्मरणालंकार इत्यर्थः । सादृश्यव्यतिरिक्तनिमित्तत्वेन 'अत्रानुगोदं मृगयानिवृत्तः—' इत्यादौ नायमलंकारः । न चेदमनुमानम् । अविनाभावाभावात् । उदाहरति । **राज्ञेति** । भूभुजामित्यत्र 'अधीगर्थ—' इत्यादिना कर्मणि षष्ठी । अथ वृत्तानुकथनपुरःसरं प्रघटकसङ्गतिमाह । **भेदाभेदेति** । आरोपगर्भा अभेदप्रधाना इत्यर्थः । तेषु रूपकस्य संगतिमाह । **तत्रापीति** । अभेदप्रधानेष्वित्यर्थः । **प्राधान्यादिति** । आरोपमूलालंकारबीजभूतत्वेनेति भावः । तस्य लक्षणमाह । **आरोपेति** । अन्यत्रान्यधर्मारोपः

उपरञ्जकमारोप्यमाणं तद्रूपकं मतम् ॥

अत्रारोपविषयस्येत्यनेन अध्यवसायगर्भस्य उत्प्रेक्षादेः अनारोपमूलानां चोपमादीनां व्यावृत्तिः। अतिरोहितरूपिण इति अनेन संदेहभ्रान्तिमदपह्नुतिप्रमुखानां व्यावृत्तिः। संदेहालंकारे विषयस्य संदिह्यमानतया तिरोधानम्। भ्रान्तिमदलंकारे भ्रान्त्या विषयतिरोधानम्। अपह्नुत्यलंकारेऽपह्नवेनारोपविषयतिरोधानम्। उपरञ्जकमित्यनेन परिणामालंकारव्यावृत्तिः। परिणामे आरोप्यमाणस्य प्रकृतोपयोगित्वेनान्वयो न प्रकृतोपरञ्जकत्वेन। अतः सादृश्यमूलेभ्यः सर्वेभ्यो विलक्षणं रूपकम्।

तस्य प्रथमं त्रैविध्यम्। सावयवं निरवयवं परम्परितं चेति। सावयवं द्विविधम्। समस्तवस्तुविषयमेकदेशविवर्ति चेति। निरवयवं द्विविधम्। केवलं मालारूपं चेति। परम्परितस्यापि श्लिष्टनिबन्धनत्वेनाश्लिष्टनिबन्धनत्वेन च द्वैविध्यम्। तयोरपि प्रत्येकं केवलमालारूपतया चातुर्विध्यम्। एवमष्टविधो रूपकालंकारः। अथोदाहरणानि।

यत्रावयवानामवयविनश्च सामस्त्येन निरूपणं निबध्यते तत् समस्तवस्तुविषयं रूपकम्।

यथा

यात्राप्रावृषि वीररुद्रनृपतेर्निस्साणधाराधरे
वैरिक्ष्मापतिगर्वपर्वताभिदाभीमं मुहुर्गर्जति।

आरोपः। तद्विषयस्य मुखादेरतिरोहितरूपिणः अतिरस्कृतस्वरूपस्य। सर्वधनादित्वादिन् प्रत्ययः। आरोप्यमाणं चन्द्रादि। उपरञ्जकं ताद्रूप्यप्रतीतिमात्रजनकम्। अत्र आरोपस्य तावतैव चरितार्थत्वान्न पुनः परिणामवत् प्रकृतोपयोगान्तमारोपविवक्षेति भावः। यदेवंविधं तद्रूपकम्। प्रकृतमप्रकृतेन रूपवत् क्रियत इति लक्ष्यनिरुक्तिः। तदुक्तम्। 'ततो विषयिरूपेण रूपवान् विषयो यतः। आरोपणेन क्रियते तेनैतद्रूपकं मतम् ॥' इति। विशेषणकृत्यमाह। **अत्रारोपविषयस्येत्यादिना**। तस्य विभागमाह। **तस्य प्रथममित्यादिना**। समस्तवस्तुविषयं लक्षयति। **यत्रेति**। आरोपविषयवदारोप्यमाणानामपि यत्र शब्देनोपादानं तत् समस्तवस्तुविषयमित्यर्थः। उदाहरति। **यात्रेति**।

शत्रुस्त्रीनयनाम्बुवृष्टिरसकृज्जातानया सर्वतो
वर्धन्ते हरिदन्तरेषु जगदानन्दा यशःकन्दलाः ॥

यत्रावयवनिरूपणादवयविनो रूपणं गम्यते तदेकदेशविवर्ति रूपकम् ।

यथा

प्रसाधिताशावलयान्तरालः शौर्याकरः काकतिवीररुद्रः ।
विकस्वरैर्वासनया त्रिलोकीं गुणप्रसूनैः सुरभीकरोति ॥

अत्रावयवानां गुणानां प्रसूनत्वरूपणेन नृपतेः कल्पशाखित्वं निरूप्यते । तस्मादेकदेशविवर्तित्वम् । यथा वा

मथिताद्वैरिवाराशेर्भुजामन्दरभूभृता ।
जाता प्रतापरुद्रस्य कीर्तिर्लोकान् धिनोत्यमून् ॥

अत्र वैरिजनस्य वाराशित्वरूपणेन भुजस्य मन्दराद्रित्वरूपणेन च जातायाः कीर्तेः सुधात्वमर्थादापतति लोकानाममरत्वं चेत्येकदेशविवर्ति रूपकम् ।

अत्र यात्राप्रावृषीत्यादावयवरूपणम् । यशःकन्दला इत्यवयविरूपणम् । ननु यशांसि कन्दला इवेत्युपमितसमासः प्राप्नोति यशांस्येव कन्दला इति रूपकसमासोऽपि । उभयोः साधकबाधकाभावात् संदेहसंकर एवायं तेन रूपकमेवेति कथं निश्चीयते इति चेत् सत्यम् । जगदानन्दा इति सामान्यप्रयोगसंभवान्नोपमितसमासः किं तु मयूरव्यंसकादित्वाद्रूपकसमास एव तेन रूपकमेवेदं नोपमा । एवमुत्तरत्रापि साधकबाधकयोरुद्भावनं द्रष्टव्यम् । एकदेशविवर्ति रूपकं लक्षयति । **यत्रेति** । उपलक्षणमेतत् । तेन यथायोगमवयवावयविनोरेकदेशस्य शाब्दत्वार्थत्वाभ्यामेकदेशविवर्त्ति रूपकमिति लक्षणं यथोदाहरणं द्रष्टव्यम् । अत एव आह काव्यप्रकाशकारः । 'श्रौता आर्थाश्च ते यस्मिन्नेकदेशविवर्ति तत्' इति । एकदेशे विशेषण वर्तनादेकदेशविवर्तीत्यर्थः । उदाहरति । **प्रसाधितेति** । प्रसाधिताशावलयान्तरालो वशीकृतदिङ्मण्डलः । विकस्वरैर्विकासिभिः । 'स्थेशभास' इत्यादिना वरच्प्रत्ययः । अवयवरूपणादवयविरूपणं गम्यत इत्याह । **अत्रेति** । उदाहरणान्तरमाह । **मथितादिति** । पूर्वोदाहरणे अवयवरूपणादवयविरूपणस्य गम्यत्वमत्र त्ववयवस्यापीति भेदः । 'निरकासयद्रविमपेतवसुं वियदालयादपरदिग्गणिका' इत्यत्र रविशब्देन विटप्रतीतेरवयवैकदेशमात्रगम्यत्वेऽप्येकदेशविव-

यत्रावयवनिरूपणमात्रे कविसंरम्भविश्रान्तिस्तन्निरवयवं रूपकम् । अवयविनिरूपणमात्रेऽपि तदेव ।

तत्र केवलं यथा

यात्रारम्भविजृम्भमाणसुभटप्रक्ष्वेडिताम्रेडितै-
र्निस्साणध्वानिभिः स्फुटं प्रतिदलद्रोदःकटाहान्तरैः ।
क्षुब्धेष्वब्धिषु कम्पितेषु गिरिषु श्रुत्यैव मुञ्चन्त्यसून्
भीताः काकतिवीररुद्रनृपतेः प्रत्यर्थिनः पार्थिवाः ॥

अत्र रोदसः कटाहत्वं निरूप्यते । मालानिरवयवं यथा

राज्ञां मौलिविभूषणस्रगमला दिक्कुञ्जरश्रोत्रयोः
स्फारं चामरभूषणं धरणिभृच्छृङ्गेषु गङ्गासरित् ।
व्योम्नः क्षौमवितानमुज्ज्वलतरं मुक्ताकलापो भुवः
स्फारः काकतिवीररुद्रयशसां जागर्ति विस्फूर्जितम् ॥

रूपकहेतुरूपकं परम्परितरूपकम् ।

रूपकद्वयमात्रव्यवस्थितत्वादस्य न समस्तवस्तुविषयेऽन्तर्भावः ।

श्लिष्टकेवलपरम्परितं यथा

प्रतापरुद्रदेवस्य मण्डलाग्रविधुन्तुदः ।
अखण्डविक्रमोद्दामो ग्रसते राजमण्डलम् ॥

र्तिरूपकत्वं द्रष्टव्यम् । निरवयवं लक्षयति । **यत्रेति** । पूर्वत्रावयवमात्रेऽन्यत्रावयवान्तरे च रूपणाभावान्निरवयवमिति भावः । अत्रैकस्यारोपविषयस्यैकमेवारोप्यमाणं चेत् केवलम् । अनेकं चेत् मालेति द्वेधा । तत्राद्यमुदाहरति । **यात्रारम्भेति** । प्रक्ष्वेडिताम्रेडितैः सिंहनादावृत्तिभिः । रोदो ब्रह्माण्डमेव कटाहः पात्रविशेषः क्षुब्धेषु क्षुभितेष्वित्यर्थः । व्याख्यातमेतद्रसप्रकरणे । द्वितीयमुदाहरति । **राज्ञामिति** । गङ्गा भागीरथी । विस्फूर्जितं विजृम्भणम् । अत्रैकस्य यशसो माल्याद्यारोप्यमाणानेकत्वान्मालानिरवयवम् । परम्परितं लक्षयति । **रूपकेति** । रूपकं हेतुर्यस्य तत् तथोक्तम् । अत एव परम्परास्य संजाता परम्परितमित्यन्वर्थम् । एकरूपकसापेक्षं रूपकं परम्परितमित्यर्थः । तेनानेकरूपकसापेक्षे समस्तवस्तुविषये नान्तर्भावोऽस्येत्याह । **रूपकद्वयेति** । **प्रतापेति** । मण्डलाग्रः खड्ग एव विधुन्तुदो राहुः । राजमण्डलं क्षत्रियसमूह एव राजमण्डलं चन्द्रबिम्बम् । अत्र मण्डलाग्रविधुन्तुद इति रूपणं राजमण्डलमेव राजमण्डलमिति श्लिष्टरूपके निमित्तमेकमेवेति श्लिष्टकेवलपरम्परितम् ।

श्लिष्टमालापरम्परितं यथा

पद्मोल्लाससहस्रभानुरसकृत्सन्मार्गचर्याबुधः
क्ष्माभृत्पक्षभिदाशनिः कुवलयालंकारराकाशशी ।
नित्योद्यत्सुमनोविकाससुरभिः कल्याणसंपत्सुर-
क्षोणीभृद्भुवनाश्रयाम्बुधिरयं श्रीवीररुद्रो नृपः ॥

अश्लिष्टकेवलपरम्परितं यथा

काकतीयस्य दुग्धाब्धेर्यशोलीलामहोर्मयः ।
दिक्कूलमुद्रुजाटोपाः खेलन्त्यभ्रंकषोच्छ्र्याः ॥

अश्लिष्टमालापरम्परितं यथा

दोराशीविषजिह्वया रिपुवनश्रेणीमहावात्यया
शौर्योग्रानलधूम्यया जयरमायोषाविलासभ्रुवा ।
संहृष्यद्धरणीविलासशिखिनीसंवासयष्ट्या जगत्-
प्रासादार्गलया कृपाणलतया रुद्रो नृपः क्रीडति ॥

पद्मेति । पद्माया लक्ष्म्या उल्लास एव पद्मानामुल्लासः । तत्र सहस्रभानुः सूर्यः । सन्मार्गः साधुमार्ग एव सन्मार्गो नक्षत्रमार्गः तत्र चर्यायां बुधः सौम्यः । क्ष्माभृत्पक्षो राजबलमेव । क्ष्माभृत्पक्षाः पर्वतपत्राणि तद्भिदायामशनिः कुलिशम् । कुवलयस्य भूमण्डलस्यैव कुवलयानामुत्पलानामलंकारे राकाशशी पूर्णिमाचन्द्रः । सुमनोविकासो विद्वदाह्लाद एव सुमनोविकासः पुष्पविकासः तस्य सुरभिर्वसन्तः । कल्याणसंपन्मङ्गलसंपत्तिरेव कल्याणसंपदक्षयस्वर्णसमृद्धिः । 'कल्याणमक्षयस्वर्णे कल्याणं मङ्गलेऽपि च' इति विश्वः । तस्याः सुरक्षोणीभृत् सुवर्णाचलः । भुवनं लोक एव भुवनमुदकं तदाश्रयस्याम्बुधिः । अत्र वीररुद्र एव सहस्रभानुरित्याद्यारोपपूर्वकस्य पद्मोल्लास एव पद्मोल्लास इत्याद्यारोपस्य श्लेषनिबन्धनस्यानेकधा निबन्धनात् श्लिष्टमालापरम्परितम् । **काकतीयस्येति** । दिशां कूलमुद्रुजतीति दिक्कूलमुद्रुजः आटोपो यासां तास्तथोक्ताः दिगन्तविश्रान्तसंभ्रमा इत्यर्थः । अभ्रं कषतीत्यभ्रङ्कष उच्छ्रयो यासां तास्तथोक्ताः । 'उदि कूले रुजिवहोः' 'सर्वकूलाभ्र—' इत्यादिनोभयत्र खश्प्रत्ययः । अत्र यशोलीलानां महोर्मित्वरूपणं काकतीयस्य दुग्धार्णवत्वरूपणाधीनमित्यश्लिष्टकेवलपरम्परितम् । **दोराशीविषेति** । वातानां समूहो वात्या । धूमानां समूहो धूम्या । उभयत्र 'पाशादिभ्यो यः' इति यप्रत्ययः । विलासशिखिनी क्रीडामयूरी । अर्गलो विष्कम्भः । अत्र कृपाणलतायां जिह्वाद्यनेकरूपस्य भुजादीनामा-

अश्लिष्टमालापरम्परितं वैधर्म्येणापि संभवति । यथा

त्रासान्धकारमध्याह्नाः कैतवातपरात्रयः ।
जयन्ति वीररुद्रस्य रणप्राङ्गणकेलयः ॥

एवमष्टविधस्यापि रूपकस्य वाक्यसमासगतत्वेन षोडश रूपकभेदाः संभवन्ति ॥

परिणामालंकारः ।

आरोप्यमाणमारोपविषयात्मतया स्थितम् ।
प्रकृतस्योपयोगित्वे परिणाम उदाहृतः ॥

आरोप्यमाणं प्रकृतोपयोगीत्यनेन सर्वालंकारव्यावृत्तिः ।

शीविषायारोपप्रतीक्षत्वादश्लिष्टमालापरम्परितम् । सर्वत्र चात्र हेतुहेतुमद्भावोऽयमलङ्कारसर्वस्वकारमतेनोक्तः । काव्यप्रकाशकारस्तु विपरीतमवोचत् । यदत्र युक्तं तद्ग्राह्यम् । व्यतिरेकेणाप्येतत् संभवतीत्याह । **अश्लिष्टेति** । त्रास एव अन्धकारस्तस्य मध्याह्नाः । शक्तस्य तस्य त्रासासंभवादिति भावः । कैतवं कपटमेवातपस्तस्य रात्रयः । धर्मयोधित्वात् तस्येतिभावः । एतच्च मुखचन्द्र इत्यादौ समासगतं । मुखमेव चन्द्र इत्यादौ वाक्यगतम् । अतः षोडशैते भेदाः । तत्रावशिष्टा भेदा अन्यतो द्रष्टव्या इत्याशयेनाह । **एवमिति** । अत्र आरोप्यमाणस्य धर्मित्वाल्लिङ्गसंख्ययोर्नैयत्येऽपि जटावल्कलालम्बिनः कपिलादावग्नय इत्यत्रैकस्य कपिलमुनेरनेकत्वमनेकविषयारोपात् । तदुक्तमलङ्कारसर्वस्वे । 'अत्र चारोप्यमाणस्य धर्मित्वादाविष्टलिङ्गसंख्याकत्वेऽपि क्वचित् स्वतोऽसंभवात् संख्यायोगस्य विषयसंख्यानं प्रत्येकमारोपात्' इति । रूपकालंकारात् प्रकृतोपयोगित्ववैधर्म्येण परिणामं लक्षयति । **आरोप्यमाणमिति** । प्रकृतस्योपयोगित्व इति विषयसप्तमी । प्रकृतोपयोगार्थमित्यर्थः । आरोप्यमाणं चन्द्रादिकम् आरोपविषयात्मतया मुखादितादात्म्येन स्थितं । मुखचन्द्रेण तापः शाम्यतीत्यत्र प्रकृतोपयोगान्तमारोपस्य विवक्षितत्वात् । वस्तुतो मुखस्यैव तापशान्तिनिमित्तत्वेन तादात्म्याभावे चन्द्रस्य प्रकृतोपयोगाभावादिति भावः । अतः प्रकृतमनपह्नुतस्वरूपमेवारोप्यमाणात्मना परिणमतीति परिणामालंकार इत्यर्थः । एवं च यत्रारोपस्य ताद्रूप्यप्रतीतिमात्रपर्यवसायितया प्रकृतमपह्नुतस्वरूपमप्रकृतरूपापन्नं भवति तस्माद्रूपकात् परिणामस्य वैलक्षण्यं दर्शितम् । तदुक्तं चक्रवर्तिना । 'विषय्याकारमारोप्य विषयस्थगनं यदा । रूपकत्वं तदा तत्र रञ्जनेन समन्वयः ॥ यदा तु विषयो रूपात् स्वस्मादप्रच्युतो भवेत् । उपयुङ्क्ते पराकारं परिणामस्तदा मतः ॥' इति । अस्य द्वैवि-

तस्य सामानाधिकरण्यवैयधिकरण्याभ्यां द्वैविध्यम् । सामानाधिकरण्येन परिणामो यथा

शश्वत् प्रसाधनविधानकृताभिलाषा
नम्रैर्भजन्ति मकुटैरवनीपवर्गाः ।
श्रीवीररुद्रनृपतेः ककुभां विजेतु-
राज्ञामयीं स्रजममन्दविलासलक्ष्मीम् ॥

वैयधिकरण्येन परिणामो यथा

किरीटमाणिक्यमयूखजालैर्विधाय पुष्पाञ्जलिमर्चयन्ते ।
फलार्थिनो रुद्रनरेन्द्रपादपीठान्तसीमानमरिक्षितीन्द्राः ॥

समासोक्तावारोप्यमाणस्य प्रकृतोपयोगित्वेऽप्यवाच्यत्वान्न परिणामेऽन्तर्भावः ।

संदेहालंकारः ।

विषयो विषयी यत्र सादृश्यात् कविसंमतात् ।
संदेहगोचरौ स्यातां संदेहालंकृतिश्च सा ॥

सा त्रिविधा । शुद्धा निश्चयगर्भा निश्चयान्ता चेति । संदेहमात्रपर्यवसायिनी शुद्धा यथा

किमेष नवमो हरित्पतिरमन्दसंपत्पदं
किमेष दशमः प्रजापतिरपूर्वसर्गक्रमः ।

ध्यमाह । **स्येति** । आद्यमुदाहरति । **शश्वदिति** । प्रसाधनविधानमलंकारविधिः । अत्रारोपेण प्रकृताज्ञातादात्म्यमापन्नाया अप्रकृतायाः स्रजो मुकुटधारणात्मकप्रकृतोपयोगात् परिणामालंकारः । अत्र विषयविषयिणोः समानविभक्तिकत्वात् सामानाधिकरण्यम् । **किरीटेति** । अत्र च पूर्ववत् परिणाम उद्भावनीयः । किं तु मयूखजालपुष्पाञ्जल्योर्विषयविषयिणोर्भिन्नविभक्तिकत्वात् वैयधिकरण्यमिति विशेषः । ननु प्रकृतोपयोगाविशेषात् परिणामसमासोक्त्योः को भेद इत्याशङ्क्यारोप्यमाणस्योपादानानुपादानाभ्यां भेद इत्याह । **समासोक्ताविति** । आरोपगर्भेष्वनवधारणात्मकं संदेहालंकारं लक्षयति । **विषय इति** । कविसंमतादित्यनेन स्थाणुर्वा पुरुषो वेति संदेहस्यालंकारता व्यावर्त्यते । वर्ण्योत्कर्षार्थं कविप्रतिभोत्थापितः प्रकृताप्रकृतगोचरः संदेहः संदेहालङ्कार इत्यर्थः । तस्य त्रेधा विभागमाह । **सेति** । आद्यमुदाहरति । **किमिति** । हरित्पतिर्लोकपालः । प्रजापतिर्ब्रह्मा । उर्वरोद्धरणचुञ्चुः क्षोणीरक्षणदक्षः । अत्र

किमेष हरिरुर्वरोद्धरणचञ्चुरेकादश-
श्शिरादिति विलोक्यते जगति वीररुद्रो जनैः ॥

निश्चयगर्भो यथा

कालाहिः किमयं मृणालमृदुलं भोगं स धत्ते पुनः
कालाभ्रूकुटिरेष किं नु मुख एवोज्जृम्भते सा पुनः ।
कालोग्रानलधूमपद्धतिरसौ किं सा पुनर्धूयते
वातेनेति विकल्प्यते प्रतिभटै रुद्रस्य कौक्षेयकः ॥

निश्चयपर्यवसाना यथा

किं कल्पद्रुममञ्जरीस्रज इमे किं वा पयोराशयः
स्वर्धेनोरथवा किमुज्ज्वलतराश्चिन्तामणेः स्फूर्तयः ।
किं वा सिद्धरसोर्मयश्चिरमिति व्यामृश्य निश्चिन्वते
सन्तः काकतिवीररुद्रनृपतेः स्मेराः कटाक्षा इति ॥

भ्रान्तिमदलङ्कारः ।

कविसंमतसादृश्याद्विषये पिहितात्मनि ।
आरोप्यमाणानुभवो यत्र स भ्रान्तिमान् मतः ॥

संपदादिसादृश्याद्वीररुद्रलोकपालादिकोटिद्वयगोचरस्य संदेहस्य तावन्मात्रपर्यवसायित्वाच्छुद्धोऽयं संदेहभेदः । ननु नवमादिपदविरहे केवललोकपालादीनामारोप्यमाणत्वसंभवादस्तु संदेहः । नवमादिपदप्रयोगे तु लोकपालादीनां वीररुद्रत्वेन संभावनादुत्प्रेक्षेयं न संदेह इति चेत् सत्यम् । अस्तु संभावनमारोपो वा । यत्र कोटिद्वयावलम्बित्वं तत्र संदेह एवेति स्वमतम् । एवंविधस्थले केचिदुत्प्रेक्षाश्रयः संदेह इत्याहुः । उत्प्रेक्षा एव इत्यन्य इत्यादि सर्वमलंकारसर्वस्वे स्पष्टम् । द्वितीयमुदाहरति । **कालाहिरिति** । भोगं सर्पशरीरम् । कालभ्रूकुटिरन्तकभ्रूभङ्गः । कालोग्रानलः प्रलयकालाग्निः । तस्य धूमः पद्धतिर्धूमरेखा । धूयते कम्प्यते । अत्र कौक्षेयकं कृष्णसर्पादिरूपतया संदिह्य सुकुमारशरीरादिविशेषादर्शनेन सर्पादिनिषेधनिश्चयेऽपि कौक्षेयकनिश्चयाभावान्निश्चयगर्भोऽयं संदेहः । तृतीयमुदाहरति । **किमिति** । सिद्धरसोर्मयः सुधारसकल्लोलाः । व्यामृश्य कल्पद्रुममञ्जरीमाल्यादिरूपेण संदिह्य । स्मेराः स्मितप्रधानाः सानुग्रहा इत्यर्थः । कटाक्षा इति निश्चिन्वते । अत एव निश्चयान्तोऽयं संदेहः । वीररुद्रकरुणावलोकनविषयाः सर्वे समृद्धा जीवन्तीति भावः । अन्यथार्थज्ञानत्वसाधर्म्यात् संदेहानन्तरं भ्रान्तिमन्तं लक्षयति । **कवीति** । पिहितात्मनि आच्छादितस्वरूपे ।

यथा

काकतीयविभोः कीर्तिविभवे व्याप्तरोदसि ।
दिवापि चन्द्रिकाबुद्ध्या चकोरा यान्ति निर्वृतिम् ॥

अपह्नवालङ्कारः ।

निषिध्य विषयं साम्यादन्यारोपे ह्यपह्नुतिः ।

तस्यास्त्रैविध्यम् । अपह्नुत्यारोपः आरोप्यापह्नवः छलादिशब्दैरसत्यत्वप्रतिपादनं च । आद्यद्वयस्योदाहरणम् ।

उद्वेल्लच्चतुरर्णवकिलकलो नायं चमूडम्बरो
नेदं दुन्दुभिगर्जितं त्रिपुरजित्कल्पान्तढक्कारवः ।
इत्थं रुद्रनरेन्द्रधाटिषु महीभारावनम्रीभव-
च्छेषाशेषशिरस्सु विस्मितमथ भ्रष्टं दिगीशैरपि ॥

छलादिशब्दैरसत्यत्वप्रतिपादनं यथा

सर्वां काकतिवीररुद्रधरणीनाथच्छलेन क्षितिं
पातुं मध्यमलोकपालपदवीं प्राप्तः स्वयंभूः शिवः ।
नैवं चेद्विषमावलोकनकलामात्रेण भस्मीकृतै-
र्जातं वैरिपुरैः कथं कथमवाग्भूतं च भूभृद्गणैः ॥

भ्रान्तिश्चित्तधर्मोऽस्यास्तीति भ्रान्तिमान् । कविप्रतिभोत्थापितः प्राकरणिकं प्रत्यप्राकरणिकत्वेनोपलम्भो भ्रान्तिमानित्यर्थः । एतेन सादृश्यमात्रनिबन्धनायाः शुक्तिरजतादिभ्रान्तेर्नालंकारत्वमिति दर्शितम् । दोषमूलायास्तु किमुतेति भावः। उदाहरति । **काकतीयेति** । व्याप्तरोदसि व्याप्तब्रह्माण्डे । अत्र कीर्त्यां चन्द्रिकानुभवात् भ्रान्तिः । सादृश्याद्वस्त्वन्तरप्रतीतिसाम्याद् भ्रान्तिमदनन्तरमपह्नुतिं लक्षयति । **निषिध्येति** । अन्यारोपे आरोप्यमाणप्रतीतावित्यर्थः । तस्यास्त्रैविध्यं विविनक्ति । **अपह्नुत्यारोप इत्यादि** । उद्वेल्लदित्यारोप्यापह्नवः । नेदं दुन्दुभिगर्जितमित्यपह्नुत्यारोपः । **नरेन्द्रधाटिष्विति** । कृदिकारः । तल्लक्षणं तु 'शत्रुदेशावमर्दाय सद्यः सुभटघोटकैः। विजिगीषोः प्रवृत्तिर्या सा धाटीति निगद्यते ॥' इत्याहुः । **सर्वामिति** । धरणीनाथच्छलेनेत्यत्र छलशब्देन नायं धरणीनाथः । किं तु स्वयंभूः शिव इति राज्ञः सत्यत्वं प्रतिपाद्यते। तदेव समर्थयते । **नैवमिति** । विषमावलोकनं निग्रहदृष्टिः । अन्यत्र तृतीयनयनदृष्टिः । वैरिपुरैरसंख्यैः त्रिभिश्च कर्तृभिर्भस्मीभूतैः कथं जातं जज्ञे । भूभृद्गणैः राजसमूहैः। अन्यत्र भूभृता कैलासेन गणैः प्रमथैश्च कथमवाग्भूतं न्यग्भूतमित्युभयत्र भावे

उल्लेखालङ्कारः ।

अर्थयोगरुचिश्लेषैरुल्लेखनमनेकधा ।
ग्रहीतृभेदादेकस्य स उल्लेखः सतां मतः ॥

रुच्यर्थयोगाभ्यां यथा

लक्ष्मीनिवासगृहमित्यखिला नरेन्द्राः
शौर्यातिभूमिखनिरित्यरिवीरवर्गाः ।
विद्याविहारपदवीति च लब्धवर्णाः
श्रीकाकतीन्द्रनगरीमनिशं स्तुवन्ति ॥

श्लेषेण यथा

उग्रः सपत्नेषु गुणेषु भास्वान् रामः प्रतीकेषु रणेषु भीमः ।
लीलासु लक्ष्म्याः पुरुषोत्तमश्चेत्याचक्षते रुद्रनृपं कवीन्द्राः ॥

अथाध्यवसायगर्भालङ्कारद्वयं निरूप्यते । विषयविषयिणोरन्यतरनिगरणेनाभेदप्रतिपत्तिरध्यवसायः । स द्विविधः । विषयिनिगरणेन विषयनिगरणेन च ।

क्तः । ईश्वरस्य गिरीशत्वात् प्रमथाधिपत्वाच्चेति भावः । आरोपगर्भेषु परिशेषादुल्लेखं लक्षयति । **अर्थेति** । अर्थेन प्रयोजनेन योगोऽर्थित्वं लिप्सेति यावत् । रुचिरभिरतिः । श्लेषः प्रसिद्धः । एतैः समस्तैर्व्यस्तैर्वा यथायोगं ग्रहीतृगतैरेकस्य वस्तुनो नानाधर्मयोगादनेकधोल्लेखनं निर्धारणमुल्लेखालंकार इत्यर्थः । सर्वालंकारव्यावर्तकेन ग्रहीतृभेदादित्यनेन विषयभेदोऽप्युपलक्ष्यते । **लक्ष्मीति** । शौर्यातिभूमेः पराक्रमातिशयस्य । खनिराकरः । लब्धवर्णा विद्वांसः । अत्रैकस्याः काकतीन्द्रनगर्याः समृद्ध्यादिधर्मयोगान्नरेन्द्रादिग्रहीतृभेदेन रुच्यर्थयोगाभ्यां लक्ष्मीनिवासगृहादिरूपतयानेकधोल्लेखनादुल्लेखः । **उग्र इति** । सपत्नेषु शत्रुषु उग्रः कपर्दी क्रूरश्च । गुणेषु भास्वान् सूर्यस्तेजस्वी च । प्रतीकेष्वङ्गेषु रामो दाशरथिरभिरामश्च । लक्ष्म्या लीलासु पुरुषोत्तमो विष्णुः पुरुषश्रेष्ठश्च । अत्र ग्रहीतृभेदाभावेऽपि सपत्नादिविषयभेदाच्छलेषेणोग्रत्वाद्यनेकधर्मोल्लेखनादुल्लेखः । अभेदप्रतिपत्तेरविशेषेऽप्यारोपादध्यवसायस्योत्कृष्टत्वाच्चारोपमूलानन्तरमध्यवसायमूलालंकारप्रस्ताव इत्याशयेनाह । **अथेति** । मूलभूतमध्यवसायं निरूपयति । **विषयेति** । एकतरपरिशेषो मा भूदित्यन्यथा व्याचष्टे । **स द्विविध इति** । निगरणमसत्यत्वमित्यर्थः । अन्यथा विषयनिगरणेनाभेदप्रतिपत्तिरध्यवसाय इति सर्वसंप्रतिपन्नेन स्वयमपि पूर्वोक्तेनाध्यवसायलक्षणेन विरोधात् । यदा विषयिणोऽसत्यत्वं तदाध्यवसायः साध्यः । यदा विषयस्यासत्यत्वं तदाध्यवसायः

उत्प्रेक्षालङ्कारः।

यत्रान्यधर्मसंबन्धादन्यत्वेनोपतर्कितम् ।
प्रकृतं हि भवेत् प्राज्ञास्तामुत्प्रेक्षां प्रचक्षते ॥

यत्राप्रकृतगुणक्रियासंबन्धादप्रकृतत्वेन प्रकृतस्य संभावनमुत्प्रेक्षा। सा द्विविधा। वाच्या प्रतीयमाना च। संभावनाप्रतिपादकानां नूनंध्रुवंप्रायइत्येवमादीनां प्रयोगे वाच्या। अप्रयोगे तु प्रतीयमाना। जातिक्रियागुणद्रव्याणां चतुर्णामध्यवसायविषयत्वेन सा द्विविधा प्रत्येकं चतुर्विधा। तेषां भावाभावरूपतया द्वैविध्येऽष्टविधा। अध्यवसायस्य गुणनिमित्तत्वेन क्रियानिमित्तत्वेन च द्वैविध्ये प्रत्येकं षोडशप्रकारा। निमित्तस्य वाच्यत्वगम्यत्वाभ्यां द्वैविध्यं वाच्योत्प्रेक्षायामेव। प्रतीयमानोत्प्रेक्षायामिवाद्यनुपादाने निमित्तस्य चाप्र-

---

सिद्ध इति विवेकः। तथा हि यदा चन्द्रादिविषयिगतं माधुर्यादिकं विषयभूते मुखादावुपनिबद्धं मुखं मुखत्वेन जानन्नेव नूनमिदं चन्द्र इति प्रयुङ्क्ते तदा विषयी चन्द्रो मुखत्वेनासत्यो निगीर्णः प्रतिभाति विषयस्तु परमार्थतः सत्य एव। एवं सत्यासत्ययोरभेदप्रतिपत्तेरसंभवान्नूनमादिशब्दैर्विषयिणोऽपि सत्यत्वसमर्थनादध्यवसायः साध्य इत्यत्राध्यवसायप्राधान्यम्। यदा तु मुखपदमनुक्त्वा चन्द्रोऽयमिति प्रयुङ्क्ते तदा वस्तुतोऽसत्यस्यापि विषयिणः सत्यता प्रतीयते। असत्यत्वनिमित्तस्य मुखपदप्रयोगस्याभावात्। विषयस्य वस्तुतः सत्यस्यापि अत्यन्तापलापादसत्याभिमतस्य निगीर्णत्वादध्यवसायः सिद्ध इत्यत्राध्यवसितप्राधान्यमित्यादि सर्वमलंकारसर्वस्वे तद्व्याख्यायां च संजीविन्यां प्रपञ्चितम्। तत् सर्वमनेनैव गतार्थमिति नेह विस्तरः क्रियते। तत्र साध्याध्यवसायमूलामुत्प्रेक्षां लक्षयति। **यत्रेति**। अन्यदप्रकृतं तस्य धर्मो गुणक्रियादिरूपः। **त**त्संबन्धात् प्रकृतमन्यत्वेनाप्रकृतत्वेनोपतर्कितं संभावितं यत्र भवेत् तामुत्प्रेक्षां प्रचक्षत इत्यर्थः। तदेतद् व्याचष्टे। **यत्रेति**। तस्या विभागमाह। **सेति**। वाच्यां लक्षयति। **संभावनेति**। अत्रादिशब्देन मन्ये शङ्के ध्रुवमित्यादीनां ग्रहणम्। जातिक्रियागुणद्रव्याणां गौश्चलति शुक्लो डित्थ इत्येवमादीनामध्यवसायविषयत्वेनोत्प्रेक्षाविषयत्वेन द्विविधा वाच्या प्रतीयमाना च प्रत्येकं चतुर्विधेत्यष्टविधा जातेत्यर्थः। तेषां जात्यादीनाम्। **अष्टविधेति**। प्रत्येकमिति शेषः। निमित्तद्वैविध्येनास्या द्वात्रिंशद् भेदा भवन्तीत्याह। **अध्यवसायस्येति**। वाच्योत्प्रेक्षायां विशेषमाह। **निमित्तस्येति**। अन्यत्रैतदभावे हेतुमाह। **प्रतीयमानेति**। 'महिलासहस्सभरिए तुह हिअअे सुहअ सा माअंती। दिअहं अणण्णसरणा अंगं तणुअं

योगे उत्प्रेक्षाया निरवलम्बनत्वात् । तथा जात्यादीनां स्वरूपेण हेतुरूपेण फलरूपेण चाध्यवसायविषयत्वे बहुविधत्वम् । वाच्योत्प्रेक्षायामपि हेतुफलयोरुत्प्रेक्षाविषयत्वे निमित्तस्योपादानमेव । तथा हि । साध्येऽनुपात्ते साधनत्वेन निर्देशो नान्वयं पुष्णाति । तथा साधनेऽनुपात्ते साध्यत्वेन निर्देशोऽपि । तयोरन्योन्यापेक्षितत्वात् । हेतूत्प्रेक्षायां फलं निमित्तम् । तस्यानुपादाने कं प्रति हेतुत्वं संगच्छते । फलोत्प्रेक्षायां साधनं निमित्तम् । तस्यानुपादाने कं प्रति फलत्वेन संघटते । यथा

प्रतापरुद्रनृपतेरपारे कीर्तिसागरे ।
मग्ना दुरीशदुष्कीर्तिसङ्गादिव जगत्त्रयी ॥

अत्रोत्प्रेक्षानिमित्तस्य मज्जनस्यानुपादाने सङ्गादिति हेतूत्प्रेक्षा न शोभामावहति । यथा वा

जयश्रीवासपद्मस्य विकासायेव भानुमान् ।
प्रतिबिम्बमिषात् खड्गं प्रविशत्यन्ध्रभूभुजः ॥

वितणुए हि ॥' छाया । महिलासहस्रभरिते तव हृदये सुभगा सा अमान्ती । दिवसमनन्यशरणा अङ्गं तनुकं वितनुते हि ॥ इत्यत्र महिलासहस्रभरिते तव हृदये अमान्तीत्युत्प्रेक्षा प्रतीयमाना इवादिप्रयोगाभावात् । तस्यामङ्गतनूकरणं निमित्तं यदि नोपादीयेत तदा तस्या निष्प्रमाणकत्वं स्यादित्यर्थः । प्रकारान्तरेण त्रैविध्यमाह । **तथा जात्यादीनामिति** । यदा जातिस्वरूपमुत्प्रेक्ष्यते तदा तस्य भावाभावरूपतया द्विविधस्योपात्तगुणक्रियानिमित्तभेदाच्चातुर्विध्यम् । निमित्तानुपादाने तु तत्कृतभेदाभावात् द्वैविध्यमेव । इत्थं षोढा जातिस्वरूपोत्प्रेक्षा । एवं क्रियागुणद्रव्याणां भेदकल्पने मिलित्वा चतुर्विंशतिस्वरूपोत्प्रेक्षाभेदाः । हेतुफलोत्प्रेक्षयोर्निमित्तोपादाननियमात् प्रत्येकं चातुर्विध्यमेवेति द्वात्रिंशत् । प्रतीयमानोत्प्रेक्षायां सर्वत्र निमित्तोपादाननियमात् निमित्तानुपादाननिबन्धनभेदाष्टकन्यूनत्वेऽष्टाचत्वारिंशद्भेदाः । एवं षण्णवतिभेदा इत्याशयेनोक्तम् । **बहुविधमिति** । वाच्योत्प्रेक्षायामपि हेतुफलोत्प्रेक्षयोर्निमित्तोपादाननियममुदाहरणेन हृदयङ्गमीकर्तुमारभते । **तथाहीत्यादिना** । हेतूत्प्रेक्षायां फलं निमित्तम् । फलोत्प्रेक्षायां हेतुर्निमित्तम् । एवं च निमित्तनैमित्तिकयोरन्यतरोपादानेऽन्वयपोषाभावादुभयोपादाननियमे निमित्तोपादानं नियतमेवेति भावः । **प्रतापेति** । अस्पृश्यस्पर्शने स्नानस्य विहितत्वादिति भावः । **जयश्रीत्यादि** ।

अत्रोत्प्रेक्षानिमित्तस्य भानुमत्प्रवेशस्यानुपादाने जयश्रीवासकमलविकासायेवेति फलोत्प्रेक्षणमसमीचीनम् । अतः स्वरूपोत्प्रेक्षायामेव निमित्तस्योपादानुपादानाभ्यां द्वैविध्यम् । अतश्चेत्थं वाच्योत्प्रेक्षाया भेदगणना । उपात्तगुणनिमित्तजातिभावस्वरूपोत्प्रेक्षा । १ । उपात्तगुणनिमित्तजात्यभावस्वरूपोत्प्रेक्षा । २ । उपात्तक्रियानिमित्तजातिभावस्वरूपोत्प्रेक्षा ।३। उपात्तक्रियानिमित्तजात्यभावस्वरूपोत्प्रेक्षा ।४। अनुपात्तनिमित्तजातिभावस्वरूपोत्प्रेक्षा । ५ । अनुपात्तनिमित्तजात्यभावस्वरूपोत्प्रेक्षा । ६ । उपात्तगुणनिमित्तजातिभावहेतूत्प्रेक्षा । ७ । उपात्तगुणनिमित्तजात्यभावहेतूत्प्रेक्षा । ८ । उपात्तक्रियानिमित्तजातिभावहेतूत्प्रेक्षा । ९ । उपात्तक्रियानिमित्तजात्यभावहेतूत्प्रेक्षा । १० । उपात्तगुणनिमित्तजातिभावफलोत्प्रेक्षा । ११ । उपात्तगुणनिमित्तजात्यभावफलोत्प्रेक्षा । १२ । उपात्तक्रियानिमित्तजातिभावफलोत्प्रेक्षा । १३ । उपात्तक्रियानिमित्तजात्यभावफलोत्प्रेक्षा । १४ । एवं चतुर्दश भेदा जात्युत्प्रेक्षा । अनेनैव क्रमेण गुणक्रियाद्रव्योत्प्रेक्षापि परिगणनीया । एवं च वाच्योत्प्रेक्षायाः षट्पञ्चाशद् भेदाः । प्रतीयमानोत्प्रेक्षायास्त्वष्टचत्वारिंशद् भेदः । अत्र स्वरूपोत्प्रेक्षायामपि निमित्तोपादाननियमात् निमित्तस्य गम्यत्वे गुणरूपत्वेन क्रियारूपत्वेन च चारुत्वविशेषाभावादेक एव भेदो गण्यते । गुणक्रिययोरुत्प्रेक्षाविषयत्वमुत्प्रेक्षानिमित्तत्वं चाभ्युपगतम् । प्राचामलंकारप्रबन्धेषु षण्णवतिभेदोत्प्रेक्षेति गणनामात्रम् । चारुत्वातिशयस्तु षट्पञ्चाशत एव । भेदानाम् तत्र यथासंभवमुदाहरणानि ।

उपात्तगुणनिमित्तजातिभावस्वरूपोत्प्रेक्षा यथा

स्पष्टम् । बुद्धिसौकर्यार्थं भेदगणनामाह । **अतश्चेत्यादिना** । निगदव्याख्यानमेतत् । प्रतीयमानोत्प्रेक्षाया भेदाष्टकन्यूनत्वे निमित्तमाह । **अत्रेति** । यथा निमित्तस्योपादाने निमित्तभेदाद्भेदस्तथानुपादाने नास्तीत्याह । **निमित्तस्येति** । गम्यत्वेनानुपादानादिति भावः । अत एव तत्र गुणक्रियारूपनिमित्तभेदनिबन्धनस्य विच्छित्तिविशेषस्यानुत्पन्नपुत्रनामकरणकल्पत्वात् एक एव भेदो गण्यत इत्याह । **गुणरूपत्वेनेत्यादि** । **गुणक्रिययोरिति** । न तु जाति-

कीर्तिः काकतिवीररुद्रनृपतेः सिंहासनाध्यासिनः
प्राचां भूमिभुजां यशः पिदधती कोटीन्दुतुल्यद्युतिः ।
रक्षादक्षिणराजलाभजनितामन्दप्रमोदोत्थिता
त्रैलोक्याट्टहसप्रभेव ककुभां प्रान्तेषु विद्योतते ॥

अत्र प्रभाशब्दो जातिवचनः । त्रैलोक्याट्टहसप्रभायाः कविप्रौढोक्तिसिद्धत्वान्नोपमाशङ्कावकाशः । उपात्तक्रियानिमित्तजातिभावस्वरूपोत्प्रेक्षा यथा

वीरस्य रुद्रनृपतेः प्रियवल्लभस्य
राज्याभिषेकसलिलैः सरसीकृतायाः ।
सद्यः समुच्छ्वसितसान्द्रपरागरेखा-
क्षोण्याः प्रमोदपुलकाङ्कुरमञ्जरीव ॥

अत्र पुलकाङ्कुरमञ्जरीवेत्युत्प्रेक्षायां सरसीकरणं क्रियारूपं निमित्तम् । अनुपात्तनिमित्तजातिभावस्वरूपोत्प्रेक्षा यथा

प्रतापरुद्रस्य नखेन्दुकान्तिः प्रणामभाजां पदयोर्नृपाणाम् ।
ललाटलग्ना विधिनिर्मितताया वर्णावलेर्वाचनदीपिकेव ॥

अत्र दीपिकेवेति जातिवचनाज्जातिरुत्प्रेक्ष्यते । उपात्तगुणनिमित्तजात्यभावस्वरूपोत्प्रेक्षा यथा

प्रतापरुद्रस्य गुणामृतोर्मिधौता विराजन्त्यमलीकृताङ्गाः ।
प्रक्षालितात्युद्धतभूमिपाला खड्गाम्बुभिः स्वच्छतरा भवन्ति ॥

द्रव्ययोरिव केवलोत्प्रेक्षाविषयत्वमिति भावः । यथायोगमुदाहरति । **कीर्तिरित्यादि** । पिदधती आच्छादयन्ती । 'वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः' इत्यकारलोपः । अट्टहसोऽट्टहासः । 'स्वनहसोर्वा' इति पाक्षिकोऽप्रत्ययः । एषा प्रमोदगुणनिमित्ता जातिभावस्वरूपोत्प्रेक्षा । अत्राट्टहासप्रभायाः स्वतःसिद्धत्वेऽपि त्रैलोक्यसंबन्धित्वेन कविकल्पितत्वात् नोपमावकाश इत्याह । **त्रैलोक्येति** । अत एवात्रेवशब्दोऽपि संभावनावाचको नोपमावाचकः । तदुक्तं चक्रवर्तिना । 'यदायमुपमानांशो लोकतः सिद्धिमृच्छति । तदोपमैव येनेवशब्दः साधर्म्यसूचकः ॥ यदा पुनरयं लोकादसिद्धेः कविकल्पितः । तदोत्प्रेक्षैव येनेवशब्दः संभावनापरः ॥' इति । **वीरस्येति** । प्रिया वल्लभा प्रेयसी यस्य प्रियवल्लभस्य । **पुलकमञ्जरीवेत्युत्प्रेक्षायामिति** । जातिभावस्वरूपोत्प्रेक्षायामित्यर्थः । **क्रियारूपमिति** । निमित्तमिति शेषः । **प्रतापरुद्रस्येति** ।

अनुपात्तनिमित्तजात्यभावस्वरूपोत्प्रेक्षा यथा

दिशां जेतुर्विश्वप्रथितमहसो रुद्रनृपते-
र्जयप्रस्थानोद्यत्करितुरगसंमर्दजनितम् ।
रजः कृत्वा ग्रस्तप्रतिबलमसूर्यामिव दिवं
प्रतापाख्यानन्यान् दिशि दिशि विधत्ते दिनकरान् ॥

अत्रासूर्यामिति जात्यभावः । जातिहेतूत्प्रेक्षा यथा

उदाररीत्या भुजया प्रतापरुद्रस्य विश्वैकधुरन्धरस्य ।
विश्वंभरा कोमलशय्ययेव विस्मारिता गोत्रमहीध्रवासम् ॥

अत्र शय्ययेवेति जातिहेतुत्वम् । जात्यभावहेतूत्प्रेक्षा यथा

भूमेरकल्पवृक्षत्वादिति धाता विचिन्तयन् ।
सृष्टवान् काकतीशानां निर्व्याजत्यागवैभवम् ॥

अत्राकल्पवृक्षत्वादिति जात्यभावस्य हेतुत्वम् । जातिफलोत्प्रेक्षा यथा

नूनं विश्वंभराधारस्तम्भीभवितुमायतौ ।
वीररुद्रनरेन्द्रस्य भुजावाजानुलम्बिनौ ॥

अत्र स्तम्भीभवितुमिति जातेः फलत्वम् । जात्यभावफलोत्प्रेक्षा यथा

पशूनवध्यानालोक्य शत्रवः काकतीशितुः ।
प्रायेणामानुषत्वाय तृणवृत्तिं समाश्रिताः ॥

अत्र वाचनदीपिकेवेति जातिभावस्वरूपोत्प्रेक्षायां निमित्तं नोपात्तम् । **दिशामिति** । रजः कर्तृ । दिवमसूर्यामिव कृत्वेत्यत्र जात्यभावस्वरूपोत्प्रेक्षा अनुपात्तनिमित्ता । **उदारेति** । उदाररीत्या उदारस्वभावया । गोत्रमहीध्रवासं कुलपर्वतनिवासम् । **विस्मारितेति** । 'गतिबुद्धि' इत्यादिना अण्यन्तकर्त्र्या विश्वंभरायाः कर्मत्वं तस्मिन्नभिधेये कर्मणि क्तः । 'ण्यन्ते कर्तुश्च कर्मणः' इति वचनात् । अत्र शय्ययेवेति जातिभावहेतूत्प्रेक्षायाः पर्वतनिवासविस्मरणं फलं निमित्तम् । **भूमेरिति** । निर्व्याजनं निरुपाधिकं त्यागवैभवमौदार्यातिशयो यस्य तं तथोक्तम् । काकतीशानं सृष्टवानिति फलं प्रत्यकल्पवृक्षत्वादिवेति जात्यभावहेतूत्प्रेक्षा । **नूनमिति** । भुजयोराजानुलम्बित्वं पुरुषस्य भाग्यलक्षणम् । तदुक्तं नाटके तृतीयेऽङ्के । अत्राधारस्तम्भीभवितुमिति जातिभावफलोत्प्रेक्षायामायतत्वगुणो निमित्तम् । **पशूनिति** । अत्रामानुषत्वायेति जात्यभावफलोत्प्रे-

अत्रामानुषत्वायेति जात्यभावस्य फलत्वम् । क्रियास्वरूपोत्प्रेक्षा यथा

श्रीकाकतीयनृपतेर्द्विषदङ्गनानां
श्वासोर्मिभिः सपदि मर्मरितान्तरालाः ।
तासां निवासविधये कृतयाचनानां
प्रत्युत्तराणि दधतीव मरोर्वनान्ताः ॥

क्रियास्वरूपाभावोत्प्रेक्षा यथा

विमुखे सति काकतिक्षितीन्द्रे वनसीमापि कठोरकण्टकाग्रा ।
चिकुरेषु विकर्षति प्रतीशानददानेव निजान्तरप्रवेशम् ॥

अत्राददानेति क्रियास्वरूपाभावः । क्रियाहेतूत्प्रेक्षा यथा

राज्ञां गर्वाङ्कुरोद्भेदाः परिम्लाना दिने दिने ।
काकतीन्द्रप्रतापार्कतीव्रोष्माभिभवादिव ॥

अत्राभिभवादिवेति क्रियाहेतुत्वम् । (क्रियाहेत्वभावोत्प्रेक्षा यथा

कपोलफलकावस्याः कथं भूत्वा तथाविधौ ।
अपश्यन्ताविवान्योन्यमीदृशीं क्षामतां गतौ ॥)

क्रियाफलोत्प्रेक्षा यथा

दम्भोलिसंरम्भमहाजिगोपः प्रस्थानभेरीनिनदोऽन्ध्रभर्तुः ।

क्षायां तृणवृत्तिसमाश्रयणक्रिया निमित्तम् । एवमुत्तरत्रापि तादर्थ्यप्रतिपादकचतुर्थ्यादिश्रवणे फलत्वम् । तृतीयादिविभक्त्या सामर्थ्येन वा हेतुत्वं चेत्यादिकमूहनीयम् । **श्रीकाकतीयेति** । मर्मरः पर्णध्वनिः । 'अथ मर्मरः । स्वनिते वस्त्रपर्णानाम्' इत्यमरः । तद्वन्ति कृतान्यन्तरालानि येषां ते तथोक्ता इति गुणनिमित्तकथनं दानोत्प्रेक्षायाम् । **विमुख इति** । प्रतीशान् प्रत्यर्थिभूपतीन् । चिकुरेषु केशेषु । निमित्तात् कर्मसंयोगे सप्तमी । **विकर्षतीति** । क्रियादानाभावोत्प्रेक्षायां निमित्तम् । एवं निमित्तानुपादानेऽप्युदाहार्यम् । **राज्ञामिति** । परिम्लानत्वमुत्प्रेक्षाफलम् । क्रियाहेत्वभावोत्प्रेक्षायाः प्रतिज्ञामात्रमेव नोदाहरणमत्र दृश्यत इत्यन्यतो लिख्यते । कपोलफलकावस्याः कथं भूत्वा तथाविधौ । अपश्यन्ताविवान्योन्यमीदृशीं क्षामतां गतौ ॥ इति । अत्र दर्शनक्रियाहेत्वभावोत्प्रेक्षा क्षामतागमननिमित्ता । **दम्भोलीति** । महाजिर्महायुद्धमन्याभिभव इति यावत् । दम्भोलिसंरम्भमेव महाजिं गोपयत्याच्छादय-

लीनानिवान्वेष्टुमरातिवर्गान् विगाहते शैलगुहान्तराणि ॥

क्रियाभावफलोत्प्रेक्षा यथा

सीमाद्रिकुञ्जेषु विहारभाजः सिद्धाङ्गनाकल्पितचन्द्रिकार्घान्।
श्रीवीररुद्रस्य यशोविलासान् गायन्त्यसंस्प्रष्टुमिवान्धकारम् ॥

अत्रासंस्प्रष्टुमिवेति क्रियाभावस्य फलत्वम् । गुणस्वरूपोत्प्रेक्षा यथा

चकास्ति काकतीन्द्रस्य कृपालोकनविभ्रमः ।
प्रकृतिष्वपि सर्वासु प्रसाद इव मूर्तिमान् ॥

गुणाभावस्वरूपोत्प्रेक्षा यथा

प्रतापरुद्रस्य महाभिषेकपयःकणैः शीतालिताखिलाङ्गा ।
प्रशान्तभारार्तफणीन्द्रागाढश्वासानिलोष्मेव विभाति पृथ्वी ॥

अत्र प्रशान्तोष्मेति गुणाभावः । गुणहेतूत्प्रेक्षा यथा

जयश्रियामाश्रयतामुपैति श्रीवीररुद्रस्य रणे कृपाणः ।
जयश्रियं वैरिमहीपतीनां समुत्सुको हर्तुमसूययेव ॥

अत्रासूययेवेति गुणहेतुत्वम् । गुणाभावहेतूत्प्रेक्षा यथा

जाता वयं संप्रति वीररुद्रनरेन्द्रगम्भीरिमगुल्फदघ्नाः ।
इत्यप्रमोदादिव जीवनेषु मालिन्यमम्भोनिधयो भजन्ति ॥

तीति तथोक्तः । तिरस्कृताशनिध्वनिरित्यर्थः । **अन्वेष्टुमिवेति** । अन्वेषणक्रियाफलोत्प्रेक्षा गुहान्तरगाहनक्रियानिमित्ता । **सीमाद्रीति** । सीमाद्रिर्लोकालोकः । कल्पितश्चन्द्रिकाया इवार्घः पूजाविधिर्येषां तान् तथोक्तान् चन्द्रिकासदृशानित्यर्थः । यशोगानस्यान्धकारासंस्पर्शः फलम् । **चकास्तीति** । प्रकृतिषु प्रजासु प्रसादगुणस्य मूर्तिमद्विशेषणादुत्प्रेक्षालाभः । निमित्तमत्र नोक्तम् । **प्रतापेति** । अन्यत्र धर्मिणि धर्म्यन्तरोत्प्रेक्षा । अत्र तु भूरूपे धर्मिण्यूष्मप्रशान्तिलक्षणो धर्म उत्प्रेक्ष्यते । तत्र शीतलाङ्गत्वं निमित्तमुपात्तम् । **जयेति** । विशिष्टवस्तुसंग्रही लेशतोऽपि तस्यान्यत्रावस्थानं न सहत इति भावः । अत एवोपात्तनिमित्तेयं गुणहेतूत्प्रेक्षा । **जाता इति** । पार्श्वनिस्सृतौ पादग्रन्थी गुल्फौ तद्दघ्नास्तत्प्रमाणाः । 'प्रमाणे द्वयसच्' इत्यादिना दघ्नच्प्रत्ययः । नरेन्द्रगम्भीरिम्णो गुल्फदघ्नाः तदपेक्षयातिस्वल्पगाम्भीर्या इत्यर्थः । जीवनेषूदकेषु वृत्तिषु च मालिन्यं कार्ष्ण्यं क्लिष्टत्वं च भजन्ते । अत्राप्रमोदादिवेति गुणहेत्वभावोत्प्रेक्षाया न श्लेषो बाधकः किं त्वङ्गमेव । तदुक्तं रुचकेन । 'एषार्थाश्रयापि धर्मविषये श्लिष्टशब्दहेतुका क्वचित्

अत्राप्रमोदादिवेति गुणाभावस्य हेतुत्वम् । गुणफलोत्प्रेक्षा यथा

आशिषां विषधूम्राणां नैर्मल्यार्थमिवोत्सुकाः ।
भुजङ्गयः काकतीन्द्रस्य गुणान् गातुं सुधामुचः ॥

अत्र नैर्मल्यार्थमिति गुणस्य फलत्वम् । गुणाभावफलोत्प्रेक्षा यथा

अरण्यवासोचितबान्धवासु मृगीष्ववैरार्थमिवाशरण्याः ।
त्रिलिङ्गदेशेश्वरवैरिनार्यः पराङ्मुखा लोचनविभ्रमेषु ॥

अत्रावैरार्थमिति गुणाभावस्य फलत्वम् । द्रव्यस्वरूपोत्प्रेक्षा यथा

न नित्यमस्मिन् परिपूर्णतेति त्यक्त्वा नभः क्षोणितलावतीर्णः ।
आनन्दयन्निन्दुरिव स्वधाम्ना विभाति लोके नवकाकतीन्द्रः ॥

द्रव्यस्वरूपाभावोत्प्रेक्षा यथा

अनन्यसाधारणदानशौण्डे सद्यःकृतार्थीभवदर्थिसार्थे ।
श्रीकाकतीन्द्रे भुवि राजमाने द्यौः पारिजातेन विना कृतेव ॥

अत्र दिवः पारिजाताभाव उत्प्रेक्ष्यते । द्रव्यहेतूत्प्रेक्षा यथा

प्रतापरुद्रदेवेन क्ष्माभृत्पक्षविजृम्भितम् ।
समुन्मूलितमामूलादपरेणेव वज्रिणा ॥

द्रव्यहेत्वभावोत्प्रेक्षा यथा

दृश्यते' इति । चक्रवर्तिनाप्युक्तम् । 'क्वचिच्छ्लेषेण धर्मांशगतेनैषा न बाध्यते" इति । **आशिषामिति** । विषधूम्राणां विषमलिनानामाशिषां दंष्ट्राणाम् । 'आशीरुरगदंष्ट्रायाम्' इति विश्वः । गुणगाननिमित्तां गुणभावफलोत्प्रेक्षां योजयति । **अत्रेति** । **अरण्येति** । शरणे रक्षणे साधुः शरण्यः । तद्रहिता अशरण्याः अनाथा इत्यर्थः । **अवैरार्थमिवेति** । विलासविमुखा मृगाङ्गना विलासिनीर्विलोक्य वैरायन्ते तन्निषेधार्थमिवेत्यर्थः । विभ्रमविमुखत्वमत्र निमित्तम् । **नेति** । अस्मिन् नभसि नवो गुणैरपूर्वः काकतीन्द्रः । अत्रेन्दोः क्षोणितलावतीर्णस्य कविकल्पितत्वादुत्प्रेक्षाविषयत्वमेकत्वाद् द्रव्यत्वं च । **अनन्येति** । दानशौण्डो बहुप्रदः । 'स्युर्वदान्यस्थूललक्षदानशौण्डो बहुप्रदः' इत्यमरः । अस्यानन्यसाधारणत्वमर्थाद् दान इति लभ्यते । उभयोः खञ्जकुब्जादिवद्विशेषणसमासः । यद्वा तादृशदाने शौण्डो मत्तः निःसीमवितरणे निर्विचार इत्यर्थः । पारिजातस्तावदेक एव तस्य राजरूपतया भूलोके वर्तमानत्वात् कुतो दिवः पारिजात इति भावः । **प्रतापेति** क्ष्माभृत्पक्षविजृम्भितं वैरिभूपालबलविजृम्भणमन्यत्र पर्वतपक्षविजृम्भणम् ।

काकतीयप्रतापोष्मविलीनाङ्गेन मेरुणा ।
असुवर्णाचलेनेव विरिञ्चिर्व्याकुलीकृतः ॥

अत्रासुवर्णाचलेनेति हेत्वभावः । द्रव्यफलोत्प्रेक्षा यथा

दुग्धार्णवशतायेव कैलासाचलकोटये ।
नूनं प्रतापरुद्रेण यशो दिक्षु प्रसारितम् ॥

अत्र दुग्धार्णवशतायेति द्रव्यस्य फलत्वम् । द्रव्याभावफलत्वोत्प्रेक्षा यथा

वीररुद्रनरेन्द्रस्य जयप्रस्थानसंभवम् ।
रजः पिहितदिग्गोलं निराकाशमिव स्थितम् ॥

अत्र निराकाशमित्याकाशाभावाय इत्यर्थः । एवं भेदान्तरं यथासंभवमुदाहार्यम् ।

इत्यौपम्यगर्भालंकारविवेचनम् ।

अत एवापरेणेव वज्रिणेति श्लेषाङ्गा द्रव्यहेतूत्प्रेक्षा । अत्रापरशब्दाप्रयोगे शब्दमात्रसाधर्म्याच्छ्लेष एव स्यात् ; अर्थसाधर्म्ये त्विन्द्रस्य सिद्धतया प्रतीतिरुपमैव । तत्प्रयोगे तु प्रकृतो राजैवापरवज्रित्वेनाध्यवसीयते । तस्येवशब्देन साध्यत्वात् प्रतीतावप्युत्प्रेक्षैव । इवशब्दाप्रयोगे तु सिद्धत्वादध्यवसायस्यातिशयोक्तिः । इवापरशब्दयोरुभयोरप्यप्रयोगे रूपकमित्यादिविशेषा यथासंभवमूहनीयाः । **काकतीयेति** । विलीनाङ्गेन द्रवीभूतावयवेन असुवर्णाचलेन सुवर्णाचलाभावेनेत्यर्थः । अत्राभाववाचिनो नञः क्रियासापेक्षत्वेनासमर्थस्यापि 'सुडनपुंसकस्य' इति ज्ञापकात् क्वचित् समास इष्यते । यदाह कैयटः । 'असमर्थनञ्समासस्य क्वचित् साधुत्वज्ञापनायानपुंसकस्येति प्रसज्यप्रतिषेध आश्रियते' इति । **दुग्धार्णवेति** । नूनमित्येतत् द्वितीयोत्प्रेक्षासाधकम् । **वीररुद्रेति** । आकाशस्याभावो निराकाशम् । अर्थाभावेऽव्ययीभावः । ततश्चतुर्थ्या 'नाव्ययीभावादतोऽम् त्वपञ्चम्याः' इत्यम्भावः । 'कस्तूरीतिलकन्ति फालफलके देव्या मुखाम्भोरुहे' इत्यादावुपमोपक्रमोत्प्रेक्षा । 'यत्रोल्लसत्फेनततिच्छलेन मुक्ताट्टहासेव विभाति शिप्रा' इत्यादौ सापह्नवोत्प्रेक्षेत्यादिकं तु स्वयमूहनीयमित्याह । **एवमिति** । इत्थं साध्याध्यवसायमूलामुत्प्रेक्षां निर्णीय सिद्धाध्यवसायमूलामतिशयोक्तिं लक्षयति । **विषयस्येति** । यत्र विषय्यप्रकृतश्चन्द्रादिरुपनिबध्यते प्राधान्येनेति शेषः । कुतः । विषयस्य प्रकृतस्य मुखादेरनुपादानात् विषयिणा निगीर्णत्वादित्यर्थः । इदमत्रानुसंधेयम् । अध्यवसाये त्रयं संभवति । विषयो विषयी अध्यवसानव्यापारात्मकं स्वरूपं च । तत्र विषयस्य निगीर्णत्वेन स्वरूप-

अतिशयोक्त्यलंकारः ।

विषयस्यानुपादानाद्विषय्युपनिबध्यते ।
यत्र सातिशयोक्तिः स्यात् कविप्रौढोक्तिजीविता ॥

यत्र कविप्रौढोक्त्या विषयतिरोधानेन विषयी निबध्यते सातिशयोक्तिः । तस्याश्चातुर्विध्यम् । भेदेऽभेदः । अभेदे भेदः । संबन्धेऽसंबन्धः । असंबन्धे संबन्धश्चेति । कार्यकारणयोः पौर्वापर्यविपर्ययरूपा त्वनध्यवसायमूलत्वाद्व्यतिरिक्तैव । किं तु प्रौढोक्तिमूलत्वादतिशयोक्तिरिति कथ्यते । तत्र भेदेऽभेदो यथा

स्थाने कल्पतरुर्जातः काकतीयकुलोदधेः ।
लक्ष्मीपतिरसौ चित्रं मर्त्यरूपमहोत्सवः ॥

अत्र प्रतापरुद्रकल्पवृक्षयोरभेदाध्यवसायः । अभेदे भेदो यथा

औन्नत्यं महदन्यदेव महितः कोऽप्येष गम्भीरिमा
काप्यन्या सरणिः प्रतापयशसोरन्यैव बाह्वोः प्रथा ।
सर्वं नूतनमेव रुद्रनृपतेर्जाने न तन्निर्मितौ
सामग्री चतुराननेन कियती कीदृक्क्रमा कल्पिता ॥

अत्रौन्नत्यादेर्वास्तवाभेदेऽपि भेदः कल्पितः । स्वतःसिद्धकविप्रौढोक्तिसिद्धयोरौन्नत्ययोर्भेदेऽपि अभेदाध्यवसायः । संबन्धेऽसंबन्धो यथा

प्रतिपत्तेरेवाभावादध्यवसाये न कुत्रापि प्राधान्यशङ्कावकाशः । नूनमादिशब्दैरध्यवसायेन व्यापारप्राधान्ये तूत्प्रेक्षा दर्शिता । नूनमादिशब्दाप्रयोगे विषयिण एव प्राधान्येऽध्यवसायस्य सिद्धत्वादतिशयोक्तिरिति । अत एवोक्तं रुचकेन । 'अध्यवसितप्राधान्ये त्वतिशयोक्तिः' इति । इदं रजतमित्यस्यातिशयोक्तिता मा भूदित्युक्तम् । **कविप्रौढोक्तिजीवितेति**। विभागमाह। **तस्या इति**। ननु पञ्चमस्याप्यतिशयोक्तिभेदस्य संभवात् कथं चातुर्विध्यमित्याशङ्क्याह । **कार्यकारणयोरिति** । काव्यप्रकाशकारोक्तवैषम्यं त्वस्मदुपाध्यायैरेकावलीतरले समाहितामिति नेह प्रपञ्च्यते । क्रमेणोदाहरति । **स्थान इति** । कल्पतरोरुदधेरुत्पत्तिरुचिता किं तु लक्ष्मीसोदरस्यामर्त्योपयोगिनस्तस्येदमद्भुतमिति भावः । **औन्नत्यमिति** । व्याख्यातमेतत् । अत्र राजमेर्वादिसंबन्धिनोरौन्नत्याद्योर्वास्तवाभेदेऽप्यन्यदेवेत्यादिना काल्पनिको भेदः प्रतिपाद्यत इत्याह । **अत्रेति** । तर्ह्यस्मिन् भेदे नाध्यवसायलक्षणानुगतिरत आह । **स्वत इति** । स्वतः सिद्धं

शिला चिन्तारत्नं तरुरमरशाखी पशुरसौ
वियद्धेनुः सर्वं जगदपि तथा दोषविधुरम् ।
न सृष्टिर्वैधात्री तदिह चतुरश्रीः कथमियं
स्पृशेद्देवं रुद्रं सकलगुणसाम्राज्यनिलयम् ॥

अत्र विधातृसृष्टिसंबन्धेऽप्यसंबन्ध उक्तः । अतीतब्रह्मसृष्टिनेश्वरेणात्राभेदाध्यवसायः । असंबन्धे संबन्धो यथा

ब्रह्मन् मेरुगिरौ कृतेऽपि किमिदं नैवंविधास्ते मुदः
स्वामिन् सत्यमधिक्रियाद्य फलिता यद्वीररुद्रः कृतः ।
मिथ्या किं नु विकत्थसे त्रिजगतस्त्राणाय मत्प्रार्थितः
शंभुः क्ष्मामवतीर्णवानिति कथा जाता हरिब्रह्मणोः ॥

अत्र हरिब्रह्मणोरेवंविधगोष्ठ्यसंबन्धेऽपि संबन्ध उक्तः । शंभुना सह काकतीन्द्रस्याभेदाध्यवसायः । कार्यकारणयोः पौर्वापर्यविपर्ययरूपातिशयोक्तिर्यथा

मातः कथं काकतिनाथदृष्टेरग्रेसराः कामशराः पतन्ति ।

यदौन्नत्यं तदेवान्यदेवेति कविप्रौढोक्त्या सातिशयम् । अतः स्वतःसिद्धप्रौढोक्तिसिद्धयोरौन्नत्ययोः फलरूपयोर्भेदेऽप्यभेदाध्यवसायो न पुनः फलिनोस्तयोर्वास्तवभेदे सत्यभेदाध्यवसायकल्पनायोगात् । तदुक्तं चक्रवर्तिना 'अभेदाध्यवसायो हि फलेऽतिशयनादिह । न पुनः फलिनोस्तत्र भेदेऽभेदो न सिध्यति ॥' इति । किं च प्रथमोदाहरणेऽपि स्वतःसिद्धप्रौढोक्तिसिद्धवदान्यत्वयोरेवाभेदाध्यवसायो न राजकल्पवृक्षयोः । अन्यथैकत्र फलयोरध्यवसायोऽन्यत्र फलिनोरिति वैरूप्यप्रसङ्गात् । एवं च प्रतापरुद्रकल्पवृक्षयोरभेदाध्यवसाय इति यत् पूर्वमुक्तं तत् फलगताभेदाध्यवसायविषयमिति द्रष्टव्यम् । **शिलेति** । यथा चिन्तारत्नादिकं शिलात्वादिदोषदुष्टं तथा सर्वमपि जगदिति दुष्टेयं ब्रह्मसृष्टिः कथमनवद्याशेषगुणमेनं संस्पृशेदिति रुद्रदेवस्य ब्रह्मसृष्टिसंबन्धेऽप्यसंबन्धकथनम् । अत्राप्यध्यवसायं संपादयति । **अतीतब्रह्मसृष्टिनेति** । अयं च स्वतः सिद्धप्रौढोक्तिसिद्धगुणातिशयाध्यवसायमूल इति द्रष्टव्यम् । **ब्रह्मन्निति** । हरिवाक्यमेतत् । विरिञ्चिरुत्तरमाह । **स्वामिन्निति** । अधिक्रिया जगत्सर्जनाधिकारः । विष्णुर्विरिञ्चिकथनमन्यथा करोति । **मिथ्येति** । अत्रालौकिकौन्नत्यादिगुणयुक्तमेनं ब्रह्मापि निर्मातुं न शक्नोतीति भावः । असंबन्धे संबन्धं योजयति । **अत्रेति** । पूर्ववदभेदाध्यवसाय इत्याह । **शम्भुनेति** । पञ्चमं भेदमुदाहरति । **मातरिति** । कामशरपीडामसहमानायाः कस्याश्चि-

तद्रूपलावण्यजितः स्मरोऽपि नूनं गतः किंकरतामपुष्य ॥

अत्र कार्यभूतस्य स्मरशरपातस्य कारणभूतात् प्रियदृष्टिपातात् पूर्वकालत्वमुक्तम् । अथोक्तिसाम्यालंकारनिरूपणेऽतिशयोक्तिहेतुका सहोक्तिर्निरूप्यते ।

सहोक्त्यलंकारः ।

सहार्थेनान्वयो यत्र भवेदतिशयोक्तितः ।
कल्पितौपम्यपर्यन्ता सा सहोक्तिरितीष्यते ॥

यत्र भेदेऽभेदरूपतया कार्यकारणपौर्वापर्यविपर्ययरूपया चातिशयोक्त्या एकस्य प्राधान्येनान्वयेऽपरस्य सहार्थेन संबन्धे उपमानोपमेयभावः कल्प्यते तत्र सहोक्तिः । प्राकरणिकाप्राकरणिकविषयत्वादुपमानोपमेयभावस्य सहार्थसंबन्धेन द्वयोरपि प्रकृतत्वान्न तदात्मता । कार्यकारणपौर्वापर्यविपर्ययरूपातिशयोक्तिमूला सहोक्तिर्यथा

न्मात्रा सह वचनम् । तस्य काकतीन्द्रस्य । अभूषणेऽपि भूषितवद्भासमान आकारो रूपं लावण्यं कान्तिविशेषः । अनयोर्लक्षणमुक्तम् । अमुष्य काकतीन्द्रस्य । कारणं पूर्वमपरं कार्यमिति सर्वत्र नियमः । कविप्रौढोक्त्या तद्विपर्ययोऽलंकार इत्याशयेनाह । **अत्रेति** । 'अविरलविलोलजलदः कुटजार्जुननीपसुरभिवनवातः । अयमागच्छति कालो हन्त हताः पथिकगेहिन्यः ॥' इत्यादि कार्यकारणयौगपद्यमपि पौर्वापर्यविपर्यय एवेति द्रष्टव्यम् । सहोक्तेः संगतिमाह । **अथेति** । लक्षणमाह । **सहार्थेनेति** । सहशब्दस्यार्थो यस्य तेन सहार्थेन तत्पर्यायेण चेत्यर्थः । 'अनेन सार्धं विहराम्बुराशेः' इत्यादौ सहोक्तिमात्रस्यालंकारता मा भूदित्युक्तम् । **अतिशयोक्तित इति** । अत्राकाङ्क्षितमंशमध्याहारादिभिः पूरयन् व्याचष्टे । **यत्रेति** । **एकस्य प्राधान्येनान्वय इति** । यथा पुत्रेण सहागतः पितेत्यादौ पितुरागमनादिना शाब्दः संबन्धस्तद्वदिति भावः । **अपरस्य सहार्थेन संबन्ध इति** । तत्रैव पुत्रादिवदिति भावः । **उपमानोपमेयभावः कल्प्यत इति** । 'सहयुक्तेऽप्रधाने' इत्यप्रधाने तृतीयाविधानात् तदन्तस्य गुणभावादुपमानत्वम् । अर्थादितरस्य प्राधान्यादुपमेयत्वं च कल्प्यत इत्यर्थः । अत एवात्र भेदप्रधानं साधर्म्यमिति द्रष्टव्यम् । सह शाखया प्रस्तरं प्रहरतीत्यत्र प्रहरणे शाखाप्रस्तरयोरिव शाब्द एवायं गुणप्रधानभावो न वास्तवः । पित्रा सहागतः पुत्र इत्यपि सुवचत्वात् । उपमानोपमेयभावश्चात्र काल्पनिको न वास्तव इत्यत्र निमित्तमाह । **प्राकरणिकेति**। तदात्म-

अन्ध्रक्ष्माभृत्सुभटासिधारा रणेषु नीलोत्पलपत्रभासः ।
पतन्ति कण्ठेष्वरिभूपतीनां साकं सुरस्त्रीजनमुक्तमाल्यैः ॥

अत्र कृपाणपतनोत्तरकालभाविनो दिव्यमाल्यपतनस्य सहकालत्वमुक्तमिति पौर्वापर्यविपर्ययः । भेदेऽभेदरूपातिशयोक्तिमूलाश्लेषगर्भाभेदाध्यवसायरूपा चारुत्वातिशयहेतुर्यथा

दिने दिने रुद्रनराधिपस्य प्रतापलक्ष्मीरुदयं प्रयाति ।
प्रकाशिताशेषदिगन्तराला विवस्वता सार्धमनिन्द्यभासा ॥

अत्रोदयं प्रयातीति श्लेषेणोदयपर्वताभ्युदययोरभेदाध्यवसायः । अथ सहोक्तिप्रतिपक्षरूपा विनोक्तिर्निरूप्यते ।

विनोक्त्यलंकारः ।

विना संबन्धि यत् किंचिद्यत्रान्यस्य पराभवेत् ।
अरम्यता रम्यता वा सा विनोक्तिरिति स्मृता ॥

यत्र कस्यचिदसंनिधानाद्वस्तु रम्यमरम्यं वा भवेत् सा विनोक्तिः । सा द्विविधा अरम्यता रम्यता चेति । अरम्यता यथा

ता अप्रकृतरूपता । उदाहरति । **अन्ध्रेति** । अत्र दिव्यमाल्यानीव खङ्गधाराः कण्ठेषु पतन्तीत्येवं प्रतीयमानस्योपमानोपमेयभावस्य द्वयोः प्राकरणिकत्वात् वैवक्षिकत्वम् । कण्ठपतनसाधर्म्यस्य भेदप्रधानकत्वं चोपमानोपमेययोः सहार्थप्रयुक्तगुणप्रधानभावनिबन्धनं चेत्याद्युन्नेयम् । अत्र कार्यकारणपौर्वापर्यविपर्ययरूपातिशयोक्तिमूलत्वमुपपादयति । **अत्रेति** । **दिने दिन इति** । श्लेषभित्तिकाभेदाध्यवसायोऽत्र सहोक्तिमूलमित्याह । **अत्रोदयमिति** । 'कुमुददलैः सह संप्रति विघटन्ते चक्रवाकमिथुनानि' इत्यत्र श्लेषभित्तिकाभेदाध्यवसायो मूलम् । अत्र विघटनं संबन्धिभेदात् भिन्नं न तच्छिलष्टत्वमित्याह सर्वस्वकारः । 'उत्क्षिप्तं सह कौशिकस्य पुलकैः' इत्यादौ इयं मालयापि दृश्यते । अत्र कर्मसाहित्यात् सहोक्तिः पूर्वत्र कर्तृसाहित्यादिति भेदः । विनोक्तेः संगतिमाह । **अथेति** । लक्षणमाह । **विनेति** । यत्र संबन्धि यत् किंचिद्वस्तु विनान्यस्य प्रतिसंबन्धिनो रम्यता शोभनत्वमरम्यताशोभनत्वं वा पराभवेन्निवर्तेत सा विनोक्तिरित्यर्थः । फलितं व्याचष्टे । **यत्रेति** । रम्यमरम्यतारहितमरम्यं रम्यतारहितं वेत्यर्थः । व्याख्यानोक्तं व्युत्क्रमं परिहरन् विभजति । **सेति** । रम्यत्वाभावः अरम्यत्वाभावश्चेत्यर्थः । कस्मिंश्चित् सति कस्यचिद्रम्यत्वमरम्यत्वं वेति विधिमुखेनापि विच्छित्तिविशेषो नास्तीत्येवमभिधानमिति द्रष्टव्यम् । तदुक्तम् । 'सदसत्वनिवृत्तिश्चेन्निवृत्यान्यस्य वर्ण्यते । तदा द्विधा विनोक्तिः स्याद्विधिरत्र

प्रतापरुद्रदेवस्य गुणवर्णनया विना।
कीदृशी काव्यरचना संश्रृणुध्वं कवीश्वराः ॥

अत्र प्रतापरुद्रगुणवर्णनेन विना काव्यश्रियोऽशोभनत्वमुक्तम्। अनेन काव्यशोभामिच्छाद्भिः कविभिः प्रतापरुद्रगुणा वर्णयितव्या इति विधिरेव प्रकाश्यते। रम्यता यथा

कलापूर्णे नित्यं जयति जगतीन्दौ त्रिजगतो
वपुष्मत्यानन्दे विमलविभवे रुद्रनृपतौ।
विना लक्ष्म प्राप्य प्रतिदिवसपूर्णा निजतनुं
प्रकाशः स्यादिन्दुर्यदि दिवि भवेत् सोऽपि सुभगः ॥

अत्र प्रतापरुद्रे प्रकाशमाने चन्द्रमसः कलङ्केन विना शोभनत्वमुक्तम्। सकलगुणशालिनः प्रतिपक्षस्य पुरस्तात् तादृशगुणवत्तयैव रम्यता नान्यथेति।

समासोक्त्यलंकारः।

विशेषणानां तौल्येन यत्र प्रस्तुतवर्तिनाम्।
अप्रस्तुतस्य गम्यत्वे सा समासोक्तिरिष्यते ॥

यत्र प्रकृतविशेषणसाम्यादप्रस्तुतं गम्यते सा समासोक्तिः। तत् त्रिविधम्। श्लिष्टविशेषणसाम्यं साधारणमौपम्यगर्भं चेति। श्लिष्टविशेषणसाम्यं यथा

फलं भवेत् ॥' इति। आद्यमुदाहरति। **प्रतापेति**। कीदृशी रम्या न भवतीत्यर्थः। संश्रृणुध्वं व्याख्यातम्। अलंकारफलं विधिमाह। **अनेनेति**। द्वितीयमुदाहरति। **कलेति**। जगतीन्दौ भूलोकचन्द्रे रुद्रनृपतौ कलापूर्णत्वादिविशेषणैः प्रतीयमानेन चन्द्रादुत्कर्षेण जयति सति इन्दुः कलङ्कराहित्येन नित्यं पूर्णः प्रकाशत इति प्रकाशः प्रकाशमानो दिवि यदि स्याद्भूलोके त्वेतत्संनिधानेन तथाविधोऽपि न शोभत इति भावः। स चन्द्रोऽपि सुभगो भवेदित्यशोभनत्वाभावकथनं। तदेवाह। **अत्रेति**। सहोक्तिविनोक्त्योः सहार्थविनार्थयोरभावेऽपि तदर्थविवक्षायामुदाहरणमलंकारसर्वस्वादौ द्रष्टव्यम्। उक्तिसाम्यात् समासोक्तिं लक्षयति। **विशेषणानामिति**। स्पष्टम्। समासेन संक्षेपेणार्थद्वयकथनात् समासोक्तिः। विशेषणसाम्यं विभजते। **तदिति**। यत्र सकृदुच्चारितशब्देनार्थद्वयं प्रतीयते तच्छिलष्टम्। यत्रोभयप्रवृत्तिनिमित्तैक्यं तत् साधारणम्। यत्रौपम्यगर्भसमासविशेषाश्रयणं तदौपम्यगर्भम्। तेन समासोक्तिरपि त्रिविधा।

सद्यो विश्लथमेखलां पुलकितामृज्वीं तनुं बिभ्रती
रागादन्ध्रपतेः कृपाणलतिका गृह्णाति कण्ठेष्वरीन् ।
तद्योगादनुरक्तभावविवशाः संमीलिताक्षाश्चिरं
शून्यान्तःकरणा भजन्ति खलु ते भावस्थितिं कामपि ॥

अत्र विश्लथमेखलां पुलकितामिति श्लिष्टविशेषणमहिम्ना कृपाणलतिकाया नायिकात्वप्रतीतिः । अनुरक्तभावविवशा इत्यादिविशेषणद्वारा रिपूणां नायकत्वप्रतीतिः । साधारणविशेषणेन यथा

वीतव्रीडमपास्तमानमुदयद्वैस्वर्यमाविर्भवत्-
स्वेदं निर्भरगात्रवेपथुमिलन्मूर्च्छं गलद्बाष्पकम् ।
संजातप्रलयं च काकतिमहीनाथ स्मरोद्वेजिता
भूपाः शैलगुहासु यान्ति विजनं भीत्या समालिङ्गिताः॥

अत्र शृङ्गारभयानकसाधारणविशेषणबलाद् भीत्या समालिङ्गिता इति नृपाणां नायकत्वप्रतीतिः । औपम्यगर्भविशेषणेन यथा

भृतात्मगुणरत्नौघैः पूर्णः सौजन्यवारिणा ।

तत्राद्यं भेदमुदाहरति । **सद्य इति** । विश्लथा प्रयोगानुकूला मेखला कण्ठरज्जुर्यस्यास्तां तथोक्तां शिथिलकाञ्चीगुणां च । पुलकाश्छाया अस्याः संजाताः पुलकिता रोमाञ्चिता च ताम् । ऋज्वीमकुटिलां रतावववामां च । तद्योगात् कृपाणलतिकासंबन्धात् । अनुरक्तोऽनुवृत्तरक्तो भावः स्वरूपं येषां ते तथोक्ताः अत एव विवशाः परवशाः । अन्यत्र तद्योगान्नायिकासंबन्धादनुरक्तभावेनानुरक्तत्वेन विवशा मीलिताक्षाः मूर्च्छया सुखपारवश्याश्च । तथा शून्यान्तःकरणा गतमनसो विगलितवेद्यान्तःकरणाश्च । कामपि वक्तुमयोग्यां साक्षादुक्तावमङ्गलत्वेनाश्लीलत्वादिति भावः । भावस्थितिं षष्ठभावविकारं विनाशनिमित्तमित्यर्थः। अन्यत्र कामपि वक्तुमशक्यां भावस्थितिं प्रेमानुबन्धं भजन्ति । अत्र श्लिष्टविशेषणसाम्यात् खड्गलतायामरिषु नायिकानायकव्यवहारसमारोप इत्याह। **अत्रेति**। द्वितीयमुदाहरति । **वीतेति** । व्याख्यातमेतत् । अत्र वीतव्रीडादिविशेषणानामुभयत्रैकार्थत्वं साम्यं । तद्बलाद्भीरूणां शृङ्गारनायकव्यवहारसमारोप इत्याह । **अत्रेति** । व्रीडव्ययादिधर्मसमारोपोऽत्र निमित्तम् । 'द्यामालिलिङ्ग मुखमाशु दिशां चुचुम्ब' इत्यत्रेक्षणाग्नौ युवनायकव्यवहारारोपे आलिङ्गनादिकार्यसमारोपः कारणम् । साधारणविशेषणसाम्ये धर्मकार्ययोरन्यतरारोपं विना व्यञ्जनव्यापारोद्भेदनेनाप्रकृतप्रतीतेरसंभवात् । एवं च द्वितीयो भेदो द्विविधो जातः । तृतीयमुदाहरति । **भृतात्मेति** । गुणा रत्नानीवेत्युपमितसमासस्य गुणा एव

प्रतापरुद्रनृपतिर्धत्ते विश्वंभराश्रियम् ॥

अत्र समासोक्तौ सर्वत्र व्यवहारसमारोप एव जीवितम् । स चतुर्विधः । लौकिके वस्तुनि लौकिकव्यवहारसमारोपः शास्त्रीयवस्तु-व्यवहारसमारोपश्चेति द्विविधः । तथा शास्त्रीयवस्तुनि शास्त्रीयवस्तु-व्यवहारसमारोपः लौकिकवस्तुव्यवहारसमारोपश्चेति । एवं चतुर्विधः। यथाक्रममुदाहरणानि ।

सप्ताङ्गस्फुरदुद्दामदानलक्ष्मीविराजितः ।
प्रतापरुद्रो भद्रात्मा तनुते सार्वभौमताम् ॥

रत्नानीति रूपकसमासस्य च साधकबाधकाभावात् सन्देहसंकरः । ततो गुण-सदृशै रत्नैरिति मध्यमपदलोपी समासः । एवमुत्तरत्रापि । इत्थमौपम्यगर्भ-विशेषणसाम्येन प्रतापरुद्रे समुद्रव्यवहारप्रतीतेः समासोक्तिः । यत्रोपमासमासे साधकमस्ति । यथा 'दन्तप्रभापुष्पचिता लोलाक्षी चारुहासिनी । केशपाशालि-वृन्देन सुवेषा हरिणेक्षणा ॥' इत्यत्र सुवेषत्वं तत्रोपमासमासानन्तरं मध्यमपद-लोपिसमासो द्रष्टव्यः । तथा च तृतीयभेदस्यापि द्वैविध्यं सिध्यतीत्येवं पञ्च-प्रकारा समासोक्तिः । तदुक्तमलंकारसर्वस्वे । 'तदेवं श्लिष्टविशेषणसमुत्थापि-तैका । साधारणविशेषणसमुत्थापिता धर्मकार्यसमारोपाभ्यां द्विधा । औपम्य-गर्भविशेषणसमुत्थापिता तूपमासङ्करसमासाभ्यां द्विभेदा' इति । यत्र 'निरीक्ष्य विद्युन्नयनैः पयोद' इत्यादौ निरीक्षणादिकं रूपके साधकमस्ति तत्रैकदेशविव-र्तिरूपकमेव न समासोक्तिरित्यादिविशेषा अपि तत्रैव द्रष्टव्याः । विशेषान्तर-माह । **अत्रेति** । व्यवहारसमारोप एवेत्येवकारो रूपकसमारोपव्यवच्छेदार्थः । तथा हि । यदा विशेषणसाम्यादप्रस्तुतं प्रस्तुतविशेष्यत्वेन प्रतीयते न तु प्रयुज्यते तदा निष्प्रतियोगिकत्वेनापरित्यक्तस्वरूपस्य प्रस्तुतस्य राजादेर्विशे-षणसाम्यावगमितेनाप्रस्तुतसमुद्रत्वादिधर्मेण विशिष्टतया प्रतीतेः व्यवहारस-मारोपः । यदा त्वप्रस्तुतमपि विशेष्यं प्रयुज्यते तदा तत् प्रस्तुतमर्थं स्वेन रूपेण रूपवन्तं कृत्वा न्यग्भवति । प्रस्तुतमपि स्वरूपं परित्यज्याप्रस्तुततादूप्य-मुपगृह्णाति । अतस्तत्र रूपकसमारोप एव । तदुक्तम् । 'अप्रस्तुतं प्रतीतं चेत् भेदकांशैकसाम्यतः । व्यवहारं समारोप्य प्रस्तुते न्यग्भवत्यथ ॥ तेनाप्रस्तुत-वृत्तान्तारोपेणाप्रस्तुतं स्वयम् । संक्षेपेणोच्यते यस्मात् समासोक्तिरियं तदा ॥ स्योद्विशेष्यांशसाम्यं चेत् प्रस्तुताकाररूपितम् । भवेदप्रस्तुतं वेद्यं रूपकालं-कृतिस्तदा ॥' इति । अत्राप्रस्तुतस्य प्रतीयमानत्वात् व्यवहारसमारोप एवेति भावः । तं चतुर्धा विभजति । **स इति** । वस्तुनि जात्यादौ क्रमेणोदाहरति । **सप्ताङ्गेति** । स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि सप्ताङ्गानि तद्गोचरया दान-

अत्र लौकिके प्रकृतवस्तुनि लौकिकस्य सार्वभौमनामधेयस्य दिग्गजस्य व्यवहारप्रतीतिः। तथा

गुरुप्रमाणेन निजेन सद्यस्तिरस्कृतोद्यत्प्रतिपक्षहेतौ।
प्रतापरुद्रस्य समित्युदग्रे खड्गे महत्खण्डनपण्डितत्वम्॥

अत्र लौकिके खड्गे तर्कशास्त्रप्रसिद्धवस्तुव्यवहारसमारोपः। तथा

अपूर्वार्थश्लाघागुरुभणितसारस्यपदवी
श्रुतिग्राह्यं तत्वं किमपि कलयन्ती प्रतिपदम्।
प्रबन्धश्रीर्वीराक्षितिभुजि कवीनां विजयते
बुधश्रेणी यस्यां निपुणमधिकर्तुं प्रभवति॥

लक्ष्म्या त्यागवैभवेन विराजितः। अदेयमस्य किमपि नास्तीति भावः। अन्यत्र सप्ताङ्गानि करादीनि तत्र स्फुरन्त्या स्रवन्त्या दानलक्ष्म्या मदवैभवेन विराजितः। तदुक्तम्। 'करात् कटाभ्यां मेढ्राच्च नेत्राभ्यां च मदस्रुतिः' इति पालकाव्ये। करात् नासारन्ध्राभ्यामित्यर्थः। भद्रात्मा मङ्गलमूर्तिः। अन्यत्र भद्रजातिः। तल्लक्षणं मतङ्गज इति प्रतीयते। सर्वभूमेरीश्वरः सार्वभौमः। 'तस्येश्वरः' इत्यण्प्रत्ययः। अनुशतिकादित्वात् उभयपदवृद्धिः। तत्तां चक्रवर्तित्वम्। अन्यत्र सार्वभौमतां दिग्गजविशेषत्वं तनुते। अत्र प्रकृतप्रतापरुद्रेऽप्रकृतभद्रगजव्यवहारसमारोपः। लौकिके वस्तुनि शास्त्रीयवस्तुव्यवहारसमारोपमुदाहरति। **गुर्विति**। गुरुणा श्रेष्ठेन प्रमाणेन ध्वजादिशुभायविशिष्टप्रमाणेनेत्यर्थः। आयुधानां ध्वजाद्याया जयावहा इति तद्विदः। अन्यत्र प्रमाणेनानुमानेन तस्यैव कथासाधनत्वात्। गौरवं चास्य व्याप्तिपक्षधर्मतावैशिष्ट्यनिबन्धनं द्रष्टव्यम्। प्रतिपक्षस्य शत्रोः प्रतिवादिनश्च। हेतीरायुधं हेतुरनुमानं चेति। इकारोकारयोः श्लेषः। **उद्यदिति**। शत्रा प्रयोगप्रारम्भ एवानयोः पराभव इति लभ्यते। समिति युद्धे सभायां च। खण्डनपण्डितत्वं विदारणकौशलम्। अन्यत्र दूषणनैपुण्यम्। अत्र विशेषणसाम्याद्वैतण्डिकः प्रतीयते। शास्त्रीये वस्तुनि शास्त्रीयवस्तुव्यवहारसमारोपमुदाहरति। **अपूर्वेति**। अपूर्वस्याचुम्बितस्यार्थस्य श्लाघया कथनेन गुरूणां श्लाघ्यानां भणितानां वाक्यानां यत् सारस्यमभिमुखीकरणयोग्यत्वं तस्य पदवी स्थानमित्यर्थः। पदे पदे प्रतिपदम्। श्रुतिग्राह्यं श्रोत्रेन्द्रियग्राह्यम्। किमप्यनिर्वचनीयम्। तत्त्वं माधुर्यरूपम्। कलयन्ती धारयन्ती। श्रुतिकट्वादिदोषराहित्येन श्लेषादिगुणसाहित्येन च। स्रवत्सुधामधुरशब्दार्थशरीरेत्यर्थः। प्रबन्धश्रीः काव्यनाटकादिप्रबन्धलक्ष्मीः विजयते यस्यां बुधश्रेणी विदग्धपरिषत् निपुण-

अत्रालंकारशास्त्रीये वस्तुनि तन्त्रशास्त्रप्रसिद्धवस्तुव्यवहारसमारोपः । तथा

सालंकारा लसद्वर्णा सगुणा रसनिर्भरा ।
भावानुबन्धिनी भाति भारती काकतीश्वरे ॥

मधिकर्तुं रसमास्वादयितुं प्रभवति । अधिकारस्य फलस्वाम्यलक्षणत्वात् सहृदय एवात्राधिकारी नान्य इत्यर्थः । अपूर्वाणामर्थानां चोदनैकसमधिगम्यत्वेन प्रमाणान्तरागोचराणामग्निहोत्रादीनां श्लाघया कत्थनेन गुरूणां श्रेष्ठानां भणितानां विधिवाक्यानां यत् सारस्यमर्थवादप्रयुक्तं प्रवर्तनौन्मुख्यं तस्य पदवी स्थानं विद्यादिविचारसध्रीचीनेत्यर्थः । श्रुतिशब्देन श्रुत्येकदेशो गृह्यते । तेन श्रुतिग्राह्यं लिङ्गादिप्रत्ययवेद्यमत एव किमप्यलौकिकं तत्त्वं श्रेयःसाधनतारूपं धर्मम् । अत एवोक्तमाचार्यैः । 'श्रेयःसाधनता ह्येषां नित्यं वेदात् प्रतीयते । ताद्रूप्येण च धर्मत्वं तस्मान्नेन्द्रियगोचरः॥' इति । पद्यते गम्यते प्रामाण्यादिकमेभिरिति पदानि न्यायाः । प्रतिपदं सहस्रेणापि न्यायैरित्यर्थः । कलयन्ती इतिकर्तव्यतारूपेण प्रतिपादयन्तीत्यर्थः । मीमांसेति गम्यते । तदुक्तमाचार्यैः । 'धर्मे प्रमीयमाणे हि वेदेन करणात्मना । इतिकर्तव्यताभागं मीमांसा पूरयिष्यति ॥' इति । यस्यां मीमांसायां बुधश्रेणिः निगमनिरुक्तादिविद्यानिष्णातविद्वत्सङ्घ एवाधिकर्तुं प्रभवति तस्यैवात्राधिकारादिति भावः । तदुक्तं जिज्ञासाप्रस्तावे । 'जिज्ञासैकोपनीतस्य द्वितीया पठितश्रुतेः । ज्ञातविद्यान्तरस्या या मीमांसा पुरस्सरी ॥' इति । अथवा मतान्तरेणार्थान्तरं तु क्रियादिव्यतिरिक्तं स्थायिकार्यं प्रमाणान्तरा गोचरमपूर्वम् । तदुक्तं शारिकानाथेन । 'क्रियादिभिन्नं यत् कार्यं वेद्यं मानान्तरैर्न तत् । अतो मानान्तरापूर्वमपूर्वमिति गीयते ॥' इति । तदेवार्थो वाक्यार्थः । प्रधानत्वात् । तदुक्तम् । 'कार्यस्यैव प्रधानत्वाद्वाक्यार्थत्वं च युज्यते ।' इति । एवमादेः श्लाघा कत्थनम् । तत्प्रधानानां गुरुभणितानां निबन्धनविवरणादिप्रभाकरग्रन्थानां यत् सारस्यं प्रसन्नगम्भीरत्वं तस्य पदवी स्थानं तथाविधग्रन्थयुक्तेत्यर्थः । श्रुतिग्राह्यं लिङादिवाच्यम् । 'एवं कार्यात्मके ह्यर्थे व्युत्पद्यन्ते लिङादय' इति शारिकोक्तेः किमप्यलौकिकं तत्त्वम् । 'कार्यत्वेन नियोज्यं च स्वात्मनि प्रेरयन्नसौ । नियोग इति मीमांसानिष्णातैरभिधीयते ॥' इत्युक्तलक्षणनियोगापरपर्यायं धर्मं प्रतिपदं कलयन्तीत्यादि पूर्ववत् । लक्ष्ये लक्षणं योजयति । **अत्रालङ्कारेति** । तन्त्रशास्त्रमत्र भाट्टं प्राभाकरं चेत्युभयं विवक्षितम् । शास्त्रीये वस्तुनि लौकिकव्यवहारसमारोपमुदाहरति । **सालङ्कारेति** । अलंकारैरुपमादिभिः । कटकादिभिश्च सहिता सालंकारा । लसद्वर्णा मधुराक्षरा मनोज्ञकान्तिश्च । सगुणा श्लेषादिगुणयुक्ता गाम्भीर्यादि च । रसेन शृङ्गारादिनानुरागेण च । निर्भरा पूर्णा । काकतीश्वरे विषये ।

अत्रालंकारशास्त्रीये वस्तुनि भारत्याख्ये लौकिकनायिकाव्यवहारसमारोपः। समासोक्तौ विशेषणविशेष्ययोर्द्वयोरुपादानाभावाच्छ्लेषाद्विशेषः। अन्येषामप्यलंकाराणामुक्तिसाम्येऽपि श्लेषगर्भत्वविशेषात् वक्रोक्तिरुच्यते।

वक्रोक्त्यलंकारः।

अन्यथोक्तस्य वाक्यस्य काका श्लेषेण वा भवेत्।
अन्यथा योजनं यत्र सा वक्रोक्तिर्निगद्यते॥

यत्र कयाचित् विवक्षया केनचित्प्रयुक्तस्य वाक्यस्यान्येन अन्यथा विवक्षया योजना क्रियते सा वक्रोक्तिः। उक्तिवक्रत्वे कथंचित् संभवत्यप्येवंविधलक्षणाभावात् सर्वालंकारेभ्यो भिद्यते। काका यथा

*बहुवल्लहो खु राआ सहि तस्स सिरिंमि णिब्भरासत्ती।
णूणा सिरिएवि तुमं अप्पाणं किं णु लहुत्रासि॥

अत्र त्वमपि श्रियो न्यूनगुणा न भवसि। अतस्त्वय्यपि नृपतिरासक्त एव किमित्यात्मानं लघूकरोषीति काका प्रतीयते। श्लेषेण यथा

---

*बहुवल्लभः खलु राजा सखि तस्य श्रियां निर्भरासक्तिः।
न्यूना श्रियोऽपि त्वमात्मानं किं नु लघयासि॥

भावोऽभिप्रायः प्रेमा च। तस्यानुबन्धो विच्छेदाभावः। तद्वती भारती वाणी। नायिका तु गम्यते। ननु यत्र श्लिष्टविशेषणसाम्यं तत्र श्लेष एवालंकारः कस्मान्न भवतीत्यत्राह। **समासोक्ताविति**। अप्रकृतविशेष्यस्यापि पृथगुपादाने श्लेषः। तदभावादत्र न श्लेषत्वमिति भावः। वक्रोक्तेः संगतिपूर्वकं लक्षणमाह। **उक्तिसाम्य इत्यादिना**। **अन्यथोक्तस्येति**। केनचिदिति शेषः। **अन्यथा योजनमिति**। अपरेणेति शेषः। तदेतद् व्याचष्टे। **यत्रेति**। सर्वेभ्यो भेदमाह। **उक्तीति**। वक्रत्वे वैचित्र्यां। **संभवत्यपीति**। सर्वालंकारेष्विति शेषः। विच्छित्तिमात्रवाचिनो वक्रशब्दस्योक्तविशेषे पर्यवसानात् सर्वविलक्षणत्वमिति भावः। काकुमूलां वक्रोक्तिमुदाहरति। **बहिति**। (अप्पाणमित्यत्र 'आत्मनि पः' इति सूत्रेणात्मशब्दे युक्तवर्णस्य पकारादेशः)। अत्र प्रथमार्धे नायिकया संभावितस्यात्मन्यूनत्वस्य द्वितीयार्धे सख्याश्रियो न्यूनेत्यत्र काका निषेधयोजनात् वक्रोक्तिः। श्लेषमूलामुदाहरति।

कस्ते सुन्दरि वर्तते हृदि सदा राजा किमिन्दुर्न हि
क्षोणीभृत्तिलकः सुमेरुरयि किं नो रुद्रदेवो विभुः ।
ईशः किं सखि सत्यमात्थ सुभगे त्वं गोत्रसारोद्भवे-
त्याल्यां खल्वपहासवाचि विरहं किंचिद्वधूर्व्यस्मरत् ॥

अथ स्वभावोक्तिः ।

स्वभावोक्तिरसौ चारु यथावद्वस्तुवर्णनम् ।

यत्र चारुतया वस्तुनो यथावद्वर्णनं निबध्यते सा स्वभावोक्तिः ॥

यथा

मदश्च्युता नर्तितकर्णतालमुद्धूतमूर्ध्ना त्रिपदस्थितेन ।
लीलाग्रहस्तेन गजेन जातो नित्योत्सवः काकतिवीररुद्रः ॥

व्याजोक्त्यलंकारः ।

अथोक्तिसाम्याद् व्याजोक्तिरुच्यते ।

व्याजोक्तिः सा समुद्भूतं वस्तु यत्र निगूह्यते ।

यत्र प्रकाशं वस्तु साम्यगर्भत्वेन निगूहनार्हत्वात् केनचित् व्याजेन प्रच्छाद्यते सा व्याजोक्तिः । यथा

क इति । अत्र सखीनायिकयोरुक्तिप्रत्युक्तितया नव वाक्यानि योजनीयानि । राजा नृपश्चन्द्रश्च । क्षोणीभृत्तिलको राजश्रेष्ठः पर्वतोत्तमश्च । रुद्रदेवः प्रतापरुद्रो रुद्रश्च । सत्यमात्थ ब्रूषे । गोत्रसारोद्भवा सत्कुलप्रसूता पर्वतराजपुत्री च । अपहासप्रधाना वाचो यस्यास्तस्यामपहासवाचिविरहं वियोगदुःखं किंचित् व्यस्मरत् । वक्रोक्तिविपर्ययेण स्वभावोक्तिं लक्षयति । **स्वभावेति** । यत्र चारु सम्यगग्राम्यम् । यथावदन्यूनातिरेकेण वस्तुनो वर्णक्रियासंस्थानरूपस्य वस्तुस्वभावस्य कविप्रतिभैकगोचरस्य वर्णनमसौ स्वभावोक्तिः । अत एवेदं ग्राम्यं नालंकार इत्युक्तं दोषप्रकरणे । उदाहरति । **मदेति** । मदश्चयुता मदस्राविणा नर्तितकर्णतालं यथा भवति तथा । उद्धूतमूर्ध्ना कम्पितकुम्भस्थलेन । त्रिभिः पदैः स्थितं स्थितिर्यस्य तेन त्रिपदस्थितेन । अग्रं चासौ हस्तश्चेत्यवयवावयविनोरभेदविवक्षायां विशेषणसमासः । यदाह वामनः । 'हस्ताग्राग्रहस्तादयो गुणगुणिनोर्भेदाभेदात्' इति । अत्र क्रियास्वभाववर्णनम् । एवं वर्णसंस्थानयोरुदाहार्यम् । व्याजोक्तेः संगतिमाह । **उक्तीति** । लक्षणमाह । **व्याजोक्तिरिति**। व्याचष्टे। **यत्रेति** । प्रकाशं निगूढचरं कुतश्चिन्निमित्तात् प्रकटमित्यर्थः । अत्र वस्त्वन्तर-

क्षोणीपाणिग्रहणसमये संमदाद्रोमहर्षे
सर्वाङ्गीणे नृपतितिलकः काकतीयान्वयेन्दुः ।
धीरोदात्तः शिशिरसलिलैः किं नु राज्याभिषेकः
कर्तव्यः स्यादिति मृदु हसन् वीक्षते मन्त्रिवृद्धान् ॥

अत्र क्षोणीपाणिग्रहणजनितं रोमहर्षणं धीरोदात्ततया प्रतापरुद्रदेवेन महाभिषेकसलिलशैत्यव्याजेन प्रच्छादयता मन्त्रिणो वीक्ष्यन्ते ।

मीलनालंकारः ।

व्याजोक्त्युत्तरं किंचित्साम्यान्मीलनमुच्यते ।
मीलनं वस्तुना यत्र वस्त्वन्तरनिगूहनम् ॥

यत्र वस्तुना वस्त्वन्तरं प्रच्छादितं भवति स मीलनालंकारः । स द्विविधः । सहजेनागन्तुकतिरोधानमागन्तुकेन सहजतिरोधानं चेति । यथाक्रममुदाहरणे ।

उग्रैः काकतिवीररुद्रनृपतेर्दोर्दण्डविस्फूर्जितै-
र्युद्धप्राङ्गणवार्जितेषु पतिषु क्वापि प्रलीनात्मसु ।
विष्वक्तीव्रतरस्मरज्वरजुषामङ्गे द्विषद्योषितां
संक्रान्तोऽपि न लक्ष्यते पथि महानूष्मा चिरं मारवः ॥

अत्र सहजेन रिपुकामिनीगतेन स्मरानलोष्मणा मार्गवशादागन्तुको मरूष्मा तिरोधीयते । तथा

प्रक्षेपरूपस्य व्याजस्य वचनाद् व्याजोक्तिरित्यर्थः । उदाहरति । **क्षोणीति** । सर्वाण्यङ्गानि व्याप्नोतीति सर्वाङ्गीणः । 'तत्सर्वादेः' इति खप्रत्ययः । अत्र निगूढः क्षोणीपाणिग्रहणजन्यो हर्षो रोमहर्षेण प्रकाशितः सलिलशैत्यव्याजेनाच्छाद्यत इत्याह । **अत्रेति** । धीरोदात्ततया गाम्भीर्येणाच्छादितस्यापि हर्षस्य मृदुहासेन पुनः प्रकाशनं लक्षणान्तःपातीति रहस्यम् । मीलनं संगमयति । **व्याजोक्तीति** । लक्षयति । **मीलनमिति** । उत्कृष्टवस्तुनापकृष्टवस्तुनिगूहनं मीलनमित्यर्थः । अत एव गुणसामान्यनिबन्धनात् सामान्यादस्य भेद इति द्रष्टव्यम् । सहजेनागन्तुकतिरोधानमुदाहरति । **उग्रैरिति** । दोर्दण्डविस्फूर्जितैः भुजविजृम्भितैः। युद्धप्राङ्गणवर्जितेषु वर्जितयुद्धप्राङ्गणेष्वित्यर्थः। 'वाहिताग्न्यादिषु' इति परनिपातः । लक्षणं योजयति । **अत्रेति** । आगन्तुना सहजतिरोधानमुदाह-

प्रतापरुद्रस्य भुजप्रभावादन्तर्भयाद्भूमिभुजामजस्रम् ।
स्वेदाश्रुकम्पाद्युदयेऽप्यनङ्गगोष्ठ्यां स्त्रियः प्रेम्णि न विश्वसन्ति ॥

अत्र भयजनितेन कम्पादिनागन्तुकेन सहजस्य प्रेमजनितस्य कम्पादेस्तिरोधानम् ।

सामान्यालंकारः ।

सामान्यं गुणसाम्येन यत्र वस्त्वन्तरैकता ।

यत्र एकस्य वस्तुनो गुणसाम्येन वस्त्वन्तरैकात्म्यं भवति स सामान्यालंकारः । यथा

कैलासदुग्धार्णवयानहंसेष्वलक्षितेष्वन्ध्रनरेन्द्रकीर्तौ ।
त्रयः पुमांसः प्रथमे स्मयन्ते स्वसेवकान् संभ्रमतो विलोक्य ॥

अत्र प्रतापरुद्रकीर्त्या जगत्सु विजृम्भितायां कैलासप्रभृतीनां विमलवस्तूनां तदैकात्म्यम् ।

तद्गुणालंकारः ।

इतरगुणसंनिधानातिशयसाम्यात् तद्गुण उच्यते ।

तद्गुणः स्वगुणत्यागादन्योत्कृष्टगुणाहृतिः ।

यत्र न्यूनं स्वगुणं विहाय संनिहितवस्तुनः सकाशादुत्कृष्टगुणः स्वीक्रियते स तद्गुणालंकारः । यथा

प्रतापरुद्रदेवाङ्घ्रिनखज्योत्स्नाविजृम्भितैः ।
नमन्नृपतिमाणिक्यमौलयः शुचयः कृताः ॥

अत्र प्रणमतां भूपतीनां पद्मरागमुकुटाः स्वां शोणप्रभां मुक्त्वा काकतिवीररुद्रपदनखज्योत्स्नागतं धवलिमानमुद्वहन्ति स्म ।

रति । **प्रतापेति** । भुजप्रभावात् पराक्रमात् भयहेतोः । अन्तर्गतं भयमन्तर्भयमाकारगोपनेनानभिव्यक्तमित्यर्थः । तस्माद्धेतोः भूमिभुजां संबन्धिनि प्रेम्णि विषये न विश्वसन्ति । प्रेममूलानामपि स्वेदादीनां भयानुभावत्वशङ्कयेति भावः । मीलनसाधर्म्यात् तदनन्तरं सामान्यं लक्षयति । **सामान्यमिति** । यत्र गुणसाम्यात् प्रस्तुतस्य वस्तुनोऽप्रस्तुतवस्त्वन्तरैकात्म्यं निबध्यते तत् समानगुणसंबन्धात् सामान्यमित्यर्थः । **कैलासेति** । प्रथमे पुमांसः शिवकेशवविरिञ्चाः । संभ्रमतः संभ्राम्यतः क्वचिदप्यनवतिष्ठमानान् स्मयन्ते मन्दं हसन्ति । लक्षणं योजयति । **अत्रेति** । तद्गुणं संगमयन् लक्षयति । **तद्गुण इति** ।

अतद्गुणालंकारः ।

तत्प्रातिपक्ष्यातदद्गुणो निरूप्यते ।

सति हेतावन्यगुणास्वीकारः स्यादतद्गुणः ।

यत्र संनिधानरूपे हेतौ सत्यप्यन्यगुणस्वीकारो नास्ति असावतद्गुणालंकारः । यथा

ईशानं समया जगत्यटति तल्लीलाट्टहासोज्ज्वले
दैत्यारिं परितस्तदङ्गविलसन्नीलद्युतिद्योतिते ।
ब्रह्माणां निकषा च तत्तनुमिलत्स्वर्णप्रभाभास्वरे
पुष्णन् रुद्रनरेन्द्रकीर्तिविभवः स्वामेव शुभ्रां छविम् ॥

अत्र हरिहरविरिञ्चीनां समीपवर्तिषु जगत्सु तत्तन्नानाप्रभाससंग्रेष्वपि निरन्तरं विहरमाणस्य प्रतापरुद्रयशसो निरङ्कुशः स्वकीय एव धवलिमा विजृम्भते ।

विरोधालंकारः ।

अतद्गुणे किंचित् प्रक्रान्तत्वात् विरोधस्य विरोधालंकारो निरूप्यते ।

आभासत्वे विरोधस्य विरोधालंकृतिर्मता ।

यत्र प्रथममाभासतया प्रतीतो विरोधः पर्यवसाने परिह्रियते स विरोधालंकारः । तत्र जातेर्जात्यादिना सह विरोधे चत्वारो भेदाः । क्रियायाः क्रियागुणद्रव्यैः सह विरोधे त्रयो भेदाः । गुणस्य गुणद्र-

---

मीलने वस्त्वन्तरनिगूहनम् । इह पुनरनिगूहितस्यान्यगुणेनोपराग इत्यनयोर्भेद इति सर्वस्वकारहृदयम् । तस्याप्रकृतस्य गुणोऽत्रास्तीति तद्गुणः । उदाहरणं स्पष्टम् । अतद्गुणमाह । **तत्प्रातिपक्ष्यादित्यादिना** । **ईशानमिति** । अत्रेशानादिसमीपवर्तिनि तत्तद्वर्णविशिष्टे जगति कीर्तिविभवः स्ववर्णमजहदेवाटतीत्यर्थः । अत एवातद्गुण इत्याह । **अत्रेति** । ईशानमित्यादौ 'अभितः परितः' इत्यादिना द्वितीया । विरोधं संगमयति । **अतद्गुण इति** । विरोधस्य सत्यपि संनिधानेऽन्यगुणस्वीकारभावलक्षणस्येत्यर्थः । लक्षयति । **आभासत्व इति** । व्याचष्टे । **यत्रेति** । अत्र विशेषतो विभागमाह । **तत्र जातेरिति** । **क्रियायास्त्रयो भेदा इति** । जात्या सहैतस्या विरोधस्य जातेरेतया विरोधेन गतार्थत्वादिति भावः । एवं यथोत्तरमेकैकन्यूनता द्रष्टव्या । अत्रायं संग्रहः । 'क्रमाज्जातिगुणद्रव्यक्रियाणां तत्तदादिभिः । विरोधे दश भेदाः स्युश्चतुस्त्रिद्वये-

न्याभ्यां विरोधे द्वौ भेदौ । द्रव्यस्य द्रव्येण सह विरोधे एको भेदः। एवं दश विरोधे भेदाः । जातेर्जात्या क्रियया च विरोधो यथा

पद्माकरोऽपि विलसति नितरामजडाशयोऽयमुर्वीशः ।
विमलतरवारिधाराप्यासीद्वैरिक्षितीशतापकरी ॥

अत्र पूर्वार्धे जात्योर्विरोधः । कमलाकरोऽप्यजडाशय इति विरोधात् । उत्तरार्धे जातिक्रिययोर्विरोधः । विमलतरवारिधारायाः संतापकरणविरोधात् । अत्र श्लेषमूलो विरोधः । जातेर्गुणद्रव्याभ्यां विरोधो यथा

अमदः सार्वभौमोऽपि भास्वानपि कलानिधिः ।
वीररुद्रनरेन्द्रोऽयमद्भुतानां विहारभूः ॥

अत्र सार्वभौमोऽप्यमद इति जातिगुणयोर्विरोधः । भास्वानपि कलानिधिरिति जातिद्रव्ययोर्विरोधः । कलानिधेरेकत्वात् द्रव्यत्वम् । अत्रापि श्लेषमूलता । क्रियायाः क्रियया विरोधो यथा

धर्मद्विषामर्थमुषां च भङ्गमुत्पादयन् काकतिवीररुद्रः ।
त्रिवर्गसाधारणगोचरोऽपि करोति कामद्विषि भावमार्द्रम् ॥

अत्र त्रिवर्गसाधारणवृत्तेर्धर्मार्थविरोधिषु भङ्गकरणं कामारौ स्नेह-

---

क्रभेदतः ॥' इति । **पद्माकर इति** । पद्माकरः सरोऽप्यजडाशय इति लडयोरभेदाज्जडाशयो जलस्थानं न भवतीति विरोधस्य लक्ष्मीनिवासोऽयममन्दबुद्धिरिति परिहारः । विमलतरा अतिनिर्मला वारिधारापि तापकरीति जातिक्रिययोर्विरोधस्य तरवारिरायुधविशेषस्तस्य धारा कोटिरिति परिहारः । सर्वत्रापिशब्दो विरोधद्योतकः । नायमौद्भटानामिव विरोधबाधकः श्लेषः किं तु श्लेषविरोधयोरङ्गाङ्गिभावेन संकर इत्याशयेनाह । **अत्र श्लेषमूलो विरोध इति** । उत्तरत्राप्येवंविधोदाहरणेष्वेवमेव विरोध इति द्रष्टव्यम् । **अमद इति** । सार्वभौमो दिग्गजोऽप्यमदो मदरहित इति जातिगुणयोर्विरोधः सर्वभूमीश्वरोऽपि निरहंकार इति परिह्रियते । भास्वान् सूर्योऽपि कलानिधिश्चन्द्र इति जातिद्रव्ययोर्विरोधः । तेजस्वी चतुःषष्टिकलाकुशल इति परिह्रियते । **धर्मद्विषामिति**। त्रयाणां धर्मार्थकामानां वर्गस्त्रिवर्गः । 'त्रिवर्गो धर्मकामार्थैः' इत्यमरः । त्रिवर्गः साधारणो वैषम्यरहितः गोचरः सेव्यत्वेन विषयो यस्य स तथोक्तः । 'न बाधतेऽस्य त्रिगुणः परस्परम्' इति भावः । कामद्विषि कामपुरुषार्थद्वेषिणि स्मरहरे च । अत एव क्रिययोर्विरोधः समाधीयत इत्याह । **अत्र त्रिव-**

करणं च विरुद्धम् । क्रियाया गुणद्रव्याभ्यां विरोधो यथा

एष जिष्णुविहारोऽपि गोत्रवात्सल्यलालसः ।
करोति कमलोल्लासं राजाप्यन्ध्रनरेश्वरः ॥

अत्र जिष्णुविहारस्य गोत्रवात्सल्यमिति क्रियागुणयोर्विरोधः । कमलोल्लासं कुर्वन्नपि राजेति क्रियाद्रव्ययोर्विरोधः । अत्रापि श्लेषमूलतैव । गुणस्य गुणेन विरोधो यथा

*रज्जंतो भुवणमिअं राएत्ति जए सलाहणिज्जो सि ।
रुद्दणरिंद कहं सा रत्ता वि अ पंडुरा जाआ ॥

अत्र रक्तत्वपाण्डुरत्वयोर्विरोधः । गुणस्य द्रव्येन विरोधो यथा

ज्वलत्प्रतापरौद्रोऽपि काकतीयनरेश्वरः ।
भूत्वा जैवातृको भाति शश्वद्विश्वप्रियंकरः ॥

अत्र प्रतापरौद्रोऽपि जैवातृक इति गुणद्रव्ययोर्विरोधः । द्रव्यस्य द्रव्येन विरोधो यथा

विभाति काकतीन्द्रोऽयं रुद्रोऽपि चतुराननः ।
तथा च जिष्णुरित्येष कथ्यते पुरुषोत्तमः ॥

एवं दश भेदा दर्शिताः । अयमश्लेषेणापि भवति । यथा

स्वभावशिशिरा दृष्टिरपि काकतिभूभुजः ।

---

*रञ्जयन् भुवनमिदं राजेति यथा श्लाघनीयोऽसि ।
रुद्रनरेन्द्र कथं सा रक्तापि च पाण्डुरा जाता ॥

गौति । पूर्वत्र द्वयोरपि विरोधिनोः श्लिष्टत्वमत्र पुनरेकस्यैवेति विशेषः । **एष इति** । जिष्णोरिन्द्रस्य विहार इव विहारो व्यापारो यस्य स तथोक्तः । तथापि गोत्रवात्सल्यलालसः पर्वतानुरक्त इति क्रियागुणौ विरुद्धौ । जयशीलव्यापारः कुलानुकूलश्चेति समाहितौ । राजा चन्द्रोऽपि कमलोल्लासं करोतीति विरोधस्य क्रियाद्रव्यगतस्य नृपतिर्लक्ष्मीविलासमिति परिहारः । **रज्जन्त इति** । 'न्तमाणौ शतृशानचोः' इति शतरि न्तादेशः । 'सलाहणिज्जो-सो—' इत्यत्र 'अः क्ष्माश्लाघयोः' इति श्लाघाशब्दे युक्तवर्णस्य विप्रकर्षः । पूर्वस्याकारयुक्तता चेति वेदितव्यम् । **ज्वलदिति** । प्रतापरुद्रोऽपि जैवातृकश्चन्द्र इति गुणद्रव्ययोर्विरोधः । जैवातृक आयुष्मानिति परिहारः । **विभातीति** । रुद्रोऽपि चतुराननो ब्रह्मेति जिष्णुरिन्द्रोऽपि पुरुषोत्तमो विष्णुरिति च द्रव्ययोर्विरोधः । रुद्र इति नामादिभिः प्रसिद्धैरर्थान्तरैः परिह्रियते । **स्वभावेति** । शैत्य-

सर्वाङ्गतापिनी जाता प्रतिपक्षमहीभृताम् ॥

अत्र स्वभावशिशिरापि तापिनीति विरोधः ।

विशेषालंकारः ।

अथ विरोधगर्भालंकारा निरूप्यन्ते ।

आधाररहिताधेयमेकं चानेकगोचरम् ।
अशक्यवस्तुकरणं विशेषालंकृतिस्त्रिधा ॥

यत्राधारमन्तरेणाधेयो निबध्यते स एको विशेषः । एकस्यानेकगोचरत्वे द्वितीयो विशेषः । प्रकृतादशक्यवस्त्वन्तरकरणे तृतीयः । यथाक्रममुदाहरणानि ।

नलनहुषदिलीपधर्मपुत्रप्रभृतिनरेश्वरसंश्रिता यशश्रीः ।
अनुदिनमधुनात्युपेत्य मैत्रीं विलसति काकतिवीररुद्रकीर्त्या ॥

अत्र प्राचां भूपतीनामाधारभूतानां तिरोधानेऽप्याश्रितायाः कीर्तेरवस्थानम् । यथा च

पश्यन्तो भयविह्वलाः प्रतिनृपाः पश्चात् पुरः पार्श्वयो-
रध्यन्तर्बहिरन्ध्रपार्थिवपतिं प्रोत्क्षिप्तकौक्षेयकम् ।
निःसीमोल्बणधावनव्यतिकरप्रभ्रष्टदोरायुधाः
शैलाच्छैलमटन्ति कम्पविगलद्गाम्भीर्यशौर्यश्रियः ॥

अत्र भयभ्रान्तानां शत्रुनृपतीनां प्रतापरुद्रनृपतिरेकोऽप्यनेकत्र प्रतीयते । तथा च

अपारकरुणानिधेः सदसि वीररुद्रप्रभोः
प्रसादमधुरक्रमा लगति यत्र दृष्टिर्जने ।

सन्तापयोर्गुणयोरश्लिष्टयोर्विरोधो विषयभेदेन परिह्रियते । विरोधमूलेष्वनेकभेदं विशेषमाह । **आधारेति** । प्रसिद्धाधाररहितमाधेयमेकं परिमितं वस्तु युगपदेवानेकगोचरं तथा किंचिद् वस्त्वारभमाणस्तेनैव यत्नेनाशक्यवस्त्वन्तरमारभत इति त्रयो विशेषभेदाः इत्यर्थः । क्रमेणोदाहरति । **नलेति** । अधुनापि नलादीनामभावसमयेऽपीत्यर्थः । नलादिसदृशकीर्तिरयं राजेति भावः । योजयति । **अत्रेति** । **पश्यन्त इति** । धावनव्यतिकरः पलायनसंबन्धः । **कम्पेति** । कम्पेन विगलन्त्यौ मूर्तद्रव्यवत् पतन्त्यौ गाम्भीर्यशौर्यश्रियौ येषां ते तथोक्ता इत्यतिशयोक्तिः । योजयति । **अत्रेति** । **अपारेति** । सदस्यास्थाने यत्र जने

अतीन्द्रमतिकिंनराधिपमशेषलोकोन्नतं
न किं किमधितिष्ठति त्रिभुवने स सर्वाधिकः ॥

अत्र साधारणो जनः प्रतापरुद्रदृष्टिप्रसादपात्रीकृतः किं किं न लभत इत्यशक्यवस्त्वन्तरकरणम् ।

अधिकालंकारः ।

आधाराधेयवैचित्र्यादाधिकालंकारो निरूप्यते ।

आधाराधेययोरानुरूप्याभावोऽधिको मतः ।

यत्राश्रयाश्रयिणोरानुरूप्यं नास्ति सोऽधिकालंकारः । स द्विविधः आश्रयस्याल्पत्वमहत्त्वाभ्याम् । प्रथमो यथा

स्तोके ब्रह्माण्डरन्ध्रे विपुलतरतया स्वैरसंचारहेला-
संकोचादेकराशीभवदतनुरुचौ काकतीन्द्रस्य कीर्तौ ।
एतैः प्रालेयपृथ्वीधररजतगिरिस्वर्णदीशीतभानु-
क्षीराम्भोराशिमुख्यैः प्रकटितमधुना तद्घनीभावरूपम् ॥

अत्राश्रयस्य रोदःकुहरस्याल्पत्वम् । आश्रितस्य प्रतापरुद्रयशसो वैपुल्यम् । द्वितीयो यथा

क्वापि क्वापि कलिङ्गमालवमहाराष्ट्राङ्गवङ्गादयो
भूपास्तादृशसैन्यवैभवसमाक्रान्ताखिलाशान्तराः ।
लीनाः काकतिवीररुद्रनृपतेर्व्यूहप्रपञ्चश्रिया
निःसीमे बलवारिधौ विदधते पूर्तिं न कोणेऽप्यहो ॥

साधारणे प्रसादमधुरक्रमा प्रसन्नेत्यर्थः । दृष्टिर्लगति स जनः सर्वाधिको लोकोत्तरः सन्नलौकिकं वैभवमनुभवतीत्यर्थः । अत्र पृथग्जनेऽपि प्रसादमारभमाणा दृष्टिरैश्वर्यविशिष्टतामारभते किल किमुत विशिष्टे जन इत्यर्थापत्तिर्व्यज्यते । संगतिपूर्वकमधिकं लक्षयति । **आधारेत्यादिना** । तस्य द्वेधा विभागमाह । **स इति** । आद्यमुदाहरति । **स्तोक इति** । स्वैरसंचारस्य स्वेच्छाविहारस्य हेलाया विस्रम्भस्य संकोचात् । प्रालेयपृथ्वीधरादिभिस्तद्घनीभावरूपं प्रकटितम् । अत्राधारे ब्रह्माण्डेऽल्पतमे आधेयायाः कीर्तेराधिक्येन संचारसंकोचात् तत्र तत्र पिण्डीभूताः कीर्तिखण्डा एवामी न तु हिमाचलप्रभृतय इत्यनयोरानुरूप्याभावः । द्वितीयमुदाहरति । **क्वापीति** । व्यूहानां मकरादिसंज्ञितानां सेनासंनिवेशविशेषाणां प्रपञ्चस्य श्रिया समृद्धया निःसीमे उद्वेले बलवारिधौ कलिङ्गमालवादि-

अत्राश्रयस्य प्रतापरुद्रसैन्याम्बुधेर्वैपुल्यम् । आश्रितानामङ्गवङ्गकलिङ्गप्रभृतिराजकानीकिनीनामल्पत्वम् ।

अथ विभावनाविशेषोक्तिश्च ।

कारणेन विना कार्यस्योत्पत्तिः स्यात् विभावना ।
तत्सामग्र्यामनुत्पत्तिर्विशेषोक्तिर्निगद्यते ॥

यत्र प्रसिद्धकारणपरित्यागेन कार्यस्योत्पत्तिर्निगद्यते सा विभावना । यत्र कारणसाकल्ये सत्यपि कार्यस्यानुत्पत्तिः सा विशेषोक्तिः । यथा

प्रतापरुद्रेण पराजितानां प्रत्यर्थिनां विन्ध्यगुहागतानां ।
तमांस्यरात्रीणि समुद्भवन्ति तेजांसि घस्रेष्वपि नोद्भवन्ति ॥

अत्र तमःप्रादुर्भावस्य प्रसिद्धकारणं रात्रिः । तया विनापि तस्योत्पत्तिर्निबद्धा । अप्रसिद्धं कारणं शोकाद्यस्त्येव । तथाहस्सु रविकिरणेषु सत्स्वपि तेजसोऽनुत्पत्तिरिति अत्र निष्प्रतापत्वादिनिमित्तमस्त्येव ।

असंगत्यलंकारः ।

कार्यकारणविरोधप्रस्तावादसंगतिरुच्यते ।

सेनाः सेवार्थमागताः सरित इव समुद्रे यत्र कुत्रापि कोणे विलीयन्त इत्यर्थः ।
अत्राधारस्याधिक्यमाधेयस्याल्पत्वं च न प्रमाणविरुद्धं । किं तु महौदनमध्ये
भिक्षाकवल इव नानुरूपम् । अत एवोक्तम् । आधाराधेययोरानुरूप्याभाव
इति । अनानुरूप्यसारूप्यादधिकानन्तरं विभावनान्तद्विपर्ययरूपां विशेषो-
क्तिं चोदाहरणलाघवार्थं युगपल्लक्षयति । **कारणेनेत्यादिना** । यदि कारणमात्रेण
विना कार्योत्पत्तिरुच्यते तदा विरोधो दुष्परिहारः स्यात् । कारणान्वयव्यतिरेकानुवि-
धायित्वात् । **कार्यस्येति** । अतस्तत्परिहारार्थमाह । **प्रसिद्धेति** । अत एव वैशि-
ष्ट्येन कार्यस्य भावनाद् विभावना । **साकल्य इति** । कारणानामिति शेषः । अत्रा-
ंदविरोधपरिहारार्थं सामग्रीवैगुण्यमुन्नेयम् । विभावनायां कार्योत्पत्तौ विरोधः
विशेषोक्तौ कारणसत्तायामित्युभयविरोधानुप्राणिताद्विरोधादेकैकविराधानुप्राणि-
तयोरनयोर्भेदः । उदाहरति । **प्रतापेति** । अविद्यमाना रात्रिः प्रसिद्धकारणं येषां
तान्यरात्रीणि । तमांस्यन्धकारा मोहाश्च । घस्रेषु दिनेष्वपि । तेजांसि प्रकाशा
विवेकाश्च । योजयति । **अत्रेति** । अत्र तमसां द्वैविध्येऽप्यभेदाध्यवसायादेक-
त्वमतिशयोक्त्या । सा चास्यामव्यभिचारिणीति न तद्बाधेनास्या उत्थानम् ।

कार्यकारणयोर्भिन्नदेशत्वे सत्यसङ्गतिः ।

यत्रैकदेशवर्तिनोरपि कार्यकारणयोर्भिन्नदेशस्थितिर्निबध्यतेऽसावसंगत्यलंकारः । यथा

बिभ्रत्युर्वीधुरां गुर्वीं वीररुद्रनरेश्वरे ।
भवन्त्यतितरां शश्वन्नम्राः सामन्तमौलयः ॥

अत्र राज्ञि भूभारः शत्रुषु नमनमिति विरोधप्रस्तावाद्विचित्रं निरूप्यते ।

विचित्रालंकारः ।

विचित्रं स्वविरुद्धस्य फलप्राप्त्यर्थमुद्यमः ।

यत्र स्वविरुद्धफलप्राप्त्यर्थमुद्योगः क्रियते स विचित्रालंकारः । यथा

प्रतापरुद्रनृपतेरग्रे दूरान्नरेश्वराः ।
अवरोहन्ति हस्तिभ्यस्तानारोढुमनर्गलम् ॥

अत्रारोढुमवरोहन्तीति विपरीतफलप्राप्त्यर्थं प्रयत्नः ।

अन्योन्यालंकारः ।

अथान्योन्यं निरूप्यते । अस्यापि विरोधमूलता ।

तदन्योन्यं मिथो यत्रोत्पाद्योत्पादकता भवेत् ।

यत्र परस्परं क्रियाद्वारकमुत्पाद्योत्पादकत्वं तदन्योन्यालंकारः । यथा

आरोहता रुद्रनरेश्वरेण विराजते काकतिराजपीठम् ।

अपि तु तदनुप्राणितत्वेनेत्यादिविशेषा अवान्तरभेदाश्च सर्वस्वे द्रष्टव्याः । असंगतेः संगतिपूर्वकं लक्षणमाह । **कार्येत्यादिना** । धूमाग्न्योरिव कार्यकारणयोः समानदेशत्वं न्यायसिद्धं तदन्यथाकृतं चेदुचितसंगतिनिवृत्तेरसंगतिर्नामालंकारः । उदाहरति । **बिभ्रतीति** । स्पष्टम् । विचित्रं संगमयन् लक्षयति । **विरोधेत्यादि** । स्वस्य हेतोर्विरुद्धस्य विपरीतस्य फलस्याप्त्यर्थमुद्यम उत्साहो विचित्रालंकारः । न चायं विषमाद्यभेदेऽन्तर्भवति । इह हि निषेधो वैपरीत्यं गमयति । विषमे तु व्यत्यय इति भेदस्य स्वकेनोक्तत्वात् । उदाहरति । **प्रतापेति** । योजयति । **अत्रेति** । अन्योन्यं निरूपयति । **अथेत्यादिना । विरोधमूलतेति** । संगतिकथनम् । क्रियाद्वारकमिति साक्षात् परस्परजन्यजनकभावस्य विरुद्धत्वादिति भावः । **आरो-**

आरुह्य तेनोज्ज्वलरत्नभाजो राजापि लक्ष्मीमधिकां बिभर्ति ॥

अत्र प्रतापरुद्रभद्रासनयोरन्योन्यालंकार्यत्वम् ।

विषमालंकारः ।

अथ विरोधमूलो विषमालंकारः कथ्यते ।

विरुद्धकार्यस्योत्पत्तिर्यत्रानर्थस्य वा भवेत् ।
विरूपघटना चासौ विषमालंकृतिस्त्रिधा ॥

यत्र कारणाद्विरुद्धकार्यस्योत्पत्तिस्तदेकं विषमम् । अकार्यभूतस्यानर्थस्योत्पत्तिर्द्वितीयम् । विरूपयोर्वस्तुनोः संघटने तृतीयम् । तत्र प्रथमं यथा

राज्ञः काकतिवीररुद्रनृपतेः खड्गात् तमालप्रभा-
दुद्भूतां शरदिन्दुकान्तिधवलां कीर्तिश्रियं पश्यताम् ।
लोकानां मुरवैरिपादकमलाज्जातां वियन्निम्नगां
श्रुत्वा संप्रति विस्मयाद्विरमति प्राप्तानुभावं मनः ॥

अत्र नीलवर्णात् खड्गादिन्दुधवलस्य यशसः समुत्पत्तिः । द्वितीयं यथा

आस्तां जयाशा रिपुभूपतीनां संग्रामसीमानमुपागतानाम् ।
प्रतापरुद्रस्य विलोकनेन भ्रश्यन्ति जीवैः सममायुधानि ॥

अत्र समरोद्योगफलस्य न केवलं जयस्यानुत्पत्तिर्यावज्जीवितभ्रंशरूपानर्थोत्पत्तिरपि । तृतीयं यथा

क भूपालास्तादृग्विभवमहनीयप्रकृतयः
क चेयं कान्तारस्थितिरशिवबृत्त्येकनिलया ।

हतेति । अत्रालंकारद्वारा रुद्रभद्रासनयोर्जन्यजनकभाव इत्याह । **अत्रेति** । संगतिपूर्वकं विषमं लक्षयति । **विरुद्धेति** । कारणविरुद्धकार्यस्येत्यर्थः । **अनर्थस्य वेति** । उत्पत्तिरिति शेषः । आद्यमुदाहरति । **राज्ञ इति** । अनुगतो भावो दार्ष्टान्तिकधर्मो यस्यासावनुभावो दृष्टान्तः प्राप्तानुभावमनुभूतदृष्टान्तं लोकानां मनोविस्मयात् विरमति । अद्वितीयमेव वस्तु विस्मयावहं न पुनः सद्वितीयमिति भावः । 'जुगुप्साविराम' इत्यादिना विस्मयादिति पञ्चमी। योजयति । **अत्रेति** । द्वितीयोदाहरणं स्पष्टम् । तृतीयमुदाहरति । **केति** । अशिवबृत्तानाममङ्गलचरितानामेकनिलयः। प्रेक्षं प्रेक्षं पुनःपुनः प्रेक्ष्य। आभीक्ष्ण्ये

इति प्रेक्षं प्रेक्षं वनभुवि रिपून् रुद्रनृपतेः
प्रतापं श्लाघन्ते शबरपुरवीराः प्रतिदिशम् ॥

अत्र महानगरनिवासयोग्यानां राज्ञामशिवानां वनप्रदेशानां विरूपाणां संघटनम् । एवं विरोधगर्भालंकारा निर्णीताः ।

समालंकारः ।

अधुना विषमवैधर्म्यात् समालंकारो निरूप्यते ।

सा समालंकृतिर्योगे वस्तुनोरनुरूपयोः ।

यत्रान्योन्यानुरूपपदार्थसंघटना क्रियते स समालंकारः । यथा

*विज्जाओ सकलाओ लच्छीए समं पआवरुद्दम्मि ।
संघटिऊण सुसरिसं होइ कअच्छो सअं बह्मा ॥

अत्र प्रतापरुद्रे सकलविद्यानां लक्ष्म्याश्च योगः ।

तुल्ययोगितालंकारः ।

अथ गम्यमानौपम्यालंकारवर्गप्रस्तावः ।

**प्रस्तुतानां तथान्येषां केवलं तुल्यधर्मतः ।
औपम्यं गम्यते यत्र सा मता तुल्ययोगिता ॥**

यत्र केवलप्रस्तुतानां केवलाप्रस्तुतानां वा समानधर्मसंबन्धादौपम्यं गम्यते सा तुल्ययोगिता । प्रस्तुतानां यथा

*विद्याः सकला लक्ष्म्या समं प्रतापरुद्रे ।
संघटय्य सुसदृशं भवति कृतार्थः स्वयं ब्रह्मा ॥

णमुलि द्विर्भावः। दिशि दिशि प्रतिदिशम्। यथार्थेऽव्ययीभावः । 'अव्ययीभावे शरत्प्रभृतिभ्यः' इति समासान्तः। अथ विरोधगर्भालंकारान्निगमयन् समालंकारं संगतिपूर्वकं लक्षयति । **एवमित्यादिना** । **विषमवैधर्म्यादिति** । विषमतृतीयभेदवैधर्म्यादित्यर्थः । अयं चालंकारः संबध्यमानवस्तुनोः श्लाघ्यत्वाश्लाघ्यत्वाभ्यां द्विविध इत्यनुसंधेयम् । **विज्जाओ इति** । 'स्त्रियां शस उदोतौ' इति स्त्रीलिङ्गे विद्याशब्दे वर्तमानस्य शस ओदादेशः । अत्र श्लाघ्ययोः लक्ष्मीसरस्वत्योर्योगः । अश्लाघ्ययोस्तु 'धात्रा निम्बफलास्वादे काकलोको हि कल्पितः' इत्यादौ द्रष्टव्यः । गम्यौपम्यानलंकारान् प्रस्तौति । **अथेति** । तत्र प्रस्तुताप्रस्तुतव्यासाश्रयां तुल्ययोगितामाह । **प्रस्तुतानामिति** । केवलमित्युभयत्र संयोज्य व्याचष्टे । **यत्रेति** । तुल्यस्य योगोऽस्यां संजात इति तुल्य-

भद्रासनाध्यासिनि रुद्रदेवे तत्कीर्तयस्तद्द्विषदङ्गनाश्च ।
अनारतं भ्रान्तिविशेषभाजः प्रतिक्षणं पाण्डुरतां भजन्ते ॥

अत्र कीर्तीनां द्विषदङ्गनानां च प्राकरणिकत्वम् । पाण्डुरतां भजन्त इति समानधर्मः । अप्राकरणिकानां यथा

कूर्मेन्द्रपन्नगाधीशहरित्करिकुलाद्रयः ।
मिथो निःसारतां प्राप्ताः काकतीन्द्रे महीभृति ॥

अत्र कूर्मेन्द्रप्रभृतीनामप्राकरणिकत्वम् । निःसारतां प्राप्ता इति समानधर्मः । अत्र गम्यमानौपम्यं न वास्तवम् किं तु वैवक्षिकम् ।

दीपकालंकारः ।

प्रस्तुताप्रस्तुतानां तु सामस्त्ये तुल्यधर्मतः ।
औपम्यं गम्यते यत्र दीपकं तन्निगद्यते ॥

यत्र प्रस्तुताप्रस्तुतानां समस्तानामेव समानधर्मसंबन्धेनौपम्यं गम्यते तद्दीपकम् । तस्य धर्मस्यादिमध्यान्तगतत्वेन त्रैविध्यम् । आदिदीपकं यथा

*भाइ णलेण किअजुअं रहुउलदीवेण सोरिणा तेता ।
दावारो तवजणिणा कलिजुअं वीररुद्देण ॥

---

*भाति नलेन कृतयुगं रघुकुलदीपेन शौरिणा त्रेता ।
द्वापारस्तपोजनिना कलियुगं वीररुद्रेण ॥

योगितेत्यर्थः । सा च प्रस्तुतानामप्रस्तुतानां च प्रतिस्वं गुणेन क्रियया च संबन्धे चतुर्विधा । तत्र केवलप्रस्तुतविषयां गुणाश्रयामुदाहरति । **भद्रासनेति** । अन्योदाहरणमाह । **कूर्मेन्द्रेति** । हरित्करिणो दिग्गजाः । एवमुभयत्र क्रियाश्रयत्वेनाप्युदाहार्यम् । ननु प्रस्तुताप्रस्तुतविषयस्यौपम्यस्य कथमत्रोपपत्तिस्तत्राह । **अत्रेति** । केवलप्रस्तुतेषु कस्यचिदुपमानत्वस्य केवलाप्रस्तुतेषु कस्यचिदुपमेयत्वस्य कल्प्यमानत्वादिति भावः । अथ प्रस्तुताप्रस्तुतसमासाश्रयं दीपकमाह । **प्रस्तुतेति** । अत्र प्रस्तुताप्रस्तुतानां सामस्त्यमत एवौपम्यं वास्तवमिति तुल्ययोगितातो विशेषः । गम्यत्वं पुनरस्य पूर्ववदत्रापि इवाद्यभावात् । प्राकरणिकाप्राकरणिकमध्ये कुत्रचिन्निविष्टः समानो धर्मः पश्चर्थानुष्ठितः प्रयाजादिः पुरोडाशस्येवेतरांशस्योपकरोति । अत एव दीपसादृश्यात् दीपकमित्युच्यते । 'संज्ञायां च' इतीवार्थे कन्प्रत्ययः । तत्र विशेषमाह । **तस्येति** । आदिमध्यान्तगतत्वेन आदिमध्यान्तवाक्यगतत्वेनेत्यर्थः । **भाईति** । रघुकुलदीपेन शौरिणा रामेण । तपसो जनिरुत्पत्तिर्यस्य

अत्र यथा नलरामधर्मपुत्रैः कृतत्रेताद्वापराः शोभन्ते तथा वीररुद्रेण कलियुगं शोभत इत्यौपम्यं गम्यते । मध्यदीपकं यथा

*भाईरहिए जलणिही राअइ जोण्हाइ पुण्णिमाचंदो ।
सुत्तीए कमलहवो कित्तीए पआवरुद्दो वि ॥

अत्र भागीरथ्यादिभिः समुद्रादयो यथा राजन्ते तथा कीर्त्या प्रतापरुद्रो राजत इत्यौपम्यं गम्यते । अन्तदीपकं यथा

†सुरलोअं सुरणाहो णरलोअं वीररुद्दणरणाहो ।
फणिलोअं फणिणाहो रक्खइ णिरुपद्दवोज्जेअं ॥

अत्र यथा सुरलोकफणिलोकौ सुरनाथफणिनाथाभ्यां रक्षितौ तथा वीररुद्रेण नरलोको रक्षित इत्यौपम्यं गम्यते । अथ पदार्थगतालंकारद्वयानन्तरं वाक्यार्थगतमलंकारद्वयं निरूप्यते ।

प्रतिवस्तूपमालंकारः ।

यत्र सामान्यनिर्देशः पृथग्वाक्यद्वये यदि ।
गम्यौपम्याश्रिता सा स्यात् प्रतिवस्तूपमा मता ॥

यत्र वस्तुप्रतिवस्तुभावेन सामान्यं वाक्यद्वये निर्दिश्यते तेन गम्यौ-

---

*भागीरथ्या जलनिधी राजते ज्योत्स्नया पूर्णिमाचन्द्रः ।
श्रुत्या कमलभवः कीर्त्या प्रतापरुद्रोऽपि ॥

†सुरलोकं सुरनाथो नरलोकं वीररुद्रनरनाथः ।
फणिलोकं फणिनाथो रक्षति निरुपद्रवोद्वेगम् ॥

तेन तपोजनिना धर्मपुत्रेण । अत्र भातीति समानधर्मस्यादिवाक्यगतत्वादादिदीपकम् । **भाईरहिए इति** । अत्र राजत इत्यस्य द्वितीयवाक्यगतत्वान्मध्यदीपकम् । **सुरेति** । अत्र रक्षणस्यान्तवाक्यगतत्वादन्तदीपकम् । एषूदाहरणेष्वनेककारकगतत्वेनैकक्रियादीपकम् । एवमनेकक्रियागतत्वेनैककारकमपि दीपकमस्ति । यथा । 'साधूनामुपकर्तुं लक्ष्मीं द्रष्टुं विहायसा गन्तुम् । न कुतूहलि कस्य मनश्चरितं च महात्मनां श्रोतुम् ॥' इति । अनन्तरालंकारयोः संगतिमाह । **अथेति** । समानधर्मस्य पदार्थगतत्वात् । दीपकतुल्ययोगिते पदार्थगते । तन्निरूपणानन्तरं तदारब्धवाक्यार्थमूलालंकारद्वयमुच्यत इत्यर्थः । तत्रापि पूर्वोक्तरीत्यान्तरङ्गवस्तुप्रतिवस्तुभावमूलां प्रतिवस्तूपमामाह । **यत्रेति** । फलतो व्याचष्टे । **यत्र वस्त्विति** । **गम्यौपम्येति** । इवाद्यप्रयोगादिति भावः । अन्यथेयमुपमैव स्यादिति हृदयम् । तेन प्रतिवस्तु प्रतिवाक्यार्थमुपमा सामान्यं यस्यां सा

पम्या प्रतिवस्तूपमा । सा साधर्म्यवैधर्म्याभ्यां द्विविधा । प्रथमा यथा

मन्थानाचल एवैकः क्षमः सिन्धुविलोडने ।
प्रतापरुद्र एवैकः शक्तः शत्रुविलोडने ॥

अत्र यथा समुद्रविलोडने मन्थानाचलः क्षमस्तथा शत्रुविलोडने प्रतापरुद्रः शक्तः इत्यौपम्यं गम्यते । द्वितीया यथा

प्रतापरुद्र एवैकः पटीयान् जनरञ्जने ।
चन्द्राहते क्षमो नान्यश्चकोरपरितोषणे ॥

अत्र चन्द्रेण यथा चकोरपरितोषणं क्रियते तथा वीररुद्रेण जनरञ्जनं क्रियत इति वैधर्म्येणौपम्यं गम्यते । अथ दृष्टान्तः ।

दृष्टान्तालंकारः ।

यत्र वाक्यद्वये बिम्बप्रतिबिम्बतयोच्यते ।
सामान्यधर्मो वाक्यज्ञैः स दृष्टान्तो निगद्यते ॥

यत्र बिम्बप्रतिबिम्बभावेन सामान्यं वाक्यद्वये निर्दिश्यते स दृष्टान्तालंकारः । सोऽपि साधर्म्यवैधर्म्याभ्यां द्विविधः । आद्यो यथा

क्षोणीं बिभ्रतु भूभृतः कतिपये कापि प्रतिष्ठा पुनः
स्वर्णाद्रेर्दिगधीशवासनगरीसंदिग्धकुञ्जश्रियः ।
राजानो जनरञ्जनं विदधतां श्रीवीररुद्रप्रभोः
कोऽप्यन्यो महिमा जगत्त्रयधुराधौरेयदोःशालिनः ॥

प्रतिवस्तूपमा इत्यन्वर्थेयमजनि । तस्या द्वैविध्यमाह । **साधर्म्येति** । साधर्म्येणोदाहरति । **मन्थानेति** । अत्र संबन्धिभेदेन क्षमशक्तशब्दाभ्यां समानधर्मस्य कथनाद्वस्तुप्रतिवस्तुभावः । वैधर्म्येणोदाहरति । **प्रतापेति** । पटीयानतिपटुः । दृष्टान्तं लक्षयति । **यत्रेति** । द्वयोः सदृशयोरर्थयोरुपादानं बिम्बप्रतिबिम्बभाव इत्युक्तम् । अत्रापीवाद्युपादाने पूर्ववदुपमैव स्यादिति द्रष्टव्यम् । दृष्टोऽन्तो निश्चयो यत्र स दृष्टान्त इत्यर्थः । साधर्म्येणोदाहरति । **क्षोणीमिति** । भूभृतः पर्वताः । दिगधीशानामिन्द्रादीनां वासनगरीत्वेन संदिग्धाः संदेहविषयीकृताः कुञ्जश्रियो यस्य तस्य तथोक्तस्य । तत्र कुञ्जेष्वेव नगरबुद्धिरुदेतीति भावः । संपूर्वको दिहिः सकर्मकोऽपि दृश्यते । यथा 'नानुपलब्धेन निर्णीतेऽर्थे

अत्र प्रतापरुद्रस्य मेरोश्च बिम्बप्रतिबिम्बभावादौपम्यं गम्यते। वैधर्म्येण यथा

काकतीन्द्रकृपादृष्टिमात्राज्जाग्रति संपदः।
तावदब्जानि निद्रान्ति यावन्नोदेति भानुमान्॥

अत्र यथा भास्वदुदयमात्रेण पद्मानि समुन्मीलन्ति तथा प्रतापरुद्रदयाविलोकनमात्रेण संपदः संभवन्तीति वैधर्म्येण बिम्बप्रतिबिम्बनम्।

निदर्शनालंकारः।

अथ गम्यमानौपम्यप्रस्तावान्निदर्शनालंकारो निरूप्यते।

असंभवद्धर्मयोगादुपमानोपमेययोः।
प्रतिबिम्बक्रिया गम्या यत्र सा स्यान्निदर्शना॥

यत्रोपमानधर्मस्योपमेयगतत्वेन निबद्धस्यान्वयासंभवात् तत्संबन्धार्थं बिम्बप्रतिबिम्बकरणमाक्षिप्यते सैका निदर्शना। तद्विपर्यये द्वितीया निदर्शना। प्रथमा यथा

रिपुतिमिरमुदस्यन् रत्नसिंहासनस्थ-
स्त्रिभुवनमहनीयः काकतीयक्षितीशः।
वहति महितविश्वोल्लासलीलामभिख्या-
मुदयशिखरिचूडाचुम्बिनस्तीव्रभानोः॥

अत्र तीव्रभानोरभिख्यायाः प्रकृतेऽसंभवादभिख्यासदृशीमभिख्यां वहतीति बिम्बप्रतिबिम्बकरणाक्षेपः। उपमेयधर्मस्योपमानेऽसंभवाद्यथा।

न्यायः प्रवर्तते अपि तु संदिग्धे' इति। जगत्त्रयधुरायां धौरेयाभ्यां धुरन्धराभ्यां दोर्भ्यां शालते ताच्छील्येन तथोक्तस्य धौरेयशब्दो व्याख्यातः। वैधर्म्येणोदाहरति। **काकतीन्द्रेति**। निदर्शनायाः संगतिमाह। **अथेति**। अत्र बिम्बप्रतिबिम्बभावोऽभ्युच्चयः। लक्षणमाह। **असंभवदिति**। उपमानधर्मस्योपमेयगतत्वेनोपमेयधर्मस्योपमानगतत्वेन वा संबन्धासंभवाद्वाक्यार्थसंबन्धा निदर्शना द्विविधेत्यर्थः। व्याचष्टे। **यत्रेति**। **तद्विपर्यय इति**। उपमेयधर्मस्योपमानगतत्वेनेत्यर्थः। **रिपुतिमिरमिति**। उदयशिखरिचूडाचुम्बिनः प्राचीनपर्वताग्रवर्तिनस्तीव्रभानोर्विश्वोल्लासिलीलां लोकानन्दिस्वरूपामभिख्यां शोभां वहति। योजयति। **अत्रेति**।

वीररुद्रनरेन्द्रस्य यशोवैशद्यसंपदः ।
लक्ष्यन्ते क्षीरवाराशिलीलादर्पणमण्डले ॥

अत्र यशोवैशद्यस्य दुग्धार्णवेऽसंभवात् सादृश्योपगमेन बिम्बप्रतिबिम्बनं गम्यते । क्वचिन्निषेधवशादाक्षिप्तया प्राप्त्या बिम्बप्रतिबिम्बकरणाक्षेपो यथा

काकतीन्द्रद्विषत्कान्ता धावन्त्यः प्रतिकाननम् ।
पद्भ्यां मुञ्चन्त्यलाक्षाभ्यां स्थले रक्तोत्पलश्रियम् ॥

अत्र मुञ्चन्तीति निषेधात् पूर्वं रक्तोत्पलश्रीप्राप्तिराक्षिप्ता ।

व्यतिरेकालंकारः ।

अथ व्यतिरेकः ।

भेदप्रधानसाधर्म्यमुपमानोपमेययोः ।
आधिक्याल्पत्वकथनाद् व्यतिरेकः स उच्यते ॥

यत्रोपमानादुपमेयस्याधिक्येन न्यूनत्वेन वा प्रतिपादनेन भेदप्रधानं साधर्म्यमुपगम्यते स व्यतिरेकालंकारः । यथा

दिनकृति कुमुदैर्धृतो न रागः शशिनि पराञ्चि परं सरोरुहाणि ।

वीररुद्रेति । अत्रोपमेयधर्मस्योपमानेऽसंभवात् प्रतिबिम्बक्रियाक्षेप इत्याह । **अत्र यश इति** । अत्र च विशेषान्तरमाह । **क्वचिदिति । काकतीन्द्रेति ।** अलाक्षाभ्यामलक्तकरहिताभ्याम् । पूर्वं राज्यसमय इत्यर्थः । संभवद्वाक्यार्थसंबन्धापीयमन्यैरङ्गीकृता । तदुक्तम् । 'अभवन् वस्तुसंबन्धो भवन् वा यत्र कल्पयेत् । उपमानोपमेयत्वं कथ्यते सा निदर्शना ॥' इति । उदाहरणं तु 'चूडामणिपदे धत्ते यो देवं रविमागतम् । सतां कार्यातिथेयीति बोधयन् गृहमेधिनः ॥' इति । अत्र चक्रवर्ती व्याचक्रे । 'बोधयन्निति कारीषोऽग्निरध्यापयतीतिवद् गिरिगृहमेधिनो बोधनक्रियासमर्थान् करोतीति तत्समर्थाचरणे णिचः प्रयोगात् संभवति वस्तुसंबन्धः' इति । ततस्तत्सदृशबोधनाक्षेपः । सैषा सर्वापि पदार्थवृत्तिः वाक्यार्थवृत्तिर्यथा । 'त्वत्पादनखरत्नानां यदलक्तकमार्जनम् । इदं श्रीखण्डलेपेन पाण्डुरीकरणं विधोः ॥' इति । न चायं दृष्टान्तः । अत्र वाक्ययोः सापेक्षत्वात् । यत्र निरपेक्षवाक्यद्वये बिम्बप्रतिबिम्बभावः स दृष्टान्तः । यत्र सापेक्षवाक्यद्वये सोऽसौ निदर्शनेति महाननयोर्भेदः । अत्र मालावैचित्र्यमपि द्रष्टव्यम् । अथ गम्यौपम्यप्रस्तावाद् व्यतिरेकं लक्षयति । **भेदेति** । भेदो वैलक्षण्यं तत्प्रधानं साधर्म्यं गम्यत इत्यध्याहृत्य व्याचष्टे । **यत्रेति** । उदाहरति । **दिनकृतीति** । रागोऽनुरागः ।

कुवलयकमलादृतप्रकाशः प्रभवति विश्वसुहृत् प्रतापरुद्रः ॥

अत्र रविशशिनोरसंभवेन सर्वप्रियंकरत्वेनोपमेयभूतस्य प्रतापरुद्रस्याधिक्यं कुवलयकमलादृतप्रकाश इति श्लेषसमुत्थापितो व्यतिरेकः।

श्लेषालंकारः ।

अथ श्लेषालंकारो निरूप्यते ।

प्रकृताप्रकृतोभयगतमुक्तं चेच्छब्दमात्रसाधर्म्यम् ।
श्लेषोऽयं श्लिष्टत्वं सर्वत्राद्यद्वये नान्त्ये ॥

यत्र केवलप्रकृतयोः केवलाप्रकृतयोश्च श्लेषः कथ्यते तत्र प्रकारद्वये विशेषणविशेष्यश्लिष्टता । प्रकृताप्रकृतविषयेऽन्त्यभेदे विशेषणमात्रश्लिष्टता । विशेष्ययोरपि श्लिष्टत्वे शब्दशक्तिमूलध्वनिप्रसङ्गात् । केवलप्रकृतयोः केवलाप्रकृतयोश्चैकशब्दगोचरत्वे तु न ध्वनिशङ्का । अत्रार्थद्वयप्रतिपादनेऽप्रस्तुतत्वेन प्रस्तुतत्वेन वा वैषम्याभावादभिधैव समर्था । प्रस्तुताप्रस्तुतविषये तु अभिधायाः प्रस्तुतैकपरतन्त्र-

---

पराञ्चि प्रतिकूलानि । अयं तु कुवलयेन भूमण्डलेन कमलया लक्ष्म्या च अभेदाध्यवसितैः कुवलयकमलैरादृतप्रकाश इत्युपमानादुपमेयस्याधिक्यकथनं श्लेषमूलम् । उपमानादुपमेयस्याल्पत्वपक्षे सहृदयहृदयानधिरोहादुदाहरणं नोक्तम् । भेदद्वयलक्षणं तु सर्वस्वकारानुसारादिति रहस्यम् । तदीयोदाहरणं तु काव्यप्रकाशकारः समदूषयत् । तत्प्रकारो व्यतिरेकप्रपञ्चश्च तत्रैव द्रष्टव्यः । 'उपमानाद्यदन्यस्य व्यतिरेकः स एव सः' इति तल्लक्षणमेव साधीयः । व्यतिरेकस्य श्लेषगर्भत्वात् तत्प्रसङ्गानन्तरं श्लेषं प्रतिज्ञापूर्वकं लक्षयति । **अथेति** । यत्र केवलप्रकृतयोः केवलाप्रकृतयोः प्रकृताप्रकृतयोश्च शब्दमात्रसाधर्म्यमुक्तं चेच्छिलष्टपदोपनिबन्धा कृतश्चेदित्यनेनोपमाव्यवच्छेदः । अयं श्लेषालंकारः । अत्राद्यद्वये केवलप्रकृतश्लेषे केवलाप्रकृतश्लेषे चेत्यर्थः । सर्वत्र श्लिष्टत्वं विशेषणेषु विशेष्येषु च श्लेष इत्यर्थः । अन्त्ये उभयश्लेषे न सर्वत्र श्लिष्टत्वं किं तु विशेषणेष्वेवेत्यर्थः । विशेष्ययोरपि श्लिष्टत्वे शब्दशक्तिमूलध्वनिप्रसंगः । तदेतदाह । **अत्रेति** । ननूभयश्लेष एव विशेष्याश्लिष्टत्वे ध्वनिशङ्का नेतरभेदद्वय इत्यत्र किं नियामकमत आह । **केवलप्रकृतयोरिति** । आद्यभेदद्वये विशेष्ययोरपि श्लिष्टत्वे अर्थद्वयस्य प्रस्तुतत्वाविशेषादप्रस्तुतत्वाविशेषाद्वा अभिधाया अकुण्ठितसंचारत्वात् प्रस्तुताप्रस्तुतौ द्वावप्यर्थौ वाच्यावेव । अतो नाद्यभेदद्वये ध्वनिशङ्केति भावः । उभयश्लेषे कथं ध्वनेरवकाश इत्याकाङ्क्षायामाह । **प्रस्तुताप्रस्तुतविषये त्विति** । प्रकरणा-

त्वादप्रस्तुतार्थप्रतिपत्तिर्व्यञ्जनव्यापारायत्तैव । तथा चोक्तं काव्यप्रकाशे ।

'अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते ।
संयोगाद्यैरवाच्यार्थधीकृत् व्यापृतिरञ्जनम् ॥' इति ।

तदेवं त्रिधा श्लेषः । तत्र केवलप्राकरणिकयोर्यथा

राज्ञः पूजाविधिं धत्ते सकलोमाधवेतिथिः ।
नीलकण्ठकलापाङ्के स्फुरदब्जमणित्विषि ॥

अत्र पूजाविषयतया हरिहरयोः प्राकरणिकत्वम् । अप्राकरणिकयोर्यथा

सदृशः काकतीन्द्रोऽयं महाकुलमहीभृताम् ।
शिरोगृहीतसन्मार्गस्फुरत्कटकसंपदाम् ॥

दिकं प्रस्तुतार्थ एवाभिधां नियच्छति नाप्रस्तुतार्थे । अतस्तस्य न वाच्यत्वमिति भावः । ननु मा भूद् वाच्यत्वं व्यङ्ग्यत्वं तु कुतो लभ्यत इत्यत आह । **अप्रस्तुतेति** । अर्थान्तरस्य व्यञ्जनव्यापारैकविषयत्वे वृद्धसंमतिमाह । **अनेक इति** । अनेकार्थस्याक्षादिशब्दस्य संयोगाद्यैः 'संयोगो विप्रयोगश्च—' इत्यादिभिः वाक्यपदीयोक्तैरर्थनिश्चायकैर्वाचकत्वे नियन्त्रिते प्रस्तुतपरत्वेन नियमिते सति अवाच्यार्थधीकृदर्थान्तरप्रतीतिकृत् व्यापृतिरञ्जनं व्यञ्जनव्यापार इत्यर्थः। **तदेवमिति** । प्रकृताप्रकृतोभयगतत्वेनेत्यर्थः । अयं च श्लेषः प्रकारान्तरेणापि त्रिविधः । तथा हि जतुकाष्ठन्यायेन सभङ्गपदः शब्दश्लेषः । एकनालावलम्बिफलद्वयन्यायेनाभङ्गपदोऽर्थश्लेषः । उभयनिबन्धे तूभयश्लेष इति । काव्यप्रकाशकारः पुनरिममर्थश्लेषं शब्दश्लेषमेवोक्त्वान्यथार्थश्लेषमवोचत् । तद्विवेकस्तु तत्रैव द्रष्टव्यः । केवलप्रकृतिश्लेषमुदाहरति । **राज्ञ इति** । नीलकण्ठकलापाङ्के मयूरपिञ्छचिह्ने स्फुरन्ती अब्जमणेः कौस्तुभस्य त्विड् यस्य तस्मिन् माधवे सकलस्तिथिः प्रतिपदादिः राज्ञः पूजाविधिं धत्ते । नीलः कण्ठो यस्यासौ नीलकण्ठः । कलाः षोडश पातीति कलापश्चन्द्रोऽङ्कः शेखरो यस्य स तथोक्तः । उभयोर्विशेषणसमासः तस्मिन् स्फुरन्ती अब्जमणेश्चन्द्रकान्तस्य त्विडिव त्विड् यस्य तस्मिन्नुमाधवे सकलातिथिः पूजाविधिं धत्ते । 'तदाद्यास्तिथयोर्द्वयोः' इत्यमरः । सर्वेष्वपि तिथिषु हरिहरौ पूजनीयावित्यर्थः । सकलोमाधवेतिथिरित्यत्र सभङ्गपदत्वाच्छब्दश्लेषत्वम् । अन्यत्राभङ्गपदत्वादर्थश्लेषत्वं च यथासंभवं द्रष्टव्यम् । केवलाप्रकृतश्लेषमुदाहरति । **सदृश इति** । शिरसा गृहीतो गौरवेण स्वीकृतः सन्मार्गः साधुमार्गो येषां ते तथोक्ताः । स्फुरन्त्यः कटकानामलंकाराणां संपदो

अत्र महाकुलानां हरिश्चन्द्रप्रभृतीनां कुलपर्वतानां चोपमानत्वेनाप्राकरणिकत्वम् । प्राकरणिकाप्राकरणिकयोर्यथा

विजितारिपुरो मूर्तौ विलसत्सर्वमङ्गलः ।
राजमौलिः प्रतापाङ्करुद्रो रुद्र इव स्थितः ॥

अत्र प्रतापरुद्ररुद्रयोः प्राकरणिकाप्राकरणिकत्वम् ।

परिकरालंकारः ।

विशेषणवैचित्र्यमूलत्वात् परिकर उच्यते ।

यत्राभिप्रायगर्भा स्याद्विशेषणपरम्परा ।
तत्राभिप्रायविदुषामसौ परिकरो मतः ॥

यत्र विशेषणानि साभिप्रायाणि निबध्यन्ते स परिकरालंकारः । यथा

राज्ञो यादववंशपार्थिवमणेः प्रख्यातशौर्यश्रिय-
स्त्वङ्गत्तुङ्गतुरङ्गसैन्यमहतो मानैकवित्तस्य च ।
सद्यो रुद्रनरेन्द्रनायकचमूनाथेन केनाप्यधि-
क्षिप्तस्याचरितानि सेवणपतेर्जानाति सा गौतमी ॥

अत्र राज्ञ इत्येवमादिविशेषणान्युत्प्रासगर्भाणि ।

येषां ते तथोक्ताः । उभयोर्विशेषणसमासः । महत् कुलं येषां ते महाकुलाः । ते च ते महीभृतो राजानो हरिश्चन्द्रादयः पर्वताश्च । शिरोभिः शिखरैर्गृहीतः सन्मार्गो नक्षत्रमार्गो येषां ते तथोक्ताः । स्फुरन्त्यः सानुसंपदो येषां महतां कुलमहीभृतां कुलपर्वतानां च सदृशः ॥ उभयश्लेषमुदाहरति । **विजितेति** । विजितारिपुरो निर्जितशत्रुनगरस्त्रिपुरान्तकश्च मूर्तौ विलसन्ति सर्वाणि मङ्गलानि विलसन्ती सर्वमङ्गला पार्वती च यस्य सः । राजमौली राजश्रेष्ठश्चन्द्रशेखरश्च । अत्र रुद्रप्रतापरुद्रयोर्विशेष्ययोः पृथगुपादानमत उभयश्लेषः । संगतिपूर्वकं परिकरं लक्षयति । **विशेषणेति** । अभिप्रायगर्भा व्यङ्ग्यगर्भा । व्यङ्ग्यस्य वाच्योन्मुखत्वेन वाच्यातिशायित्वाभावात् परिकर इत्यन्वर्थोऽलंकारः । उदाहरति । **राज्ञ इति** । राज्ञो न तु यस्य कस्यचित् । यादववंशपार्थिवमणेर्महाकुलीनस्य न म्लेच्छस्य । प्रख्यातशौर्यश्रियोऽनेकधा विहितपराक्रमस्य न त्वनाघ्रातरणगन्धस्य । त्वङ्गत्तुङ्गतुरङ्गसैन्यमहतो नैकाकिनः । मानैकवित्तस्य न तु यथा कथंचित् प्राणपरायणस्य । सेवणपतेः केनाप्यन्ध्रचमूपतिना अधिक्षिप्तस्य सतः । आचरितान्यायुधसन्न्यासादीनि । सा कबलितसेवणपतिसर्वस्वा गौतमी जानातीत्येवं

आक्षेपालंकारः ।

अथाक्षेपालंकारः ।

विशेषबोधायोक्तस्य वक्ष्यमाणस्य वा भवेत् ।
निषेधाभासकथनमाक्षेपः स उदाहृतः ॥

यत्र विशेषप्रतिपत्त्यर्थमुक्तवक्ष्यमाणयोः प्राकरणिकयोर्निषेधाभासः कथ्यते स आक्षेपालंकारः । उक्तविषये वस्तु वा कथनं वा निषिध्यते । वक्ष्यमाणविषये कथनमेव निषिध्यते । तत्रापि सामान्यरूपेण प्रतिज्ञाय विशेषरूपेण निषेधः । अंशोक्तावंशान्तरस्य वा निषेधः । एवं चतुर्विधोऽयमाक्षेपः । क्रमेणैषामुदाहरणानि ।

नरेन्द्रमौले न वयं तव संदेशहारिणः ।
जगत्कुटुम्बिनः कश्चिन्न शत्रुरिति कथ्यते ॥

अत्र राजसन्धिविग्रहकारिणामुक्तौ न वयं संदेशहारिण इति वस्तुनिषेधः । स चानुपपद्यमानः संधिविग्रहकालोचितकैतववचनपरिहारेण तत्ववादित्वे पर्यवसितः । सर्वजगत्पालकस्य तव शत्रुभावेन नालोकनीया राजानः किं तु भृत्यरूपेण संरक्षणीया इत्येवमादिविशेषमाक्षिपति । कथननिषेधो यथा

वयमशरणा इत्येषोक्तिः कथं घटते जगत्-
त्रितयशरणे त्रायस्वास्मानिति स्फुटमज्ञता ।
सकलजनतारक्षादक्षे त्वयि प्रणता इति
त्रिभुवननमस्कार्ये सिद्धं प्रतापमहीपते ॥

साभिप्रायविशेषणत्वम् । उत्प्रासगर्भाण्यभिप्रायगर्भाणीत्यर्थः । गम्यत्वप्रस्तावात् परिकरानन्तरं विशेषगम्यत्वाश्रयमाक्षेपं लक्षयति । **विशेषेति** । यत्रोक्तस्य वक्ष्यमाणस्य वा प्राकरणिकत्वेन विधातुमिष्टस्य अत एव निषेधानर्हस्य यो निषेधो विशेषबोधार्थमभिधीयमानः सन्नाभासी भवति स आक्षेप इत्यर्थः । तस्य चतुर्धा विभागमाह । **उक्तविषय इत्यादिना** । तत्रोक्तवस्तुविषयनिषेधमुदाहरति । **नरेन्द्रेति** । अजातशत्रोः किमर्थं संधिविग्रहकारिण इति भावः । वस्तुनिषेधं योजयति । **अत्रेति** । तत्फलं विशेषमाह । **स चेति** । संदेशहारिषु तत्त्वनिषेधोऽनुपपद्यमानः सन्नस्मदीया राजानो भृत्यरूपेण भरणीया इत्यादिविशेषं बोधयतीत्यर्थः । कथननिषेधमुदाहरति । **वयमिति** । सर्वेषां नाथे

अत्र वयमशरणा इत्येवमाद्युक्तिकथननिषेधाभासरूपादवश्यं परिपालनीयत्वादिविशेषः प्रतीयते । वक्ष्यमाणविषये सामान्यं प्रतिज्ञाय कथननिषेधो यथा

विज्ञापयामस्ते किंचित् काकतीयकुलोद्वह ।
विज्ञाप्यते किमथवा सर्वज्ञे रक्षके त्वयि ॥

अत्र विज्ञापयाम इति सामान्यं प्रतिज्ञाय कथननिषेधाभासात् सर्वथा वयं रक्षणीया इति विशेष आक्षिप्यते । अंशोक्तावंशान्तरस्य निषेधो यथा

प्रतापरुद्रः स्वयमिद्धतेजा दैवं च तद्विक्रमदत्तहस्तम् ।
यूयं च तूलोपमसारभाजस्तद्युक्तमेवं यदि वा किमुक्तैः ॥

अत्र प्रतापरुद्रो महीयान् यूयमल्पा इत्यंशोक्त्या यदि वा किमुक्तैरित्यंशान्तरनिषेधाभासेन सर्वथा प्रणामैः प्रसादनीयोऽयं न तु प्रातिपक्ष्यमवलम्बनीयं युष्माभिरिति शत्रुस्त्रीवचनभङ्ग्या विशेष आक्षिप्यते ।

समानार्थतयाऽनिष्टविध्याभासोऽप्याक्षेप इत्यभ्युपगम्यते । यथा चेष्टनिषेधस्यानुपपद्यमानतयाभासत्वं तथानिष्टविधेरप्यनुपपद्यमानतयाभासत्वम् । यथा

नाथ प्रतापरुद्रस्य सेवां त्यजासि चेत्त्यज ।

रक्षके नमस्कार्ये च त्वयि दीप्यमाने सर्वान्तर्भूतानामस्माकमशरणास्त्रायस्व प्रणता इत्यादीनि वचनानि व्यर्थानीत्यर्थः । योजयति । **अत्रेति** । वयमशरणा इत्येवमाद्युक्तिभिः यः कथननिषेधस्तस्मादाभासरूपादविषयप्रवृत्त्या निषेधस्य प्ररोहाभावादाभासत्वमिति भावः । वक्ष्यमाणविषये सामान्यं प्रतिज्ञाय विशेषनिषेधमुदाहरति । **विज्ञापयाम इति** । अत्र प्रथमार्धे सामान्येन प्रतिज्ञाय द्वितीयार्धे वयं रक्षणीया इति विशेषबोधार्थं विशेषकथननिषेधादाक्षेपः । अंशोक्तावंशान्तरनिषेधमुदाहरति । **प्रतापेति** । इद्धतेजाः समृद्धप्रतापः । दत्तहस्तमनुकूलम् । तूलोपमसारभाजो निःसारा इत्यर्थः । तदेवं युक्तमित्यंशोक्त्या किमुक्तैरित्यंशान्तरनिषेधः । तस्य व्यङ्ग्यं विशेषमाह । **सर्वथेति** । आक्षेपान्तरमुपक्षिपति । **समानेति** । समानार्थतया समानन्यायतयेत्यर्थः । तदेवाह । **यथा चेति** । अनुपपत्तिवशादिष्टनिषेधस्येवानिष्टविधेरप्याभासत्वादाक्षेपत्वमिति भावः । उदाहरति । **नाथेति** । अनिष्टविध्याभासं योजयति ।

अरण्यगृहमेधिन्या रीतिरभ्यस्यते मया ॥

अत्रानिष्टभूतं प्रतापरुद्रपादसेवात्यजनं तद्रिपुकामिन्या विधीयते। स विधिरनुपपद्यमान आभासे पर्यवस्यति । अरण्यगृहमेधिन्या रीतिरभ्यस्यत इत्यनेन विध्याभास एव उपबृंहितः ।

व्याजस्तुत्यलंकारः ।

अथ गम्यप्रस्तावात् व्याजस्तुतिरुच्यते ।

निन्दया वाच्यया यत्र स्तुतिरेवावगम्यते ।
स्तुत्या वा गम्यते निन्दा व्याजस्तुतिरसौ मता ॥

यत्र निन्दाकथनमुखेन स्तुतिर्गम्यते एका सा । यत्र स्तुतिमुखेन निन्दा गम्यते सा द्वितीया व्याजस्तुतिः । क्रमेण यथा

काकतीयविभोः कीर्त्या किं वाद्य धवलीकृतम् ॥
यत्तदीयारिवक्त्रेषु दृश्यते कालिमा महान् ॥

स्तुत्या निन्दा यथा

प्रतापरुद्रनृपतेरहो साहसिका द्विषः ।
यद्विशन्त्युदधीन् शैलानारोहन्ति समन्ततः ॥

अप्रस्तुतप्रशंसालंकारः ।

अथ गम्यत्वप्रस्तावादप्रस्तुतप्रशंसोच्यते ।

अप्रस्तुतस्य कथनात् प्रस्तुतं यत्र गम्यते ।
अप्रस्तुतप्रशंसेयं सारूप्यादिनियन्त्रिता ॥

अत्रेति। अथ गम्यत्वप्रस्तावाद्वाच्याभासत्वप्रसङ्गेनाक्षेपानन्तरं व्याजस्तुतिं लक्षयति। **निन्दयेति**। यत्र निन्दया स्तुत्या वा वाच्यया प्रमाणान्तरबाधितस्वरूपया यथाक्रमं स्तुतिर्निन्दा वा गम्यते सा व्याजेन व्याजरूपा वा स्तुतिरिति द्विविधाप्यन्वर्था व्याजस्तुतिरित्यर्थः । **काकतीयेति**। विशेषनिषेधे शेषाभ्यनुज्ञानमिति न्यायेनारिवक्त्रव्यतिरिक्तं विश्वं कीर्त्या धवलीकृतमिति निन्दया स्तुतिर्गम्यते । **प्रतापेति**। अत्र शत्रूणां साहसप्रशंसया भीरुत्वं व्यज्यते । स्तुतिप्रसङ्गाद्व्याजस्तुत्यनन्तरमप्रस्तुतप्रशंसामाह । **अथेति** । यद्यप्यप्रस्तुतमप्रस्तुतत्वादेव न कथनीयं तथापि प्रस्तुतार्थप्रतीत्यर्थत्वादविरोधः । अत्र गम्यगमकयोः प्रस्तुताप्रस्तुतयोर्नियामकं संबन्धमाह । **सारूप्येति** । आदिग्रहणात् सामान्यविशेषभावः कार्यकारणभावश्च गृह्यते । तेषामेवार्थान्तरप्रतीतिहेतुत्वात् ।

यत्र सारूप्येण सामान्यविशेषभावेन कार्यकारणभावेन चाप्रस्तुतकथनात् प्रस्तुतप्रतीतिस्तत्राप्रस्तुतप्रशंसा। अप्रस्तुतात् प्रस्तुतप्रतीतिरित्यनेन समासोक्तेर्व्यावृत्तिः। न च कार्यात् कारणप्रतीतावनुमानाविर्भावशङ्का। अनुमानालंकारे प्रत्याय्यप्रत्यायकयोर्द्वयोरपि प्राकरणिकत्वाभ्युपगमात्। अनेन पर्यायोक्तस्य व्यावृत्तिरपि। न चायं ध्वनिः। प्रतीयमानस्य वाच्यसिद्ध्यङ्गत्वात्। तत्र सारूप्येण यथा

आशासु प्रशमितवासनोदयेभ्यः किं लब्धं भ्रमरगणैर्जरत्तरुभ्यः।
पुन्नागो नवनवसौरभप्रसूनैरामोदं दिशति विवासमारभध्वम्॥

अत्र भ्रमरवृत्तान्तेनाप्रस्तुतेन सर्वानसंपूर्णविभवानुर्वीश्वरान् विहाय सकलगुणपरिपूर्णः सर्वजनानन्दी प्रतापरुद्र एक एव सर्वेषां विदुषां सेव्य इति प्रस्तुतं प्रतीयते। सामान्याद्विशेषप्रतीतिर्यथा

यशस्विनी पद्मभवस्य सृष्टिरुत्पादयित्री नृपशेखराणाम्।
तत्पालनाल्लालनभाग्ययोग्यो जातश्चिरान्मध्यमलोक एषः॥

अत्र प्रतापरुद्रस्य गुणमहत्वे प्रस्तुते सामान्यमभिहितम्। विशेषात् सामान्यप्रतिपत्तिर्यथा

*दट्ठुमणा वि ण पेक्खइ ण भणइ वत्तुं सकोऊहलावि।

---

*द्रष्टुमना अपि न पश्यति न भणति वक्तुं सकौतूहलापि।

तेन सामान्यं विशेषः कार्यं कारणं सरूपं च प्रस्तुतं स्वस्वप्रतियोगिनोऽप्रस्तुतस्य कथनात् प्रतीयत इति पञ्चाप्रस्तुतप्रशंसाभेदाः। न चेयं समासोक्तिः। तद्विपर्ययेण प्रवृत्तेरित्याह। **अप्रस्तुतादिति**। कार्यात् कारणप्रतीतिभेदस्यानुमानेऽन्तर्भावं वारयति। **न चेति**। अत एव पर्यायोक्तव्यावृत्तिरपीत्याह। **अनेनेति**। तत्राप्युभयोः प्रकृतत्वादिति भावः। व्यङ्ग्यमत्रालंकार्यमत आह। **न चेति**। तत्र हेतुमाह। **प्रतीयमानस्येति**। वाच्यसिद्ध्यङ्गत्वादप्रस्तुतस्य वाच्यत्वमेवायुक्तमिति कृत्वा प्रस्तुतं प्रतीयमानं तत्साधनत्वेनोपकरोतीति वाच्यसिद्ध्यङ्गं नाम गुणीभूतव्यङ्ग्यं न प्रधानमतो न ध्वनिरिति भावः। तत्र सारूप्येणोदाहरति। **आशास्विति**। प्रशमितवासनोदयेभ्यो निवर्तितपरिमलप्रचारेभ्यो जरत्तरुभ्यो जीर्णवृक्षेभ्यः। अत्राप्रस्तुतभ्रमरवृत्तान्तेन प्रस्तुतप्रतापरुद्रवृत्तान्तः सारूप्येण प्रतीयते। साधर्म्येणेदमुदाहरणम्। वैधर्म्यादिनिबन्धनास्त्वन्यतो द्रष्टव्याः। **यशस्विनीति**। अत्राप्रस्तुतराजसामान्यवृत्तान्तवर्णनया प्रस्तुतराजविशेषप्रतापरुद्रगुणमहिमप्रतीतिः। **दट्ठुमणावीति**। अत्र दर्शनाद्युत्कण्ठायामप्यदर्शनादी-

*परिसासआ वि ण प्पसइ वणिआए कीरिसी सिट्ठी ॥

अत्र मुग्धानां नवसंगमे महती लज्जेति सामान्ये प्रस्तुते विशेषोऽभिहितः । कार्यात् कारणप्रतीतिर्यथा

गाधा इवार्णवा जाता नीचा इव महाद्रयः ।
महीमवतरत्यस्मिन् काकतीयकुलेश्वरे ॥

अत्रार्णवादीनां गाधत्वादिभिः कार्यभूतैरप्रस्तुतैः कारणभूतं प्रतापरुद्रगाम्भीर्यादि प्रतीयते । कारणात् कार्यप्रतीतिर्यथा

प्रतापरुद्रनृपतेर्धरित्रीकिल्पशाखिनः ।
जाता मयि कृपादृष्टिः किं वा विस्मयसे सखे ॥

अत्र कथमीदृशमहाविभवभाजनमधुना भवसीति कार्यं पृच्छते सविस्मयाय सुहृदे कारणभूता प्रतापरुद्रकृपादृष्टिरभिहिता ।

वाच्यसंभवासंभवोभयरूपतया यथासंभवं भेदाः स्वयं द्रष्टव्याः ।

पर्यायोक्तालंकारः ।

गम्यत्वप्रस्तावात् पर्यायोक्तमुच्यते ।

कारणं गम्यते यत्र प्रस्तुतात् कार्यवर्णनात् ।
प्रस्तुतत्वेन संबद्धं तत् पर्यायोक्तमुच्यते ॥

यत्र प्रस्तुतस्यैव कार्यस्य वर्णनात् प्रस्तुतमेव कारणं गम्यते तत् पर्यायोक्तम् । यथा

---

* स्पर्शाशयापि न स्पृशति वनितायाः कीदृशी सृष्टिः ॥

नामप्रस्तुतानां लज्जाविशेषाणामुक्त्या प्रस्तुतलज्जासामान्यप्रतीतिः। लज्जाकार्याणां लज्जात्वमौपचारिकम् । **गाधा इति** । अत्राप्रस्तुतार्णवगाधादिकार्यवर्णनया प्रस्तुतप्रतापरुद्रगाम्भीर्यप्रतीतिः । **प्रतापेति** । अत्राप्रस्तुतकारणवर्णनात् प्रस्तुतकार्यप्रतीतिं योजयति । **अत्रेति** । अत्र वाच्यस्य संभवाद्युपाधिवशात् भेदान्तराणि स्वयमूहनीयानीत्याह । **वाच्येति** । वाच्यस्य संभवे प्राचीनान्येवोदाहरणानि । असंभवे तु 'कस्त्वं भोः कथयामि दैवहतकं मां विद्धि शाखोटकम्' इत्यादावचेतनेन सह प्रश्नोत्तरिकानुपपन्नेति वाच्यस्यासंभवः । एवमन्यदप्युदाहार्यम् । कारणगम्यत्वप्रस्तावात् पर्यायोक्तं लक्षयति । **कारणमिति** । प्रस्तुतादित्येतदप्रस्तुतप्रशंसाव्यवच्छेदार्थम् । पर्यायेण कार्यादिद्वारा प्रतीयमानस्य

प्रतिभूपालशुद्धान्तदीर्घिकास्वाजिधूसराः ।
प्रक्षालयन्ति गात्राणि काकतियचमूचराः ॥

अत्र रिपुनगरीदीर्घिकावारिविहारेण प्रतापरुद्रचमूचरकर्तृकेन कार्यभूतेन समरप्रारम्भ एव स्वपुराणि विहाय पलायिताः प्रतिनृपा इति कारणं प्रतीयते । अथ प्रतीपम् ।

प्रतीपालंकारः ।

आक्षेप उपमानस्य कैमर्थक्येन कथ्यते ।
यद्वोपमेयस्याद्यत्वं तत्प्रतीपमुदाहृतम् ॥

यत्रोपमेयस्य लोकोत्तरत्वादुपमानाक्षेपः क्रियते तदेकं प्रतीपम् । यत्रोपमेयस्योपमानत्वं कल्प्यते तत् द्वितीयम् । आद्यं यथा

कीर्तौ प्रतापरुद्रस्य विलसन्त्यां दिगन्तरे ।
किमर्थमुदयत्येष निर्लज्जः शशलाञ्छनः ॥

द्वितीयं यथा

काकतीयकुले लक्ष्मीपतिरेष न संशयः ।
अनेन कथमल्पज्ञैः सुमेरुरुपमीयते ॥

अनुमानालंकारः ।

अथ तर्कन्यायमूलालंकारा निरूप्यन्ते ।

साध्यसाधननिर्देशे त्वनुमानमुदीर्यते ।

कारणस्य वर्णनं पर्यायोक्तमित्यर्थः । उदाहरति । **प्रतिभूपालेति** । शुद्धान्तदीर्घिकास्वन्तःपुरक्रीडापुष्करिणीषु । अत्र प्रस्तुतकार्यकथनात् प्रस्तुतस्यैव कारणस्य प्रतीतिं योजयति । **अत्रेति** । स्फुटप्रतीयमानानन्तरमस्फुटप्रतीयमानं प्रतीपालंकारं लक्षयति । **आक्षेप इति** । उपमेयेनैवोपमानकार्ये सिद्धे किमर्थमुपमानमित्याक्षेपः एकं प्रतीपम् । यत्र सिद्धोपमानस्य निकर्षार्थमुपमेयत्वक्लृप्तिस्तत् द्वितीयम् । उभयत्राप्युपमेयस्योपमानप्रातिकूल्यात् प्रतीपव्यपदेशः । **कीर्ताविति** । अत्र कीर्तेरेव चन्द्रभारोद्वहनात् व्यर्थश्चन्द्र इत्यर्थः । **काकतीयेति** । अत्रोपमानत्वेन प्रसिद्धस्य सुमेरोर्निकर्षार्थमुपमेयत्वं कल्पितम् । काकतीन्द्रस्योपमानत्वे विवक्षा प्रयोजिका । अथानुमानाद्यलंकारवर्गमधिकरोति । **अथेति** । तत्रापि प्राधान्यादनुमानमादौ लक्षयति । **साध्येति** । व्यापकस्य धर्मिण्ययोगव्यवच्छेदः साध्यम् । पक्षधर्मत्वं सपक्षे सत्वं विपक्षात् व्यावृत्तिरित्येतद्रूपत्रय-

रूपकहेतुकत्वेन तर्कानुमानवैलक्षण्यम् । यथा

रजोधूमः सेनाव्यतिकरभवो यत् प्रसरति
स्फुलिङ्गा दृश्यन्ते भटघटितकौक्षेयकभुवः ।
ततो मन्ये यात्राशुचिसमयजो रुद्रनृपतेः
प्रभूतः कोपाग्निर्दहति रिपुभूपालनगरीः ॥

काव्यलिङ्गालंकारः ।

अथ काव्यलिङ्गम् ।

हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम् ।

यत्र हेतुर्वाक्यगतत्वेन पदगतत्वेन वा प्रतिपाद्यते तत् काव्यलिङ्गम् । यथा

प्रतापरुद्र इत्येषा कापि पञ्चाक्षरी शुभा ।
हृदि यां बिभ्रतो भूपा वशीकुर्वन्ति संपदः ॥

अत्र वाक्यार्थगतो हेतुः । पदार्थगतो यथा

म्लानापि भूभृतां फाललिपिरुच्छ्वसिता पुनः ।
प्रतापरुद्रदेवाङ्घ्रिनखज्योत्स्नामृतोक्षिता ॥

अत्र पूर्वं परिम्लानाया भूपालफाललिपेः पुनरुच्छ्वासे प्रतापरुद्रनरेन्द्रचरणनखचन्द्रिकासेचनं हेतुः । तस्य विशेषणगतत्वात् पदार्थ-

---

सहितो हेतुः साधनम् । यत्र साध्यप्रतीतये साधनं निर्दिश्यते सोऽनुमानालंकार इत्यर्थः । तर्कानुमानवैलक्षण्यं दर्शयति । **रूपकहेतुकत्वेनेति** । उदाहरति । **रजोधूम इति** । यात्रैव शुचिसमय आषाढमासो ग्रीष्म इत्यर्थः । अत्र क्रोधाग्नौ साध्ये रजोधूमः खड्गभुवः स्फुलिङ्गाश्च लिङ्गम् । सर्वसंप्रतिपन्नरूपत्वयसम्पन्नयोर्धूमाग्न्योः रूपकगर्भत्वादनुमानालंकारत्वम् । अनुमानप्रसङ्गात्तदनन्तरं काव्यलिङ्गमाह । **हेतोरिति** । वाक्यार्थहेतुकं विशेषणगत्या पदार्थहेतुकं काव्यलिङ्गं द्विविधमित्यर्थः । काव्यग्रहणं तर्कवैलक्षण्यार्थम् । तेन व्याप्तिपक्षधर्मतादयो न क्रियन्त इति रुचकः । अत एवानुमानादस्य वैषम्यमिति लभ्यते । **प्रतापेति** । अत्र संपद्वशीकरणे वाक्यार्थे प्रतापरुद्रपञ्चाक्षरीप्राशस्त्यलक्षणो वाक्यार्थो हेतुः । **म्लानेति** । अत्र शत्रुभूपालफाललिपेः पुनरुच्छ्वासे नरेन्द्रनखज्योत्स्नामृतोक्षितत्वपदार्थो हेतुः । यत्र नखज्योत्स्नामृतोक्षितत्वादिति त्वतलादिशिरस्कतया पदार्थस्य हेतुत्वेनोपादाने वाक्यार्थहेतुके हेतुत्वप्रतिपादकयच्छब्दादिप्रयोगे च नालंकारः । तदा हेतुहेतुमद्भावस्य लौकिकत्वेन विच्छित्तिविशेषाभावात् । यत्र तूपात्तस्य हेतुत्वं यथोदाहृते विषये तत्र न कश्चिद्विरोध इति सर्वस्वरहस्यम् ।

गतत्वोक्तिः । अथार्थान्तरन्यासः ।

अर्थान्तरन्यासालंकारः ।

कार्यकारणसामान्यविशेषाणां परस्परम् ।
समर्थनं यत्र सोऽर्थान्तरन्यास उदाहृतः ॥

यत्र कार्यकारणभावेन सामान्यविशेषभावेन वा प्रकृतसमर्थनं क्रियते सोऽर्थान्तरन्यासः । कार्यकारणभावेन यथा

भूपाः प्रतापरुद्रस्य नता भवत नोन्नताः ।
उन्नतान् नमयत्येष नतानुन्नमयत्यपि ॥

अत्र फलरूपेणौन्नत्येन नम्रत्वकारणं समर्थितम् । सामान्याद्विशेषसमर्थनं यथा

उद्वेजिता रुद्रनरेश्वरस्य रणापदानैः प्रतिपक्षभूपाः ।
बिभ्रत्यमी चित्रमचेतनेभ्यो भीतस्य सर्वं भयकारि नूनम् ॥

अत्र भीतस्य सर्वं भयकारीति सामान्यमचेतनेभ्यो रिपुभूपा बिभ्यतीति विशेषं समर्थयति । विशेषात् सामान्यसमर्थनं यथा

दुष्टोऽपि महतां संगाद्भवत्येव हि सज्जनः ।
प्रतापरुद्रमभ्येत्य कलिः कृतयुगायते ॥

तदेतन्मनसि निधायाह। **तस्य विशेषणगतत्वात् पदार्थगतत्वोक्तिरिति।** क्वचित्काव्यलिङ्गसाम्यात् तदनन्तरमर्थान्तरन्यासं लक्षयति । **कार्येति** । व्याचष्टे । **यत्रेति । प्रकृतसमर्थनमिति ।** समर्थनार्हत्वेनाभिहितस्य प्रकृतस्य यत् समर्थनमुपादानं न त्वपूर्वत्वेन प्रतीतिरित्यनुमानव्यवच्छेदः । समर्थ्यसमर्थकभावे समानेऽपि ताटस्थ्येन हेतुत्वात् काव्यलिङ्गात् भेदः । ननु ताटस्थ्येन हेतुत्वं सामान्यविशेषभाव एव न तु कार्यकारणभावे । अतस्तत्र का गतिरिति चेत् लक्षणान्तरमस्तु यथायोगमन्यत्र वान्तर्भवत्विति समाधेयम् । तदुक्तं चक्रवर्तिना । 'अप्रतीतप्रतीतौ स्यादनुमानव्यवस्थितिः । पदार्थाद्वाथ वाक्यार्थान्निर्देशे सति हेतुतः ॥ समर्थनं प्रतीतस्य काव्यलिङ्गद्वयं मतम् । भवेदर्थान्तरन्यासस्ताटस्थ्ये हेतुभावतः । कार्यकारणभावे तु तस्योक्तं लक्षणान्तरम् ॥' इति। उदाहरति । **भूपा इति ।** कार्येण कारणसमर्थनं योजयति । **अत्रेति । उद्वेजिता इति ।** रणैरेवापदानैरद्भुतकर्मभिः । सामान्येन विशेषः समर्थ्यत इत्याह । **अत्र भीतस्येति । दुष्टोऽपीति ।** अत्र विशेषेण सामान्यसमर्थनं

अत्र प्रतापरुद्रसंगतिमहिम्ना कलिः कृतयुगसदृश इति विशेषेण सामान्यसमर्थनम् । कार्यकारणभावेऽपि कारणात् कार्यसमर्थनं काव्यलिङ्गेऽन्तर्भूतमिति तत्रोक्तम् । अतः प्रकारत्रयमर्थान्तरन्यासस्य । तर्कन्यायमूलालंकारानन्तरं वाक्यन्यायमूलालंकारा निरूप्यन्ते ।

यथासंख्यालंकारः ।

उद्दिष्टानां पदार्थानां पूर्वं पश्चाद्यथाक्रमम् ।
अनूद्देशो भवेद्यत्र तद्यथासंख्यमिष्यते ॥

यत्र येन क्रमेणोद्दिष्टाः पदार्थास्तेनैव क्रमेणानूद्दिश्यन्ते तत्र यथासंख्यालंकारः । यथा

गाम्भीर्यमौन्नत्यमनर्गलत्वं प्रतापरुद्रे समवेक्ष्य धाता ।
अम्भोनिधिष्वद्रिषु दिग्गजेषु सृष्टिं प्रयासैकफलाममंस्त ॥

अर्थापत्त्यलंकारः ।

एकस्य वस्तुनो भावाद्यत्र वस्त्वन्यदापतेत् ।
कैमुत्यन्यायतः सा स्यादर्थापत्तिरलंक्रिया ॥

यत्र कस्यचिदर्थस्य निष्पत्तौ तत्समानन्यायात् कैमुत्येनार्थान्तर-

---

योजयति । **अत्र प्रतापेति** । कारणेन कार्यसमर्थनं काव्यलिङ्गेऽन्तर्भूतत्वान्नोदाहृतमित्याह । **कार्येति** । वैधर्म्याश्रयणे षड् भेदा द्रष्टव्याः । तर्कपरिशुद्धबुद्धेरेव मीमांसायामधिकारात् तन्मूलानन्तरमेतन्मूलानां प्रस्ताव इत्याह । **तर्केति** । यथासंख्यं लक्षयति । **उद्दिष्टानामिति** । पूर्वं निर्दिष्टा उद्दिष्टाः । पश्चान्निर्देशोऽनूद्देशः । तेनात्र पूर्वपश्चात्पदे स्फुटार्थे । व्याचष्टे । **यत्रेति** । आग्नेयादीनामग्नेरहं देव यज्ययेत्याद्यनुमन्त्रणमन्त्रवद्यत्रोद्दिष्टक्रमेणानूद्देशः स यथासंख्यालंकार इत्यर्थः । **गाम्भीर्यमिति** । समुद्रादिभ्योऽधिकमस्य गाम्भीर्यादिकमिति भावः । गाम्भीर्याद्युद्दिष्टक्रमेण समुद्रादीनामनूद्देशाद्यथासंख्यालंकारः । क्रमालंकारोऽयमिति केचित् । वाक्यविदामर्थापत्तिश्च न्याय इति कृत्वा संप्रत्यर्थापत्तिं लक्षयति । **एकस्येति** । यत्रैकस्य वस्तुनः कस्यचिदर्थस्य भावान्निष्पत्तेः । किमुतैव कैमुत्यम् । चातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ्प्रत्ययः । तन्न्यायतोऽन्यद्वस्तु वस्त्वन्तरमापतेत् सार्थापत्तिः स्यादित्यर्थः । व्याचष्टे । **यत्रेति** । यथा दण्डभक्षणादपूपभक्षणमर्थादापतितं तद्वत् कस्यचिदर्थस्य निष्पत्तौ तत्सामर्थ्यरूपात् समानन्यायादर्थान्तरमापतति सोऽर्थापत्त्यलंकार इत्यर्थः । अत एव सर्वस्वसूत्रं 'दण्डापूपिकयार्थान्तरापतनमर्थापत्तिः' इति । अनुमानान्तर्भावं

मापतति सोऽर्थापत्तिरलंकारः । न चात्रानुमानशङ्का । कैमुत्यन्याय-संबन्धरूपत्वात् । यथा

समन्तादुँद्वेलैर्विविधहयधाटीकलकलै-
र्जगत्यां क्रामन्नप्यजनि विधुरः सेवणपतिः ।
मनाक् क्रोधोदञ्चद्भ्रुकुटिकुटिले रुद्रनृपतौ
नृपाणामन्येषां विफलितरुषां कैव गणना ॥

अपि च ।

त्रैलोक्यसारोऽपि सुवर्णशैलः प्रतापरुद्रेण नृपेण तुल्यम् ।
तुलां समारोढुमपूर्ण एव महीभृतां का गणनेतरेषाम् ॥

अत्र प्रतापरुद्रापेक्षया मेरावप्यसारेऽन्येषां महीभृतामर्थादसारत्वं कैमुत्यादापतति । अथ परिसंख्या ।

परिसंख्यालंकारः ।

एकस्य वस्तुनः प्राप्तावनेकत्रैकदा यदि ।
एकत्र नियमः सा हि परिसंख्या निगद्यते ॥

यत्रैकं वस्तु युगपदनेकत्र संभाव्यमानमेकत्रैव नियम्यते सा परिसंख्या । सा प्रथमं द्विविधा प्रश्नपूर्विका तदन्यथा चेति । तयोर्द्वयोर्वर्जनीयस्य शाब्दत्वार्थत्वाभ्यां द्वैविध्ये चातुर्विध्यम् । तत्र शाब्दवर्जनीया प्रश्नपूर्विका यथा

किं मण्डनं त्रिलोक्याः काकतितिलको न हाटकक्षितिभृत् ।

वारयति । **न चेति** । उदाहरति । **समन्तादिति** । अत्र प्राकरणिकः सेवणपतिवृत्तान्तो नृपान्तरवृत्तान्तमप्राकरणिकमाक्षिपाति । **त्रैलोक्येति** । तुलां सादृश्यम् । महीभृतां राज्ञामद्रीणां च । अत्राक्षेप्याक्षेपकयोरुभयमहीभृद्वृत्तान्तयोरप्राकरणिकत्वम् । महीभृतामित्यत्र श्लेषो विशेषः । एवमप्राकरणिकस्य प्राकरणिकाक्षेपेऽप्युदाहार्यम् । परिसङ्ख्यां लक्षयति । **एकस्येति** । एकस्य वस्तुनोऽनेकत्रैकदा युगपत्प्राप्तावन्यतो निवृत्त्यर्थमेकत्र नियमनं परिसङ्ख्येत्यर्थः । एतेन 'विधिरत्यन्तमप्राप्ते नियमः पाक्षिके सति । तत्र चान्यत्र च प्राप्ते परिसङ्ख्येति गीयते ॥' इति मीमांसकोक्तनियमपरिसङ्ख्ययोर्भेदो नालंकारिकैरङ्गीकृत इति द्रष्टव्यम् । परिवर्जनेन कस्यचिद्वर्जनेन कुत्रचित् सङ्ख्यानं वर्णनीयत्वेन गणनं परिसङ्ख्येत्यन्वर्थेयम् । तस्या विभागमाह । **सेति** । **तयोरिति** । प्रश्नपूर्विकाप्रश्नपूर्विकयोरित्यर्थः । क्रमेणोदाहरति । **किमिति** । अत्र मण्डनत्वेन प्राप्तयोः

स्तोतव्यः कः सुधियां रुद्रनरेन्द्रो न मन्दरः क्षितिभृत् ॥

आर्थवर्जनीया प्रश्नपूर्विका यथा

किं वा क्षौमवितानं लोकानां काकतीयकुलकीर्तिः ॥

किं सौख्यं वसुमत्या रुद्रनरेन्द्रस्य भुजवासः ॥

अप्रश्नपूर्विका शाब्दवर्जनीया यथा

रागो धर्मे न विषयसुखे सङ्गतिः सत्सभायां
न स्त्रीगोष्ठयां व्यसनमनिशं नीतिशास्त्रे न चाक्षे ।
कीर्त्यां नित्यार्जनचतुरता नार्थजाते विनोदो
विद्याभ्यासे न च परिजने रुद्रदेवस्य राज्ञः ॥

आर्थवर्जनीया अप्रश्नपूर्विका यथा

भूरेव भुवनं देवः स्वयंभूरेव पार्थिवः ।
प्रतापरुद्र एवैकशिलैव नगरी शुभा ॥

क्षोणीं रुद्रनराधीशे रक्षति क्षतविद्विषि ।
बलिसद्मन्यहिभयं त्रिदिवे गोत्रभित्कथा ॥

अलंकारस्यास्य श्लेषेण चारुत्वातिशयः ।

उत्तरालंकारः ।

उत्तरात् प्रश्न उन्नेयो यत्र प्रश्नोत्तरे तथा ।
बहुधा च निबध्येते तदुत्तरमुदीर्यते ॥

काकतीन्द्रकनकाचलयोः कनकाचलं कण्ठोक्त्या वर्जयित्वा काकतीन्द्रे नियमनात् शाब्दवर्जनीया प्रश्नपूर्विका परिसङ्ख्येत्यर्थः । एवमुत्तरत्रापि द्रष्टव्यम् । **किं वेति** । अत्र वर्जनीयस्य चन्द्रिकादेरार्थत्वम् । **राग इति** । अक्षे द्यूते । अत्र विषयसुखादि वर्जनीयं शाब्दम् । प्रश्नस्तु नास्ति । **भूरेवेति** । न स्वर्गादिरित्यार्थवर्जनीया प्रश्नरहिता परिसङ्ख्या । **क्षोणीमिति** । बलिसद्मनि पाताले । अहिभयं सर्पभयं । स्वपक्षप्रभवं भयं च । 'महीभुजामहिभयं स्वपक्षप्रभवं भयम्' इत्यमरः । त्रिदिवे गोत्रभित्कथा इन्द्रप्रसङ्गः कुलघातुकप्रसङ्गश्च । अत्राभ्युच्चयमाह । **अलंकारस्येति** । परिसङ्ख्यायां प्रश्नप्रसङ्गात् तदनन्तरमुत्तरं लक्षयति । **उत्तरादिति** । यत्रोत्तरादुपनिबध्यमानात् प्रश्न उन्नीयते तदेकमुत्तरम् । न चेदमनुमानम् । पक्षधर्मत्वादिनिर्देशाभावात् । तथा प्रश्नपूर्वकं लोकोत्तरमुत्तरं बहुधा निबध्यते तदपरम् । सकृच्चारुत्वं नास्तीति बहुधाग्रहणम् । नेयं परिसङ्ख्या । तद्वदत्र व्यव-

यत्रोत्तरान्निबध्यमानात् प्रश्न उन्नीयते तदेकमुत्तरम् । चारुत्वार्थ-प्रसक्तश्लोकोत्तरं प्रश्नप्रतिपादनपूर्वमुत्तरं द्वितीयमुत्तरम् । क्रमेण यथा

किमद्य व्युत्पत्तिस्तव सुजनलोकव्यवहृता
यदद्य ज्ञातव्यं प्रभवति यदा रुद्रनृपतिः ।
तदारभ्योन्मूर्धा जयति विशदो धर्मविभवो
महीदेवाश्चोद्यद्विविधविभवारम्भमुदिताः ॥

अत्र प्रतापरुद्रो यदा प्रभवति तदारभ्य पूर्णधर्मप्रतिष्ठा मही । महीदेवा अपि तथाविधसंतोषभाजः । किमधुना पृच्छसीत्युत्तरात् किं प्रतापरुद्रराज्ये धर्मप्रतिपालनमस्ति किं सुखिनो भूसुरा इत्युन्नीयते प्रश्नः । द्वितीयं यथा

*किं णु धणं कुलविज्जा को लाहो सज्जणेण सहवासो ।
का णअरी एआसिला को राआ वीररुद्दणरणाहो ॥

विकल्पालंकारः ।

वाक्यन्यायमूलप्रस्तावाद्विकल्प उच्यते ।

विरोधे तुल्यबलयोर्विकल्पालंकृतिर्मता ।

यत्र तुल्यप्रमाणानुशिष्टयोर्विरुद्धयोर्द्वयोर्युगपत्प्राप्तौ एकस्यासंभवस्तत्र विकल्पः । औपम्याच्चारुत्वम् । यथा

भूपालाः क्रियतां मूर्ध्ना धनुषां वा विनम्रता ।

---

*किं नु धनं कुलविद्या को लाभः सज्जनेन सहवासः ।
का नगरी एकशिला को राजा वीररुद्रनरनाथः ॥

च्छेद्यव्यवच्छेदकभावस्याविवक्षितत्वात् । क्रमेणोदाहरति । **किमद्येति** । सुजन-लोकव्यवहृता साधुजनप्रसिद्धा व्युत्पत्तिर्धार्मिकत्वादिज्ञानं तवाद्य किं यदद्य तव च ज्ञातव्यं भवतीति शेषः । किं तदित्याकाङ्क्षायामाह । **प्रभवतीति** । प्रभुर्भवतीत्यर्थः । उन्मूर्धा परिपूर्ण इत्यर्थः । विशदो निर्मलो निरुपाधिक इत्यर्थः । महीदेवा ब्राह्मणाश्च उद्यद्भिर्विविधैर्विभवारम्भैरैश्वर्यविजृम्भणैर्मुदिताः । अत्रोत्तरात् प्रश्नोन्नयनं योजयति । **अत्रेति** । द्वितीयमुदाहरति । **किं ण्विति** । अत्र व्यवच्छेद्यव्यवच्छेदकभावमविवक्षितत्वाद्बहुधा प्रश्नोत्तरनिबन्धनादुत्तरालंकारः । विकल्पं संगतिपूर्वकं लक्षयति । **वाक्यन्यायेत्यादिना** । तुल्यप्रमाणविशिष्टत्वात्तुल्यबलयोरेकत्र युगपत्प्राप्तौ विरुद्धत्वाद्यौगपद्यासंभवे विकल्प इत्यर्थः । लौकिकविकल्पाद्वैलक्षण्यं दर्शयति । **औपम्याच्चारुत्वमिति** । **भूपाला**

पादच्छायान्ध्रनाथस्य विन्ध्याद्रेर्वा निषेव्यताम् ॥

अत्र प्रतापरुद्रे प्रभवति राज्ञां संधिविग्रहाभ्यां तुल्यबलप्रमाणाभ्यां शिरोनमनधनुर्नमने युगपदेव प्राप्ते तयोर्विरुद्धत्वाद्यौगपद्यासंभवे विकल्पः । विकल्पप्रतिपक्षभूतः समुच्चयो निरूप्यंते ।

समुच्चयालंकारः ।

गुणक्रियायौगपद्यं समुच्चय उदाहृतः ।

यत्र गुणानां वैमल्यादीनां क्रियाणां च दर्शनादीनां युगपदवस्थानं तत्र समुच्चयालंकारः । यथा

प्रतापरुद्रनृपतौ भद्रासनमुपेयुषि ।
सतां प्रसन्नं हृदयमसतां कलुषं मनः ॥

क्रियासमुच्चयो यथा

*पेच्छइ इम णरिन्दो पविसइ मअणो अ गलइ माणो अ ।
घुण्णइ मणो अ सुण्णं किं एदं उवह सहिआओ ॥

एते भिन्नविषयत्वे उदाहरणे । एकविषयत्वे यथा

त्रैलोक्यप्रथमानकीर्तिमहितश्रीवीररुद्रप्रभोः
सेवार्थं चिरयत्सु काकतिपुरे भूपेषु तद्योषितः ।
द्वारं यान्ति विलोकयन्ति पुरतो निश्वासमातन्वते
शुष्यन्ति प्रलपन्ति यान्ति तनुतां मुह्यन्ति मूर्च्छन्ति च ॥

---

*प्रेक्षते इमां नरेन्द्रः प्रविशति मदनश्च गलति मानश्च ।
घूर्णते मनश्च शून्यं किमेतत् पश्यत सख्यः ॥

इति । पादच्छाया चरणच्छाया । अन्यत्र प्रत्यन्तपर्वतच्छाया । अत्र श्लेषो विशेषः । लक्षणं योजयति । **अत्रेति** । समुच्चयस्य संगतिमाह । **विकल्पेति** लक्षणमाह । **गुणेति** । व्याचष्टे । **यत्रेति** । यत्र गुणानां क्रियाणां च व्यस्तानां समस्तानां वा युगपदवस्थानं स समुच्चयालंकार इत्यर्थः । विषयभेदेन गुणसमुच्चयमुदाहरति । **प्रतापेति** । तथैव क्रियासमुच्चयमुदाहरति । **पेच्छईति** । विषयभेदाभावेन क्रियासमुच्चयमुदाहरति । **त्रैलोक्येति** । तद्योषितः प्रोषितभर्तृकाः उत्कण्ठया द्वारं यान्ति पुरतो विलोकयन्ति यावद्दृष्टिः प्रसरतीति भावः । निश्वासमातन्वते प्रियमदृष्ट्वा चिन्तयेति भावः । ज्वरेण शुष्यन्ति मुह्यन्ति जडीभवन्ति इतिकर्तव्यतामूढमनसो भवन्तीत्यर्थः । यद्वा मोहमूर्च्छयोः

गुणक्रियासामस्त्येन यथा

देवे काकतिवीररुद्रनृपतौ जैत्रप्रयाणोन्मुखे
माद्यद्दन्तिचलत्पदातिविचलद्वाजिप्रधावद्रथम् ।
विच्छायाननमाकुलाक्षमुदयत्कार्पण्यमाविर्भवत्-
कम्पं भ्राम्यति सर्वतः प्रतिवनं प्रत्यर्थिभूभृद्गणः ॥

द्वितीयः समुच्चयः ।

खलेकपोतन्यायेन बहूनां कार्यसाधने ।
कारणानां समुद्योगः स द्वितीयः समुच्चयः ॥

यत्रैकं कार्यं साधयितुमहमहमिकया बहूनां कारणानामुद्यमः सोऽपि समुच्चय एव । युगपदनेकेषामवस्थानात् । यथा

शुभ्रं यशः शौर्यमहच्च वृत्तं विद्यानवद्या विमलं कुलं च ।
प्रतापरुद्रस्य नरेश्वरस्य लोकोत्तरां रीतिमुदञ्चयन्ति ॥

संचार्यवस्थाभेदेन भेदः । अत्रावस्थानामविवक्षितः क्रमः । गुणक्रिययोः सामस्त्येन समुच्चयमाह । **देव इति** । माद्यद्दन्तीत्यादीनि चत्वारि प्रयाणक्रियाविशेषणानि । अत्र कम्पः क्रिया । अन्ये गुणाः । समुच्चयत्वसाम्यात् द्वितीयसमुच्चयं लक्षयति । **खलेकपोतेति** । पुरा किल कुत्रचित्खले लुब्धकेन प्रसारिते जाले चित्रग्रीवो नाम कश्चित् कपोतराजः सपरिवारो धान्यलोभादागत्य बद्धः परस्परं मन्त्रयित्वा सर्वेऽपि संभूय जालेन सहोड्डीय लुब्धकाद्दृश्यतां गत्वा कुत्रचित् प्रदेशे हिरण्यकनाम्नो मूषिकराजान्मित्रात् पाशच्छेदं लब्ध्वा सपरिवारः स्वगृहं प्रविष्ट इति पञ्चतन्त्रकथां मनसि निधायाह । **खलेकपोतन्यायेनेति** । यथा पाशच्छेदं प्रति सर्वेषां कपोतानामुद्यमः एवं कस्यचित् कार्यस्य साधने बहूनां कारणानामुद्यमे सोऽपि समुच्चय एवेति । व्याचष्टे । **यत्रेति** । अहमहमिका व्याख्याता । समुच्चयत्वे हेतुमाह । **युगपदिति** । अस्यैव तत्करमिति संज्ञान्तरम् । तदुक्तम् । 'तत्सिद्धिहेतावेकस्मिन् यत्रान्यत् तत्करं भवेत् ।' इति । उदाहरति । **शुभ्रमिति** । सद्योगे चेदमुदाहरणम् । शुभ्रत्वेन शोभनस्य यशसो लोकोत्तररीतिसंपादने शौर्यमहत्त्वादिना शोभनैर्वृत्तादिसमुच्चयात् । 'दुर्वाराः स्मरमार्गणाः प्रियतमे दूरे मनोऽप्युत्सुकम्' इत्यादौ स्मरमार्गणानां दुर्वारत्वेनाशोभनानां तादृशैरेव प्रियतमादिभिः समुच्चय इत्यत्रासद्योगः । प्रियतमादीनां स्वतः शोभनत्वेऽपि विरहिविषयत्वेनात्राशोभनत्वं ज्ञेयम् । 'शशी दिवसधूसरो गलितयौवना कामिनी' इत्यादौ शशिनः शोभनस्यापि दिवसधूसरत्वादशोभनत्वेन सदसतस्तादृशैरेव कामिनीप्रभृतिभिः समुच्चय इति सदसद्यो-

अत्र यशःप्रभृतीनां लोकोत्तररीतिसंपादने प्रत्येकं हेतुत्वेऽपि युगपत्खलेकपोतन्यायसंबन्धः । अथ समाधिरुच्यते ।

समाध्यलंकारः।

एकस्मिन् कारणे कार्यसाधनेऽन्यत् परापतेत् ।
काकतालीयनियतः स समाधिरुदीर्यते ॥

यत्रैकस्मिन् कारणे कार्यसाधनाय प्रवृत्ते काकतालीयतयान्यत् कारणमागत्य तत्कार्यं सुकरं करोति स समाध्यलंकारः । यथा

रणाङ्गणे रुद्रनरेन्द्ररोषशमाय राज्ञां विहितस्तुतीनाम् ।
वक्त्रेषु यद्वायुवशात् पतन्ति तृणानि देवस्य स पक्षपातः ॥

अत्र प्रतापरुद्रनरेन्द्रक्रोधशान्त्यर्थं रणाग्रे प्रक्रान्तस्तुतीनां राज्ञां वक्त्रेषु वायुवशात् काकतालीयतया पतितैस्तृणैः कोपशान्तिलक्षण-कार्यसुकरत्वम् । अथ लोकन्यायमूलालंकारा निरूप्यन्ते ।

भाविकालंकारः।

अतीतानागते यत्र प्रत्यक्षे इव लक्षिते ।

गोऽत्र द्रष्टव्य इति त्रिविधोऽयं समुच्चयः । तत्करसादृश्यात् तदनन्तरं समाधिं लक्षयति । **एकस्मिन्निति** । व्याचष्टे । **यत्रेति** । केनचिदारब्धस्य कार्यस्य काकतालीयन्यायेन कारणान्तरेण समाधानात् समाधिरित्यर्थः।**काकतालीयेति**। काकतालीयन्यायेन कारणान्तरेण समाधानात् समाधिरित्यर्थः। काकतालशब्दौ काकतालसमवेतक्रियावाचिनौ । तेन काकागमन-मिव तालपतनमिव काकतालमितीवार्थे 'समासाच्च तद्विषयात्' इति ज्ञापकात् सुप्सुपेति समासः । उभयत्रोपमेयं क्रमेण देवदत्तागमनं दस्यूपनिपातश्च तेन देवदत्तदस्युसमागमः काकतालसमागमसदृश इति लभ्यते । ततः काकतालमिव काकतालीयमिति द्वितीयस्मिन्निवार्थे 'समासाच्च तद्विषयात्' इति छप्रत्ययः । यथा पतता तालफलेन काकवधस्तद्वदुपनिपतितैर्दस्युभिर्देवदत्तस्य वध इत्यर्थः । यदाह भगवान् भाष्यकारः । 'एवं तर्हि द्वाविवार्थौ काकागमनमिव तालपतन-मिव काकतालं काकतालमिव काकतालीयम्' इति । तच्च व्याख्यातं कैयटेन । 'तत्र काकागमनं देवदत्तागमनस्योपमानं तालपतनं दस्यूपनिपातस्य । तालेन तु यः काकस्य वधः स देवदत्तस्य दस्युना वधस्योपमानमिति वधादिः काक-तालीयादिशब्दवाच्यः संपद्यते' इति। तेन काकतालीयं नामातर्कितोपनतं चित्री-करणमुच्यत इति वृत्तिकारः । एवं चानुषङ्गिककारणान्तरस्य समाधेः समप्रधानं-सर्वकारणात् समुच्चयात् भेद इति द्रष्टव्यम्। उदाहरति। **रणाङ्गण इति**। अत्र क्रोध-शान्तौ स्तुतिः प्रधानकारणम् । वक्त्रे वायुवशात् तृणपतनं काकतालीयमिति समा-धिः । लोकन्यायमूलेषु चमत्कारातिशयनिदानं भाविकं लक्षयति । **अतीतेति** ।

अत्यद्भुतार्थकथनाद्भाविकं तदुदाहृतम् ॥

यत्राद्भुतचरितोपवर्णनात् भूतभाविनोर्वस्तुनोः प्रत्यक्षायमाणत्वं भवति स भाविकालंकारः। न च भूतभाविनोः प्रत्यक्षवदवभासो विरुद्धः। अत्यद्भुतवस्तुवर्णनया भाविकानां हृदि भावनोदयात्। तथा च भावनाया पुनःपुनश्चेतासि निदर्शनात् प्रत्यक्षायमाणत्वं घटत एव। यथा पान्थस्य कामिनीभावनया तस्याः प्रत्यक्षायमाणत्वम्। न चेयं स्वभावोक्तिः। तस्यां वस्तुस्वभावस्य यथावद्वर्णनया प्रत्यक्षायमाणता। इह त्वत्यद्भुतत्वेन। नापि रसवदाद्यलंकारः। तत्र विभावाद्यनुसंधानेनैव रसादेर्भाव्यत्वम्। न त्वत्यद्भुतत्वेन।

अत्यद्भुतार्थकथनादिति। तथाविधशब्दसंदर्भेणेति शेषः। व्याचष्टे। **यत्रेति**। भावः कवेरभिप्रायः श्रोतरि प्रतिबिम्बितत्वेनास्तीति भाविकम्। ननु संबन्धो वर्तमानं च गृह्यते चक्षुरादिना इति न्यायेन भूतभाविनोः प्रत्यक्षवदवभासो विरुद्ध इत्याशङ्क्य परिहरति। **न चेति**। तत्र हेतुमाह। **अत्यद्भुतेति**। भाविकानां सहृदयानां भावनोदयात् संस्कारोद्बोधात्। न चेदमयुक्तमित्याह। **तथा चेति**। **भावनायाः पुनरिति**। भावनाविषयाणामत्यद्भुतवस्तूनामित्यर्थः। चेतसि सहृदयहृदये निदर्शनान्नितरां दर्शनात् आदरप्रत्ययेन धार्यमाणत्वादित्यर्थः। **प्रत्यक्षायमाणत्वं घटत एवेति**। यथा लौकिकानामिन्द्रियैर्वर्तमानसंबन्धार्थसाक्षात्कारः यथा वा योगिनामैकाग्र्यलक्षणया भावनयातीन्द्रियार्थसाक्षात्कारः तथा काव्यतत्त्वविदां काव्यतत्त्वगतात्यद्भुतत्वानुसंधानप्रयुक्तया भावनयातीतानागतार्थसाक्षात्कारो युज्यत एवेत्यर्थः। अत्र दृष्टान्तमाह। **यथेति**। पान्थस्य पथिकस्य विरहिण इत्यर्थः। 'पथोण नित्यम्' इति णप्रत्ययः। कामिनीभावनया कामिनीध्यानेन तस्याः कामिन्याः प्रत्यक्षायमाणत्वम्। तदुक्तम्। 'साक्षिगतस्साकलिकोऽयमद्वैतवाद' इति। न चेदं स्वभावोक्तावन्तर्भवतीत्याह। **न चेति**। कुत इत्याकाङ्क्षायामुभयोर्वैषम्यमाह। **तस्यामिति**। वस्तुस्वभावस्य लौकिकवस्तुगतसूक्ष्मधर्मस्येत्यर्थः। यथावदन्यूनातिरिक्तत्वेन वर्णनया प्रत्यक्षायमाणता साधारण्येन हृदयसंवादिप्रतीतिविषयत्वमित्यर्थः। इह भाविके त्वत्यद्भुतत्वेन लोकोत्तराणां वस्तूनां स्फुटतया ताटस्थ्येन प्रतीतिरिति भेद इत्यर्थः। अत एव रसवदादौ नान्तर्भाव इत्याह। **नापीति**। तत्र हेतुमाह। **तत्रेति**। विभावानुभावाद्यनुसंधानेन परमाद्वैतज्ञानिवन्ममैवैते शत्रोरेवैते तटस्थस्यैवैत इत्यादिविशेषपरिहारात् साधारण्येन सहृदयसंवादिप्रत्ययेनेत्यर्थः। रसादेर्भाव्यत्वं स्वाद्यत्वमित्यर्थः। **न त्वत्यद्भुतत्वेनेति**। यथा भाविके भूतभाविनोरत्यद्भुतार्थयोः सर्वज्ञवत् ताटस्थ्येन प्रतीतिर्न साधारण्येन तद्वदत्र न भवतीत्यर्थः। नन्वत्र भूतभावि-

न चेयमुत्प्रेक्षा । अतीतानागतयोः प्रत्यक्षत्वेनाध्यवसायाभावात् । न चायं भ्रान्तिमदलंकारः । भावनाया अभ्रान्तिरूपत्वात् । अतः सर्वोत्तीर्ण एवायमलंकारः । यथा

ध्वजाग्रे काकतीन्द्रस्य भाति क्रोडाकृतिर्हरिः ।
मृद्बिन्दुरिव दंष्ट्राग्रे यस्यालक्ष्यत मेदिनी ॥

अत्राष्टादशद्वीपयुक्ताया मेदिन्या दंष्ट्राग्रे मृद्बिन्दुरूपतेति अत्यद्भुतवर्णनया तथाविधभावनायां प्रत्यक्षवत् प्रतीतिसंभवः ।

प्रत्यनीकालंकारः ।

अथ प्रत्यनीकालंकारः प्रतिपाद्यते ।

बलिनः प्रतिपक्षस्य प्रतीकारे सुदुष्करे ।
यस्तदीयतिरस्कारः प्रत्यनीकं तदुच्यते ॥

यत्र प्रबलस्य प्रतिपक्षस्य प्रतीकारासामर्थ्यात् तदीयतिरस्कारो भवति तत् प्रत्यनीकम् । यथा

काकतीयपतिशौर्यमहोष्मन्यक्कृतस्वमहिमा बडबाग्निः ।
तद्गभीरिमसनाभिमजस्रं बाधते निधिमपां बहिरन्तः ॥

नोरप्रत्यक्षयोः प्रत्यक्षत्वेनाध्यवसायादिवादेरभावाच्च प्रतीयमानोत्प्रेक्षा कुतो न स्यादत आह । **न चेयमुत्प्रेक्षेति** । तत्र हेतुमाह । **अतीतेति** । न ह्यप्रत्यक्षं प्रत्यक्षत्वेनाध्यवसीयते । किं तर्हि काव्यार्थविद्भिः प्रत्यक्षं दृश्यत इति नोत्प्रेक्षेति भावः । ननु भूतभाविनोः प्रत्यक्षत्वे भ्रान्तिमदलंकारः किं न स्यादत आह । **न चायमिति** । तत्र हेतुमाह । **भावनाया इति** । काव्यतत्त्वविदां भूतभाविवस्तुसाक्षात्कारसामग्री भावना तस्या अभ्रान्तिरूपत्वात् । भ्रान्तिं रूपयति जनयतीति भ्रान्तिरूपा तस्या भावस्तत्त्वम् । तदभावात् भ्रान्तिजनकत्वाभावादित्यर्थः । भूतभाविविषयत्वेऽपि भावनामहिम्ना न प्रत्यक्षत्वहानिरिति भावः । कण्टकशोधनमुपसंहरति । **अत इति** । यदन्यदवशिष्टं तत्सर्वमलंकारसर्वस्वे द्रष्टव्यम् । उदाहरति । **ध्वजाग्र इति** । क्रोडाकृतिर्वराहाकृतिः । योजयति । **अत्रेति** । लोकन्यायमूलप्रस्तावात् प्रत्यनीकं लक्षयति । **बलिन इति** । **प्रतीकार इति** । 'उपसर्गस्य घञ्यमनुष्ये बहुलम्' इति दीर्घः । व्याचष्टे । **यत्रेति** । अनीकस्य सैन्यस्य प्रतिनिधिः प्रत्यनीकं तत्तुल्यत्वादिदमपि प्रत्यनीकमित्यर्थः । प्रतिपक्षप्राबल्यप्रख्यापनमत्र प्रयोजनम् । **काकतीयेति** । तस्य काकतीयस्य गभीरिम्णा गाम्भीर्येण सनाभिं सुहृदं 'ज्योतिर्जनपद' इत्यादिना समानशब्दस्य सभावः ।

अत्र सादृश्यहेतुकं तदीयत्वमित्यलंकारत्वम् । अथ व्याघातः ।

व्याघातालंकारः ।

येन यत् साधितं वस्तु तेनैव क्रियतेऽन्यथा ।
अन्येन तदलंकारो व्याघात इति कथ्यते ॥

यद्वस्तु येन केनाचित् कर्त्रा येन साधनेन साधितं तद्वस्तु तेनैव साधनेनान्येन कर्त्रा यदन्यथाक्रियते स व्याघातः । यथा

काकतीयाभिजातोऽयं नाभिजाताधिकस्थितिः ।
दोर्भ्यां लब्धोदयान् भूपांस्ताभ्यामनुदयान् सृजन् ॥

अथ लोकन्यायमूलालंकारनिरूपणप्रस्तावात् पर्यायालंकारो निरूप्यते ।

पर्यायालंकारः ।

क्रमेणैकमनेकस्मिन्नाधारे वर्तते यदि ।
एकस्मिन्नथवानेकं पर्यायालंकृतिर्मता ॥

यत्र क्रमादेकमाधेयमनेकास्मिन्नाधारे वर्तते स एकः पर्यायः । न चात्र विशेषालंकारः । तत्रैकस्यानेकत्र युगपद्वर्तनम् । अत्र क्रमेण । तथैकस्मिन्नाधारेऽनेकमाधेयं वर्तते स द्वितीयः पर्यायः । न चात्र समुच्चयालंकारः । तत्राप्येकत्रानेकेषां युगपद्वर्तनम् । अत्र क्रमेण यथा

दंष्ट्रायां कुहनाकिटेर्भगवतो देवस्य शौरेः पुरा
पश्चान्मस्तकमण्डले फणभृतः पातालकेशितुः ।

अस्यालंकारत्वमाह । **अत्रेति** । पूर्वयैव संगत्या व्याघातं लक्षयति । **येनेति** । येनोपायेन यद्वस्तु साधितं केनचित् कर्त्रेति शेषः । तेनैवोपायेनान्येन कर्त्रा तद्वस्त्वन्यथा क्रियते चेत् स व्याघातोऽलंकार इत्यर्थः । **काकतीयेति** । काकतीयाभिजातः काकतीयकुलोद्भूतो नाभिजातो ब्रह्मा ततोऽधिका स्थितिर्यस्य स तथोक्तः । दोर्भ्यामीश्वरबाहुभ्यां लब्धोदयान् भूपान् राजन्यान् 'बाहू राजन्यः कृतः' इति श्रुतेः । ताभ्यां दोर्भ्यामनुदयानुदयरहितान् सृजान्निति निष्पादकस्य निष्पादितवस्तुव्याहतिहेतुत्वात् व्याघातः । व्याघाते वस्तुसाधनान्यथाकरणयोः क्रमिकत्वात् तत्प्रसङ्गेन पर्यायं लक्षयति । **क्रमेणेति** । एकस्यानेकत्र वर्तनमनेकस्यैकत्र वर्तनं चेति द्विधा पर्यायालंकारः । उभयस्य क्रमिकत्वाद्विशेषसमुच्चययोः क्रमेण व्यवच्छेदः । **दंष्ट्रायामिति** । कुहनाकिटेर्मायावराहस्य

अद्योर्वीपतिशेखरस्य महतः श्रीकाकतीयप्रभो-
र्बाहौ सर्वधुरीणसारमहिते बद्धोत्सवा मेदिनी ॥

अत्रैकस्या मेदिन्याः क्रमादनेकत्र वर्तनम् । द्वितीयः ।

येषां मुखे निजवधूसविधे नृपाणां
शौर्योक्तयः समभवन्नभिमानगर्भाः ।
तेषां प्रतापनृपवीक्षणकातराणां
तत्रैव दीनवचनानि समुद्भवन्ति ॥

सूक्ष्मालंकारः ।

अथ सूक्ष्मालंकारो निरूप्यते ।

असंलक्षितसूक्ष्मार्थप्रकाशः सूक्ष्म उच्यते ।

विदग्धमात्रज्ञेयस्यार्थस्य यत्राकारेङ्गिताभ्यां प्रकाशनं स सूक्ष्मालंकारः । यथा

*गुरुअणसविहम्मि वहू दट्ठूण णरेंदपेसिआं दूई ।
सव्वंगेसु सहासं कत्थूरिविलेवणं कुणइ ॥

---

*गुरुजनसाविधे वधूर्दृष्ट्वा नरेन्द्रप्रेषितां दूतीम् ।
सर्वाङ्गेषु सहासं कस्तूरीविलेपनं करोति ॥

पातालकोकेशितुः फणभृतः शेषस्य । सर्वधुरां वहतीति सर्वधुरीणः । 'खः सर्वधुरात्' इति खप्रत्ययः । विश्वधुरीणेति पाठे अत्रैव 'खः' इति योगविभागात् खप्रत्ययः । एकस्यानेकत्र वर्तनं योजयति । **अत्रेति । येषामिति** । निजवधूसाविधे योषिन्मध्ये । अभिमानगर्भा गर्वगुम्फिताः । तत्रैव मुखे दीनवचनानि त्रायस्वेत्यादिवाक्यानि समुद्भवन्ति । अत्रैकस्मिन् मुखे शौर्योक्तीनां दीनवचनानां च क्रमेण वृत्तिः एकत्रानेकवृत्तिप्रसङ्गेनैकस्य संलक्षितत्वासंलक्षितत्वसंबन्धात् पर्यायानन्तरं सूक्ष्मं लक्षयति । **असंलक्षितेति** । असंलक्षितस्य स्थूलबुद्धीनामसंवेद्यस्य सूक्ष्मस्येङ्गिताकाराभ्यां तीक्ष्णबुद्धिसंवेद्यस्यार्थस्य प्रकाशो विदग्धं प्रति प्रकाशनं यत्र स सूक्ष्मालंकार इत्यर्थः । **विदग्धेति** । इङ्गिताकारयोर्लक्षणमाह चक्रवर्ती । 'आकृतिव्याञ्जिव्याचष्टे । ताश्चेष्टा इङ्गितं बुद्धिकारिताः । आकारः पुनराम्नातस्ता एवाबुद्धिकारिताः ॥' तथा 'तारापुटभ्रूदृष्ट्यादेर्विकारानिङ्गितं विदुः । आकारः सत्त्वजा भावा आद्या बुद्ध्यापरेऽन्यथा ॥' इति । उदाहरति । **गुर्विति** । अत्र दूत्याः संकेतसमयजिज्ञासायां तदीयेन भ्रूभङ्गादिनेङ्गितेनोपलभ्य प्रगल्भवध्वा रात्रिसमयः संके-

अत्र कस्तूरीविलेपनेन तिमिरसमयः संकेतकाल इति प्रकाशितम्। अथोदात्तालंकारः कथ्यते । तस्यापि लोकन्यायमूलतैवानन्तर्यकारणम् ।

उदात्तालंकारः।

तदुदात्तं भवेद्यत्र समृद्धं वस्तु वर्ण्यते ।

यत्र महासमृद्धिशालिनो वस्तुनो वर्णनं क्रियते तत्रोदात्तालंकारः। यथा

रम्यामेकशिलाभिधाननगरीमासेदिवांसो बुधाः
सौवर्णेषु गृहेषु रत्नरचितद्वास्तोरणेषु स्थिताः।
आरुह्याङ्गणमेदिनीषु कलभान् क्रीडोत्सुकानर्भकान्
मोदन्ते यदवेक्ष्य रुद्रनृपतेस्तत्त्यागलीलायितम् ॥

तकाल इति कस्तूरीविलेपनेन प्रकाश्यते । 'वक्त्रस्यन्दिस्वेद बिन्दुप्रबन्धैर्दृष्ट्वा भिन्नं कुङ्कुमं कापि कण्ठे । पुंस्त्वं तन्व्या व्यञ्जयन्ती वयस्या स्मित्वा पाणौ खड्गलेखां लिलेख ॥' इत्यत्र स्वेदबिन्दुनिमित्तकुङ्कुमभेदलक्षणाकारसूचितं पुरुषायितं पाणौ कृपाणलेखनेन पुरुषैकयोग्येन प्रकाश्यत इत्याकारनिबन्धनः सूक्ष्मः। उदात्तमाह । **अथेति** । तस्य संगतिमाह । **तस्येति** । लक्षणमाह । **तदिति** । व्याचष्टे । **यत्रेति** । महासमृद्धिशालिनः कविप्रतिभाप्राप्तैश्वर्यशालिन इत्यलौकिकत्वकथनादलंकारत्वमिति । **रम्यामिति** । आसेदिवांसः प्राप्ताः । कलभान् बालगजान् । मोदन्त इति यत् तत् त्यागलीलायितं त्यागलीला । लोहितादिक्यषन्तात् भावे क्तः । अङ्गभूतमहापुरुषचरितं चोदात्तम् । यथा । 'तदिदमरण्यं यस्मिन् दशरथवचनानुपालनव्यसनी । निवसन् बाहुसहायश्चकार रक्षःक्षयं रामः ॥' अत्रारण्ये वर्णनीये रामचरितमङ्गत्वेन वर्णितमिति मतान्तरानुसारेण सर्वस्वकारः। तथा हि यत्र रसादयो वाक्यार्थीभूतास्तत्र रसवदादयोऽलंकारा इत्यलंकारमात्ररसिका भामहादयः। तन्मते यथा वाक्यार्थीभावादङ्गभूतो रसादिः तथाङ्गभूतमहापुरुषचरितवर्णनात्मको द्वितीयोदात्त उपपद्यते। ध्वनिदर्शने तु काव्यात्मनो रसादेः प्राधान्यदशायामलंकार्यत्वादलंकारभावो नोपपद्यते। तदुक्तं ध्वन्याचार्यैः। 'रसभावतदाभासभावशान्त्यादिरक्रमः। ध्वनेरात्माङ्गिभावेन भासमानो व्यवस्थितः ॥' इति । यत्र रसस्वरूपे वस्तुमात्रेऽलंकारतायोग्ये वाक्यार्थीभावेन प्रधानेऽङ्गभूता रसादयस्तत्र रसवदाद्यलंकारा एव। तदपि तैरेवोक्तम्। 'प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गन्तु रसादयः । काव्ये तस्मिन्नलंकारो रसादिरिति मे मतिः ॥' इति । तदा द्वितीयोदात्तस्य विषय एव नास्तीति सर्वस्वहृदयम् । अत एव ध्वनिदर्शनानुसारी विद्यानाथोऽपि

परिवृत्त्यलंकारः ।

अथ समानन्यायात् परिवृत्तिर्निरूप्यते ।

समन्यूनाधिकानां च यदा विनिमयो भवेत् ।
साकं समाधिकन्यूनैः परिवृत्तिरसौ मता ॥

समन्यूनाधिकानां समाधिकन्यूनैर्विनिमयः परिवृत्तिः । समेन समपरिवृत्तिर्न्यूनेनाधिकपरिवृत्तिरधिकेन न्यूनपरिवृत्तिश्चेति । समेन समपरिवृत्तिर्यथा

सुधारसमुचो वाचो दत्त्वा काकतिभूभुजे ।
अतो लभन्ते कवयः सहस्रं गन्धसिन्धुरान् ॥

अत्र वचसां गन्धसिन्धुराणां च समत्वम् । न्यूनेनाधिकपरिवृत्तिर्यथा

उपायनं गजाश्वादि कृत्वा सर्वेऽपि भूभुजः ।
प्रतापरुद्रदेवस्य लभन्ते सुस्थिरां कृपाम् ॥

अत्र त्यज्यमानादुपायनादेरादीयमानस्य प्रतापरुद्रकृपाविलसितस्यैवाधिक्यम् । अधिकेन न्यूनपरिवृत्तिर्यथा

प्रतापरुद्रेण रणे जिताः प्रत्यर्थिभूभुजः ।
दत्वा भूषां किरातेभ्यो लभन्ते वल्कलादिकम् ॥

अत्र त्यज्यमानादाभरणजातादादीयमानस्य वल्कलादेर्न्यूनत्वम् ।

अथ शृङ्खलान्यायमूलालंकारा निरूप्यन्ते ।

द्वितीयमुदात्तं नाङ्गीचकारेति रहस्यम् । नन्वेवं तर्हि रसवदादयः किमिति नाङ्गीक्रियन्त इति चेन्मैवम् । रसप्रकरण एव तत्स्वरूपनिरूपणात् । किं तूदाहरणमलंकारप्रकरणे भविष्यतीति प्रतिज्ञाय केन वाभिप्रायेणेह नोदाहृतम् । अस्माभिस्तु तत्रैव दिङ्मात्रमुदाहृतमिति नेह पुनः प्रयत्यते । समृद्धिकार्यत्वात् विनिमयस्य तद्रूपां परिवृत्तिमुदात्तानन्तरं निरूपयति । **अथेति** । समानन्यायात् लोकव्यवहाररूपात् । **समेति** । किंचित् दत्वा कस्यचिदादानं विनिमयः । समस्य समेन न्यूनस्याधिकेनाधिकस्य न्यूनेन विनिमय इति त्रेधा परिवृत्तिः । समेन समपरिवृत्तिमुदाहरति । **सुधेति** । अतः काकतीन्द्रात् । गन्धसिन्धुरान् गन्धगजान् । लक्षणमुक्तं नाटके । न्यूनेनाधिकपरिवृत्तिमुदाहरति । **उपायनमिति** । अधिकेन न्यूनपरिवृत्तिमुदाहरति । **प्रतापेति** । अनन्तरालं-

कारणमालालंकारः ।

पूर्वपूर्वं प्रति यदा हेतुः स्यादुत्तरोत्तरम् ।
तदा कारणमालाख्यमलंकरणमुच्यते ॥

यदा पूर्वपूर्वं क्रमेणोत्तरोत्तरं प्रति हेतुतां भजते स कारणमालाख्योऽलंकारः । यथा

विद्यया विनयोत्कर्षो विनयेन गुणार्जनम् ।
गुणैः प्रजानुरागश्च क्रमोऽयं काकतीश्वरे ॥

एकावल्यलंकारः।

यत्रोत्तरोत्तरेषां स्यात् पूर्वं पूर्वं प्रति क्रमात् ।
विशेषणत्वकथनमसावेकावली मता ॥

यत्र पूर्वपूर्वं प्रति क्रमेणोत्तरोत्तरं विशेषणत्वं भजते स एकावल्यलंकारः। यथा

प्रतापरुद्रनगरी सुजनैरुपशोभिता ।
सुजनाः स्फीतविभवैर्विभवाः स्थैर्यशालिनः ॥

एतत्स्थापनेनोदाहरणम् । अपोहनेनापि भवति । यथा

न तद्राज्यं प्रजा यत्र न भवन्त्यूर्जितश्रियः ।
न ताः प्रजाः प्रभुर्यासां न स्वयं काकतीश्वरः ॥

मालादीपकालंकारः।

यदा तु पूर्वपूर्वस्य संभवेदुत्तरोत्तरम् ।
प्रत्युत्कर्षावहत्वं तन्मालादीपकमुच्यते ॥

कारचतुष्टयस्य संगतिमाह । **अथेति** । कारणमालां लक्षयति । **पूर्वपूर्वमिति**। प्रतिशब्दो भिन्नक्रमः । तेन पूर्वपूर्वस्योत्तरोत्तरहेतुत्वे कारणमालेत्यर्थः । तथा व्याचष्टे । **यदेति** । **विद्ययेति** । विद्यादयो विनयादीन् प्रति हेतवः । ईषदेतद्वैपरीत्यादेकावलीं लक्षयति । **यत्रेति** । पूर्वपूर्वं प्रत्युत्तरोत्तरस्य विशेषणत्वं स्थापनेनापोहनेन च द्वैविध्यमनुभवतीत्येकावलीं द्विधा करोति । आद्यमुदाहरति । **प्रतापेति** । अत्र नगर्यादेः पूर्वपूर्वस्य सुजनाद्युत्तरोत्तरं स्थापनेन विशेषणत्वं भजते । द्वितीयमुदाहरति । **न तद्राज्यमिति** । अत्र राज्यादेः पूर्वपूर्वस्य प्रजाद्युत्तरोत्तरमपोहनेन विशेषणत्वं भजते । पूर्वपूर्वं प्रत्युत्तरोत्तरस्योत्कर्षहेतुत्वेनैकावलीमुक्त्वोत्तरोत्तरं प्रति पूर्वपूर्वस्योत्कर्षहेतुत्वे मालादीपकमाह। **यदेति**।

यत्र पूर्वपूर्वस्योत्तरोत्तरगुणावहत्वं स मालादीपकालंकारः । यथा

भाग्यभूमा महीं प्राप्तः काकतीन्द्रभुजं मही ।
भुजः प्रतापमतुलं प्रतापश्च जगत्त्रयम् ॥

सारालंकारः ।

उत्तरोत्तरमुत्कर्षः सारालंकार उच्यते ।

यथा

जगत्सु वसुधा भाति तस्यामेकशिलापुरी ।
काकतीयान्वयस्तत्र तस्मिन् रुद्रनरेश्वरः ॥

सकलभुवनसारभूतं प्रतापरुद्रं विषयीकुर्वतश्चिरादस्यालंकारस्य सार इत्यन्वर्थाभिधानम् ।

इति श्रीविद्यानाथकृतौ प्रतापरुद्रयशोभूषणेऽलंकारशास्त्रेऽर्थालंकारप्रकरणं समाप्तम् ।

भाग्येति । अत्र भाग्यातिशयादिभिर्मह्यादीनामुत्कर्षः क्रमेण विधीयते । परिशेषात् सारं लक्षयति । **उत्तरोत्तरमिति** । **जगत्स्विति** । अत्र जगदपेक्षया वसुधाया उत्कर्षः । तदपेक्षया एकशिलाया इत्यादिक्रमेणोत्कर्षो रुद्रनरेश्वरे विश्राम्यति ।

इति पदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलचलमल्लिनाथसूरिसूनुना विश्वजनीनविद्यस्य विद्वन्मणेः पेद्दयार्यस्यानुजेन कुमारस्वामिसोमपीथिना विरचिते प्रतापरुद्रीयव्याख्याने रत्नापणाख्याने अर्थालङ्कारनिरूपणं नाम अष्टमं प्रकरणम् ॥

॥ अथ मिश्रालंकारप्रकरणम् ॥

अथ संसृष्टिसंकरौ निरूप्येते । यथा लौकिकानामलंकाराणां हिरण्मयानां मणिमयानां च पृथक् सौन्दर्यहेतूनामन्योन्यसंबन्धेन चारुत्वातिशयो दृश्यते तथैव काव्यालंकाराणां रूपकादीनां मिथः संबन्धेन सौन्दर्यातिशयः प्रतीयते । स च संबन्धो द्विविधः । संयोगरूपः समवायरूपश्चेति । संयोगे मिश्रतिलतण्डुलन्यायः । समवाये मिश्रक्षीरनीरन्यायः । तिलतण्डुलन्यायेन संबन्धे संसृष्टिः। क्षीरनीरन्यायेन संबन्धे संकरः । अनयोः पृथक्चारुत्वातिशयहेतुत्वादलंकारधुरन्धरत्वम् । न तु पूर्वोक्तालंकारशेषता । तत्र प्रथमं संसृष्टिर्निगद्यते ।

संसृष्टिः ।

तिलतण्डुलसंश्लेषन्यायाद्यत्र परस्परम् ।
संश्लिष्येयुरलंकाराः सा संसृष्टिर्निगद्यते ॥

यत्र तिलतण्डुलन्यायेन परस्परसंबद्धा रूपकादयो भवन्ति सा संसृष्टिः। सा त्रिविधा । शब्दालंकारगतत्वेनार्थालंकारगतत्वेनोभयालंकारगतत्वेन च । शब्दालंकारसंसृष्टिर्यथा

शुम्भत्संभ्रमगन्धसिन्धुरधुरानिर्दारितोर्वीतला-
स्त्वङ्गत्तुङ्गतुरङ्गमप्रतिभया द्राक्स्यन्दनस्यन्दनाः ।

एकैकालंकारानिरूपणानन्तरं मिश्रालंकारानिरूपणं प्रतिजानीते । **अथेति**। उक्तानामलंकाराणां क्वचित् सहभावे किं पार्थक्येन पर्यवसानमुतालंकारान्तरत्वमिति विचार्य लौकिकालंकारन्यायेनालंकारान्तरत्वं सिद्धान्तयति । **यथेति** । हिरण्मयानां सौवर्णानाम् । 'दाण्डिनायन' आदिसूत्रेण निपातनात् साधुः । पृथङ् मिथः संबन्धाभावेऽपि सौन्दर्यहेतूनां मिथः संबन्धे चारुत्वातिशयस्तथैव रूपकादीनामित्यर्थः । सौन्दर्यातिशयहेतोस्संबन्धस्य द्वैविध्यमाह । **स चेति** । उत्कटभेदः संयोगरूपः । अनुत्कटभेदः समवायरूप इत्यर्थः । आद्ये तिलतण्डुलन्यायेन संसृष्टिः । द्वितीये क्षीरनीरन्यायेन संकरः । अनयोः पृथगुपादानं न पूर्वशेषत्वमित्यर्थः । तत्र प्रथमसुत्कटभेदानिबन्धनां संसृष्टिं लक्षयति । **तिलेति** । तस्यास्त्रेधा विभागमाह । **सेति** । शब्दालंकारसंसृष्टिमुदाहरति । **शुम्भदिति**।

तीव्रारम्भसमुद्यदुद्भटभटाटोपस्फुरद्दिक्तटा
निःसीमाः प्रसरन्ति रुद्रनृपतेर्जैत्रप्रयाणोद्यमाः ॥

अत्रच्छेकानुप्रासवृत्त्यनुप्रासयोः संसृष्टिः । अर्थालंकारसंसृष्टिर्यथा

काकतीन्द्रचमूर्धत्ते महिमानमुदन्वतः ।
ग्रसते या द्विषद्भूपध्वजिनीस्तटिनीरिव ॥

अत्र निदर्शनोपमयोः संसृष्टिः । उभयसंसृष्टिर्यथा

प्रतापरुद्रदोर्दण्डो मण्डलाग्रेण मण्डितः ।
दृश्यते समरे वीरैरुत्फणः फणवानिव ॥

अत्र वृत्त्यनुप्रासोपमयोः संसृष्टिः । अथ संकरो निरूप्यते ।

सङ्करः ।

क्षीरनीरनयाद्यत्र संबन्धः स्यात् परस्परम् ।
अलंकृतीनामेतासां संकरः स उदाहृतः ॥

यत्र क्षीरनीरन्यायेनालंकाराणां मिथः संबन्धो भवति स संकरः । तस्याङ्गाङ्गिभावेन संदेहेनैकवाचकानुप्रवेशेन च त्रैविध्यम् । तत्राङ्गाङ्गिभावसंकरो यथा

उद्यद्बृंहितगर्जितैर्द्विपघटाकादम्बिनीसंभ्रमैः
क्षोणीभृत्कटकोपरोधपटुभिः प्रावृड्विहारा इव ।
शत्रुस्त्रीबहुलाश्रुवृष्टिशमितक्ष्माचक्रतापोदया
यात्राः काकतिवल्लभस्य जगतामानन्दमातन्वते ॥

शुम्भत्संभ्रमा दीप्यमानसंरम्भा ये गन्धसिन्धुरा गन्धगजाः तद्धुरया तद्भारेण निर्दारितं निर्भिन्नमुर्वीतलं येषु तथोक्ताः । त्वङ्गद्भिः प्लवमानैस्तुङ्गतुरङ्गमैः प्रतिभया भयंकराः द्राक्स्यन्दना शीघ्रधावनाः स्यन्दना रथा येषु ते तथोक्ताः । अत्र धुरधुरा भटभटेत्यत्र च्छेकानुप्रासोऽन्यत्र वृत्त्यनुप्रासश्च संसृज्यते । अर्थालंकारसंसृष्टिमुदाहरति । **काकतीन्द्रेति** । उदन्वतो महिमानं धत्त इत्यत्रासंभवद्धर्मयोगेन प्रतिबिम्बकरणाक्षेपान्निदर्शना । तस्यास्तटिनीरिवेत्युपमायाश्च परस्परनैरपेक्ष्यात् संसृष्टिः । उभयसंसृष्टिमुदाहरति । **प्रतापेति** । संकरं लक्षयति । **क्षीरेति** । यत्रालंकाराणां क्षीरनीरन्यायादनुत्कटभेदः संबन्धः स सङ्कर इत्यर्थः । तस्य त्रेधा विभागमाह । **तस्येति** । क्रमेणोदाहरति । **उद्यदिति** । क्षोणीभृत्कटकानां वैरिभूपालराजधानीनामन्यत्र पर्वतनितम्बानामुपरोधपटुभिर्निरोधनसमर्थैः । 'कटकं वलये सानौ राजधानीनितम्बयोः' इति विश्वः । शत्रुस्त्री

अत्र यात्राः प्रावृड्विहारा इवेत्युपमालंकारेण द्विपघटाकादम्बिनीत्यत्रोपमा प्रसाध्यत इति सजातीययोरङ्गाङ्गिभावः। कादाम्बिनीव द्विपघटेति समासाश्रयणात् क्षोणीभृत्कटकोपरोधेत्यत्र श्लेषमूलातिशयोक्तिः। विजातीयसंकरो यथा

प्रतापरुद्रस्य कृपाणधारा प्रत्यर्थिफालेषु पतन्त्यमन्दम्।
प्रक्षालनायेव कृतस्य धात्रा तद्वर्तिनो दुर्लिपिकल्मषस्य ॥

अत्र प्रक्षालनायेवेत्युत्प्रेक्षया दुर्लिपिकल्मषस्येत्यत्र रूपकं प्रसाध्यत इति विजातीययोरङ्गाङ्गिभावः। एकवाचकानुप्रविष्टसंकरो यथा

विजितारिपुरो मूर्तौ विलसत्सर्वमङ्गलः।
भुवि शंभुरिवाभाति कायतीयनरेश्वरः ॥

अत्र विजितारिपुर इत्यर्थसाम्यादुपमा विलसत्सर्वमङ्गल इति शब्दसाम्यात् श्लेषश्च शम्भुरिवेत्येकस्मिन्निवशब्देऽनुप्रविष्टौ। संदेह-

---

बहुलाश्रुवृष्ट्येव शमितः क्ष्माचक्रतापोदयो भूमण्डलसंतापातिशयो यासु तास्तथोक्ताः। दुष्टनिग्रहेण भूभारोऽवतरतीति भावः। सजातीयसङ्करं योजयति। **अत्रेति। उपमा प्रसाध्यत इति**। रूपकत्वे द्विपघटारूपविषयस्थगने कादम्बिनीरूपोपमानस्य सविशेषणत्वं नोपमेयस्य। अतोऽधिकोपमं नाम दोषः स्यात्। तस्मादुपमा प्रसाध्यत इति भावः। यात्राः प्रावृड्विहारा इवेत्यस्या अनुग्राह्यत्वादङ्गित्वम्। द्विपघटाकादम्बिनीत्यस्या अनुग्राहकत्वादङ्गत्वम्। अतोऽनयोरङ्गाङ्गिभावेन सङ्करः। अङ्गिनोः अन्योन्यं चमत्कारहेतुत्वान्मिश्रणेति रामणीयकं द्रष्टव्यम्। तर्हि द्विपघटाकादम्बिनीत्यत्र केन समासेनोपमालाभ इत्याकाङ्क्षायामाह। **कादम्बिनीव द्विपघटेति**। 'उपमितं व्याघ्रादिभिः' इति समासः। अभ्युच्चयमाह। **क्षोणीभृदिति**। क्षोणीभृत्कटकशब्देन शत्रुराजधानीपर्वतानितम्बयोरभिधानाच्छ्लेषः। उभयोरभेदाध्यवसायात् श्लेषमूलातिशयोक्तिरित्यर्थः। इयं च द्विपघटाकादम्बिनीत्यत्रोपमाया अङ्गं तेनातिशयोक्त्यनुगृहीतया तया यात्राः प्रावृड्विहारा इवेत्युपमानुग्राह्यत इति फलितम्। विजातीयसंकरमुदाहरति। **प्रतापेति**। कृपाणस्य धारा कोटिरुदकधारा च। अमन्दमनल्पम्। तद्वर्तिनः प्रत्यर्थिफालवर्तिनो दुर्लिपिरेव कल्मषं पङ्कं तस्य क्षालनायेवेति फलोत्प्रेक्षा। अत्र क्षालनयोग्यस्य कल्मषस्य प्राधान्यं रूपकेणैव लभ्यते नान्यथेत्युत्प्रेक्षया रूपकं प्रसाध्यत इति रूपकोत्प्रेक्षयोर्विजातीययोरन्योन्यसापेक्षत्वादङ्गाङ्गिभावेन सङ्करः। एकवाचकानुप्रविष्टं संकरमुदाहरति। **विजितेति**। योजयति। **अत्रेति**। विजितारिपुर इत्यत्र शब्दपरिवृत्तिसहि-

सङ्करो यथा

जातः प्रतापरुद्रेन्दुः काकतीयान्वयाम्बुधौ ।
धत्ते जनचकोराणां प्रसादज्योत्स्नयामृतम् ॥

अत्र काकतीयकुलाम्बुधौ इत्यादौ रूपकोपमयोः संदेहसंकरः । काकतीयान्वय एवाम्बुधिः काकतीयान्वयोऽम्बुधिरिवेति समासद्वयसंभवात् । न चात्र साधकं बाधकं वा प्रमाणमन्यतरस्यास्तीति संदेह एव पर्यवस्यति । साधकबाधकप्रमाणसंभवे तु संदेहनिवृत्तिः । अत्र साधकं यथा

प्रतापरुद्रनृपतेः पारिजातात् समुद्भवाः ।
वतंसयन्ति दिङ्नार्यो मधुराः कीर्तिमञ्जरीः ॥

अत्र कीर्तय एव मञ्जर्य इति रूपकालंकारे वतंसयन्तीति साधकं प्रमाणम् । अवतंसीकरणेनाभेदप्रतीतिः । बाधकं यथा

काकतीन्द्रस्य निःसाणध्वनौ दिक्षु विजृम्भिते ।
व्याकुलीकृतसत्त्वोऽभूत् प्रतिपक्षबलार्णवः ॥

ष्णुत्वादर्थसाम्यम् । विलसत्सर्वमङ्गल इत्यत्र तदभावाच्छब्दसाम्यम् । तावुपमाश्लेषावेकस्मिन्निवशब्देऽनुप्रविष्टौ । तस्योभयोपकारित्वादिति भावः । संदेहसङ्करमुदाहरति । **जात इति** । योजयति । **अत्र कुलाम्बुधावित्यादौ समासद्वयसंभवादिति** । मयूरव्यंसकादीनां चाकृतिगणत्वाद्रूपकोपमितसमासद्वयसंभवादित्यर्थः । नन्वत्रामृतदानस्य चन्द्र एव प्रसिद्धत्वात् प्रतापरुद्र एवेन्दुरिति रूपकमेव नोपमेति चेन्नैवम् । औपचारिकस्यामृतदानस्य प्रतापरुद्रेऽपि संभवात् । उपमाया बाधकाभावात् । तेनात्र रूपकोपमयोः संदेह एव पर्यवस्यतीत्याह । **न चेति** । साधकमनुकूलं बाधकं प्रतिकूलम् । तत्सद्भावे संदेह एव निवर्तत इत्यर्थः । तर्हि कुत्र साधकं कुत्र वा बाधकमित्याकाङ्क्षायां क्रमेण दर्शयति । **प्रतापेति** । प्रतापरुद्रनृपतिरूपात् पारिजातात् । वतंसयन्तीत्यत्र ‘ वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः ’ इत्यकारलोपः । अत्र वतंसीकरणं मञ्जरीष्वेवानुगुणमिति रूपकपरिग्रहे साधकमित्याह । **अत्रेति** । तत्रोपोद्बलकमाह । **वतंसीकरणेनाभेदप्रतीतिरिति** । न पुनरुपमायामिव भेदाभेदप्रतीतिरिति भावः । बाधकं दर्शयति । **काकतीन्द्रस्येति** । दिक्षु निस्साणध्वनौ विजृम्भिते व्याप्ते सति प्रतिपक्षबलमेवार्णवो व्याकुलीकृतानि कलुषीकृतानि सत्त्वान्यन्तःकरणानि प्राणिनश्च यस्य स

अत्र प्रतिपक्षबलार्णव इत्युपमाया व्याकुलीकृतसत्त्व इति बाधकं प्रमाणम् । 'उपमितं व्याघ्रादिभिः सामान्याप्रयोगे' इत्यनुशासनेन सामान्यप्रयोगस्योपमाबाधकत्वात् । अतः पारिशेष्याद्रूपकालंकारः । एवं यथासंभवमन्येषामलंकाराणां संसृष्टिसंकरौ बोद्धव्यौ तत्र तत्र प्रबन्धेषु ।

इति श्रीविद्यानाथमहोपाध्यायकृतौ प्रतापरुद्रयशोभूषणेऽलंकार-
शास्त्रे मिश्रालंकारप्रकरणं समाप्तम् । प्रतापरुद्रीयं
नामालंकारशास्त्रं समाप्तम् ।

तथोक्तः । बाधकं योजयति । **अत्रेति** । प्रतिपक्षबलमर्णव इवेत्युपमितसमासस्य व्याकुलीकृतसत्त्व इति सामान्यप्रयोगस्य बाधकत्वात् परिशेषात् रूपकमेवेत्यर्थः । अलंकारान्तरसंकरसंसृष्टिप्रपञ्चः प्रबन्धान्तरेषु द्रष्टव्य इत्याह । **एवमिति** । विवेकिनामेतावतैवेतरदपि सुबोधमिति विस्तरभीरुभिरस्माभिरुपरम्यत इति सर्वमवदातम् ।

जगति निखिलविद्यासिन्धुमुष्टिंधयानां
परभणितिपरीक्षा युज्यते सज्जनानाम् ।
तदिह मम निबन्धे दूषणं भूषणं वा
भवति यदि विदग्धैस्तद्ध्यवश्यं विमृश्यम् ॥

इति पदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलचलमल्लिनाथ-
सूरिसूनुना विश्वजनीनविद्यस्य विद्वन्मणेः पेद्दयार्यस्यानुजेन
कुमारस्वामिसोमपीथिना विरचिते प्रतापरुद्रीयव्याख्याने
रत्नापणाख्याने मिश्रालंकारनिरूपणं नाम
नवमं प्रकरणम् ॥

Bhawan's Sri Sankaracharya Bharatiya Vidya Mahavidyalaya 605 a

श्रीवालमनोरमा प्रेस् ट्रिप्लिकेन्, मद्रास्.

पूरक-उत्तरपुस्तिका

भारतीय विद्या भवन, बम्बई

शास्त्रीय परीक्षा

परीक्षा नाम ______________________

परीक्षा केन्द्र ______________________

खंड नाम ______________________

परीक्षार्थी क्रमांक (अंकों में) ______________________ अनिवार्य संस्कृत/शास्त्र ______________________

परीक्षार्थी क्रमांक (शब्दों में) ______________________ विभाग / विषय ______________________

प्रश्नपत्र क्रमांक ______________ दिनांक ______________ समय ______________

पूरक–उत्तरपुस्तिका

भारतीय विद्या भवन, बम्बई

शास्त्रीय परीक्षा

परीक्षा नाम ____________________

परीक्षा केन्द्र ____________________

खंड नाम ____________________

परीक्षार्थी क्रमांक (अंकों में) ____________________ अनिवार्य संस्कृत/शास्त्र ____________________

परीक्षार्थी क्रमांक (शब्दों में) ____________________ विभाग / विषय ____________________

प्रश्नपत्र क्रमांक ____________ दिनांक ____________ समय ____________

SUPPLEMENT No.________

BHARATIYA VIDYA BHAVAN

RAJENDRA PRASAD INSTITUTE OF COMMUNICATION & MANAGEMENT

GROUP : ____________ EXAM. REGN. No.____________

SUPPLEMENT No.________

BHARATIYA VIDYA BHAVAN

RAJENDRA PRASAD INSTITUTE OF COMMUNICATION & MANAGEMENT

GROUP :________ EXAM. REGN. No.________

Supplement No.______

BHARATIYA VIDYA BHAVAN

RAJENDRA PRASAD INSTITUTE OF COMMUNICATION & MANAGEMENT

Group :______________ Exam. Regn. No.__________